अक्रमिष्यत्	अक्रमिष्यताम्	अक्रमिष्यन्
अक्रमिष्यः	अक्रमिष्यतम्	अक्रमिष्यत
अक्रमिष्यम्	अक्रमिष्याव	अक्रमिष्याम

अभ्यास

१. मेरे सारे मित्र बाग में टहलते हैं।
मम सर्वाणि मित्राणि उद्याने क्रामन्ति (क्राम्यन्ति)

२. श्री कृष्ण हिमालय की चोटियों पर टहलते थे।
श्री कृष्णः हिमाचलस्य सानुषु चक्राम।

३. हम तो कल मामा के साथ बाग में टहलेंगे।
वयं तु श्वः मातुलेन साकम् उद्याने क्रमितास्मः।

४. वे सब आज किले पर टहलेंगे = ते अद्य दुर्गे क्रमिष्यन्ति।

५. क्या हम दोनों छत पर टहलेंगे = किम् आवां छदिषि क्रामाव (क्राम्याव)

६. मैं कल उसके साथ नहीं टहला अहं ह्यः तेन सह न अक्रामम् (अक्राम्यम्)

७. छात्रों को सवेरे वन में टहलना चाहिए = छात्राः प्रातः वने क्रामेयुः (क्राम्येयुः)

८. आज अतिथि तालाब के किनारे टहले थे = अद्य अतिथयः तडागस्य तटे अक्रमिषुः।

९. यदि तू हमारे साथ टहलता तो मोरों का नृत्य देखता = यदि त्वम् अस्माभिः सह अक्रमिष्यः तर्हि मयूराणां नृत्यम् अद्रक्ष्यः।

१०. इस घने जङ्गल में मत टहल=अस्मिन् गहने वने मा क्रमीः (मा स्म क्रामः/क्राम्यः)

(१८) त्यज् (हानौ)=त्यागना, छोड़ना [परस्मै०]

लट्

त्यजति	त्यजतः	त्यजन्ति
त्यजसि	त्यजथः	त्यजथ
त्यजामि	त्यजावः	त्यजामः

लिट्

तत्याज	तत्यजतुः	तत्यजुः

लुट्

त्यक्ता	त्यक्तारौ	त्यक्तारः
त्यक्तासि	त्यक्तास्थः	त्यक्तास्थ
त्यक्तास्मि	त्यक्तास्वः	त्यक्तास्मः

लृट्

त्यक्ष्यति	त्यक्ष्यतः	त्यक्ष्यन्ति
त्यक्ष्यसि	त्यक्ष्यथः	त्यक्ष्यथ
त्यक्ष्यामि	त्यक्ष्यावः	त्यक्ष्यामः

लोट्

त्यजतु (त्यजतात्)	त्यजताम्	त्यजन्तु
त्यज (त्यजतात्)	त्यजतम्	त्यजत
त्यजानि	त्यजाव	त्यजाम

लङ्

अत्यजत्	अत्यजताम्	अत्यजन्
अत्यजः	अत्यजतम्	अत्यजत
अत्यजम्	अत्यजाव	अत्यजाम

वि० लिङ्

त्यजेत्	त्यजेताम्	त्यजेयुः
त्यजेः	त्यजेतम्	त्यजेत
त्यजेयम्	त्यजेव	त्यजेम

लुङ्

अत्याक्षीत्	अत्याक्ताम्	अत्याक्षुः
अत्याक्षीः	अत्याक्तम्	अत्याक्त
अत्याक्षम्	अत्याक्ष्व	अत्याक्ष्म

लृङ्

अत्यक्ष्यत्	अत्यक्ष्यताम्	अत्यक्ष्यन्
अत्यक्ष्यः	अत्यक्ष्यतम्	अत्यक्ष्यत
अत्यक्ष्यम्	अत्यक्ष्याव	अत्यक्ष्याम

अभ्यास

१. वीर लोग कभी शरणागत का त्याग नहीं करते हैं।
वीराः कदापि शरणागतं न त्यजन्ति।

२. हक़ीकत राय ने धर्म की रक्षा के लिये प्राण त्याग दिये।
हकीकतरायः धर्मस्य रक्षायै प्राणान् तत्याज।

३. यह यजमान कल अपने सब व्यसन छोड़ देगा।
अयं यजमानः श्वः स्वानि सर्वाणि व्यसनानि त्यक्ता।

४. हम आज सायङ्काल झूठ बोलना छोड़ देंगे।
वयम् अद्य सायङ्काले मिथ्याभाषणं त्यक्ष्यामः।

५. हे शिष्यो ! तुम आलस्य को शीघ्र छोड़ दो।
भोः शिष्याः ! यूयं सपदि आलस्यं त्यजत।

६. कल स्वामी शिवानन्द ने पीले कपड़े त्याग दिये।
   ह्यः स्वामी शिवानन्दः पीतानि वस्त्राणि अत्यजत्।
७. हम सब को चोरी छोड़ देनी चाहिए=वयं स्तेयं त्यजेम।
८. इन वानप्रस्थियों ने आज अपने घर त्याग दिये।
   इमे वानप्रस्थाश्रमिणः अद्य स्वानि गेहानि अत्याक्षुः।
९. यदि वे गुड़ त्याग देते तो रसगुल्ले पाते।
   यदि ते गुडम् अत्यक्ष्यन् तर्हि रसगोलान् अलप्स्यन्त (प्राप्स्यन्)।
१०. कभी भी काम के वश में होकर, अथवा भय से अथवा लोभ से धर्म का त्याग न करे='न जातु कामात् न भयात् न लोभात् धर्मं त्यजेत्।
११. हे पुत्र ! सब बुराइयाँ छोड़ दे, पर अच्छाइयाँ मत छोड़।
   हे पुत्र ! विश्वानि दुरितानि त्यज, किन्तु भद्राणि मा त्याक्षीः (मा स्म त्यजः)

(१९) दह् (भस्मीकरणे)=जलाना (परस्मै०)

लृट्, लृङ्, और लुङ् इन तीन लकारों में दह् के दकार को धकार हो जायेगा। क्योंकि वहाँ दह् के तुरन्त बाद स्य अथवा सिच् का स् वर्त्तमान है।[1] लुङ् के रूपों में प्र० द्वि०; म० द्वि० और म० ब० में स् परे न रहने से द् को ध् नहीं होगा।

लट्

दहति	दहतः	दहन्ति
दहसि	दहथः	दहथ
दहामि	दहावः	दहामः

लिट्

ददाह	देहतुः	देहुः

लुट्

दग्धा	दग्धारौ	दग्धारः
दग्धासि	दग्धास्थः	दग्धास्थ
दग्धास्मि	दग्धास्वः	दग्धास्मः

लृट्

धक्ष्यति	धक्ष्यतः	धक्ष्यन्ति
धक्ष्यसि	धक्ष्यथः	धक्ष्यथ
धक्ष्यामि	धक्ष्यावः	धक्ष्यामः

लोट्

दहतु (दहतात्)	दहताम्	दहन्तु
दह (दहतात्)	दहतम्	दहत
दहानि	दहाव	दहाम

लङ्

अदहत्	अदहताम्	अदहन्
अदहः	अदहतम्	अदहत
अदहम्	अदहाव	अदहाम

वि० लिङ्

दहेत्	दहेताम्	दहेयुः
दहेः	दहेतम्	दहेत
दहेयम्	दहेव	दहेम

---

१. एकाचो बशो भष् झषन्तस्य स्ध्वोः। अष्टा० ८.२.३७.

लुङ्			लृङ्		
अधाक्षीत्	अदाग्धाम्	अधाक्षुः	अधक्ष्यत्	अधक्ष्यताम्	अधक्ष्यन्
अधाक्षीः	अदाग्धम्	अदाग्ध	अधक्ष्यः	अधक्ष्यतम्	अधक्ष्यत
अधाक्षम्	अधाक्ष्व	अधाक्ष्म	अधक्ष्यम्	अधक्ष्याव	अधक्ष्याम

अभ्यास

१. यह रसोइया बहुत लकड़ियाँ जलाता है=अयं सूपकारः बहूनि काष्ठानि दहति।

२. हनुमान ने रावण की लङ्का जला दी=हनूमान् रावणस्य लङ्कां ददाह।

३. ये मजदूर कल इस कूड़े के ढेर में आग लगायेंगे।
एते श्रमिकाः श्वः इमम् अवकरराशिं दग्धारः।

४. हम आज इस सूखे पेड़ को जला देंगे=वयम् अद्य इमं शुष्कवृक्षं धक्ष्यामः।

५. विश्वामित्र ने राम और लक्ष्मण को उपदेश दिया—'तुम काम और क्रोध को जला दो'=विश्वामित्रः रामलक्ष्मणौ उपदिदेश—'युवां कामक्रोधौ दहतम्'।

६. हमने तो कल इतनी तीलियाँ जलादीं, तूने तो एक भी नहीं जलाई।
वयं तु ह्यः एतावतीः शलाकाः अदहाम, त्वं तु एकाम् अपि न अदहः।

७. हमें रावण के पुतले को नहीं अपितु अपने पाप को जलाना चाहिये।
वयं रावणस्य प्रतिकृतिं न दहेम प्रत्युत स्वपापं दहेम।

८. तुम दोनों ने आज गोबर के ढेर को क्यों जलाया ?
युवाम् अद्य गोमयनिकायं किमर्थम् अदाग्धम् ?

९. राष्ट्रीय सम्पत्ति को मत जलाओ=राष्ट्रियसम्पत्तिं मा दाग्ध (मा स्म दहत)।

१०. यदि तू मिर्च नहीं जलाता तो खाँसी नहीं होती=यदि त्वं मरिचं न अधक्ष्यः तर्हि कासः न अभविष्यत्।

(२०) शुच् (शोके)=शोक करना (परस्मै०)

लट्			लृट्		
शोचति	शोचतः	शोचन्ति	शोचिष्यति	शोचिष्यतः	शोचिष्यन्ति
शोचसि	शोचथः	शोचथ	शोचिष्यसि	शोचिष्यथः	शोचिष्यथ
शोचामि	शोचावः	शोचामः	शोचिष्यामि	शोचिष्यावः	शोचिष्यामः

लिट्		
शुशोच	शुशुचतुः	शुशुचुः

लुट्			लोट्		
शोचिता	शोचितारौ	शोचितारः	शोचतु (शोचतात्)	शोचताम्	शोचन्तु
शोचितासि	शोचितास्थः	शोचितास्थ	शोच (शोचतात्)	शोचतम्	शोचत
शोचितास्मि	शोचितास्वः	शोचितास्मः	शोचानि	शोचाव	शोचाम

लङ्			लुङ्		
अशोचत्	अशोचताम्	अशोचन्	अशोचीत्	अशोचिष्टाम्	अशोचिषुः
अशोचः	अशोचतम्	अशोचत	अशोचीः	अशोचिष्टम्	अशोचिष्ट
अशोचम्	अशोचाव	अशोचाम	अशोचिषम्	अशोचिष्व	अशोचिष्म
वि० लिङ्			लृङ्		
शोचेत्	शोचेताम्	शोचेयुः	अशोचिष्यत्	अशोचिष्यताम्	अशोचिष्यन्
शोचेः	शोचेतम्	शोचेत	अशोचिष्यः	अशोचिष्यतम्	अशोचिष्यत
शोचेयम्	शोचेव	शोचेम	अशोचिष्यम्	अशोचिष्याव	अशोचिष्याम

अभ्यास

१. मनुष्य जो वस्तु नष्ट हो गई उसे नहीं सोचते=सज्जनाः नष्टं वस्तु न शोचन्ति ।

२. जब सीता को रावण हर ले गया, तब राम ने उसे बहुत सोचा ।
यदा सीतां रावणः जहार, तदा रामः तां भृशं शुशोच ।

३. मैं भविष्य को नहीं सोचूंगा केवल वर्त्तमान को ही सोचता हूं ।
नाहं भविष्यं शोचिष्यामि (शोचितास्मि) केवलं वर्त्तमानं चिन्तयामि ।

४. मेरी औषध खाले मैं तुझे सब रोगों से छुड़ा दूंगा, मत सोच ।
मम औषधं सेवस्व अहं त्वां सर्वरोगेभ्यः मोक्षयिष्यामि मा शोचीः (मा स्म शोचः)

५. यह पड़ोसी कल फूटे घड़े पर शोक कर रहा था ।
अयं प्रतिवेशी ह्यः भग्नं घटम् अशोचत् ।

६. विद्वानों को किसी वस्तु का शोक नहीं करना चाहिये ।
विद्वांसः किमपि वस्तु न शोचेयुः (शोचन्तु) ।

७. जो सम्पत्ति में खुश नहीं होते और विपत्ति में शोक नहीं करते वे संसार में पूजे जाते हैं ।=ये सम्पत्तौ न हृष्यन्ति विपत्तौ च न शोचन्ति ते जगति पूज्यन्ते ।

८. आज वह राजा मर गया, किसी ने शोक नहीं किया ।
अद्य सः नृपः अमृत, कोऽपि तं न अशोचीत् ।

९. यदि मैं धन के विषय में सोचता तो धन इकट्ठा कर लेता, पर मैंने इस विषय में कभी नहीं सोचा ।

यदि अहं धनम् अशोचिष्यं तर्हि बहु उपार्जयिष्यम्, परन्तु अहम् अस्मिन् विषये न कदापि अशोचिषम् ।

अब तक २० धातुओं के प्रायः सभी लकारों में पूरे रूप लिखकर उनके वाक्यों में अभ्यास सिखाये हैं । अब कुछ और परस्मैपदी धातुओं के प्रयोग सिखायेंगे । उनके रूप सरल हैं, अतः उनका निर्देशमात्र करेंगे । शेष रूप पूर्ववत् स्वयं बना लेने चाहियें ।

(२१) रक्ष् (पालने)=रक्षा करना, पालना (परस्मै०)

लट्—रक्षति	रक्षतः	रक्षन्ति	लङ्—अरक्षत्	अरक्षताम्	अरक्षन्
लिट्—ररक्ष	ररक्षतुः	ररक्षुः	वि. लिङ्—रक्षेत्	रक्षेताम्	रक्षेयुः
लुट्—रक्षिता	रक्षितारौ	रक्षितारः	लुङ्—अरक्षीत्	अरक्षिष्टाम्	अरक्षिषुः
लृट्—रक्षिष्यति	रक्षिष्यतः	रक्षिष्यन्ति	लृङ्—अरक्षिष्यत्	अरक्षिष्यताम्	अरक्षिष्यन्
लोट्—रक्षतु (रक्षतात्)	रक्षताम्	रक्षन्तु			

अभ्यास

१. वे बेचारे रात दिन धन की रक्षा करते हैं=ते वराकाः अर्हनिशं धनं रक्षन्ति ।

२. जो रात दिन धन की रक्षा करते हैं और भोग नहीं करते, वे धन के चौकीदार हैं ।
ये नक्तन्दिनं द्रविणं रक्षन्ति न च भुञ्जते ते धनस्य प्रहरिणः सन्ति ।

३. राम ने वन में महर्षियों की रक्षा की=रामः अरण्ये महर्षीन् ररक्ष ।

४. लोग इस आशा से बच्चों को पालते हैं कि वे उनकी बुढ़ापे में रक्षा करेंगे ।
'एते मम पुत्राः वार्द्धक्ये मां रक्षिष्यन्ति (रक्षितारः)' इमाम् आशाम् अवलम्ब्य जनाः पुत्रान् पोषयन्ति ।

५. धनियों को गरीबों की रक्षा करनी चाहिये=धनिकाः निर्धनान् रक्षेयुः (रक्षन्तु) ।

६. वीरदेव ने कल आततायियों से महिलाओं की रक्षा की ।
वीरदेवः ह्यः आततायिभ्यः महिलाः अरक्षत् ।

७. यदि वह पुलिस वाला उसकी रक्षा न करता तो चोर उसे मार डालते ।
यदि सः राजपुरुषः तं न अरक्षिष्यत् तर्हि चौराः तम् अहनिष्यन् ।

८. आज राम और श्याम ने इन घोड़ियों की रक्षा की ।
अद्य रामश्यामौ एताः वडवाः अरक्षिष्टाम् ।

९. इस पापी की रक्षा मत कर=इमं पापिनं मा रक्षीः (मा स्म रक्षः)

१०. आज हमारी सोने की बारी है, कल हम मकान की रक्षा करेंगे ।
अद्य अस्माकं शायिका अस्ति, श्वः वयं भवनं रक्षितास्मः ।

(२२) वस् (निवासे)=रहना, निवास करना (परस्मै०)

लट्—वसति	वसतः	वसन्ति	लृट्	वत्स्यति	वत्स्यतः	वत्स्यन्ति
				वत्स्यसि	वत्स्यथः	वत्स्यथ
लिट्[1]—उवास	ऊषतुः	ऊषुः		वत्स्यामि	वत्स्यावः	वत्स्यामः
लुट्—वस्ता	वस्तारौ	वस्तारः	लोट्	वसतु (वसतात्)	वसताम्	वसन्तु

---

१ लिट् में प्र० पु० के एकवचन में 'लिट्यभ्यासस्योभयेषाम्' अष्टा.६.१.१७ से तथा द्विवचन-बहुवचन में 'वचिस्वपियजादीनां किति' अष्टा.६.१.१५ से व को उ सम्प्रसारण हो गया ।

लङ्—अवसत्	अवसताम्	अवसन्	अवात्सीः	अवात्तम्	अवात्त
वि. लिङ्—वसेत्	वसेताम्	वसेयुः	अवात्सम्	अवात्स्व	अवात्स्म
लुङ्—अवात्सीत्	अवात्ताम्	आवात्सुः	लृङ्—अवत्स्यत्	अवत्स्यताम्	अवत्स्यन्

अभ्यास

१. तुम सब कहाँ रहते हो ?=यूयं कुत्र वसथ ?

२. कृष्ण सुदामा के साथ पाँच वर्ष सांदीपनि के आश्रम में पढ़ा और दोनों वहीं रहे। कृष्णः सुदाम्ना सह पञ्च वर्षाणि यावत् सान्दीपनेः आश्रमे पपाठ, उभावपि च तस्मिन् एव आश्रमे ऊषतुः।

३. मैं कल अपने गांव में रहूँगा=अहं श्वः स्वग्रामे वस्तास्मि।

४. तू आज कहाँ रहेगा ?=त्वम् अद्य कुत्र वत्स्यसि ?

५. आप कुछ दिन हमारे घर रहिये।
भवन्तः कानिचिद् दिनानि यावद् अस्माकं गृहे वसन्तु (वसेयुः)।

६. बनारस में आप कहाँ रहे थे ?=वाराणस्यां भवन्तः कुत्र अवात्सुः (अवसन्) ?

७. यदि वे दोनों मेरे साथ बनारस में रहते तो संस्कृत बोलते।
यदि तौ मया साकं वाराणस्यां अवत्स्यताम् तर्हि संस्कृतम् अगदिष्यताम्।

८. वे उस, झरोखों से रहित कमरे में न रहें।
ते तस्मिन् निर्गवाक्षे प्रकोष्ठे मा वात्सुः (मा स्म वसन्)।

(२३) तॄ प्लवनसन्तरणयोः (=तैरना, पार करना) (परस्मै०)

ॠकारान्त तॄ धातु के लुट्, लृट् और लृङ् लकारों के रूपों में इट् को विकल्प से दीर्घ होता है[1] अतः इन लकारों में दो दो रूप बनेंगे।

लट्—तरति	तरतः	तरन्ति	वि. लिङ्—तरेत्	तरेताम्	तरेयुः
लिट्—ततार	तेरतुः	तेरुः	लुङ्[2]—अतारीत्	अतारिष्टाम्	अतारिषुः
लुट्—(१) तरिता	तरितारौ	तरितारः	अतारीः	अतारिष्टम्	अतारिष्ट
(२) तरीता	तरीतारौ	तरीतारः	अतारिषम्	अतारिष्व	अतारिष्म
लृट् (१) तरिष्यति	तरिष्यतः	तरिष्यन्ति			
(२) तरीष्यति	तरीष्यतः	तरीष्यन्ति	लृङ् (१) अतरिष्यत्	अतरिष्यताम्	अतरिष्यन्
लोट्—तरतु (तरतात्)	तरताम्	तरन्तु			
लङ्—अतरत्	अतरताम्	अतरन्	(२) अतरीष्यत्	अतरीष्यताम्	अतरीष्यन्

---

१. वृतोवा। अष्टा.७.२.३८.।

२. लुङ् में 'सिचि च परस्मैपदेषु' अष्टा.७.२.४० से दीर्घत्व का निषेध।

अभ्यास

१. धर्मात्मा ही संसार सागर को तरते हैं, बाकी सब बीच सागर में डूबते हैं।
धर्मात्मानः एव संसारसागरं तरन्ति, अन्ये मध्येसागरं निमज्जन्ति।

२. सीता को ढूंढने के लिए हनुमान ने समुद्र को तैरा।
सीताम् अन्वेष्टुं हनूमान् समुद्रं ततार।

३. मैं इस नदी को तैरूंगा।
अहम् इमां नदीं तरितास्मि (तरीतास्मि) तरिष्यामि (तरीष्यामि)।

४. अब सब तालाब को पार करें = अधुना सर्वे तडागं तरन्तु (तरेयुः)।

५. यदि तू इस नदी को तैर जाता तो इनाम पाता।
यदि त्वम् इमाम् आपगाम् अतरिष्यः, तर्हि पारितोषिकम् प्राप्स्यः।

६. उस भयङ्कर नदी को मत तैर।
तां भीषाणां निम्नगां मा तारीः (मा स्म तरः)।

७. तूने तो इस धारा को आज पार किया है, मैंने तो कल ही इसे पार कर लिया था।
त्वं तु इमां धाराम् अद्य अतारीः, अहं तु ह्यः एव एताम् अतरम्।

(२४) स्खल् (सञ्चलने) = फिसलना (परस्मै०)

लट्—	स्खलति	स्खलतः	स्खलन्ति
लिट्—	चस्खाल	चस्खलतुः	चस्खलुः
लुट्—	स्खलिता	स्खलितारौ	स्खलितारः
लृट्—	स्खलिष्यति	स्खलिष्यतः	स्खलिष्यन्ति
लोट्—	स्खलतु (स्खलतात्)	स्खलताम्	स्खलन्तु
लङ्—	अस्खलत्	अस्खलताम्	अस्खलन्
वि० लिङ्—	स्खलेत्	स्खलेताम्	स्खलेयुः
लुङ्[1]—	अस्खालीत्	अस्खालिष्टाम्	अस्खालिषुः
	अस्खालीः	अस्खालिष्टम्	अस्खालिष्ट
	अस्खालिषम्	अस्खालिष्व	अस्खालिष्म
लृङ्—	अस्खलिष्यत्	अस्खलिष्यताम्	अस्खलिष्यन्

अभ्यास

१. मनुष्य बार बार फिसलते हैं, किन्तु फिसल के संभलना अच्छी बात है।
मनुष्याः मुहुर्मुहुः स्खलन्ति, किन्तु स्खलित्वा समुत्थानं वरम्।

---

१ अतो ल्रान्तस्य (अष्टा.७.२.२) से नित्य वृद्धि।

२. पहिले जब लोग धर्म से फिसलते थे, तो प्रायश्चित्त करते थे, अब कोई परवाह नहीं करता।

पुरा यदा मनुष्याः धर्मात् चस्खलुः (अस्खलिषुः, अस्खलन्) तदा प्रायश्चित्तं चक्रुः (अकार्षुः, अकुर्वन्), इदानीं स्खलनम् उपेक्षन्ते।

३. देखिये, फिसल मत जाना, रास्ता फिसलने वाला है।

अवधत्स्व मा स्खालीः (मा स्म स्खलः), पिच्छिलः पन्थाः।

४. कल यहाँ यात्री फिसल गये थे, आज पत्थर लगा दिये, अब कोई नहीं फिसला।

ह्यः अत्र यात्रिणः अस्खलन्, अद्य पाषाणाः स्थापिताः, इदानीं कोऽपि न अस्खालीत्।

(२५) हस् (हसे) हसने=हँसना [परस्मै०]

लट्—हसति	हसतिः	हसन्ति	वि० लिङ्—हसेत्	हसेताम्	हसेयुः
लिट्—जहास	जहसतुः	जहसुः	लुङ्[1]—अहसीत्	अहसिष्टाम्	अहसिषुः
लुट्—हसिता	हसितारौ	हसितारः	अहसीः	अहसिष्टम्	अहसिष्ट
लृट्—हसिष्यति	हसिष्यतः	हसिष्यन्ति	अहसिषम्	अहसिष्व	अहसिष्म
लोट्—हसतु(हसतात्)	हसताम्	हसन्तु	लृङ्—अहसिष्यत्	अहसिष्यताम्	अहसिष्यन्
लङ्—अहसत्	अहसताम्	अहसन्			

अभ्यास

१. जो सदा हंसते हैं, उनके पास सब लोग आते हैं; जो रोते हैं उनके पास कोई नहीं।

ये सर्वदा हसन्ति तान् जनाः उपसर्पन्ति (अभिनन्दन्ति च), ये रुदन्ति ते न कस्मै चिदपि रोचन्ते।

२. अष्टावक्र को देखकर जनक राजा के सब सभासद् हंसने लगे।

अष्टावक्रम् अवलोक्य जनकस्य राज्ञः समे सभासदः जहसुः (अहसिषुः, अहसन्)।

३. गरीबों को देखकर मत हंसो=विलोक्य निर्धनान् मा हसिष्ट (मा स्म हसत)।

४. जो किसी की बुरी अवस्था पर हंसते हैं, उन पर ईश्वर प्रसन्न नहीं होता।

ये कस्यचिद् दुरवस्थां हसन्ति, तेषु ईश्वरः न प्रसीदति।

५. हम विपत्ति में भी हंसेंगे=वयं विपत्तौ अपि हसितास्मः (हसिष्यामः)।

६. प्रतिदिन हंसो, स्वस्थ रहोगे=प्रत्यहं हसत (हसेत), स्वास्थ्यं प्राप्स्यथ।

---

१. हस् धातु एदित् (=जिसके उपदेशावस्था के अन्तिम एकार की इत्संज्ञा और लोप हुआ) है अतः लुङ् में 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' अष्टा. ७.२.५. से वृद्धि का निषेध हुआ।

७. भगवान् करे तुम सदा हंसते रहो=ईशकृपया यूयं सदा हसेत (हसत)।

८. यदि तुम सभा में न हंसते तो अध्यक्ष तुम पर क्रुद्ध नहीं होता।
यदि त्वं सभायां न अहसिष्यः तर्हि अध्यक्षः तुभ्यं न अक्रोत्स्यत्।

(२६) क्रीड् (क्रीड़्) विहारे=खेलना [परस्मै०]

लट्—क्रीडति	क्रीडतः	क्रीडन्ति	लङ्—अक्रीडत्	अक्रीडताम्	अक्रीडन्
क्रीडसि	क्रीडथः	क्रीडथ	वि० लिङ्—क्रीडेत्	क्रीडेताम्	क्रीडेयुः
क्रीडामि	क्रीडावः	क्रीडामः	लुङ्—अक्रीडीत्	अक्रीडिष्टाम्	अक्रीडिषुः
लिट्—चिक्रीड	चिक्रीडतुः	चिक्रीडुः	अक्रीडीः	अक्रीडिष्टम्	अक्रीडिष्ट
लुट्—क्रीडिता	क्रीडितारौ	क्रीडितारः	अक्रीडिषम्	अक्रीडिष्व	अक्रीडिष्म
लृट्—क्रीडिष्यति	क्रीडिष्यतः	क्रीडिष्यन्ति	लृङ्—अक्रीडिष्यत्	अक्रीडिष्यताम्	अक्रीडिष्यन्
लोट्—क्रीडतु(क्रीडतात्)	क्रीडताम्	क्रीडन्तु			

अभ्यास

१. छोटे ब्रह्मचारी मैदान में खेलते हैं=लघवः ब्रह्मचारिणः क्रीडाङ्गने क्रीडन्ति।

२. पाण्डव और कौरव एक साथ खेलते थे।
पाण्डवाः कौरवाश्च सम्मिल्य चिक्रीडुः (अक्रीडन्, अक्रीडिषुः)।

३. तेरा मित्र तो बम्बई चला गया, तू कल किसके साथ खेलेगा?
तव मित्रं तु मुम्बापुरीं गतं, त्वं श्वः केन सह क्रीडितासि?

४. हम तो आज बाग में गेंद से खेलेंगे।
वयं तु अद्य उपवने कन्दुकेन क्रीडिष्यामः।

५. मैं बरामदे में किसके साथ खेलूं?=अहं प्रघाणे केन सह क्रीडानि?

६. स्कूल से आकर सब को खेलना चाहिये।=विद्यालयात् आगत्य सर्वे क्रीडेयुः।

७. दुष्ट लड़कों के साथ मत खेलना=दुष्टैः बालकैः सह मा क्रीडीः (मा स्म क्रीडः)।

८. यदि तू सब खेल खेलता, तो रूस देश जाता।
यदि त्वं सर्वाः क्रीडाः अक्रीडिष्यः, तर्हि रूसदेशम् अगमिष्यः।

(२७) तप (सन्तापे)=तप करना [परस्मै०]

लट्—तपति	तपतः	तपन्ति	वि० लिङ्—तपेत्	तपेताम्	तपेयुः
लिट्—तताप	तेपतुः	तेपुः	लुङ्—अताप्सीत्	अताप्ताम्	अताप्सुः
लुट्—तप्ता	तप्तारौ	तप्तारः	अताप्सीः	अताप्तम्	अताप्त
लृट्—तप्स्यति	तप्स्यतः	तप्स्यन्ति	अताप्सम्	अताप्स्व	अताप्स्म
लोट्—तपतु(तपतात्)	तपताम्	तपन्तु			
लङ्—अतपत्	अतपताम्	अतपन्	लृङ्—अतप्स्यत्	अतप्स्यताम्	अतप्स्यन्

अभ्यास

१. जो तप करते हैं, वे ही सुखी होते हैं = ये तपः तपन्ति ते एव सुखिनः भवन्ति ।

२. जिन्होंने पूर्वजन्म में तप किया, वे आज मन्त्री बने बैठे, हैं भगतसिंह जैसे तप करके मर गये ।

ये पूर्वजन्मनि तपः तेपुः (अताप्सुः, अतपन्) ते अद्य मन्त्रिपदं भजन्ति, भगतसिंह-सदृशाः तपन्तः मृत्युम् प्रापन् ।

३. तप करो, तप का फल उत्तम होता है = तपत (तपेत), तपसः फलं श्रेष्ठं भवति ।

४. हम विद्या के लिये तप करेंगे = वयं विद्यायै तप्स्यामः (तप्तास्मः) ।

५. मैंने बचपन में बहुत तप किया, इसलिये थोड़ा सा पढ़ लिया ।
अहं बाल्ये भृशम् अतपम् (अताप्सम्), अतः किञ्चित् अपठम् (अपठिषम्) ।

६. यदि आप लोग तप करते तो व्याकरण जान लेते ।
यदि भवन्तः अतप्स्यन् तर्हि व्याकरणम् अवापमिष्यन् ।

७. लोगों को दिखाने के लिये तप मत कर ।
लोकान् दर्शयितुं मा ताप्सीः (मा स्म तपः) ।

८. पार्वती ने तप किया, इसलिये शिव जैसा पति पाया ।
पार्वती तपः तताप अतएव शिवसदृशं भर्तारम् अलभत । (लेभे)

९. उस दढ़ियल ने कल पाँच अग्नियों के बीच तप किया ।
सः जटिलः ह्यः पञ्चाग्नीनां मध्ये तपः अतपत् ।

अब हम तुम्हें आत्मनेपदी धातुओं के रूप समझाते हैं । त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि और महिङ् इन नौ प्रत्ययों का नाम आत्मनेपद है । किसी भी शब्द के अन्तिम अच् (=स्वर) को [और उसके बाद कोई व्यञ्जन (=हल्) अक्षर आ जावे तो उस व्यञ्जन सहित स्वर को] व्याकरण में 'टि' कहते हैं ।[1] जैसे 'राम' शब्द में 'अ' टि । 'शरद्' शब्द में 'अद्' टि इत्यादि । आत्मनेपदी धातुओं के रूपों में जो आमनेपद प्रत्यय लगाते हैं उनके 'टि' भाग को [जैसे 'त' के अ को, 'आताम्' के आम् को] टित् लकारों में (=लट्, लिट्, लुट्, लृट् आदि में) 'ए' आदेश हो जाता है[2] । ङित् लकारों में (=लङ् आदि में) ऐसा नहीं होता ।

---

१. 'अचोऽन्त्यादि टि' अष्टा. १.१.६४.

२. टित आत्मनेपदानां टेरे ॥ अष्टा. ३.४.७९.

(२८) मुद् (हर्षे)=प्रसन्न होना (आत्मनेपदी)

लट्			लङ्		
मोदते	मोदेते	मोदन्ते	अमोदत	अमोदेताम्	अमोदन्त
मोदसे	मोदेथे	मोदध्वे	अमोदथाः	अमोदेथाम्	अमोदध्वम्
मोदे	मोदावहे	मोदामहे	अमोदे	अमोदावहि	अमोदामहि

लिट्			वि० लिङ्		
मुमुदे	मुमुदाते	मुमुदिरे	मोदेत	मोदेयाताम्	मोदेरन्
			मोदेथाः	मोदेयाथाम्	मोदेध्वम्
			मोदेय	मोदेवहि	मोदेमहि

लुट्		
मोदिता	मोदितारौ	मोदितारः
मोदितासे	मोदितासाथे	मोदिताध्वे
मोदिताहे	मोदितास्वहे	मोदितास्महे

लुङ्		
अमोदिष्ट	अमोदिषाताम्	अमोदिषत
अमोदिष्ठाः	अमोदिषाथाम्	अमोदिढ्वम् / अमोदिद्वम्
अमोदिषि	अमोदिष्वहि	अमोदिष्महि

लृट्		
मोदिष्यते	मोदिष्येते	मोदिष्यन्ते
मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे
मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे

लृङ्		
अमोदिष्यत	अमोदिष्येताम्	अमोदिष्यन्त
अमोदिष्यथाः	अमोदिष्येथाम्	अमोदिष्यध्वम्
अमोदिष्ये	अमोदिष्यावहि	अमोदिष्यामहि

लोट्		
मोदताम्	मोदेताम्	मोदन्ताम्
मोदस्व	मोदेथाम्	मोदध्वम्
मोदै	मोदावहै	मोदामहै

अभ्यास

१. बच्चे लड्डुओं से खुश होते हैं=बालकाः मोदकैः मोदन्ते ।

२. हनुमान को देखकर सीता प्रसन्न हुई=हनुमन्तं दृष्ट्वा सीता मुमुदे ।

३. कल जब मेरा मित्र आयेगा, तब मैं बहुत प्रसन्न होऊँगा ।
श्वः यदा मम मित्रम् आगन्ता तदा अहं भृशं मोदिताहे ।

४. वे सब आज माता पिता को देखकर प्रसन्न होंगे ।
ते अद्य पितरौ दृष्ट्वा मोदिष्यन्ते ।

५. मेरी बातों पर ध्यान न देवें, आप सब प्रसन्न होवें ।
मम वार्त्तासु ध्यानं न यच्छन्तु, भवन्तः मोदन्ताम् ।

६. सूची में अपना नाम देखकर कल तू बहुत प्रसन्न हुआ था ।
सूच्यां स्वं नाम अवलोक्य ह्यः त्वम् अत्यन्तम् अमोदथाः ।

७. इन सबको प्रसन्न होना चाहिये, आज अवकाश है ।
एते मोदेरन्, अद्य अवकाशः अस्ति ।

८. अरे ! अभी से मत प्रसन्न हो, परीक्षाफल आने दे ।
अयि ! इदानीम् मा मोदिष्ठाः (मा स्म मोदथाः), परीक्षाफलम् आगच्छेत् ।

९. अपने मित्र के पत्र को पाकर आज मुझे बहुत प्रसन्ता हुई ।
स्वस्य मित्रस्य पत्रम् प्राप्य अद्य अहं नितराम् अमोदिषि ।

१०. यदि आप प्रसन्न होते, तो हम सब भी बहुत प्रसन्न होते ।
यदि भवान् अमोदिष्यत तर्हि वयम् अपि सुतराम् अमोदिष्यामहि ।

(२९) यत् (यती) प्रयत्ने=प्रयत्न करना [आत्मनेपदी]

लट्

यतते	यतेते	यतन्ते
यतसे	यतेथे	यतध्वे
यते	यतावहे	यतामहे

लिट्

येते	येताते	येतिरे

लुट्

यतिता	यतितारौ	यतितारः
यतितासे	यतितासाथे	यतिताध्वे
यतिताहे	यतितास्वहे	यतितास्महे

लृट्

यतिष्यते	यतिष्येते	यतिष्यन्ते
यतिष्यसे	यतिष्येथे	यतिष्यध्वे
यतिष्ये	यतिष्यावहे	यतिष्यामहे

लोट्

यतताम्	यतेताम्	यतन्ताम्
यतस्व	यतेथाम्	यतध्वम्
यतै	यतावहै	यतामहै

लङ्

अयतत	अयतेताम्	अयतन्त
अयतथाः	अयतेथाम्	अयतध्वम्
अयते	अयतावहि	अयतामहि

वि० लिङ्

यतेत	यतेयाताम्	यतेरन्
यतेथाः	यतेयाथाम्	यतेध्वम्
यतेय	यतेवहि	यतेमहि

लुङ्

अयतिष्ट	अयतिषाताम्	अयतिषत
अयतिष्ठाः	अयतिषाथाम्	अयतिध्वम्
अयतिषि	अयतिष्वहि	अयतिष्महि

लृङ्

अयतिष्यत	अयतिष्येताम्	अयतिष्यन्त
अयतिष्यथाः	अयतिष्येथाम्	अयतिष्यध्वम्
अयतिष्ये	अयतिष्यावहि	अयतिष्यामहि

अभ्यास

१. सब छात्र परीक्षा में उत्तीर्ण होने का यत्न करते हैं ।
सर्वे छात्राः परीक्षाम् उत्तरीतुं यतन्ते ।

२. भरत ने राम को मनाने का यत्न किया=भरतः रामम् अनुनेतुं येते ।

३. कल मैं वहाँ जाने का प्रयत्न करूँगा=श्वः अहं तत्र गमनाय यतिताहे ।

४. क्या आज तुम सब मेरे पास आने का प्रयत्न करोगे ?
किमद्य यूयं मम समीपम् आगन्तुं यतिष्यध्वे ?

५. मन लगाकर व्याकरण पढ़ने का यत्न करो।
दत्तचित्ताः भूत्वा व्याकरणं पठितुं यतध्वम्।

६. कल मैंने बड़ा यत्न किया, किन्तु सफल नहीं हुआ।
ह्यः अहं नितराम् अयते किन्तु सफलो नैव अभवम्।

७. आप सबको मिलकर यत्न करना चाहिये, कार्य अवश्य होगा।
भवन्तः सङ्गत्य यतेरन् कार्यम् अवश्यं सेत्स्यति।

८. आज तूने मन्त्र याद करने का यत्न नहीं किया।
अद्य त्वं मन्त्रान् स्मर्तुं न अयतिष्ठाः।

९. यदि तू यत्न करता, तो उनको लाने में अवश्य सफल होता।
यदि त्वम् अयतिष्यथाः, तर्हि तान् आनेतुम् अवश्यम् सफलः अभविष्यः।

१०. यह टूट गया है, यत्न मत कर, अब नहीं जुड़ेगा।
इदं भग्नम् अस्ति, मा यतिष्ठाः (मा स्म यतथाः), अधुना न संयोक्ष्यते।

(३०) शकि (=शङ्क्) शङ्कायाम् [शङ्का करना]

जिस धातु के उपदेशावस्था (=मूलपाठ) में वर्त्तमान अन्तिम ह्रस्व इकार का लोप (=इत्सञ्ज्ञा के बाद लोप) हो जाता है, उस धातु के बचे हुए स्वर (=अच्) के बाद न् (=नुम्) अक्षर आ जाता है[1], और फिर उस न् के स्थान पर अनुस्वार आदेश होता है, और उस अनुस्वार के स्थान पर परले व्यञ्जन के अनुसार उस उस वर्ग का पञ्चम अक्षर हो जाता है[2], जैसे शकि→शक्→शन्क्→शंक्→शङ्क्=शङ्क्। यही नियम सर्वत्र इदित् [=उपदेशावस्था में इकारान्त (ह्रयच्)] धातुओं के विषय में ध्यान रखना चाहिये।

	लट्	
शङ्कते	शङ्केते	शङ्कन्ते
शङ्कसे	शङ्केथे	शङ्कध्वे
शङ्के	शङ्कावहे	शङ्कामहे
	लिट्	
शशङ्के	शशङ्काते	शशङ्किरे
	लुट्	
शङ्किता	शङ्कितारौ	शङ्कितारः
शङ्कितासे	शङ्कितासाथे	शङ्किताध्वे
शङ्किताहे	शङ्कितास्वहे	शङ्कितास्महे

	लृट्	
शङ्किष्यते	शङ्किष्येते	शङ्किष्यन्ते
शङ्किष्यसे	शङ्किष्येथे	शङ्किष्यध्वे
शङ्किष्ये	शङ्किष्यावहे	शङ्किष्यामहे
	लोट्	
शङ्कताम्	शङ्केताम्	शङ्कन्ताम्
शङ्कस्व	शङ्केथाम्	शङ्कध्वम्
शङ्कै	शङ्कावहै	शङ्कामहै

१. इदितो नुम् धातोः। अष्टा. ७.१.५८.
२. 'नश्चापदान्तस्य झलि'; 'अनुस्वारस्य ययि परसवर्णः' अष्टा. ८.३.२४., ८.४.५८.

लङ्			लुङ्		
अशङ्कत	अशङ्केताम्	अशङ्कन्त	अशङ्किष्ट	अशङ्किषाताम्	अशङ्किषत
अशङ्कथाः	अशङ्केथाम्	अशङ्कध्वम्	अशङ्किष्ठाः	अशङ्किषाथाम्	अशङ्किध्वम्
अशङ्के	अशङ्कावहि	अशङ्कामहि	अशङ्किषि	अशङ्किष्वहि	अशङ्किष्महि
वि० लिङ्			लृङ्		
शङ्केत	शङ्केयाताम्	शङ्केरन्	अशङ्किष्यत	अशङ्किष्येताम्	अशङ्किष्यन्त
शङ्केथाः	शङ्केयाथाम्	शङ्केध्वम्	अशङ्किष्यथाः	अशङ्किष्येथाम्	अशङ्किष्यध्वम्
शङ्केय	शङ्केवहि	शङ्केमहि	अशङ्किष्ये	अशङ्किष्यावहि	अशङ्किष्यामहि

अभ्यास

१. तू इस कार्य में व्यर्थ ही शङ्का करता है=त्वम् अस्मिन् कर्मणि व्यर्थम् एव शङ्कसे ।

२. रावण को राम के आने की शङ्का नहीं थी=रावणः रामागमनं न शशङ्के ।

३. कल वे ईश्वर की व्यापकता के विषय में शङ्का करेंगे ।
श्वः ते ईश्वरस्य व्यापकतायाः विषये शङ्कितारः ।

४. आज मैं शङ्का करूंगा, तू उत्तर देना=अद्य अहं शङ्किष्ये, त्वम् उत्तरं दास्यसि ।

५. आप शङ्का करें, मैं उत्तर अवश्य दूंगा ।
भवन्तः शङ्कन्ताम्, अहम् अवश्यम् उत्तरिष्यामि ।

६. कल मैंने जिस बात की शङ्का की थी वही हुई ।
ह्यः अहं यां वार्त्ताम् अशङ्के सा एव अभवत् ।

७. तुझे मेरे घर भोजन करने में शङ्का नहीं करनी चाहिये ।
त्वम् मम गृहे भोजनाय न शङ्केथाः ।

८. आज मैंने मानव के चन्द्रमा पर पहुंचने में शङ्का की थी, किन्तु उसने समाधान कर दिया ।
अद्य अहं मानवस्य चन्द्रगमने अशङ्किषि, किन्तु सः समाधानम् अकार्षीत् ।

९. यदि वह सूर्य के घूमने के विषय में शङ्का करता, तो मैं उसे समझा देता ।
यदि सः सूर्यघूर्णने अशङ्किष्यत, तर्हि अहं तम् अबोधयिष्यम् ।

१०. उपासना में शङ्का मत कर=उपासनायां मा शङ्किष्ठाः (मा स्म शङ्कथाः) ।

इसी प्रकार की कुछ अन्य आत्मनेपदी धातुओं के भी अभ्यास करवायेंगे । जहाँ रूप में कोई भेद है वहां तो उस उस लकार के पूरे रूप लिखेंगे, अन्यथा केवल प्रथम पुरुष के ही रूप लिखेंगे ।

(३१) वृत् (वृतु) वर्त्तने [सत्ता=होना, बरतना] आत्मने०

वृत् धातु यद्यपि आत्मनेपदी है तथापि लृट्, लृङ् और लुङ् इन तीन लकारों

में इससे विकल्प से परस्मैपद प्रत्यय भी होते हैं[1] फलतः तीनों लकारों में दो दो रूप बनेंगे। जब परस्मैपद प्रत्यय होंगे तब (लृट्, लृङ् में) इड् आगम भी नहीं होगा[2]। लुङ् में परस्मैपदों के पक्ष में च्लि के स्थान पर अ (=अङ्) होगा[3]। आत्मनेपदों में तो स्(=सिच्) ही रहेगा।

लट्

वर्तते	वर्तेते	वर्तन्ते
वर्तसे	वर्तेथे	वर्तध्वे
वर्ते	वर्तावहे	वर्तामहे

लिट्

ववृते	ववृताते	ववृतिरे

लुट्

वर्तिता	वर्तितारौ	वर्तितारः

लृट्

आत्म.	वर्तिष्यते	वर्तिष्येते	वर्तिष्यन्ते
	वर्तिष्यसे	वर्तिष्येथे	वर्तिष्यध्वे
	वर्तिष्ये	वर्तिष्यावहे	वर्तिष्यामहे
पर.	वर्त्स्यति	वर्त्स्यतः	वर्त्स्यन्ति
	वर्त्स्यसि	वर्त्स्यथः	वर्त्स्यथ
	वर्त्स्यामि	वर्त्स्यावः	वर्त्स्यामः

लोट्

वर्तताम्	वर्तेताम्	वर्तन्ताम्

लङ्

अवर्तत	अवर्तेताम्	अवर्तन्त

वि० लिङ्

वर्तेत	वर्तेयाताम्	वर्तेरन्

लुङ्

आत्म.	अवर्तिष्ट	अवर्तिषाताम्	अवर्तिषत
	अवर्तिष्ठाः	अवर्तिषाथाम्	अवर्तिढ्वम्
	अवर्तिषि	अवर्तिष्वहि	अवर्तिष्महि
पर.	अवृतत्	अवृतताम्	अवृतन्
	अवृतः	अवृततम्	अवृतत
	अवृतम्	अवृताव	अवृताम

लृङ्

(आत्म०)—

अवर्तिष्यत	अवर्तिष्येताम्	अवर्तिष्यन्त
अवर्तिष्यथाः	अवर्तिष्येथाम्	अवर्तिष्यध्वम्
अवर्तिष्ये	अवर्तिष्यावहि	अवर्तिष्यामहि

(परस्मै०)—

अवर्त्स्यत्	अवर्त्स्यताम्	अवर्त्स्यन्
अवर्त्स्यः	अवर्त्स्यतम्	अवर्त्स्यत
अवर्त्स्यम्	अवर्त्स्याव	अवर्त्स्याम

इस धातु का वाक्यों में अभ्यास, उपसर्ग सहित धातुओं के अभ्यास के प्रसङ्ग में करायेंगे।

(३२) वृध् (वृधु) वृद्धौ [=बढ़ना] आत्मने०

वृत् धातु के समान ही वृध् धातु के भी लृट्, लृङ् और लुङ् में आत्मनेपद और परस्मैपद के दो-दो रूप बनेंगे।

---

१. 'द्युद्भ्यो लुङि', 'वृद्भ्यः स्यसनोः'। अष्टा. १.३.९१,९२॥

२. न वृद्भ्यश्चतुर्भ्यः। अष्टा. ७.२.५९॥

३. पुषादिद्युताद्य् लृदितः परस्मैपदेषु। (अष्टा. ३.१.५५)

लट्

वर्धते	वर्धेते	वर्धन्ते

लिट्

ववृधे	ववृधाते	ववृधिरे

लुट्

वर्धिता	वर्धितारौ	वर्धितारः

लृट्

आत्म.	वर्धिष्यते	वर्धिष्येते	वर्धिष्यन्ते
	वर्धिष्यसे	वर्धिष्येथे	वर्धिष्यध्वे
	वर्धिष्ये	वर्धिष्यावहे	वर्धिष्यावहे
पर.	वर्त्स्यति	वर्त्स्यतः	वर्त्स्यन्ति
	वर्त्स्यसि	वर्त्स्यथः	वर्त्स्यथ
	वर्त्स्यामि	वर्त्स्यावः	वर्त्स्यामः

लोट्

वर्धताम्	वर्धेताम्	वर्धन्ताम्

लङ्

अवर्धत	अवर्धेताम्	अवर्धन्त

वि० लिङ्

वर्धेत	वर्धेयाताम्	वर्धेरन्

लुङ्

आत्म.	अवर्धिष्ट	अवर्धिषाताम्	अवर्धिषत
	अवर्धिष्ठाः	अवर्धिषाथाम्	अवर्धिढ्वम्
	अवर्धिषि	अवर्धिष्वहि	अवर्धिष्महि
पर.	अवृधत्	अवृधताम्	अवृधन्
	अवृधः	अवृधतम्	अवृधत
	अवृधम्	अवृधाव	अवृधाम

लृङ्

(आत्मने०)—

अवर्धिष्यत	अवर्धिष्येताम्	अवर्धिष्यन्त
अवर्धिष्यथाः	अवर्धिष्येथाम्	अवर्धिष्यध्वम्
अवर्धिष्ये	अवर्धिष्यावहि	अवर्धिष्यामहि

(परस्मै०)—

अवर्त्स्यत्	अवर्त्स्यताम्	अवर्त्स्यन्
अवर्त्स्यः	अवर्त्स्यतम्	अवर्त्स्यत
अवर्त्स्यम्	अवर्त्स्याव	अवर्त्स्याम

अभ्यास

१. इस लड़के का भार प्रतिदिन बढ़ता है।
अस्य बालकस्य भारः प्रतिदिनं वर्धते।

२. राम के वन जाने पर वन के वृक्ष खूब बढ़े।
वनं गतवति रामे आरण्याः वृक्षाः भृशं ववृधिरे।

३. तुम्हारा वजन इस महीने में बढ़ेगा =तव भारः अस्मिन् मासे वर्धिता।

४. आज खुशी के कारण उसका सेर खून बढ़ जायेगा।
अद्य मोदेन तस्य सेटकं रक्तं वर्द्धिष्यते (वर्त्स्यति)।

५. तुम सब यश के साथ बढ़ो=यूयं यशसा वर्धध्वम्।

६. यह पौधा कल आधा अङ्गुल बढ़ा =अयं क्षुपः ह्यः अर्धाङ्गुलमात्रम् अवर्धत।

७. तुम सबको व्रताभ्यास में भी आगे बढ़ना चाहिये।
यूयं व्रताभ्यासे अपि अग्रं वर्धध्वम्।

८. क्या आज तू दौड़ने में सबसे आगे बढ़ा था ?
किम् अद्य त्वं धावने सर्वेभ्यः अवर्धिष्ठाः।

९. आगे मत बढ़, सिंह का भय है।
मा वर्धिष्ठाः (मा वृधः) मा स्म वर्धथाः, सिंहात् भयम् अस्ति।

१०. यदि वे दोनों आगे बढ़ जाते तो जीत जाते।
यदि तौ अवर्धिष्येताम् तर्हि व्यजेष्येताम्।

(३३) रुच् (दीप्तावभिप्रीतौ च) चमकना, अच्छा लगना [आत्मने०]

रुच् धातु से लुङ् लकार में एक पक्ष में परस्मैपद प्रत्यय भी होंगे[1]।

लट्—रोचते	रोचेते	रोचन्ते
लिट्—रुरुचे	रुरुचाते	रुरुचिरे
लुट्—रोचिता	रोचितारौ	रोचितारः
लृट्—रोचिष्यते	रोचिष्येते	रोचिष्यन्ते
लोट्—रोचताम्	रोचेताम्	रोचन्ताम्
लङ्—अरोचत	अरोचेताम्	अरोचन्त
वि०लिङ्—रोचेत	रोचेयाताम्	रोचेरन्

(आत्म०)— लुङ्

अरोचिष्ट	अरोचिषाताम्	अरोचिषत
अरोचिष्ठाः	अरोचिषाथाम्	अरोचिढ्वम्
अरोचिषि	अरोचिष्वहि	अरोचिष्महि
(पर०) अरुचत्	अरुचताम्	अरुचन्
अरुचः	अरुचतम्	अरुचत
अरुचम्	अरुचाव	अरुचाम

लृङ्

अरोचिष्यत	अरोचिष्येताम्	अरोचिष्यन्त

अभ्यास[2]

१. मुझे वह अच्छा नहीं लगता = मह्यं सः न रोचते।

२. यक्ष को युधिष्ठिर के उत्तर वाक्य बड़े अच्छे लगे।
यक्षाय युधिष्ठिरस्य उत्तरवाक्यानि अत्यन्तं रुरुचिरे।

३. कल उस बाग के आम सबको बहुत अच्छे लगेंगे।
श्वः तस्य उपवनस्य रसालानि सर्वेभ्यः भृशं रोचितारः।

४. क्या सभा में आज मेरी उपस्थिति सबको अच्छी लगेगी ?
किं सभायाम् अद्य मम उपस्थितिः सर्वेभ्यः रोचिष्यते ?

५. इसको पढ़ाई अच्छी लगे, ऐसी ईश्वर से प्रार्थना है।
अस्मै अध्ययनं रोचताम्, इति परमेश्वरं प्रार्थये अहम्।

६. कल तेरी बातें देवेन्द्र को अच्छी नहीं लगीं = ह्यः तव वार्ताः देवेन्द्राय न अरोचन्त।

७. साक्षात्कार में नम्रता से उत्तर देना और सबके मन को भा जाना।
साक्षात्कारे विनयेन उत्तराणि यच्छ सर्वेभ्यश्च रोचस्व।

---

१. द्युद्भ्यो लुङि। अष्टा० १।३।९१

२. रुच् धातु के प्रयोग-वाक्यों में यह ध्यान रखना चाहिये कि जिसको कोई वस्तु अच्छी लगती है उसमें चतुर्थी विभक्ति आती है। [रुच्यर्थानां प्रीयमाणः; चतुर्थी सम्प्रदाने, अष्टा० १।४।३३; २।३।१३] अच्छी लगने वाली वस्तु कर्ता होती है।

८. मेरी समझ में यह घी तुम्हें अच्छा लगना चाहिये ।
मम विचारणायाम् इदं सर्पिः तुभ्यं रोचेत ।
९. आज मुझे भोजन बिल्कुल अच्छा नहीं लगा ।
अद्य मह्यं भोजनं किञ्चिदपि न अरोचिष्ट (अरुचत्)
१०. यदि भोजन सबको अच्छा लगता, तो कोई न उठता ।
यदि भोजनं समेभ्यः अरोचिष्यत, तर्हि कोऽपि न उदस्थास्यत् ।
११. पापी किसी को अच्छा न लगे ।
पापी कस्मैचिदपि मा रोचिष्ट (मा रुचत्, मा स्म रोचत) ।
१२. जन्म से अन्धा होने के कारण मैं अपनी माँ को कभी अच्छा नहीं लगा ।
जन्मना अन्धत्वात् स्वजनन्यै अहं कदापि न अरोचे (अरुचम्/अरोचिषि) ।

(३४) द्युत् (दीप्तौ)=चमकना [आत्मने०]

द्युत् धातु के लुङ् में पूर्ववत् आत्मनेपद और परस्मैपद दोनों प्रकार के प्रत्यय होंगे ।[1]

लट्—द्योतते	द्योतेते	द्योतन्ते
द्योतसे	द्योतेथे	द्योतध्वे
द्योते	द्योतावहे	द्योतामहे
लिट्—दिद्युते	दिद्युताते	दिद्युतिरे
लुट्—द्योतिता	द्योतितारौ	द्योतितारः
लृट्—द्योतिष्यते	द्योतिष्येते	द्योतिष्यन्ते
लोट्—द्योतताम्	द्योतेताम्	द्योतन्ताम्
लङ्—अद्योतत	अद्योतेताम्	अद्योतन्त
वि. लिङ्—द्योतेत	द्योतेयाताम्	द्योतेरन्

(आत्म०)—	लुङ्	
अद्योतिष्ट	अद्योतिषाताम्	अद्योतिषत
अद्योतिष्ठाः	अद्योतिषाथाम्	अद्योतिध्वम्
अद्योतिषि	अद्योतिष्वहि	अद्योतिष्महि
(पर.)-अद्युतत्	अद्युतताम्	अद्युतन्
अद्युतः	अद्युततम्	अद्युतत
अद्युतम्	अद्युताव	अद्युताम
	लृङ्	
अद्योतिष्यत	अद्योतिष्येताम्	अद्योतिष्यन्त

अभ्यास

१. रात्रि में आकाश में तारे चमकते हैं=रात्रौ आकाशे तारकाः द्योतन्ते ।
२. वह धूमकेतु सौ वर्ष पहिले चमका था ।
सः धूमकेतुः शतात् वर्षेभ्यः प्राक् दिद्युते ।
३. कल यह तारा इस स्थान पर चमकेगा ।
श्वः इयं तारा अस्मिन् स्थाने द्योतिता ।
४. आज वर्षा हो रही है इसलिये खेत में जुगनू नहीं चमकेंगे ।
अद्य वर्षः भवति, अतः क्षेत्रे खद्योताः न द्योतिष्यन्ते ।

---

१. द्युद्भ्यो लुङि । अष्टा० १।३।९१।

५. हे स्नातको ! तुम दोनों ब्रह्मतेज से खूब चमको।
हे स्नातकौ ! युवां ब्रह्मवर्चसेन सुतरां द्योतेथाम् (द्योतेयाथाम्)।

६. कल हम रात्रि में जङ्गल में आ रहे थे, अचानक शेर की आंखें चमकीं।
ह्यः वयं निशायाम् अरण्ये आगच्छन्तः आस्म, अकस्मात् सिंहस्य नेत्रे अद्योतेताम्।

७. ब्रह्मचर्य के पालन से तो छात्रों के चेहरे चमकने चाहियें।
ब्रह्मचर्यस्य पालनेन तु छात्राणां मुखानि द्योतेरन्।

८. बहुत साफ किया, पर आज ये बरतन चमके ही नहीं।
भृशम् अमार्जिषम् (अमार्क्षम्) परम् अद्य एतानि पात्राणि न अद्योतिषत (अद्युतन्)।

९. यदि चार दिन सूर्य चमकता, तो समिधाएं सूख जातीं।
यदि चतुरः दिवसान् यावत् सूर्यः अद्योतिष्यत तर्हि समिधः अशोक्ष्यन्।

१०. इतना मत चमक, कि लोग तुझसे जलने लग जायें।
एवं मा द्योतिष्ठाः (मा द्युतः; मा स्म द्योतथाः) यत् जनाः तुभ्यम् ईर्ष्येयुः।

(३५) सेव् (षेवृ) सेवने=सेवा करना [आत्मनेपदी]

इस धातु का प्रयोग सेवा करना और सेवन करना अर्थात् प्रयोग में लाना दोनों अर्थों में होता है।

लट्—सेवते	सेवेते	सेवन्ते	लङ्—असेवत	असेवेताम्	असेवन्त
लिट्—सिषेवे	सिषेवाते	सिषेविरे	वि. लिङ्—सेवेत	सेवेयाताम्	सेवेरन्
लुट्—सेविता	सेवितारौ	सेवितारः	लुङ्—असेविष्ट	असेविषाताम्	असेविषत
लृट्—सेविष्यते	सेविष्येते	सेविष्यन्ते	लृङ्—असेविष्यत	असेविष्येताम्	असेविष्यन्त
लोट्—सेवताम्	सेवेताम्	सेवन्ताम्			

अभ्यास

१. शिष्य ज्ञान की प्राप्ति के लिए गुरुओं की सेवा करते हैं।
शिष्याः ज्ञानप्राप्तये गुरून् सेवन्ते।

२. दयानन्द ने गुरु विरजानन्द की खूब सेवा की।
दयानन्दः गुरुं विरजानन्दं सुतरां सिषेवे।

३. कल मैं इन पीली गोलियों का सेवन करूँगा।
श्वः अहम् एताः पीतवर्णाः गुटिकाः सेविताहे।

४. जो आज मेरी सेवा करेगा, उसे मैं जलेबी दूंगा।
यः अद्य मां सेविष्यते, तस्मै अहं कुण्डलिनीः दास्यामि।

५. दर्शनशास्त्र में पाण्डित्य चाहते हो, तो ईश्वरचन्द्र जी की सेवा करो।
दर्शनशास्त्रे पाण्डित्यम् इच्छथ चेत् ईश्वरचन्द्रमहाभागं सेवध्वम्।

६. कल उस रोगी ने विजयपर्पटी का सेवन किया था।
ह्यः सः रुग्णः विजयपर्पटीम् असेवत।

७. तुमको तन मन धन से मातापिता की सेवा करनी चाहिये।
त्वं देहमनोद्रविणैः पितरौ सेवेथाः।

८. क्या हम दोनों ने आज उपदेशकों की सेवा नहीं की?
किम् आवाम् अद्य उपदेशकान् न **असेविष्वहि**।

९. जगत् को मिथ्या कहने वाले और अपने आपको ब्रह्म मानने वालों की कभी सेवा मत कर।=जगत् मिथ्याभाषिणः स्वात्मानं च ब्रह्म मन्यमानान् कदापि मा सेविष्ठाः (मा स्म सेवथाः)।

१०. यदि तू दिनभर धूप का सेवन करता, तो रोमछिद्र खुल जाते।
यदि त्वम् अखिलं दिनम् आतपम् असेविष्यथाः, तर्हि रोमरन्ध्राणि उदघटिष्यन्त

(३६) क्षम्[1] (क्षमूष्) सहने=[सहन करना. क्षमा करना] आत्मने०

लट्

क्षमते	क्षमेते	क्षमन्ते
क्षमसे	क्षमेथे	क्षमध्वे
क्षमे	क्षमावहे	क्षमामहे

लिट्

चक्षमे	चक्षमाते	चक्षमिरे

लुट्

(१)	क्षमिता	क्षमितारौ	क्षमितारः
	क्षमितासे	क्षमितासाथे	क्षमिताध्वे
	क्षमिताहे	क्षमितास्वहे	क्षमितास्महे
(२)	क्षन्ता	क्षन्तारौ	क्षन्तारः
	क्षन्तासे	क्षन्तासाथे	क्षन्ताध्वे
	क्षन्ताहे	क्षन्तास्वहे	क्षन्तास्महे

लृट्

(१)	क्षमिष्यते	क्षमिष्येते	क्षमिष्यन्ते
	क्षमिष्यसे	क्षमिष्येथे	क्षमिष्यध्वे
	क्षमिष्ये	क्षमिष्यावहे	क्षमिष्यामहे
(२)	क्षंस्यते	क्षंस्येते	क्षंस्यन्ते
	क्षंस्यसे	क्षंस्येथे	क्षंस्यध्वे
	क्षंस्ये	क्षंस्यावहे	क्षंस्यामहे

लोट्

क्षमताम्	क्षमेताम्	क्षमन्ताम्
क्षमस्व	क्षमेथाम्	क्षमध्वम्
क्षमै	क्षमावहै	क्षमामहै

लङ्

अक्षमत	अक्षमेताम्	अक्षमन्त
अक्षमथाः	अक्षमेथाम्	अक्षमध्वम्
अक्षमे	अक्षमावहि	अक्षमामहि

वि० लिङ्

क्षमेत	क्षमेयाताम्	क्षमेरन्
क्षमेथाः	क्षमेयाथाम्	क्षमेध्वम्
क्षमेय	क्षमेवहि	क्षमेमहि

---

१. क्षम् धातु के लुट्, लृट्, लुङ् और लृङ् इन चार लकारों में इ (इड्आगम) के विकल्प (स्वरतिसूतिसूयतिधूञूदितो वा अष्टा. ७।२।४४।।) से होने के कारण दो-दो रूप बनेंगे।

लुङ्			(१) लृङ्		
(१) अक्षमिष्ट	अक्षमिषाताम्	अक्षमिषत	अक्षमिष्यत	अक्षमिष्येताम्	अक्षमिष्यन्त
अक्षमिष्ठाः	अक्षमिषाथाम्	अक्षमिढ्वम्	अक्षमिष्यथाः	अक्षमिष्येथाम्	अक्षमिष्यध्वम्
अक्षमिषि	अक्षमिष्वहि	अक्षमिष्महि	अक्षमिष्ये	अक्षमिष्यावहि	अक्षमिष्यामहि
(२) अक्षंस्त	अक्षंसाताम्	अक्षंसत	(२) अक्षंस्यत	अक्षंस्येताम्	अक्षंस्यन्त
अक्षंस्थाः	अक्षंसाथाम्	अक्षंध्वम्	अक्षंस्यथाः	अक्षंस्येथाम्	अक्षंस्यध्वम्
अक्षंसि	अक्षंस्वहि	अक्षंस्महि	अक्षंस्ये	अक्षंस्यावहि	अक्षंस्यामहि

अभ्यास

१. मैं अब तो तुम्हें क्षमा करता हूं, आगे ऐसा न हो।
अहम् अधुना तु त्वां क्षमे, परस्तात् मैवं भूत्।

२. श्रीकृष्ण ने शिशुपाल को बार-बार क्षमा किया।
श्रीकृष्णः शिशुपालं पुनः पुनः चक्षमे।

३. कल प्रधानमन्त्री सब अपराधियों को क्षमा कर देगा।
श्वः प्रधानमन्त्री सर्वान् अपराधिनः क्षमिता (क्षन्ता)।

४. आज तुम्हारे पिता तुम्हारे सब अपराधों को क्षमा कर देंगे।
अद्य तव पिता तव सर्वान् अपराधान् क्षंस्यते (क्षमिष्यते)।

५. राजनीति के व्यवहार में कोई किसी को क्षमा नहीं करता।
राजनीतिव्यवहारे कोऽपि कमपि न क्षमते।

६. हे दयालु! मेरी गलतियों को क्षमा कर दे।
हे दयालो! मम सर्वाः त्रुटीः क्षमस्व।

७. कल जज ने उस हत्यारे को क्षमा नहीं किया।
ह्यः न्यायाधीशः तं हन्तारं न अक्षमत।

८. स्वामी दयानन्द ने जगन्नाथ को क्षमा कर दिया।
स्वामी दयानन्दः जगन्नाथं चक्षमे (अक्षमत, अक्षमिष्ट, अक्षंस्त)।

९. ये बच्चे हैं, आपको इनको क्षमा कर देना चाहिये।
इमे बालकाः सन्ति, भवान् एतान् क्षमेत।

१०. इस दुष्ट को क्षमा मत कर=इमं दुष्टं मा क्षमिष्ठाः (क्षंस्थाः, मा स्म क्षमथाः)।

११. आज तो मैंने उन्हें क्षमा कर दिया=अद्य तु अहम् एतान् अक्षमिषि (अक्षंसि)।

१२. यदि पृथ्वीराज मुहम्मदगौरी को क्षमा न करता, तो भारत की दुर्दशा न होती।
यदि पृथ्वीराजः मुहम्मदगौरी इति नामकं यवनं न अक्षमिष्यत (अक्षंस्यत) तर्हि भारतवर्षस्य दुर्दशा न अभविष्यत्।

१३. बार बार अपराध करने वाले को कौन क्षमा करे।
असकृत् अपराध्यन्तं कः क्षमेत।

(३७) रम् (रमु) क्रीडायाम्=[खेलना, रमण करना] आत्मने०

लट्—रमते	रमेते	रमन्ते	लङ्—अरमत	अरमेताम्	अरमन्त
लिट्—रेमे	रेमाते	रेमिरे	वि. लिङ्—रमेत	रमेयाताम्	रमेरन्
लुट्—रन्ता	रन्तारौ	रन्तारः	लुङ्—अरंस्त	अरंसाताम्	अरंसत
लृट्—रंस्यते	रंस्येते	रंस्यन्ते	अरंस्थाः	अरंसाथाम्	अरंध्वम्
लोट्—रमताम्	रमेताम्	रमन्ताम्	अरंसि	अरंस्वहि	अरंस्महि
			लृङ्—अरंस्यत	अरंस्येताम्	अरंस्यन्त

रम् धातु से पूर्व वि, आङ्, परि, और उप इनमें से कोई उपसर्ग लगा हो तो रम् से परस्मैपद प्रत्यय होते हैं।[1]

वि+रम् (परस्मै०)			आ+रम् (परस्मै०)		
लट्—विरमति	विरमतः	विरमन्ति	लट्—आरमति	आरमतः	आरमन्ति
लिट्—विरराम	विरेमतुः	विरेमुः	लिट्—आरराम	आरेमतुः	आरेमुः
लुट्—विरन्ता	विरन्तारौ	विरन्तारः	लुट्—आरन्ता	आरन्तारौ	आरन्तारः
लृट्—विरंस्यति	विरंस्यतः	विरंस्यन्ति	लृट्—आरंस्यति	आरंस्यतः	आरंस्यन्ति
लोट्—विरमतु (विरमतात्)	विरमताम्	विरमन्तु	लोट्—आरमतु (आरमतात्)	आरमताम्	आरमन्तु
लङ्—व्यरमत्	व्यरमताम्	व्यरमन्	लङ्—आरमत्	आरमताम्	आरमन्
वि. लिङ्—विरमेत्	विरमेताम्	विरमेयुः	वि. लिङ्—आरमेत्	आरमेताम्	आरमेयुः
लुङ्[2]—व्यरंसीत्	व्यरंसिष्टाम्	व्यरंसिषुः	लुङ्—आरंसीत्	आरंसिष्टाम्	आरंसिषुः
व्यरंसीः	व्यरंसिष्टम्	व्यरंसिष्ट	आरंसीः	आरंसिष्टम्	आरंसिष्ट
व्यरंसिषम्	व्यरंसिष्व	व्यरंसिष्म	आरंसिषम्	आरंसिष्व	आरंसिष्म
लृङ्—व्यरंस्यत्	व्यरंस्यताम्	व्यरंस्यन्	लृङ्—आरंस्यत्	आरंस्यताम्	आरंस्यन्

इसी प्रकार परि+रम् के परिरमति, परिरराम आदि और उप+रम् के उपरमंति; उपरराम आदि रूप बनेंगे।

अभ्यास

१. योगी समाधि में ईश्वर के साथ रमण करते हैं।
   योगिनः समाधौ ईश्वरेण सह रमन्ते।

२. अच्छे आदमियों का मन नगर में रमण नहीं करेगा।
   साधूनां चित्तं नगरे न रंस्यते (रन्ता)।

---

१. व्याङ्परिभ्यो रमः, उपाच्च। अष्टा० १।३।८३, ८४।

२ यमरमनमातां सक् च (अष्टा० ७.२.७३) से स् (=सक्) आगम हुआ और इट् आगम भी।

३. इस दुर्व्यसन से हट जा=विरम अस्मात् दुर्व्यसनात् ।

४. वह मेरे कहने से कल झगड़े से हट गया ।
सः मम वचनात् ह्यः कलहात् व्यरमत् ।

५. आप लोगों को बुरी आदतों से हट जाना चाहिये ।
भवन्तः दुर्व्यसनेभ्यः विरमेयुः ।

६. विष्णु और मोहन आज जयपुर जाने से रुक गये ।
विष्णुमोहनौ अद्य जयपुरगमनात् व्यरंसिष्टाम् ।

७. यदि तू पहिले कार्य से हट जाता, तो इतना न थकता ।
यदि त्वं पूर्वं कार्यात् व्यरंस्यः, तर्हि एवं परिश्रान्तः न अभविष्यः (तर्हि एवं न पर्यश्रमिष्यः) ।

८. धर्माचरण से कभी मत रुको, पापाचरण की ओर मत झुको,
धर्माचरणात् कदापि मा विरंसीः (मा स्म विरमः), पापाचरणे कदापि मा प्रवर्तिष्ठाः (मा प्रवृतः; मा स्म प्रवर्त्तथाः) ।

९. बहुत मना करने पर भी शिशुपाल गाली देने से नहीं रुका ।
बहुवारितः अपि शिशुपालः गालिप्रदानात् न विरराम ।

१०. मुझे आशा है कि कल तुम इस मुकदमे से हट जाओगे ।
अहम् आशासे यत् श्वः यूयम् अस्मात् अभियोगात् विरन्तास्थ ।

११. हे प्रभो ! मेरा चित्त सदा सत्य में ही लगे ।
हे प्रभो ! मदीयं चित्तं सदा सत्ये ह्येव रमताम् ।

(३८) कपि (=कम्प्) चलने=चलना, काँपना [आत्मने०]

लट्—	कम्पते	कम्पेते	कम्पन्ते
लिट्—	चकम्पे	चकम्पाते	चकम्पिरे
लुट्—	कम्पिता	कम्पितारौ	कम्पितारः
लृट्—	कम्पिष्यते	कम्पिष्येते	कम्पिष्यन्ते
लोट्—	कम्पताम्	कम्पेताम्	कम्पन्ताम्
लङ्—	अकम्पत	अकम्पेताम्	अकम्पन्त
वि. लिङ्—	कम्पेत	कम्पेयाताम्	कम्पेरन्
लुङ्—	अकम्पिष्ट	अकम्पिषाताम्	अकम्पिषत
लृङ्—	अकम्पिष्यत	अकम्पिष्येताम्	अकम्पिष्यन्त

अभ्यास

१. चोर पुलिस वाले को देखकर भय से काँपने लगते हैं ।
चौराः राजपुरुषं दृष्ट्वा भयेन कम्पन्ते ।

२. राम को देखकर राक्षस कांपे=रामम् अवलोक्य राक्षसाः चकम्पिरे (अकम्पन्त; अकम्पिषत) ।

३. वे यदि कश्मीर में बिना कपड़े के जायेंगे तो सर्दी से काँपेंगे।
ते यदि ऋते वस्त्रेभ्यः कश्मीरान् गमिष्यन्ति तर्हि शैत्येन कम्पिष्यन्ते।

४. तुम वीर हो, डाकू के भय से तुम्हें नहीं काँपना चाहिये।
शूराः स्थ, दस्योः भयेन यूयं न कम्पध्वम् (न कम्पेध्वम्)।

५. यहाँ की बर्फीली हवा से तू कल ही काँप गया था, मैं तो आज भी नहीं काँपा।
अत्रत्येन हिममयेन वातेन त्वं ह्यः एव अकम्पथाः, अहं तु अद्यापि न अकम्पिषि।

६. साक्षात्कार के समय प्रश्नों की बौछार से काँपना मत।
साक्षात्कारकाले प्रश्नानां वर्षेण मा कम्पिष्ठाः (मा स्म कम्पथाः)।

७. यदि उस समय तू न कांपता, तो लोग तुझे चोर न समझते।
यदि तदानीं त्वं न अकम्पिष्यथाः, तर्हि जनाः त्वां चोरं न अमंस्यन्त।

(३९) लभ् (डुलभष्) प्राप्तौ=प्राप्त करना, पाना [आत्मने०]

लट्—लभते	लभेते	लभन्ते
लिट्—लेभे	लेभाते	लेभिरे
लुट्—लब्धा	लब्धारौ	लब्धारः
लृट्—लप्स्यते	लप्स्येते	लप्स्यन्ते
लोट्—लभताम्	लभेताम्	लभन्ताम्
लङ्—अलभत	अलभेताम्	अलभन्त

वि. लिङ्—लभेत	लभेयाताम्	लभेरन्
लुङ्—अलब्ध	अलप्साताम्	अलप्सत
अलब्धाः	अलप्साथाम्	अलब्ध्वम्
अलप्सि	अलप्स्वहि	अलप्स्महि
लृङ्—अलप्स्यत	अलप्स्येताम्	अलप्स्यन्त

अभ्यास

१. जो निरन्तर प्रयत्न करते हैं वे ईश्वर को प्राप्त कर लेते हैं।
ये अनवरतं प्रयतन्ते ते परमेश्वरं लभन्ते।

२. नचिकेता ने यमाचार्य से तीन वर प्राप्त किये।
नचिकेताः यमाचार्यात् त्रीन् वरान् लेभे।

३. हम कल गुरुजी से सौ रुपये इनाम प्राप्त करेंगे।
वयं श्वः गुरुचरणेभ्यः शतं रूप्यकाणि पारितोषिकं लब्धास्महे।

४. मैंने कल गाय की सेवा की थी इसलिये मुझे आज दूध मिलेगा।
अहं ह्यः गाम् असेवे अतः अहम् अद्य दुग्धं लप्स्ये।

५. खूब सेवा करो और मेवा पाओ=सुतरां सेवध्वं सुफलं च लभध्वम्।

६. खूब ढूंढा पर मुझे कल चाकू नहीं मिला।
भृशम् अन्वेष्यं परं नाहं ह्यः लवित्रम् अलभे।

७. इस वर्ष तुम्हें परीक्षा में सफलता प्राप्त करनी ही चाहिये।
ऐषमः यूयं परीक्षायां साफल्यं लभेध्वम् एव।

८. आज प्रातः मुझे मेरे मामा का पत्र मिला ।
अद्य प्रातः अहं मम मातुलस्य पत्रम् अलप्सि ।

९. युक्ति से पुरुषार्थ करो और दुःख मत पाओ ।
युक्त्या पुरुषार्थं कुरु दुःखं च मा लब्धाः (मा स्म लभथाः) ।

१०. यदि वे दोनों रोजगार पा जाते तो उनके बच्चे दुःखी न होते ।
यदि तौ आजीविकाम् अलप्स्येतां तर्हि तयोः बालकाः दुःखिनः न अभविष्यन् ।

(४०) त्रै (त्रैङ्) पालने=पालन करना, रक्षा करना [आत्मनेपदी]

लट्—	त्रायते	त्रायेते	त्रायन्ते
	त्रायसे	त्रायेथे	त्रायध्वे
	त्राये	त्रायावहे	त्रायामहे
लिट्—	तत्रे	तत्राते	तत्रिरे
लुट्—	त्राता	त्रातारौ	त्रातारः
लृट्—	त्रास्यते	त्रास्येते	त्रास्यन्ते
लोट्—	त्रायताम्	त्रायेताम्	त्रायन्ताम्
लङ्—	अत्रायत	अत्रायेताम्	अत्रायन्त
वि. लिङ्—	त्रायेत	त्रायेयाताम्	त्रायेरन्
लुङ्—	अत्रास्त	अत्रासाताम्	अत्रासत
	अत्रास्थाः	अत्रासाथाम्	अत्राध्वम्
	अत्रासि	अत्रास्वहि	अत्रास्महि
लृङ्—	अत्रास्यत	अत्रास्येताम्	अत्रास्यन्त

अभ्यास

१. राजा प्रजा की सब चोरों से रक्षा करता है ।
राजा प्रजाः सर्वविधेभ्यः चोरेभ्यः त्रायते ।

२. राम और लक्ष्मण ने यज्ञ की राक्षसों से रक्षा की ।
रामलक्ष्मणौ यज्ञं राक्षसेभ्यः तत्राते ।

३. यदि तू झूठ बोला तो कल मैं तेरी रक्षा नहीं करूँगा ।
यदि त्वम् असत्यं गदितासि तर्हि श्वः अहं त्वां न त्राताहे ।

४. आज तो ये सिपाही मेरी रक्षा करेंगे=अद्य तु एते आरक्षिणः मां त्रास्यन्ते ।

५. बलवान् बनो और अपनी रक्षा आप करो ।
बलवन्तः भवत स्वयं च आत्मानं त्रायध्वम् ।

६. जिनकी कल मैंने रक्षा की थी, वे ही आज वस्त्र पायेंगे ।
यान् ह्यः अहम् अत्राये, ते एव अद्य वस्त्राणि लप्स्यन्ते ।

७. हमको निर्बलों की बलवानों से सदा रक्षा करनी चाहिये ।
वयं निर्बलान् बलवद्भ्यः सदा त्रायेमहि ।

८. आज कुत्तों ने घर की चोरों से रक्षा की ।
अद्य सारमेयाः गृहं चौरेभ्यः अत्रासत ।

९. यदि आप उसे न बचाते, तो उसका प्राणान्त हो जाता ।
यदि भवान् तं न अत्रास्यत, तर्हि तस्य प्राणान्तः अभविष्यत् ।

१०. पापी को दण्ड से मत बचा और पाप करेगा ।
पापिनं दण्डात् मा त्रास्थाः (मा स्म त्रायथाः) अधिकं पापं करिष्यति ।

उभयपदी धातुएं

अब हम उभयपदी धातुओं का प्रयोगाभ्यास करायेंगे। जिन धातुओं से आत्मनेपद प्रत्यय और परस्मैपद प्रत्यय दोनों होते हैं वे धातुएं उभयपदी कहलाती हैं। एक धातु के रूप सब लकारों में देंगे, आगे केवल निर्देश मात्र करेंगे।

(४१) भज् (सेवायाम्)=सेवा करना, भजन करना, ध्यान करना, [उभयपदी]

परस्मैपद

लट्—	भजति	भजतः	भजन्ति
	भजसि	भजथः	भजथ
	भजामि	भजावः	भजामः
लिट्—	बभाज	भेजतुः	भेजुः
लुट्—	भक्ता	भक्तारौ	भक्तारः
	भक्तासि	भक्तास्थः	भक्तास्थ
	भक्तास्मि	भक्तास्वः	भक्तास्मः
लृट्—	भक्ष्यति	भक्ष्यतः	भक्ष्यन्ति
	भक्ष्यसि	भक्ष्यथः	भक्ष्यथ
	भक्ष्यामि	भक्ष्यावः	भक्ष्यामः
लोट्—	भजतु (भजतात्)	भजताम्	भजन्तु
	भज (भजतात्)	भजतम्	भजत
	भजानि	भजाव	भजाम
लङ्—	अभजत्	अभजताम्	अभजन्
	अभजः	अभजतम्	अभजत
	अभजम	अभजाव	अभजाम
वि० लिङ्—	भजेत्	भजेताम्	भजेयुः
	भजेः	भजेतम्	भजेत
	भजेयम्	भजेव	भजेम
लुङ्—	अभाक्षीत्	अभाक्ताम्	अभाक्षुः
	अभाक्षीः	अभाक्तम्	अभाक्त
	अभाक्षम्	अभाक्ष्व	अभाक्ष्म

आत्मनेपद

लट्—	भजते	भजेते	भजन्ते
	भजसे	भजेथे	भजध्वे
	भजे	भजावहे	भजामहे
लिट्—	भेजे	भेजाते	भेजिरे
लुट्—	भक्ता	भक्तारौ	भक्तारः
	भक्तासे	भक्तासाथे	भक्ताध्वे
	भक्ताहे	भक्तास्वहे	भक्तास्महे
लृट्—	भक्ष्यते	भक्ष्येते	भक्ष्यन्ते
	भक्ष्यसे	भक्ष्येथे	भक्ष्यध्वे
	भक्ष्ये	भक्ष्यावहे	भक्ष्यामहे
लोट्—	भजताम्	भजेताम्	भजन्ताम्
	भजस्व	भजेथाम्	भजध्वम्
	भजै	भजावहै	भजामहै
लङ्—	अभजत	अभजेताम्	अभजन्त
	अभजथाः	अभजेथाम्	अभजध्वम्
	अभजे	अभजावहि	अभजामहि
वि० लिङ्—	भजेत	भजेयाताम्	भजेरन्
	भजेथाः	भजेयाथाम्	भजेध्वम्
	भजेय	भजेवहि	भजेमहि
लुङ्—	अभक्त	अभक्षाताम्	अभक्षत
	अभक्थाः	अभक्षाथाम्	अभग्ध्वम्
	अभक्षि	अभक्ष्वहि	अभक्ष्महि

लृङ्—अभक्ष्यत्	अभक्ष्यताम्	अभक्ष्यन्	लृङ्—अभक्ष्यत	अभक्ष्येताम्	अभक्ष्यन्त
अभक्ष्यः	अभक्ष्यतम्	अभक्ष्यत	अभक्ष्यथाः	अभक्ष्येथाम्	अभक्ष्यध्वम्
अभक्ष्यम्	अभक्ष्याव	अभक्ष्याम	अभक्ष्ये	अभक्ष्यावहि	अभक्ष्यामहि

अभ्यास

१. भक्त ईश्वर का भजन करते हैं=भक्ताः ईश्वरं भजन्ते (भजन्ति)

२. ध्रुव ने ईश्वर का भजन किया=ध्रुवः परमेश्वरं बभाज (भेजे)

३. कल मैं सब गुरुओं की सेवा करूँगा=श्वः अहं सर्वान् गुरून् भक्तास्मि (भक्ताहे)

४. जो मेरी सेवा करेगा वही मेरी सम्पत्ति पायेगा।
यः मां भक्ष्यति (भक्ष्यते) सः एव मम सम्पत्तिं लप्स्यते।

५. यह संसार असार है, भगवान् का भजन कर।
असारोऽयं संसारः, भगवन्तं भज (भजस्व)

६. महापुरुषों ने भगवान् का भजन किया, इसीलिये उन्होंने विशेष शक्ति पाई।
महापुरुषाः भगवन्तम् अभजन् (अभजन्त), अत एव ते विशिष्टां शक्तिम् अलभन्त

७. गृहस्थ को अतिथियों की सेवा करनी चाहिये।
गृहस्थः अतिथीन् भजेत् (भजेत; भजतु; भजताम्)

८. आज मैं रोगी था, इसलिये माता पिता की सेवा नहीं की।
अद्य अहं रुग्णः अभूवम्, अतः पितरौ न अभाक्षम् (अभक्षि)

९. पाखण्डियों की कभी सेवा मत कर।
पाखण्डिनः कदापि मा भाक्षीः (भक्थाः) [मा स्म भजः, मा स्म भजथाः]

१०. यदि मैं गुरुओं की सेवा करता, तो विद्वान् क्यों नहीं बनता ?
यदि अहं गुरून् अभक्ष्यं (अभक्ष्ये), तर्हि विद्वान् कथं न अभविष्यम्।

(४२) धाव् (धावु) गतिशुद्ध्योः=दौड़ना, धोना [उभयपदी]

परस्मैपद

लट्—धावति	धावतः	धावन्ति
लिट्—दधाव	दधावतुः	दधावुः
लुट्—धाविता	धावितारौ	धावितारः
लृट्—धाविष्यति	धाविष्यतः	धाविष्यन्ति
लोट्—धावतु (धावतात्)	धावताम्	धावन्तु
लङ्—अधावत्	अधावताम्	अधावन्
वि० लिङ्—धावेत्	धावेताम्	धावेयुः
लुङ्—अधावीत्	अधाविष्टाम्	अधाविषुः
अधावीः	अधाविष्टम्	अधाविष्ट
अधाविषम्	अधाविष्व	अधाविष्म
लृङ्—अधाविष्यत्	अधाविष्यताम्	अधाविष्यन्

आत्मनेपद

लट्—धावते	धावेते	धावन्ते
लिट्—दधावे	दधावाते	दधाविरे
लुट्—धाविता	धावितारौ	धावितारः
लृट्—धाविष्यते	धाविष्येते	धाविष्यन्ते
लोट्—धावताम्	धावेताम्	धावन्ताम्
लङ्—अधावत	अधावेताम्	अधावन्त
वि० लिङ्—धावेत	धावेयाताम्	धावेरन्

लुङ्—

अधाविष्ट	अधाविषाताम्	अधाविषत
अधाविष्ठाः	अधाविषाथाम्	अधाविढ्वम्
अधाविषि	अधाविष्वहि	अधाविष्महि

लृङ्—

अधाविष्यत अधाविष्येताम् अधाविष्यन्त

अभ्यास

१. ब्रह्मचारी मैदान में तेजी से दौड़ते हैं।
ब्रह्मचारिणः क्रीडाङ्गने वेगेन धावन्ति (धावन्ते)

२. लङ्का में राक्षस हनुमान् के पीछे दौड़े।
लङ्कायां राक्षसाः अनु हनूमन्तं दधावुः (दधाविरे)

३. लड़को ! दौड़ो वहां लड्डू बंट रहे हैं।
बालकाः ! धावत (धावध्वं) तत्र मोदकानि वितीर्यन्ते।

४. मैच में हम तो आज ही दौड़ेंगे, बाकी लड़के कल दौड़ेंगे।
स्पर्धाक्रीडासु वयं तु अद्यैव धाविष्यामः (धाविष्यामहे), अवशिष्टाः बालकाः तु श्वः धावितारः।

५. तुम्हें मुख बन्द करके दौड़ना चाहिये=यूयं मुखं पिधाय धावेत (धावेध्वम्)।

६. श्यामा की बहिन आज मैदान में दौड़ी थी।
श्यामायाः स्वसा अद्य क्रीडाङ्गने अधावीत् (अधाविष्ट) :

७. खाना खाकर मत दौड़ना, आयु कम होती है।
भुक्त्वा मा धावीः (मा धाविष्ठाः) मा स्म धावः (मा स्म धावथाः), आयुः क्षीयते।

८. यदि तुम लोग न दौड़ते तो, भेड़िये भेड़ों को खा जाते।
यदि यूयं न अधाविष्यत (अधाविष्यध्वम्) तर्हि वृकाः मेषान् अखादिष्यन्।

९. परसों पहरेदार चोरों के पीछे दौड़े थे।
परह्यः प्रहरिणः अनु दस्यून् अधावन् (अधावन्त)।

(४३) यज् (देवपूजासङ्गतिकरणदानेषु) सत्कार करना, यज्ञ करना, सङ्गति करना, दान करना [उभय०]

परं०			आत्म०		
लट्—यजति	यजतः	यजन्ति	लट्—यजते	यजेते	यजन्ते
लिट्—इयाज	ईजतुः	ईजुः	लिट्—ईजे	ईजाते	ईजिरे
लुट्—यष्टा	यष्टारौ	यष्टारः	लुट्—यष्टा	यष्टारौ	यष्टारः
यष्टासि	यष्टास्थः	यष्टास्थ	यष्टासे	यष्टासाथे	यष्टाध्वे
यष्टास्मि	यष्टास्वः	यष्टास्मः	यष्टाहे	यष्टास्वहे	यष्टास्महे
लृट्—यक्ष्यति	यक्ष्यतः	यक्ष्यन्ति	लृट्—यक्ष्यते	यक्ष्येते	यक्ष्यन्ते
लोट्—यजतु (यजतात्)	यजताम्	यजन्तु	लोट्—यजताम्	यजेताम्	यजन्ताम्
लङ्—अयजत्	अयजताम्	अयजन्	लङ्—अयजत	अयजेताम्	अयजन्त
वि० लिङ्—यजेत्	यजेताम्	यजेयुः	वि० लिङ्—यजेत	यजेयाताम्	यजेरन्
लुङ्—अयाक्षीत्	अयाष्टाम्	अयाक्षुः	लुङ्—अयष्ट	अयक्षाताम्	अयक्षत
अयाक्षीः	अयाष्टम्	अयाष्ट	अयष्ठाः	अयक्षाथाम्	अयड्ढ्वम्
अयाक्षम्	अयाक्ष्व	अयाक्ष्म	अयक्षि	अयक्ष्वहि	अयक्ष्महि
लृङ्—अयक्ष्यत्	अयक्ष्यताम्	अयक्ष्यन्	लृङ्—अयक्ष्यत	अयक्ष्येताम्	अयक्ष्यन्त

अभ्यास

१. गुरुकुल में ब्रह्मचारी प्रतिदिन यज्ञ करते हैं।
गुरुकुले ब्रह्मचारिणः प्रतिदिनं यजन्ति (यजन्ते)।

२. पुत्रों की प्राप्ति के लिये दशरथ ने यज्ञ किया।
सुतानां प्राप्तये दशरथः इयाज (ईजे)।

३. हम दम्पती कल यज्ञ करेंगे, आप लोग अवश्य आवें।
आवां दम्पती श्वः यष्टास्वः (यष्टास्वहे), भवन्तः अवश्यम् आगच्छन्तु।

४, क्या तुम्हारे चाचा के लड़के आज ही यज्ञ करेंगे?
किं तव पितृव्यस्य सुताः अद्यैव यक्ष्यन्ति (यक्ष्यन्ते)?

५. सुख चाहते हो तो नित्य यज्ञ करो।
सुखम् इच्छथ चेत् नित्यं यजत (यजध्वम्)।

६. हे ग्रामवासियो! वर्षा की कामना हो तो तुमको भरपूर यज्ञ करना चाहिये।
हे ग्रामवासिनः! वर्षम् अभिलषथ चेत् यूयं पुष्कलं (भृशं) यजेत (यजेध्वम्)।

७. जिन्होंने आज यज्ञ नहीं किया, वे प्रायश्चित्त करेंगे।
ये अद्य न अयाक्षुः (अयक्षत, ते प्रायश्चित्तं करिष्यन्ति)

८. बिना झाड़ू लगाए यज्ञ मत कर।
मार्जनम् अकृत्वा मा याक्षीः (मा यष्ठाः) मा स्म यजः (मा स्म यजथाः)।

९. यदि देशवासी नित्य यज्ञ करते तो स्वस्थ रहते।
यदि देशवासिनः प्रत्यहम् अयक्ष्यन् (अयक्ष्यन्त) तर्हि स्वस्थाः अवर्त्तिष्यन्त (अवर्त्स्यन्)।

१०. इन पड़ोसियों ने कल खेत में यज्ञ किया था।
एते प्रतिवेशिनः ह्यः क्षेत्रे अयजन् (अयजन्त)।

११. पूजनीय परमेश्वर का यज्ञ के द्वारा देवों ने यजन किया।
'यज्ञेन यज्ञम् अयजन्त देवाः'।[1]

(४४) वह (प्रापणे)=ढोना, ले जाना [उभय०]

परस्मैपद			आत्मनेपद		
लट्—वहति	वहतः	वहन्ति	लट्—वहते	वहेते	वहन्ते
लिट्—उवाह	ऊहतुः	ऊहुः	लिट्—ऊहे	ऊहाते	ऊहिरे
लुट्—वोढा	वोढारौ	वोढारः	लुट्—वोढा	वोढारौ	वोढारः
लृट्—वक्ष्यति	वक्ष्यतः	वक्ष्यन्ति	लृट्—वक्ष्यते	वक्ष्येते	वक्ष्यन्ते
लोट्—वहतु(वहतात्)	वहताम्	वहन्तु	लोट्—वहताम्	वहेताम्	वहन्ताम्
लङ्—अवहत्	अवहताम्	अवहन्	लङ्—अवहत	अवहेताम्	अवहन्त
वि० लिङ्—वहेत्	वहेताम्	वहेयुः	वि० लिङ्—वहेत	वहेयाताम्	वहेरन्
लुङ्—अवाक्षीत्	अवोढाम्	अवाक्षुः	लुङ्—अवोढ	अवक्षाताम्	अवक्षत
अवाक्षीः	अवोढम्	अवोढ	अवोढाः	अवक्षाथाम्	अवोढ्वम्
अवाक्षम्	अवाक्ष्व	अवाक्ष्म	अवक्षि	अवक्ष्वहि	अवक्ष्महि
लृङ्—अवक्ष्यत्	अवक्ष्यताम्	अवक्ष्यन्	लृङ्—अवक्ष्यत	अवक्ष्येताम्	अवक्ष्यन्त

अभ्यास

१. मूर्ख अर्थज्ञान के बिना शास्त्रों का भार ढोते हैं।
मूर्खाः अर्थज्ञानं बिना शास्त्राणां भारं वहन्ति (वहन्ते)

२. चेतक ने आजीवन महाराणा प्रताप का भार ढोया।
चेतकाख्यः अश्वः आजीवनं महाराजं प्रतापम् ऊहे (उवाह)।

३. ग्राम निर्माण में कल हम भार ढोयेंगे।
ग्राम-निर्माणे श्वः वयं भारं वोढास्मः (वोढास्महे)।

---

१. यजु० ३१.१६

४. ये दोनों थके हुए हैं, ये आज भार नहीं ढोयेंगे ।
एतौ श्रान्तौ स्तः, एतौ अद्य भारं न वक्ष्यतः (वक्ष्येते) ।

५. कल हमने इतने पत्थर उठाये, कि हाथ दुःख रहे हैं ।
ह्यः वयम् एतावतः पाषाणान् अवहाम (अवहामहि), यत् हस्ताः दूयन्ते ।

६. समाज का जलसा होगा, द्रव्यसंग्रह का भार तुमको उठाना चाहिये ।
समाजस्य उत्सवः भविता (भविष्यति), द्रव्यसङ्ग्रह-भारं त्वं वहेः (वहेथाः)

७. यज्ञवेदि के लिये आज तूने बहुत ईंट ढोई हैं, अब वह ढोयेगा ।
यज्ञवेद्यै अद्य त्वं भूयसीः इष्टकाः अवाक्षीः (अवोढाः), अधुना सः वक्ष्यति(वक्ष्यते)

८. इतना बोझ मत ढो, शरीर बिगड़ेगा ।
एतावन्तं भारं मा वाक्षीः (मा वोढाः;) मा स्म वहः, (मा स्म वहथाः) शरीरं दोक्ष्यति

९. यदि हम इतने गन्ने न ढोते, तो कन्धे न दुःखते ।
यदि वयम् इयन्ति इक्षुकाण्डानि न अवक्ष्याम (अवक्ष्यामहि) तर्हि स्कन्धौ न अदविष्येताम् ।

१०. तुम को गुरुओं की आज्ञा सिर से पालन करनी चाहिये ।
यूयं गुरूणाम् आज्ञां शिरसा वहेत (वहेध्वम्)

११. मैंने सदा माता पिता की आज्ञा पाली ।
अहं सदा पित्रोः आज्ञाम् अवाक्षम् (अवक्षि)

(४५) पच् (डुपचष्) पाके=पकाना [उभय०]

परस्मैपद			आत्मनेपद		
लट्—पचति	पचतः	पचन्ति	लट्—पचते	पचेते	पचन्ते
लिट्—पपाच	पेचतुः	पेचुः	लिट्—पेचे	पेचाते	पेचिरे
लुट्—पक्ता	पक्तारौ	पक्तारः	लुट्—पक्ता	पक्तारौ	पक्तारः
लृट्—पक्ष्यति	पक्ष्यतः	पक्ष्यन्ति	लृट्—पक्ष्यते	पक्ष्येते	पक्ष्यन्ते
लोट्—पचतु (पचतात्)	पचताम्	पचन्तु	लोट्—पचताम्	पचेताम्	पचन्ताम्
लङ्—अपचत्	अपचताम्	अपचन्	लङ्—अपचत	अपचेताम्	अपचन्त
वि० लिङ्—पचेत्	पचेताम्	पचेयुः	वि० लिङ्—पचेत	पचेयाताम्	पचेरन्
लुङ् अपाक्षीत्	अपाक्ताम्	अपाक्षुः	लुङ्—अपक्त	अपक्षाताम्	अपक्षत
अपाक्षीः	अपाक्तम्	अपाक्त	अपक्थाः	अपक्षाथाम्	अपग्ध्वम्
अपाक्षम्	अपाक्ष्व	अपाक्ष्म	अपक्षि	अपक्ष्वहि	अपक्ष्महि
लृङ्—अपक्ष्यत्	अपक्ष्यताम्	अपक्ष्यन्	लृङ् अपक्ष्यत	अपक्ष्येताम्	अपक्ष्यन्त

अभ्यास

१. रसोइये रसोई में भोजन पकाते हैं=सूदाः महानसे भोजनं पचन्ति (पचन्ते)

२. युधिष्ठिर के राजसूययज्ञ में रसोइयों ने एक लाख जनों का भोजन पकाया।
युधिष्ठिरस्य राजसूययज्ञे सूपकाराः लक्षस्य जनानां कृते भोजनम् पेचुः (पेचिरे)

३. कल उषा मीठे चावल पकायेगी=श्वः उषा मिष्टम् ओदनं पक्ता।

४. आज सुमित्रा मूंग की दाल का हलवा बनायेगी।
अद्य सुमित्रा मुद्गद्विदलान्नस्य संयावं पक्ष्यति (पक्ष्यते)

५. कल स्वप्ना ने जो कढी पकायी थी, वह बहुत स्वादिष्ठ थी।
ह्यः स्वप्ना यां क्वाथिकाम् अपचत् (अपचत), सा अति स्वादिष्ठा आसीत्।

६. तुम दोनों मिलकर भोजन बनाओ, जल्दी जाना है।
युवां सम्भूय भोजनं पचतम् (पचेतम्), सपदि गमिष्यामि।

७. मुझे आपके लिये बढ़िया खीर पकानी चाहिये।
अहं भवते उत्तमं पायसं पचेयम् (पचेय)

८. आज तुम लोगों ने हमारे लिये जमीकन्द का शाक क्यों नहीं पकाया।
अद्य यूयम् अस्माकं कृते सूरणस्य शाकं कथं न अपाक्त (अपग्ध्वम्)

९. यदि तू उड़द की दाल पकाता, तो विष्णुदत्त जीमता (=भोजन करता)
यदि त्वं माषसूपम् अपक्ष्यः (अपक्ष्यथाः) तर्हि विष्णुदत्तः अजमिष्यत्।

१०. बिना हींग के दाल मत पका=ऋते रामठात् सूपं मा पाक्षीः (मा पक्थाः)
[मा स्म पचः, मा स्म पचथाः]

(४६) शप् (आक्रोशे)=शाप देना, शपथ लेना [उभय०]

परस्मैपद			आत्मनेपद		
लट्—शपति	शपतः	शपन्ति	लट्—शपते	शपेते	शपन्ते
लिट्—शशाप	शेपतुः	शेपुः	लिट्—शेपे	शेपाते	शेपिरे
लुट्—शप्ता	शप्तारौ	शप्तारः	लुट्—शप्ता	शप्तारौ	शप्तारः
लृट्—शप्स्यति	शप्स्यतः	शप्स्यन्ति	लृट्—शप्स्यते	शप्स्येते	शप्स्यन्ते
लोट्—शपतु (शपतात्)	शपताम्	शपन्तु	लोट्—शपताम्	शपेताम्	शपन्ताम्
लङ्—अशपत्	अशपताम्	अशपन्	लङ्—अशपत	अशपेताम्	अशपन्त
वि० लिङ्—शपेत्	शपेताम्	शपेयुः	वि० लिङ्—शपेत	शपेयाताम्	शपेरन्
लुङ्—अशाप्सीत्	अशाप्ताम्	अशाप्सुः	लुङ्—अशप्त	अशप्साताम्	अशप्सत
अशाप्सीः	अशाप्तम्	अशाप्त	अशप्थाः	अशप्साथाम्	अशब्ध्वम्
अशाप्सम्	अशाप्स्व	अशाप्स्म	अशप्सि	अशप्स्वहि	अशप्स्महि
लृङ्—अशप्स्यत्	अशप्स्यताम्	अशप्स्यन्	लृङ्—अशप्स्यत	अशप्स्येताम्	अशप्स्यन्त

अभ्यास

१. दण्ड से बचने के लिये छात्र झूठी शपथ खाते हैं।
दण्डात् आत्मानं त्रातुं छात्राः मिथ्या शपन्ति (शपन्ते) ।

२. कर्ण के मिथ्याभाषण को जानकर, परशुराम ने उसे शाप दिया।
कर्णस्य मिथ्याभाषणं विज्ञाय परशुरामः तस्मै शशाप (शेपे)

३. हम दोनों जज के सामने कल कसम खायेंगे।
आवां न्यायाधीशस्य पुरस्तात् श्वः शप्तास्वः (शप्तास्वहे)

४. वे कसम क्यों खायेंगे, उनकी कोई गलती नहीं है।
ते किमर्थं शप्स्यन्ति (शप्स्यन्ते), तेषां कोऽपि दोषो नास्ति।

५. तू कसम खा कि मैंने रुपये नहीं चुराये।
त्वं शप (शपस्व) यद् अहं रूप्यकाणि न अमूषम् (अमूषिषम्; अमुष्णाम्, अमोषिषम्)

६. उसने कल शपथ ली थी, कि मैं आजीवन वेद पढूंगा।
सः ह्यः अशपत् (अशपत) यदहं जीवनपर्यन्तं (आजीवनं) वेदं पठिष्यामि।

७. हम सबको देश को अखण्ड बनाने के लिये शपथ लेनी चाहिये।
वयं राष्ट्रम् अखण्डं कर्तुं शपेम (शपेमहि)।

८. जिसने आज कसम खाई थी, वह ही कुआ खोदेगा।
यः अद्य अशाप्सीत् (अशप्त) सः एव कूपं खनिष्यति।

९. भीष्म जैसी कसम मत खा, माता पिता रोयेंगे।
भीष्मसदृशं मा शाप्सीः (मा शप्थाः; मा स्म शपः, मा स्म शपथाः) पितरौ रोदिष्यतः।

१०. यदि तुम लोग कसम खा लेते तो दोषमुक्त हो जाते।
यदि यूयम् अशप्स्यत (अशप्स्यध्वम्) तर्हि दोषमुक्ताः अभविष्यत।

(४७) वप् (डुवप्) बीजसन्ताने छेदने च = बीज बोना, काटना [उभय०]

परस्मैपद			आत्मनेपद		
लट्—वपति	वपतः	वपन्ति	लट्—वपते	वपेते	वपन्ते
लिट्—उवाप	ऊपतुः	ऊपुः	लिट्—ऊपे	ऊपाते	ऊपिरे
लुट्—वप्ता	वप्तारौ	वप्तारः	लुट्—वप्ता	वप्तारौ	वप्तारः
लृट्—वप्स्यति	वप्स्यतः	वप्स्यन्ति	लृट्—वप्स्यते	वप्स्येते	वप्स्यन्ते
लोट्—वपतु (वपतात्)	वपताम्	वपन्तु	लोट्—वपताम्	वपेताम्	वपन्ताम्
लङ्—अवपत्	अवपताम्	अवपन्	लङ्—अवपत	अवपेताम्	अवपन्त
वि० लिङ्—वपेत्	वपेताम्	वपेयुः	वि० लिङ्—वपेत	वपेयाताम्	वपेरन्

लुङ्—अवाप्सीत्	अवाप्ताम्	अवाप्सुः	लुङ्—अवप्त	अवप्साताम्	अवप्सत
अवाप्सीः	अवाप्तम्	अवाप्त		अवप्थाः	अवप्साथाम्	अवब्ध्वम्
अवाप्सम्	अवाप्स्व	अवाप्स्म		अवप्सि	अवप्स्वहि	अवप्स्महि
लृङ्—अवप्स्यत	अवप्स्यताम्	अवप्स्यन्		अवप्स्यत	अवप्स्येताम्	अवप्स्यन्त

अभ्यास

१. किसान वर्षा ऋतु में बीज बोते हैं=कृषकाः वर्षासु बीजानि वपन्ति (वपन्ते)

२. त्रेता में रावण ने बुराई का बीज बोया।
त्रेतायां रावणः पापबीजम् उवाप (ऊपे)

३. कल मैं दो खेतों में गेहूं बोऊँगा।
श्वः अहं द्वयोः क्षेत्रयोः गोधूमान् वप्तास्मि (वप्ताहे)

४. आज ये लोग चनों के साथ जौ बोयेंगे।
अद्य एते चणकैः सह यवान् वप्स्यन्ति (वप्स्यन्ते)।

५. तुम लोग अपने अपने खेतों में तिल और उड़द बोओ।
यूयं स्वेषु स्वेषु क्षेत्रेषु तिलान् माषान् च वपत (वपध्वम्)।

६. हम दोनों ने तो कल धान बोये, तुमने क्या बोया था।
आवां तु ह्यः व्रीहीन् अवपाव (अवपावहि) यूयं किम् अवपत (अवपध्वम्)

७. तू आज या कल गन्ने बो दे=त्वम् अद्य श्वः वा इक्षूणि वपेः (वपेथाः)

८. आज उन्होंने बाग़ में बढ़िया बीज बोये।
अद्य ते उद्याने उत्तमानि बीजानि अवाप्सुः (अवप्सत)।

९. यदि आम खाने हैं तो बबूल मत बो।
यदि आम्राशनम् अभिलषसि तर्हि बर्बूरबीजानि मा वाप्सीः (वा वप्थाः; मा स्म वपः, मा स्म वपथाः)।

१०. यदि हमारे पिता फलों के बीज न बोते तो हम फल कहाँ से खाते।
यदि अस्माकं पिता फलबीजानि न अवप्स्यत् (अवप्स्यत) तर्हि वयं कुतः फलानि अखादिष्याम।

(४८) नी (णीञ्) प्रापणे=ले जाना [उभय०] (द्विकर्मक)

यह धातु द्विकर्मक है। इस धातु के पूर्व में आ उपसर्ग लग जाने पर इसका अर्थ 'लाना' हो जाता है।

परस्मैपद			आत्मनेपद		
लट् नयति	नयतः	नयन्ति	लट्—नयते	नयेते	नयन्ते
लिट्—निनाय	निन्यतुः	निन्युः	लिट्—निन्ये	निन्याते	निन्यिरे
लुट्—नेता	नेतारौ	नेतारः	लुट्—नेता	नेतारौ	नेतारः

लृट्—नेष्यति	नेष्यतः	नेष्यन्ति		लृट्—नेष्यते	नेष्येते	नेष्यन्ते
लोट्—{नयतु / नयतात्	नयताम्	नयन्तु		लोट्—नयताम्	नयेताम्	नयन्ताम्
लङ्—अनयत्	अनयताम्	अनयन्		लङ्—अनयत	अनयेताम्	अनयन्त
वि० लिङ्—नयेत्	नयेताम्	नयेयुः		वि० लिङ्—नयेत	नयेयाताम्	नयेरन्
लुङ्—अनैषीत्	अनैष्टाम्	अनैषुः		लुङ्—अनेष्ट	अनेषाताम्	अनेषत
अनैषीः	अनैष्टम्	अनैष्ट		अनेष्ठाः	अनेषाथाम्	अनेढ्वम्
अनैषम्	अनैष्व	अनैष्म		अनेषि	अनेष्वहि	अनेष्महि
लृङ्—अनेष्यत्	अनेष्यताम्	अनेष्यन्		लृङ्—अनेष्यत	अनेष्येताम्	अनेष्यन्त

अभ्यास

१. मैं उसे अपने घर ले जाता हूं=अहं तं स्वं गृहं नयामि (नये)।

२. वह अतिथियों को खिलाने के लिए घर ले जाता है।
सः अतिथीन्, भोजयितुं गृहं नयति (नयते)।

३. रावण अपने साथ मारीच को ले गया=रावणः आत्मना सह मारीचं निनाय(निन्ये)

४. मैं कल विद्वानों को यज्ञशाला में ले जाऊँगा।
अहं श्वः विदुषः यज्ञशालां नेतास्मि (नेताहे)।

५. हम उसे यात्रा में ले जायेंगे=वयं तं यात्रायै नेष्यामः (नेष्यामहे)।

६. यह बीमार है इसे अस्पताल ले जा=अयं रुग्णः अस्ति इमं चिकित्सालयं नय (नयेः)

७. वे इसे कल दिल्ली ले गये थे, हम इसे अपने साथ अलवर लाये।
ते एतं ह्यः दिल्लीम् अनयन् (अनयन्त), वयम् इमं आत्मना सह अलवरम् आनयाम (आनयामहि)।

८. तुमको अपने पिता को इलाज के लिये वैद्यराज त्र्यम्बकशास्त्री के पास ले जाना चाहिये।=त्वं स्वपितरं चिकित्सायै वैद्यराजस्य त्र्यम्बकशास्त्रिणः समीपं नयेः (नयेथाः)।

९. हमारी साइकिल आज ही तो तू स्कूल ले गया था।
अस्माकं द्विचक्रयानम् अद्यैव तु त्वं विद्यालयम् अनैषीः (अनेष्ठाः)।

१०. इस असभ्य को सभा में मत ले जा।
इमम् असभ्यं सभां मा नैषीः (मा नेष्ठाः; मा स्म नयः; मा स्म नयथाः)।

११. यदि तू मुझे पिंजोर के बाग में ले जाता, तो मैं तुझे आम खिलाता।
यदि त्वं मां पिंजोरस्य उपवनम् अनेष्यः (अनेष्यथाः) तर्हि अहं त्वाम् आम्राणि अभोजयिष्यम्।

(४६) हृ (हृञ्) हरणे = हरण करना, ले जाना [उभय०] द्विकर्मक

हृ धातु हरण करने अर्थात् जबरदस्ती छीनकर ले जाने के अर्थ में आती है, जबकि चुर् धातु पीछे से चुराने के अर्थ में प्रयुक्त होती है।

लट्—हरति	हरतः	हरन्ति	लट्—हरते	हरेते	हरन्ते
लिट्—जहार	जह्रतुः	जह्रुः	लिट्—जह्रे	जह्राते	जह्रिरे
लुट्—हर्ता	हर्तारौ	हर्तारः	लुट्—हर्ता	हर्तारौ	हर्तारः
लृट्—हरिष्यति	हरिष्यतः	हरिष्यन्ति	लृट्—हरिष्यते	हरिष्येते	हरिष्यन्ते
लोट्—हरतु (हरतात्)	हरताम्	हरन्तु	लोट्—हरताम्	हरेताम्	हरन्ताम्
लङ्—अहरत्	अहरताम्	अहरन्	लङ्—अहरत	अहरेताम्	अहरन्त
वि. लिङ्—हरेत्	हरेताम्	हरेयुः	वि. लिङ्—हरेत	हरेयाताम्	हरेरन्
लुङ्—अहार्षीत्	अहार्ष्टाम्	अहार्षुः	लुङ्—अहृत	अहृषाताम्	अहृषत
अहार्षीः	अहार्ष्टम्	अहार्ष्ट	अहृथाः	अहृषाथाम्	अहृड्ढ्वम्
अहार्षम्	अहार्ष्व	अहार्ष्म	अहृषि	अहृष्वहि	अहृष्महि
लृङ्—अहरिष्यत्	अहरिष्यताम्	अहरिष्यन्	लृङ्—अहरिष्यत	अहरिष्येताम्	अहरिष्यन्त

अभ्यास

१. तेरी बातें मेरा मन चुराती हैं = तव वार्ताः मम मनः हरन्ति (हरन्ते)।

२. रावण सीता को कुटिया से हर ले गया = रावणः सीतां कुटीरात् जहार (जह्रे)

३. कल उस काले बाजारिये का सब धन सरकार छीन लेगी।
श्वः तस्य कूटवणिजः सर्वं धनं राजपुरुषाः हर्तारः।

४. आज दोपहर तक मेरा धन दे दे, नहीं तो मैं तेरी चीजें उठा ले जाऊँगा।
आमध्याह्नम् अद्य मदीयं धनं प्रतियच्छ, नोचेत् अहं तव वस्तूनि हरिष्यामि (हरिष्ये

५. उस अत्याचारी का सब धन छीन लो = तस्य अत्याचारिणः सर्वं धनं हरत (हरध्वम्

६. कल डाकू उसका सब माल असबाब उठा ले गये।
ह्यः दस्यवः तस्य सर्वं गृहोपकरणम् अहरन् (अहरन्त)।

७. तुमको किसी की चीज नहीं छीननी चाहिये।
त्वं कस्यापि वस्तु न हरेः (हरेथाः)।

८. अभी दो उचक्के सेठ की तिजोरी छीन ले गये।
अधुनैव द्वौ तस्करौ श्रेष्ठिनः कोषमञ्जूषाम् अहार्ष्टाम् (अहृषाताम्)।

९. गरीब का धन मत छीनो, वह दया का पात्र है।
निर्धनस्य धनं मा हार्ष्ट (मा हृड्ढ्वम्; मा स्म हरत, मा स्म हरध्वम्) दयापात्रं सः।

१०. यदि तू उसकी चीजें न छीनता तो जेल न जाता।
यदि त्वं तस्य वस्तूनि न अहरिष्यः (अहरिष्यथाः) तर्हि कारां न अगमिष्यः।

(५०) याच् (टुयाचृ) याच्ञायाम्=मांगना [उभय०] द्विकर्मक

परस्मैपद			आत्मनेपद		
लट्—याचति	याचतः	याचन्ति	लट्—याचते	याचेते	याचन्ते
लिट्—ययाच	ययाचतुः	ययाचुः	लिट्—ययाचे	ययाचाते	ययाचिरे
लुट्—याचिता	याचितारौ	याचितारः	लुट्—याचिता	याचितारौ	याचितारः
लृट्—याचिष्यति	याचिष्यतः	याचिष्यन्ति	लृट्—याचिष्यते	याचिष्येते	याचिष्यन्ते
लोट्—याचतु (याचतात्)	याचताम्	याचन्तु	लोट्—याचताम्	याचेताम्	याचन्ताम्
लङ्—अयाचत्	अयाचताम्	अयाचन्	लङ्—अयाचत	अयाचेताम्	अयाचन्त
वि. लिङ्—याचेत्	याचेताम्	याचेयुः	वि. लिङ्—याचेत	याचेयाताम्	याचेरन्
लुङ्—अयाचीत्	अयाचिष्टाम्	अयाचिषुः	लुङ्—अयाचिष्ट	अयाचिषाताम्	अयाचिषत
अयाचीः	अयाचिष्टम्	अयाचिष्ट	अयाचिष्ठाः	अयाचिषाथाम्	अयाचिड्ढ्वम्
अयाचिषम्	अयाचिष्व	अयाचिष्म	अयाचिषि	अयाचिष्वहि	अयाचिष्महि
लृङ्—अयाचिष्यत्	अयाचिष्यताम्	अयाचिष्यन्	लृङ्—अयाचिष्यत	अयाचिष्येताम्	अयाचिष्यन्त

अभ्यास

१. वह मुझसे तीन पुस्तकें मांगता है=सः मां त्रीणि पुस्तकानि याचति (याचते)।

२. ब्राह्मण ने कर्ण से सुवर्ण कुण्डल मांगे=विप्रः कर्णं कनककुण्डले ययाच (ययाचे)।

३. मैं कल उससे एक हजार रुपये मांगूगा।
अहं श्वः तं सहस्रं रूप्यकाणि याचितास्मि (याचिताहे)।

४. तू उससे पुस्तक कब मांगेगा?=त्वं तं पुस्तकं कदा याचिष्यसि (याचिष्यसे)?

५. ईश्वर से ही सब कुछ मांगो=परमेश्वरम् एव सर्वं याचत (याचध्वम्)।

६. मैंने कल धर्मशाला के लिये दुष्यन्त से रुपये मांगे।
अहं ह्यः धर्मशालायै (धर्मशालाय[1]) दुष्यन्तं रूप्यकाणि अयाचम् (अयाचे)।

७. दर्शनसम्मेलन के लिये हमें पण्डित ईश्वरचन्द्र जी से समय मांगना चाहिये।
दर्शनसम्मेलनाय वयं पण्डितराजम् ईश्वरचन्द्रं समयं याचेम (याचेमहि)।

---

१ विभाषा सेनासुराच्छायाशालानिशानाम्। अष्टा.२.४.२५ इससे एक पक्ष में नपुंसकलिङ्गता।

८. आज प्रातः मैंने उससे दस पात्र मांगे थे।
अद्य प्रातः अहं तं दश पात्राणि अयाचिषम् (अयाचिषि)।

९. इस घमण्डी से कुछ मत मांगना।
इमम् अभिमानिनं किमपि मा याचीः (याचिष्ठाः) मा स्म याचः (मा स्म याचथाः)

१०. यदि वह कुछ न मांगता तो मैं उसे बहुत कुछ देता।
यदि सः किमपि न अयाचिष्यत् (अयाचिष्यत) तर्हि अहं तस्मै बहु अदास्यम्।

(५१) बुध् (बुधिर्[1]) बोधने=जानना [उभय०]

लट्—	बोधति	बोधतः	बोधन्ति
लिट्—	बुबोध	बुबुधतुः	बुबुधुः
लुट्—	बोधिता	बोधितारौ	बोधितारः
लृट्—	बोधिष्यति	बोधिष्यतः	बोधिष्यन्ति
लोट्—	बोधतु (बोधतात्)	बोधताम्	बोधन्तु
लङ्—	अबोधत्	अबोधताम्	अबोधन्
वि. लिङ्—	बोधेत्	बोधेताम्	बोधेयुः
लुङ् (१)	अबोधीत्	अबोधिष्टाम्	अबोधिषुः
	अबोधीः	अबोधिष्टम्	अबोधिष्ट
	अबोधिषम्	अबोधिष्व	अबोधिष्म
(२)[2]	अबुधत्	अबुधताम्	अबुधन्
	अबुधः	अबुधतम्	अबुधत
	अबुधम्	अबुधाव	अबुधाम
लृङ्—	अबोधिष्यत्	अबोधिष्यताम्	अबोधिष्यन्

लट्—	बोधते	बोधेते	बोधन्ते
लिट्—	बुबुधे	बुबुधाते	बुबुधिरे
लुट्—	बोधिता	बोधितारौ	बोधितारः
लृट्—	बोधिष्यते	बोधिष्येते	बोधिष्यन्ते
लोट्—	बोधताम्	बोधेताम्	बोधन्ताम्
लङ्—	अबोधत	अबोधेताम्	अबोधन्त
वि. लिङ्—	बोधेत	बोधेयाताम्	बोधेरन्
लुङ्—	अबोधिष्ट	अबोधिषाताम्	अबोधिषत
	अबोधिष्ठाः	अबोधिषाथाम्	अबोधिढ्वम्
	अबोधिषि	अबोधिष्वहि	अबोधिष्महि
लृङ्—	अबोधिष्यत	अबोधिष्येताम्	अबोधिष्यन्त

अभ्यास

१. मैं तेरी धूर्त्तता को अच्छी तरह जानता हूँ।
अहं तव धौर्त्यं सम्यक् बोधामि (बोधे)।

२. विक्रमसिंह ने दयानन्द की शक्ति जान ली थी।
विक्रमसिंहः दयानन्दस्य शक्तिं बुबोध (बुबुधे)।

३. मैं कल तुम्हारी सब पंतरेबाजियाँ जान लूंगा।
अहं श्वः तव सर्वाः कूटगतीः बोधितास्मि (बोधिताहे)।

---

१ भ्वादिगण की यह बुधिर् (बोधने) धातु उभयपदी सेट् है; भ्वादिगण की ही बुध (अवगमने) धातु परस्मैपदी सेट् है। दिवादिगण की बुध (अवगमने) धातु आत्मनेपदी अनिट् है। २ इरितोवा (अष्टा. ३.१.५७) से विकल्प से अङ्।

४. समय बहुत थोड़ा सा है, आज क्या क्या समझेंगे ।
ह्रसीयान् खलु कालः, अद्य किं किं बोधिष्यामः (बोधिष्यामहे) ।

५. स्वरप्रकरण कठिन है, मन लगाकर समझ ।
स्वरप्रकरणं (सौवरं) दुर्बोधम् अस्ति, मनोयोगेन बोध (बोधस्व) ।

६. कल तुम दोनों ने मेरा तात्पर्य नहीं समझा, इसलिये नाराज हो ।
ह्यः युवां मदीयम् अभिसन्धि न अबोधतम् (अबोधेथाम्), अतएव रुष्टौ स्थः ।

७. उन्हें यह समझ लेना चाहिये कि लातों के देव बातों से नहीं मानते ।
ते इदं बोधेयुः (बोधेरन्) यद् दण्ड्याः दानवाः न तृपन्ति[1] वार्ताभिः ।

८. आज तुमने उसे जाना, हमने तो पहले ही जान लिया था ।
अद्य यूयं तम् अबोधिष्ट (अबुधत, अबोधिढ्वम्), वयं तु पूर्वमेव अबोधाम (अबोधामहि) ।

९. किसी के रहस्य को मत जान, मन की एकाग्रता नष्ट होगी ।
कस्यचित् रहस्यं मा बोधीः (मा बुधः, मा बोधिष्ठाः; मा स्म बोधः, मा स्म बोधथाः), मनसः ऐकाग्र्यं नशिष्यति (नंक्ष्यति) ।

१०. यदि हम वेदार्थ को भलीभांति समझ लेते, तो पाखण्ड में न फँसते ।
यदि वयं वेदार्थं सुतराम् अबोधिष्याम (अबोधिष्यामहि), तर्हि पाखण्डे न न्यमङ्क्ष्याम ।

(५२) लष् (कान्तौ) = चमकना, चाहना [उभय०]

लट्, लोट्, लङ् और वि. लिङ् में एक पक्ष में शप् और एक पक्ष में श्यन् होगा[2] । फलतः इन लकारों में दो दो रूप बनेंगे ।

लट्—(१)	लषति	लषतः	लषन्ति	लट्—(१)	लषते	लषेते	लषन्ते
	लषसि	लषथः	लषथ		लषसे	लषेथे	लषध्वे
	लषामि	लषावः	लषामः		लषे	लषावहे	लषामहे
(२)	लष्यति	लष्यतः	लष्यन्ति	(२)	लष्यते	लष्येते	लष्यन्ते
	लष्यसि	लष्यथः	लष्यथ		लष्यसे	लष्येथे	लष्यध्वे
	लष्यामि	लष्यावः	लष्यामः		लष्ये	लष्यावहे	लष्यामहे
लिट्—	ललाष	लेषतुः	लेषुः	लिट्—	लेषे	लेषाते	लेषिरे

१. तुदादिगणीय 'तृप' का प्रयोग है ।
२. 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' । अष्टा.३.१.७०॥

परस्मैपद

लुट्—लषिता लषितारौ लषितार:
लृट्—लषिष्यति लषिष्यत: लषिष्यन्ति
लोट्—(१) लषतु (लषतात्) लषताम् लषन्तु
(२) लष्यतु (लष्यतात्) लष्यताम् लष्यन्तु
लङ्—(१) अलषत् अलषताम् अलषन्
(२) अलष्यत् अलष्यताम् अलष्यन्
वि० लिङ्—(१) लषेत् लषेताम् लषेयु:
(२) लष्येत् लष्येताम् लष्येयु:
लुङ्[१]—(१) अलाषीत् अलाषिष्टाम् अलाषिषु:
(२) अलषीत् अलषिष्टाम् अलषिषु:
लृङ्—अलषिष्यत् अलषिष्यताम् अलषिष्यन्

आत्मनेपद

लुट्—लषिता लषितारौ लषितार:
लृट्—लषिष्यते लषिष्येते लषिष्यन्ते
लोट्—(१) लषताम् लषेताम् लषन्ताम्
(२) लष्यताम् लष्येताम् लष्यन्ताम्
लङ्—(१) अलषत अलषेताम् अलषन्त
(२) अलष्यत अलष्येताम् अलष्यन्त
वि० लिङ्—(१) लषेत लषेयाताम् लषेरन्
(२) लष्येत लष्येयाताम् लष्येरन्
लुङ्—अलषिष्ट अलषिषाताम् अलषिषत
लृङ्—अलषिष्यत अलषिष्येताम् अलषिष्यन्त

इस धातु का वाक्यों में अभ्यास, सोपसर्ग धातुओं के प्रसङ्ग में सिखायेंगे।

(५३) ह्वेञ् स्पर्धायां शब्दे च=स्पर्धा करना, बुलाना [उभय०]

लट्—ह्वयति ह्वयत: ह्वयन्ति
लिट्—जुहाव जुहुवतु: जुहुवु:
लुट्—ह्वाता ह्वातारौ ह्वातार:
लृट्—ह्वास्यति ह्वास्यत: ह्वास्यन्ति
लोट्—ह्वयतु (ह्वयतात्) ह्वयताम् ह्वयन्तु
लङ्—अह्वयत् अह्वयताम् अह्वयन्
वि० लिङ्—ह्वयेत् ह्वयेताम् ह्वयेयु:
लुङ्[२]—अह्वत् अह्वताम् अह्वन्
अह्व: अह्वतम् अह्वत
अह्वम् अह्वाव अह्वाम
लृङ्—अह्वास्यत् अह्वास्यताम् अह्वास्यन्

आत्मनेपद

लट्—ह्वयते ह्वयेते ह्वयन्ते
लिट्—जुहुवे जुहुवाते जुहुविरे
लुट्—ह्वाता ह्वातारौ ह्वातार:
लृट्—ह्वास्यते ह्वास्येते ह्वास्यन्ते
लोट्—ह्वयताम् ह्वयेताम् ह्वयन्ताम्
लङ्—अह्वयत अह्वयेताम् अह्वयन्त
वि० लिङ्—ह्वयेत ह्वयेयाताम् ह्वयेरन्
लुङ्[३]—(१) अह्वत अह्वेताम् अह्वत
अह्वथा: अह्वेथाम् अह्वध्वम्
अह्वे अह्वावहि अह्वामहि
(२) अह्वास्त अह्वासाताम् अह्वासत
अह्वास्था: अह्वासाथाम् अह्वाद्ध्वम्
अह्वासि अह्वास्वहि अह्वास्महि
लृङ्—अह्वास्यत अह्वास्येताम् अह्वास्यन्त

---

१. अतो हलादेर्लघो:। अष्टा०. ७.२,७ के कारण पाक्षिक वृद्धि होगी।

२. लिपिसिचिह्वश्च। अष्टा० ३.१.५३। से च्लि के स्थान पर अङ्।

३. आत्मनेपद में 'आत्मनेपदेष्वन्यतरस्याम्' अष्टा० ३.१.५४ से विकल्प से च्लि के स्थान पर अङ्। अत: दो दो रूप बनेंगे।

इस धातु का प्रयोग प्रायः आङ्पूर्वक होता है, अतः इसका अभ्यास सोपसर्ग धातुओं के प्रकरण में करवायेंगे।

(५४) गुह् (गुहू) संवरणे=ढकना [उभय०]

गुह् धातु के उपधा के ह्रस्व उकार को दीर्घ ऊकार हो जाता है यदि गुह् से अ, इ आदि स्वर परे हों।[१] गुह् धातु ऊदित है, इसलिये लुट्, लृट्, लुङ् और लृङ् में विकल्प से इट् होगा।[२] फलतः इन लकारों में दो दो रूप बनेंगे।

परस्मैपद

लट्—गूहति गूहतः गूहन्ति
गूहसि गूहथः गूहथ
गूहामि गूहावः गूहामः

लिट्—जुगूह जुगुहतुः जुगुहुः

लुट्—(१) गूहिता गूहितारौ गूहितारः
गूहितासि गूहितास्थः गूहितास्थ
गूहितास्मि गूहितास्वः गूहितास्मः
(२) गोढा गोढारौ गोढारः
गोढासि गोढास्थः गोढास्थ
गोढास्मि गोढास्वः गोढास्मः

लृट्—(१) गूहिष्यति गूहिष्यतः गूहिष्यन्ति
(२) घोक्ष्यति घोक्ष्यतः घोक्ष्यन्ति

लोट्—गूहतु (गूहतात्) गूहताम् गूहन्तु

लङ्—अगूहत् अगूहताम् अगूहन्

वि० लिङ्—गूहेत् गूहेताम् गूहेयुः

लुङ्—(१) अगूहीत् अगूहिष्टाम् अगूहिषुः
अगूहीः अगूहिष्टम् अगूहिष्ट
अगूहिषम् अगूहिष्व अगूहिष्म
(२) अघुक्षत् अघुक्षताम् अघुक्षन्
अघुक्षः अघुक्षतम् अघुक्षत
अघुक्षम् अघुक्षाव अघुक्षाम

लृङ्—(१) अगूहिष्यत् अगूहिष्यताम् अगूहिष्यन्
(२) अघोक्ष्यत् अघोक्ष्यताम् अघोक्ष्यन्

आत्मनेपद

लट्—गूहते गूहेते गूहन्ते
गूहसे गूहेथे गूहध्वे
गूहे गूहावहे गूहामहे

लिट्—जुगुहे जुगुहाते जुगुहिरे

लुट्—(१) गूहिता गूहितारौ गूहितारः
गूहितासे गूहितासाथे गूहिताध्वे
गूहिताहे गूहितास्वहे गूहितास्महे
(२) गोढा गोढारौ गोढारः
गोढासे गोढासाथे गोढाध्वे
गोढाहे गोढास्वहे गोढास्महे

लृट्—(१) गूहिष्यते गूहिष्येते गूहिष्यन्ते
(२) घोक्ष्यते घोक्ष्येते घोक्ष्यन्ते

लोट्—गूहताम् गूहेताम् गूहन्ताम्

लङ्—अगूहत अगूहेताम् अगूहन्त

वि० लिङ्—गूहेत गूहेयाताम् गूहेरन्

लुङ्—(१) अगूहिष्ट अगूहिषाताम् अगूहिषत
अगूहिष्ठाः अगूहिषाथाम् अगूहिध्वम्
अगूहिषि अगूहिष्वहि अगूहिष्महि

---

१. ऊदुपधाया गोहः। अष्टा० ६.४.८९।
२. स्वरतिसूतिसूयतिधूञूदितो वा। अष्टा० ७.२.४४।

(२)[1] {अगूढ:[1] / अघुक्षत} अघुक्षाताम् अघुक्षन्त

{अगूढा:[1] / अघुक्षथा:} अघुक्षाथाम् अघूढ्वम्[2]

अघुक्षि {अगुह्वहि[1] / अघुक्षावहि} अघुक्षामहि

लृङ्— (१) अगूहिष्यत अगूहिष्येताम् अगूहिष्यन्त

(२) अघोक्ष्यत अघोक्ष्येताम् अघोक्ष्यन्त

गुह् धातु के अभ्यास वाक्य भी उपसर्गों वाले प्रकरण में समझायेंगे। जहाँ उपधा को गुण (=गोह्) सम्भव है वहीं दीर्घ ऊकार आदेश होगा। लिट् के जुगुहतुः तथा जुगुहे आदि प्रयोगों में नहीं।

अदादिगण

अब अदादिगण की धातुओं का अभ्यास करायेंगे। अदादिगण की धातुओं के रूप सरल हैं। जैसे भ्वादिगण की धातुओं और तिङ् प्रत्ययों के बीच शप् विकरण (=अ अक्षर) रहता था वैसे इस गण की धातुओं के बीच नहीं रहता। अतः लट्, लोट्, लङ् और विधिलिङ् के रूप अत्यन्त सरल हैं। शेष लकारों में भ्वादि के समान ही कार्य होगा। इस गण के आरम्भ में 'अद्' (भक्षणे) धातु है इसलिये इसको अदादिगण कहते हैं। हम इस गण की उन धातुओं के रूप ही दर्शायेंगे जो अधिक प्रयोग में आती हैं।

(१) हन् (हिंसागत्योः)=मारना और गति करना, पाना [परस्मै०]

लट्

हन्ति	हतः	घ्नन्ति
हंसि	हथः	हथ
हन्मि	हन्वः	हन्मः

लिट्

जघान	जघ्नतुः	जघ्नुः

लुट्

हन्ता	हन्तारौ	हन्तारः
हन्तासि	हन्तास्थः	हन्तास्थ
हन्तास्मि	हन्तास्वः	हन्तास्मः

लृट्

हनिष्यति	हनिष्यतः	हनिष्यन्ति
हनिष्यसि	हनिष्यथः	हनिष्यथ
हनिष्यामि	हनिष्यावः	हनिष्यामः

लोट्

हन्तु (हतात्)	हताम्	घ्नन्तु
जहि (हतात्)	हतम्	हत
हनानि	हनाव	हनाम

लङ्

अहन्	अहताम्	अघ्नन्
अहन्	अहतम्	अहत
अहनम्	अहन्व	अहन्म

१. प्र० पु० एकवचन, म० पु० एकवचन और उ० पु० के द्विवचन में 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' अष्टा० ७.३.७३ से एकपक्ष में क्स का लुक् हो जाता है।

२. ढ्रलोपेपूर्वस्य दीर्घोऽणः (अष्टा० ६.३.१०९ से दीर्घत्व।

वि० लिङ्			अवधीः	अवधिष्टम्	अवधिष्ट
हन्यात्	हन्याताम्	हन्युः	अवधिषम्	अवधिष्व	अवधिष्म
हन्याः	हन्यातम्	हन्यात		लृङ्	
हन्याम्	हन्याव	हन्याम	अहनिष्यत्	अहनिष्यताम्	अहनिष्यन्
	लुङ्[1]		अहनिष्यः	अहनिष्यतम्	अहनिष्यत
अवधीत्	अवधिष्टाम्	अवधिषुः	अहनिष्यम्	अहनिष्याव	अहनिष्याम

अभ्यास

१. बलवान् सैनिक अत्याचारी शत्रुओं को मारते हैं
बलवन्तः भटाः अत्याचारिणः सपत्नान् घ्नन्ति ।

२. तू उसे जान से क्यों मारता है=त्वं तं कथं जीवनाशं हंसि ?

३. पाण्डवसेना ने कौरवसेना को मार दिया=पाण्डवसेना कौरवसेनां जघान ।

४. वह कल अपने सब शत्रुओं को मार देगा ।
सः श्वः स्वान् सकलान् सपत्नान् हन्ता ।

५. आज ईराक देश के सैनिक ईरान देश के सैनिकों को मारेंगे ।
अद्य ईराक-देश-भटाः ईरान-देश-भटान् हनिष्यन्ति ।

६. तू काम और क्रोध को मार=त्वं कामक्रोधौ जहि ।

७. कल के युद्ध में उसने पांच शत्रु मारे और तूने अठारह मारे ।
ह्यस्तने संग्रामे सः पञ्च रिपून् अहन् त्वं च अष्टादश शत्रून् अहन् ।

८. हमें अपने आक्रामक शत्रुओं को अवश्य मारना चाहिये ।
वयं स्वान् आक्रामकान् अरीन् अवश्यं हन्याम ।

९. हे प्रभो ! हमारे पिता और माता को मत मारो ।
हे प्रभो ! मा नो वधीः पितरं मोत मातरम् ।[2]

१०. दुर्जनो ! निरपराध को कभी मत मारो ।
दुर्जनाः ! निरपराधं कदापि मा वधिष्ट (मा स्म हत) ।

११. उन्होंने आज अपने विरोधी मार दिये ।
ते अद्य स्वान् प्रत्यर्थिनः अवधिषुः ।

१२. यदि हम अपने दुर्गुणों को मारते, तो हमारा जीवन पवित्र होता ।
यदि वयं स्वान् दुर्गुणान् अहनिष्याम तर्हि अस्माकं जीवनं पूतम् अभविष्यत् ।

१३. श्लोक—धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः ।
तस्माद् धर्मो न हन्तव्यो, मा नो धर्मो हतो वधीत् ॥

---

१. लुङ् में 'लुङि च' अष्टा० २.४.४३ से हन् के स्थान पर 'वध' आदेश होता है ।
२. यजु० १६.१५.

मारा हुआ (=त्यागा हुआ) धर्म, धर्म को मारने वाले (=त्यागने वाले) को मार देता है और रक्षा किया हुआ धर्म, उस रक्षक की रक्षा करता है; हमें धर्म का घात नहीं करना चाहिये, जिससे कि पीड़ित धर्म हमें नष्ट न कर दे।

(२) विद (ज्ञाने)=जानना [परस्मै०]

अदादिगण की विद धातु के लट् लकार में तिप् आदि प्रत्ययों के स्थान पर क्रमशः णल् (=अ), अतुस्, उस्, थल्, अथुस्, अ, णल् (=अ), व, म ये आदेश विकल्प से होते हैं अतः दो प्रकार के रूप बनेंगे।[1] लिट् लकार में भी विकल्प से आम् प्रत्यय मध्य में रहता है और कृञ् अर्थात् कृ (चकार), भू (बभूव) तथा अस् (आस) का अनुप्रयोग क्रमशः होता है।[2] अतः लिट् में चार प्रकार के रूप बनेंगे। लोट् लकार में भी एक पक्ष में आम् प्रत्यय और कृञ् का अनुप्रयोग होगा, फलतः दो प्रकार के रूप बनेंगे।[3]

लट्

(१) वेत्ति	वित्तः	विदन्ति
वेत्सि	वित्थः	वित्थ
वेद्मि	विद्वः	विद्मः
(२) वेद	विदतुः	विदुः
वेत्थ	विदथुः	विद
वेद	विद्व	विद्म

लिट्

(१) विवेद	विविदतुः	विविदुः
(२) विदाञ्चकार	विदाञ्चक्रतुः	विदाञ्चक्रुः
(३) विदाम्बभूव	विदाम्बभूवतुः	विदाम्बभूवुः
(४) विदामास	विदामासतुः	विदामासुः

लुट्

वेदिता	वेदितारौ	वेदितारः

लृट्

वेदिष्यति	वेदिष्यतः	वेदिष्यन्ति

लोट्

(१) वेत्तु (वित्तात्)	वित्ताम्	विदन्तु
विद्धि (वित्तात्)	वित्तम्	वित्त
वेदानि	वेदाव	वेदाम
(२) विदाङ्करोतु, विदाङ्कुरुतात्	विदाङ्कुरुताम्	विदाङ्कुर्वन्तु
विदाङ्कुरु, विदाङ्कुरुतात्	विदाङ्कुरुतम्	विदाङ्कुरुत
विदाङ्करवाणि	विदाङ्करवाव	विदाङ्करवाम

लङ्

अवेत् (अवेद्)	अवित्ताम्	अविदुः
अवेः (अवेत्, अवेद्)	अवित्तम्	अवित्त
अवेदम्	अविद्व	अविद्म

वि० लिङ्

विद्यात्	विद्याताम्	विद्युः
विद्याः	विद्यातम्	विद्यात
विद्याम्	विद्याव	विद्याम

---

१. 'विदो लटो वा' अष्टा० ३.४.८४

२. 'उषविदजागृभ्योऽन्यतरस्याम्', 'कृञ्चानुप्रयुज्यते लिटि' अष्टा० ३.१.३८;४०

३. विदाङ्कुर्वन्त्वित्यन्यतरस्याम् (अष्टा.३.१.४१)

	लुङ्	
अवेदीत्	अवेदिष्टाम्	अवेदिषुः
अवेदीः	अवेदिष्टम्	अवेदिष्ट
अवेदिषम्	अवेदिष्व	अवेदिष्म

	लृङ्	
अवेदिष्यत्	अवेदिष्यताम्	अवेदिष्यन्

अभ्यास

१. क्या आप लोग पुलिस इंस्पेक्टर का घर जानते हैं ?
किं भवन्तः आरक्षिनिरीक्षकस्य गृहं विदन्ति (विदुः) ?

२. उसका घर तो न मैं जानता हूँ और न ही यह जानता है।
तस्य गृहं तु न अहं वेद (वेद्मि) नापि अयं वेद (वेत्ति)।

३. जितने सूत्रों को हम जानते हैं उतने तुम नहीं जानते।
यावन्ति सूत्राणि वयं विद्म (विद्मः) तावन्ति यूयं न विद (वित्थ)।

४. त्र्यम्बक शास्त्री जी जितना आयुर्वेद जानते थे उसका शतांश मैं जानता हूँ।
त्र्यम्बकशास्त्रिणः यावन्तम् आयुर्वेदं विविदुः (विदाञ्चक्रुः, विदाम्बभूवुः, विदामासुः) तस्य शतांशम् अहं वेद्मि (वेद)।

५. कल हम दोनों उनके सब प्रश्न जान लेंगे।
श्वः आवां तेषां सर्वान् प्रश्नान् वेदितास्वः।

६. आज तुम लोग इस जादू के रहस्यों को जान लोगे।
अद्य यूयम् अस्य इन्द्रजालस्य रहस्यानि वेदिष्यथ।

७. तू उसको भोला ही जान, उसमें कुछ बुद्धि नहीं है।
त्वं तं मुग्धमेव विद्धि (विदाङ्कुरु) मतिविहीनः सः।

८. ओम्प्रकाश तो उन्हें पहिले ही जानता था, मैंने उसे कल समझा।
ओम्प्रकाशः तु तान् पूर्वमेव अवेत्, अहं तं ह्यः अवेदम्।

९. भाषा के शुद्ध प्रयोग के लिये हमें व्याकरण जरूर जानना चाहिये।
भाषायाः शुद्धप्रयोगाय वयं व्याकरणम् अवश्यं विद्याम।

१०. न्याय के सिद्धान्तों को तूने तो आज समझ लिया, पर मैंने नहीं जाना।
न्यायसिद्धान्तान् त्वं तु अद्य अवेदीः, परम् अहं न अवेदिषम्।

११. बिना परीक्षा के किसी को सुनने मात्र से बुरा मत समझो।
अपरीक्ष्य कमपि श्रवणमात्रेण दुष्टं मा वेदीः [मा स्म वेः, मा स्म वेत् (वेद्)]।

१२. यदि मैं उसे अच्छी प्रकार जान लेता तो उस पर विश्वास न करता।
यदि अहं तं सम्यक् अवेदिष्यं तर्हि तस्य विश्वासं न अकरिष्यम्।

३) अस् (भुवि) = होना, अस्तित्व [परस्मै०]

लिट्, लुट्, लृट्, आशीर्लिङ्, लुङ् और लृङ् इन छः लकारों में अस् के स्थान पर भू आदेश हो जाता है[1] अतः इनमें भू धातु के समान ही रूप चलेंगे। अस् धातु के लङ् लकार में प्रथम पुरुष तथा मध्यम पुरुष के एकवचन में ईट् आगम भी होगा।[2]

लट्—अस्ति	स्तः	सन्ति
असि	स्थः	स्थ
अस्मि	स्वः	स्मः
लिट्—बभूव	बभूवतुः	बभूवुः
लुट्—भविता	भवितारौ	भवितारः
लृट्—भविष्यति	भविष्यतः	भविष्यन्ति
लोट्—अस्तु (स्तात्)	स्ताम्	सन्तु
एधि (स्तात्)	स्तम्	स्त
असानि	असाव	असाम

लङ्—आसीत्	आस्ताम्	आसन्
आसीः	आस्तम्	आस्त
आसम्	आस्व	आस्म
वि. लिङ्—स्यात्	स्याताम्	स्युः
स्याः	स्यातम्	स्यात
स्याम्	स्याव	स्याम
लुङ्—अभूत्	अभूताम्	अभूवन्
लृङ्—अभविष्यत	अभविष्यताम्	अभविष्यन्

अभ्यास

१. क्या तू आज भतीजे के साथ ही है ? = किं त्वमद्य भ्रातृव्येण सह एव असि ?

२. कल जहाँ तू था वहीं हम थे = ह्यः यत्र त्वम् आसीः तत्रैव वयम् आस्म।

३. आकाश बादलों से घिरा हुआ है, शायद आज वर्षा हो।
मेघाच्छन्नं नभः, मन्ये अद्य वर्षः स्यात्।

४. हे प्रभो ! आप मेरे हृदय मन्दिर में सदा वर्त्तमान रहो।
हे प्रभो ! त्वं मदीये हृदयमन्दिरे सदा विराजमानः एधि।

५. यद्यपि हम निर्धन हैं, तथापि हमें ईमानदार रहना चाहिये।
यद्यपि वयम् अधनाः स्मः तथापि वयं प्रामाणिकाः स्याम।

६. क्या वे क्रूर हैं तो हम भी वैसे ही हो जावें।
यदि ते क्रूराः सन्ति तर्हि किं वयमपि तादृशाः असाम।

७. क्या इस खेल में, मैं नायक बनूं ? = किम् अस्यां क्रीडायाम् अहं नायकः असानि ?

(४) रुद् (रुदिर्) अश्रुविमोचने = रोना [परस्मै०]

रुद् धातु के लट्, लोट्, लङ्, इन तीन लकारों में भी वलादि[3] तिङ् प्रत्ययों

---

१ अस्तेर्भूः। अष्टा.२.४.५२.

२ अस्तिसिचोऽपृक्ते (अष्टा.७.३.९६)

३ वलादि अर्थात् यकारवर्जितव्यञ्जनादि।

के आरम्भ में इकार लग जाता है।[1] लङ् लकार के प्र० पु० और म० पु० के एक-वचन में ई लगेगा[2]। तथा एक पक्ष में 'अ' भी रहेगा[3]। शेष लकारों में सामान्य कार्य होते हैं।

लट्—	रोदिति	रुदितः	रुदन्ति
	रोदिषि	रुदिथः	रुदिथ
	रोदिमि	रुदिवः	रुदिमः
लिट्—	रुरोद	रुरुदतुः	रुरुदुः
लुट्—	रोदिता	रोदितारौ	रोदितारः
लृट्—	रोदिष्यति	रोदिष्यतः	रोदिष्यन्ति
लोट्—	रोदितु (रुदितात्)	रुदिताम्	रुदन्तु
	रुदिहि (रुदितात्)	रुदितम्	रुदित
	रोदानि	रोदाव	रोदाम
लङ्—	अरोदीत् (अरोदत्)	अरुदिताम्	अरुदन्
	अरोदीः (अरोदः)	अरुदितम्	अरुदित
	अरोदम्	अरुदिव	अरुदिम
वि. लिङ्—	रुद्यात्	रुद्याताम्	रुद्युः
लुङ्[4]—(१)	अरुदत्	अरुदताम्	अरुदन्
	अरुदः	अरुदतम्	अरुदत
	अरुदम्	अरुदाव	अरुदाम
(२)	अरोदीत्[5]	अरोदिष्टाम्	अरोदिषुः
	अरोदीः[5]	अरोदिष्टम्	अरोदिष्ट
	अरोदिषम्	अरोदिष्व	अरोदिष्म
लृङ्—	अरोदिष्यत्	अरोदिष्यताम्	अरोदिष्यन्

अभ्यास

१. ग्रामत्याग के समय मैं रोता हूँ और तुम दोनों रोते हो यह तो उचित है, पर यहाँ वाले क्यों रोते हैं ?
ग्रामत्यागकाले अहं रोदिमि युवां च रुदिथः एतत्तु उचितं, परम् अत्रत्याः किमर्थं रुदन्ति ?

२. राक्षस बहुत रोये, जब हनुमान् ने बाग उजाड़ दिया।
यदा हनूमान् उद्यानम् अनाशयत् तदा राक्षसाः भृशं रुरुदुः।

३. कल गुरुजी जायेंगे और हम रोयेंगे।
श्वः गुरुचरणाः गन्तारः वयं च रोदितास्मः।

४. तू विद्या पढ़, नहीं तो सदा रोयेगा = त्वं विद्यां पठ, नो चेत् सदा रोदिष्यसि।

५. मैं क्यों रोऊँ ? मैं सुखी हूँ = अहं सर्वथा सुखी अस्मि, कथं रोदानि।

---

१ रुदादिभ्यः सार्वधातुके। अष्टा.७.२.७६.

२ रुदश्च पञ्चभ्यः। अष्टा.७.३.९८.

३ अड्गार्ग्यगालवयोः। अष्टा.७.३.९९.

४ लुङ् में च्लि के स्थान पर विकल्प से अङ् 'इरितो वा' अष्टा. ३.१.५७. से होगा। अतः दो रूप होंगे।

५ अस्तिसिचोऽपृक्ते अष्टा. ७.३.९६ से ईट्।

६. कल जब बिटिया गई, तो मैं भी रोया और तू भी रोई।
ह्यः यदा पुत्री अगच्छत्, तदा अहम् अपि अरोदं त्वम् अपि अरोदः (अरोदीः)।

७. हमको शोक में इतना क्यों रोना चाहिये=वयं शोके एतावत् किमर्थं रुद्याम।

८. आज कान्ता, भाई के चले जाने पर बहुत रोई।
भ्रातरि गतवति अद्य कान्ता भृशम् अरुदत् (अरोदीत्)।

९. शोक समवेदना में वे कल भी रोये और आज भी, पर तू कल नहीं रोया था आज क्यों रोया?
शोकसमवेदनायां ते ह्यः अपि अरुदन् अद्यापि च अरुदन् (अरोदिषुः), परं त्वं ह्यः न अरोदीः (अरोदः) अद्य कथं अरोदीः (अरुदः)?

१०. हे बालक! मत रो, लड्डू दूंगा।
हे बालक मा रोदीः (मा रुदः; मा स्म रोदीः, मा स्म रोदः) मोदकानि ते दास्यामि।

११. यदि उषा न रोती तो मैं न आता।
यदि उषा न अरोदिष्यत् तर्हि अहं न आगमिष्यम्।

१२. श्लोक—'तात वाग्भट! मा रोदीः कर्मणां गतिरीदृशी।
दुषधातोरिवास्माकं गुणो दोषाय कल्पते'॥

—[वाग्भट की पुत्री पिता से कहती है]—हे पिताजी! आप रोओ मत, हमारे कर्म ही ऐसे हैं। जैसे दुष् धातु में गुण होने पर 'दोष' बनता है वैसे हमारे रूप आदि गुण भी 'दोष' के अर्थात् हमारे अकल्याण के कारण बने।

(५) स्वप् (ञिष्वप्) शये=सोना [परस्मै०]

स्वप् धातु के भी लट्, लोट् और लङ् इन तीन लकारों में वलादि तिङ् प्रत्ययों को इट् का आगम 'रुद्' के समान होता है। लङ् में भी रुद् के समान ही ईट् होगा और पक्ष में अट् भी।

लट्—	स्वपिति	स्वपितः	स्वपन्ति
	स्वपिषि	स्वपिथः	स्वपिथ
	स्वपिमि	स्वपिवः	स्वपिमः
लिट्—	सुष्वाप	सुषुपतुः	सुषुपुः
लुट्—	स्वप्ता	स्वप्तारौ	स्वप्तारः
लृट्—	स्वप्स्यति	स्वप्स्यतः	स्वप्स्यन्ति
लोट्—	स्वपितु (स्वपितात्)	स्वपिताम्	स्वपन्तु
	स्वपिहि (स्वपितात्)	स्वपितम्	स्वपित
	स्वपानि	स्वपाव	स्वपाम
लङ्—	अस्वपीत् (अस्वपत्)	अस्वपिताम्	अस्वपन्
	अस्वपीः (अस्वपः)	अस्वपितम्	अस्वपित
	अस्वपम्	अस्वपिव	अस्वपिम
वि. लिङ्—	स्वप्यात्	स्वप्याताम्	स्वप्युः
लुङ्—	अस्वाप्सीत्	अस्वाप्ताम्	अस्वाप्सुः
	अस्वाप्सीः	अस्वाप्तम्	अस्वाप्त
	अस्वाप्सम्	अस्वाप्स्व	अस्वाप्स्म
लृङ्—	अस्वप्स्यत्	अस्वप्स्यताम्	अस्वप्स्यन्

अभ्यास

१. तू महल में सोता है और मैं कुटिया में, हम दोनों में क्या बराबरी ?
त्वं प्रासादे स्वपिषि अहं च कुट्यां स्वपिमि, आवयोः कीदृशं सादृश्यम् ?
२. तप करती हुई पार्वती, जङ्गल में ही सो गई।
तपः कुर्वती पार्वती अरण्ये एव सुष्वाप।
३. आज मैंने रात में भी कार्य किया, कल खूब सोऊंगा।
अद्य अहं रात्रौ अपि कार्यम् अकार्षम्, श्वः भृशं स्वप्तास्मि।
४. आज सब, खेतों के बीच में सोयेंगे=अद्य सर्वे, क्षेत्राणां मध्ये स्वप्स्यन्ति।
५. बहुत रात हो गई, अब यहीं सो जा=भूयसी रात्रिः गता, अधुना अत्रैव स्वपिहि।
६. कल ये अतिथि किसके घर सोये थे ?=ह्यः एते अतिथयः कस्य गृहे अस्वपन् ?
७. जहाँ कल तू सोया था वहीं सर्वमित्र भी सोया था।
यत्र ह्यः त्वम् अस्वपीः (अस्वपः) तत्रैव सर्वमित्रः अपि अस्वपीत् (अस्वपत्)।
८. सबको स्वच्छ वायु में सोना चाहिये=सर्वे स्वच्छे समीरे स्वप्युः।
९. आज जैसे मैं सुख से सोया, वैसे तुम भी सोये कि नहीं ?
अद्य यथा अहं सुखम् अस्वाप्सं, तथा यूयम् अपि अस्वाप्त न वा ?
१०. दिन में मत सो, ढीला पड़ जायेगा।
दिवा मा स्वाप्सीः (मा स्म स्वपीः, मा स्म स्वपः), शिथिलः भविष्यसि।
११. यदि तू तेज हवा में न सोता, तो रोगी न होता।
यदि त्वं प्रवाते न अस्वप्स्यः, तर्हि रुग्णः न अभविष्यः।

(६) जागृ निद्राक्षये=(जागना) [परस्मै०]

जागृ धातु के लिट् लकार में विकल्प से आम् प्रत्यय (कृञ् अनुप्रयोगसहित) होगा[1] अतः चार प्रकार के रूप बनेंगे।

लट्—जागर्ति	जागृतः	जाग्रति[2]
जागर्षि	जागृथः	जागृथ
जागर्मि	जागृवः	जागृमः

लिट्

(१) जजागार जजागरतुः जजागरुः
(२) जागराञ्चकार जागराञ्चक्रतुः जागराञ्चक्रुः
(३) जागराम्बभूव जागराम्बभूवतुः जागराम्बभूवुः
(४) जागरामास जागरामासतुः जागरामासुः

---

१. उषविदजागृभ्योऽन्यतरस्याम्। अष्टा. ३.१.३८.
२. जक्षित्यादयः षट् (अष्टा. ६.१.६) से जागृ की अभ्यस्तसञ्ज्ञा और अदभ्यस्तात् (अष्टा. ७.१.४) से झ् को अत्।

लुट्—जागरिता जागरितारौ जागरितारः
लृट्—जागरिष्यति जागरिष्यतः
जागरिष्यन्ति

लोट्— { जागर्तु जागृताम् जाग्रतु[1]
(जागृतात्)
{ जागृहि जागृतम् जागृत
(जागृतात्)
जागराणि जागराव जागराम

लङ्—अजागः अजागृताम् अजागरुः
अजागः अजागृतम् अजागृत
अजागरम् अजागृव अजागृम

वि॰लिङ्—जागृयात् जागृयाताम् जागृयुः
जागृयाः जागृयातम् जागृयात
जागृयाम् जागृयाव जागृयाम

लुङ्[2]
अजागरीत् अजागरिष्टाम् अजागरिषुः
अजागरीः अजगरिष्टम् अजागरिष्ट
अजागरिषम् अजागरिष्व अजागरिष्म

लृङ्—अजागरिष्यत् अजागरिष्यताम्
अजागरिष्यन्

अभ्यास

१. आश्रम में ब्रह्मचारी ब्रह्ममूहूर्त में जागते हैं।
आश्रमे ब्रह्मचारिणः ब्राह्मे मुहूर्त्ते जाग्रति।

२. सतयुग में सभी प्रातः चार बजे जागते थे।
कृतयुगे सर्वे प्रातः चतुर्वादनकाले जजागरुः (जागराञ्चक्रुः, जागराम्बभूवुः, जागरामासुः)।

३. कल वे लोग जल्दी जागेंगे और सूर्योदय से पूर्व यहाँ आ जायेंगे।
श्वः ते द्राक् जागरितारः सूर्योदयात् प्राक् चैतत् स्थलम् आगन्तारः।

४. जो देर से जागेंगे वे दण्ड पायेंगे।
ये चिरेण जागरिष्यन्ति ते दण्डं लप्स्यन्ते।

५. हे शिष्य जागो, चिड़िया चहचहा रही हैं।
भो शिष्य ! जागृहि, चटकाः कलरवं कुर्वन्ति।

६. कल जब मैं तेरे घर गया था, तो न तू जगा था न तेरा भाई जगा था।
ह्यः यदा अहं तव गृहम् अगच्छम्, तदा न त्वम् अजागः नापि तव भ्राता अजागः।

७. अब वेदप्रचार हो गया है, अब तो देशवासियों को जाग जाना चाहिये।
अधुना वेदप्रसारः अभूत्, इदानीं देशवासिनः जागृयुः।

---

१. जक्षित्यादयः षट् (अष्टा. ६.१.६.) से जागृ की अभ्यस्तसञ्ज्ञा और अदभ्यस्तात् (अष्टा. ७.१.४.) से झ् को अत्।

२. 'सिचिवृद्धिः परस्मैपदेषु' (अष्टा. ७.२.१) से प्राप्त वृद्धि का 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' अष्टा॰ ७-२-५ से निषेध।

८. आज जब मैं बगीचे में गया, हंस जाग चुके थे।
 अद्य यदा अहम् उद्यानम् अगमं, हंसाः अजागरिषुः।
९. तुम पापी हो, तुम्हारा भाग्य कभी न जागे।
 यूयं पापिनः स्थ, युष्मदीयं भाग्यं कदापि मा जागरीत् (मा स्म जागः)।
१०. यदि तुम जाग जाते तो चोर गौएं न ले जाते।
 यदि यूयम् अजागरिष्यत तर्हि चोराः गाः न अचोरयिष्यन्।

(७) शास् (शासु) अनुशिष्टौ [शासन करना] परस्मै०

लुङ् लकार और वि० लिङ् लकार में सर्वत्र तथा लट्, लोट् और लङ् के समस्त द्विवचनों और बहुवचनों में 'शास्' के अकार के स्थान पर इकार आदेश होगा[1] जहाँ इकार होगा वहीं स् को ष् भी हो जायेगा[2] अर्थात् शास् के स्थान पर शिष् हो जायेगा। लुङ् लकार में च्लि के स्थान पर अङ् होगा[3]।

लट्—	शास्ति	शिष्टः	शासति
	शास्सि	शिष्ठः	शिष्ठ
	शास्मि	शिष्वः	शिष्मः
लिट्—	शशास	शशासतुः	शशासुः
लुट्—	शासिता	शासितारौ	शासितारः
लृट्—	शासिष्यति	शासिष्यतः	शासिष्यन्ति
लोट्—	शास्तु (शिष्टात्)	शिष्टाम्	शासतु
	शाधि (शिष्टात्)	शिष्टम्	शिष्ट
	शासानि	शासाव	शासाम
लङ्—	अशात्	अशिष्टाम्	अशासुः
	अशाः (अशात्)	अशिष्टम्	अशिष्ट
	अशासम्	अशिष्व	अशिष्म
वि. लिङ्—	शिष्यात्	शिष्याताम्	शिष्युः
	शिष्याः	शिष्यातम्	शिष्यात
	शिष्याम्	शिष्याव	शिष्याम
लुङ्—	अशिषत्	अशिषताम्	अशिषन्
	अशिषः	अशिषतम्	अशिषत
	अशिषम्	अशिषाव	अशिषाम
लृङ्—	अशासिष्यत्	अशासिष्यताम्	अशासिष्यन्

अभ्यास

१. जो शासक प्रजा पर ठीक शासन नहीं करते वे अयोग्य हैं।
 ये शासकाः प्रजाः सम्यक् न शासति ते अयोग्याः सन्ति।

---

१. शास इदङ्हलोः अष्टा ६.४.३४॥
२. शासिवसिघसीनां च (अष्टा. ३.१.५६.)
३. सर्तिशास्त्यर्तिभ्यश्च। अष्टा० ३.१.५६.
४. शास् की 'अभ्यस्त' सञ्ज्ञा (जक्षित्यादयःषट्, अष्टा.६.१.६) होने से लङ् में भी 'सिजभ्यस्तविदिभ्यश्च' अष्टा.३.४.१०९ से झि के स्थान पर जुस् आदेश।

२. कोसल देश पर इक्ष्वाकु वंश के राजा शासन करते थ।
कोसलदेशम् इक्ष्वाकुवंशप्रभवाः नृपाः शशासुः।
३. कल से योगेन्द्र इस गांव पर शासन करेगा।
श्वःप्रभृति योगेन्द्रः इमं ग्रामं शासिता।
४. अब से इन्दिरा गांधी भारत पर भली प्रकार शासन करेगी।
अद्यप्रभृति इन्दिरा गान्धी भारतं सुतरां शासिष्यति।
५. मैं आपकी शरण हूँ, मुझे आप ठीक चलाइये।
'शाधि मां त्वां प्रपन्नम्'।[1]
६. उन्होंने अवसर पाकर भी दो वर्षों में जनता पर शासन ठीक नहीं किया।
ते अवसरम् उपलभ्य अपि द्वयोः वर्षयोः जनताः सम्यक् न अशासुः (अशिषन्)।
७. विद्वान् बनाने के लिये अध्यापक शिष्यों पर उत्तम शासन करें।
विदुषः भावयितुं शिक्षकाः शिष्यान् सुष्ठु शिष्युः।
८. चोर और पाप-प्रशंसक लोग कभी हमारे पर शासन न करें।
स्तेनाः अघशंसाः च कदापि नः मा शिषन् (मा स्म शासुः)।
९. आज तूने उन बन्दियों पर बड़ा कठोर शासन किया।
अद्य त्वं तान् कारानिबद्धान् जनान् अतिकठोरम् अशिषः।
१०. यदि तुम्हारी पार्टी देश पर अच्छा शासन करती तो देश में शान्ति होती।
यदि युष्माकं पक्ष्याः देशम् उत्तमम् अशासिष्यन् तर्हि देशे शान्तिः अभविष्यत्।

(८) मा माने=समाना, मापना [परस्मै०]

लट्—माति	मातः	मान्ति	
लिट्—ममौ	ममतुः	ममुः	
लुट्—माता	मातारौ	मातारः	
लृट्—मास्यति	मास्यतः	मास्यन्ति	
लोट्—मातु (मातात्)	माताम्	मान्तु	
माहि (मातात्)	मातम्	मात	
मानि	माव	माम	

लङ्—अमात्	अमाताम्	अमान् (अमुः[2])	
अमाः	अमातम्	अमात	
अमाम्	अमाव	अमाम	
वि. लिङ्—मायात्	मायाताम्	मायुः	
लुङ्—अमासीत्	अमासिष्टाम्	अमासिषुः	
अमासीः	अमासिष्टम्	अमासिष्ट	
अमासिषम्	अमासिष्व	अमासिष्म	
लृङ्—अमास्यत्	अमास्यताम्	अमास्यन्	

अभ्यास

१. दुष्ट बनिये कम तोलते हैं=खलाः वणिजः ऊनं मान्ति।
२. पहिले कोई कम नहीं तोलता था=पुरा कोऽपि न्यूनं न ममौ।

---

१. गीता. २.७.
२. लङः शाकटायनस्यैव (अष्टा.३.४.१११) से एक पक्ष में झि को जुस् (=उस्)।

३. कल से दूकान पर तू तोलेगा=श्वस्तनात् दिवसात् आपणे त्वं मातासि।

४. आज हमें छुट्टी है, हम सब बारी से तोलेंगे।
अद्य वयं सावकाशाः, वयं पर्यायेण मास्यामः।

५. हे धनपाल ! पूरा तोल, मैं सब देख रहा हूँ।
हे धनपाल ! पूर्णं माहि, सर्वम् ईक्षे अहम्।

६. वे सच्चे वैश्य हैं, उन्होंने कभी कम नहीं तोला।
ते सन्तः वैश्याः सन्ति, ते कदापि न्यूनं न अमान् (अमुः, अमासिषुः, ममुः)।

७. जब वे पूरे पैसे लेते हैं, तो उन्हें ठीक ही तोलना चाहिये।
यदा ते पूर्णं द्रविणं प्रतिगृह्णन्ति, तर्हि ते सम्यक् मायुः।

८. कम मत तोल, यह पाप है=ऊनं मा मासीः (मा स्म माः), पापमिदम्।

९. यदि ये बजाज कम न मापते तो जेल क्यों जाते।
यदि एते वास्त्रिकाः[1] न्यूनं न अमास्यन् तर्हि कारां किमर्थम् अयास्यन्।

(९) पा रक्षणे=रक्षा करना [परस्मै०]

लट्—पाति	पातः	पान्ति	लङ्—अपात्	अपाताम्	अपान् (अपुः)
लिट्—पपौ	पपतुः	पपुः	वि. लिङ्—पायात्	पायाताम्	पायुः
लुट् पाता	पातारौ	पातारः	लुङ्[2]—अपासीत्	अपासिष्टाम्	अपासिषुः
लृट्—पास्यति	पास्यतः	पास्यन्ति			
लोट्—पातु (पातात्)	पाताम्	पान्तु	लृङ्—अपास्यत्	अपास्यताम्	अपास्यन्

अभ्यास

१. गुरुकुल में ब्रह्मचारियों की गुरु रक्षा करते हैं=गुरुकुले ब्रह्मचारिणः गुरवः पान्ति।
२. सुषेण वैद्य ने लक्ष्मण की मृत्यु से रक्षा की=वैद्यः सुषेणः लक्ष्मणं मृत्योः पपौ।
३. कल तुम दोनों इस पेड़ के नीबुओं की रक्षा करोगे।
श्वः युवाम् अस्य पादपस्य जम्बीराणि पातास्थ।
४. मेरी बुढ़ापे में कौन रक्षा करेगा ?=वार्धक्ये कः मां पास्यति ?
५. हे राजकुमारो ! तुम दोनों मेरे यज्ञ की, राक्षसों से रक्षा करो।
हे नृपपुत्रौ ! युवां मदीयं मखं राक्षसेभ्यः पातम्।

---

१. वस्त्रं पण्यम् एषां ते वास्त्रिकाः 'तदस्य पण्यम्' (अष्टा.४.४.५१) से ठक्।
२. 'गातिस्थाघुपा०' (अष्टा.२.४.७७) से केवल पीने अर्थ वाली पा (=पिब) धातु के ही सिच् का लुक् होता है 'पा' रक्षणे के सिच् का नहीं।

६. 'पाहि नो अग्ने रक्षसः'[1]—हे अग्नि ! हमें राक्षस से बचाओ।

७. उस बुढ़िया की किसी ने रक्षा नहीं की।
तां वृद्धां कोऽपि न अपात् (अपासीत्)

८. जिसकी डाक्टर ने कल रक्षा की थी, उसने आज पानी पिया है।
यं चिकित्सकः ह्यः अपात्, सः अद्य सलिलम् अपात्[2]।

९. सांपों को मत पाल=सर्पान् मा पासीः (मा स्म पाः)

१०. यदि तू धर्म की रक्षा करता, तो धर्म तेरी रक्षा करता।
यदि त्वं धर्मम् अपास्यः तर्हि धर्मः त्वाम् अपास्यत्।

मा धातु तथा पा धातु के समान ही 'या प्रापणे', 'भा दीप्तौ' आदि के रूप चलेंगे।

(१०) स्ना (ष्णा) शौचे [स्नान करना] परस्मैपद

लट्—	स्नाति	स्नातः	स्नान्ति
लिट्—	सस्नौ	सस्नतुः	सस्नुः
लुट्—	स्नाता	स्नातारौ	स्नातारः
लृट्	स्नास्यति	स्नास्यतः	स्नास्यन्ति
लोट्—	स्नातु (स्नातात्)	स्नाताम्	स्नान्तु

लङ्—	अस्नात्	अस्नाताम्	अस्नान् (अस्नुः)
वि० लिङ्—	स्नायात्	स्नायाताम्	स्नायुः
लुङ्—	अस्नासीत्	अस्नासिष्टाम्	अस्नासिषुः
लृङ्—	अस्नास्यत्	अस्नास्यताम्	अस्नास्यन्

अभ्यास

१. क्या सब ब्रह्मचारी ठण्डे पानी से नहाते हैं ?
किं सर्वे ब्रह्मचारिणः शीतलेन सलिलेन स्नान्ति ?

२. भीमसेन दुर्योधन के साथ गङ्गा में नहाया।
भीमसेनः दुर्योधनेन सह गङ्गायां सस्नौ।

३. क्या तू तलाब में नहायेगा ?—किं त्वं तडागे स्नातासि (स्नास्यसि) ?

४. इसी घाट पर स्नान कर ले, वे भले ही धार में नहावें।
अस्मिन्नेव अवतारे स्नाहि, ते कामं धारायां स्नान्तु।

५. उन्होंने सरस्वती में स्नान किया=ते सरस्वत्याम् अस्नान् (अस्नुः, सस्नुः, अस्नासिषुः)

६. तुझे प्रातः कुए के ताजा खींचे हुए पानी से नहाना चाहिये।
त्वं प्रातः कूपस्य रज्जुशारदेन जलेन स्नायाः।

---

१. ऋग्वेद १.३६.१५क

२. पा पाने (भ्वादि.) के लुङ् का रूप।

७. जैसे तू आज इस सोते में नहाया है, वैसे कल भी नहाया था ?
यथा त्वम् अद्य अस्मिन् स्रोतसि अस्नासीः तथा ह्यः अपि अस्नाः ।

८. इस गन्दे तीर्थ में मत नहा, जुएँ हो जायेंगी ।
अस्मिन् मलिने तीर्थे मा स्नासीः (मा स्म स्नाः) यूकाः सम्पत्स्यन्ते ।

९. यदि तू विद्या तीर्थ में स्नान करता तो स्नातक बन जाता ।
यदि त्वं विद्यातीर्थे अस्नास्यः तर्हि स्नातकः अभविष्यः ।

(११) इ (इण्) गतौ = जाना [परस्मै०]

इण् धातु के स्थान पर लुङ् लकार में गा आदेश होता है ।[1]

लट्—एति	इतः	यन्ति	
एषि	इथः	इथ	
एमि	इवः	इमः	
लिट्—इयाय	ईयतुः	ईयुः	
लुट्—एता	एतारौ	एतारः	
लृट्—एष्यति	एष्यतः	एष्यन्ति	
लोट्—एतु (इतात्)	इताम्	यन्तु	
इहि (इतात्)	इतम्	इत	
अयानि	अयाव	अयाम	
लङ्—ऐत्	ऐताम्	आयन्	
ऐः	ऐतम्	ऐत	
आयम्	ऐव	ऐम	
वि० लिङ्—इयात्	इयाताम्	इयुः	
इयाः	इयातम्	इयात	
इयाम्	इयाव	इयाम	
लुङ्—अगात्	अगाताम्	अगुः	
अगाः	अगातम्	अगात	
अगाम्	अगाव	अगाम	
लृङ्—ऐष्यत्	ऐष्यताम्	ऐष्यन्	
ऐष्यः	ऐष्यतम्	ऐष्यत	
ऐष्यम्	ऐष्याव	ऐष्याम	

इसके वाक्यों का अभ्यास उपसर्गों के प्रकरण में करवायेंगे ।

(१२) इ (इङ्) अध्ययने = पढ़ना [आत्मने०]

इङ् धातु सदा अधि उपसर्ग पूर्वक ही प्रयुक्त होती है । लिट् लकार में इङ् के स्थान पर गा (गाङ्) आदेश होता है ।[2] लुङ् और लृङ् में विकल्प से इङ् को गाङ् आदेश होता है,[3] अतः इन दोनों लकारों में दो प्रकार के रूप बनेंगे । गाङ् आदेश वाले रूपों में सिच् (लुङ् में) और स्य (लृङ् में) को ङिद्वद्भाव होगा ।[4] फलतः 'गा' के आ को ईकार आदेश हो जायेगा ।[5]

---

१. इणो गा लुङि । अष्टा० २.४.४५ ।

२. गाङ् लिटि । अष्टा० २.४.४९ ।

३. विभाषा लुङ्लृङोः । अष्टा० २.४.५० ।

४. गाङ्कुटादिभ्योऽञ्णिन्ङित् । अष्टा० १.२.१ ।

५. घुमास्थागापाजहातिसां हलि । अष्टा० ६.४.६६ ।

लट्

अधीते	अधीयाते	अधीयते
अधीषे	अधीयाथे	अधीध्वे
अधीये	अधीवहे	अधीमहे

लिट्

अधिजगे	अधिजगाते	अधिजगिरे

लुट्

अध्येता	अध्येतारौ	अध्येतारः
अध्येतासे	अध्येतासाथे	अध्येताध्वे
अध्येताहे	अध्येतास्वहे	अध्येतास्महे

लृट्

अध्येष्यते	अध्येष्येते	अध्येष्यन्ते
अध्येष्यसे	अध्येष्येथे	अध्येष्यध्वे
अध्येष्ये	अध्येष्यावहे	अध्येष्यामहे

लोट्

अधीताम्	अधीयाताम्	अधीयताम्
अधीष्व	अधीयाथाम्	अधीध्वम्
अध्ययै	अध्ययावहै	अध्ययामहै

लङ्

अध्यैत	अध्यैयाताम्	अध्यैयत
अध्यैथाः	अध्यैयाथाम्	अध्यैध्वम्
अध्यैयि	अध्यैवहि	अध्यैमहि

वि० लिङ्

अधीयीत	अधीयीयाताम्	अधीयीरन्
अधीयीथाः	अधीयीयाथाम्	अधीयीध्वम्
अधीयीय	अधीयीवहि	अधीयीमहि

लुङ्

(१) अध्यगीष्ट	अध्यगीषाताम्	अध्यगीषत
अध्यगीष्ठाः	अध्यगीषाथाम्	अध्यगीढ्वम्
अध्यगीषि	अध्यगीष्वहि	अध्यगीष्महि
(२) अध्यैष्ट	अध्यैषाताम्	अध्यैषत
अध्यैष्ठाः	अध्यैषाथाम्	अध्यैढ्वम्
अध्यैषि	अध्यैष्वहि	अध्यैष्महि

लृङ्

(१) अध्यगीष्यत	अध्यगीष्येताम्	अध्यगीष्यन्त
अध्यगीष्यथाः	अध्यगीष्येथाम्	अध्यगीष्यध्वम्
अध्यगीष्ये	अध्यगीष्यावहि	अध्यगीष्यामहि
(२) अध्यैष्यत	अध्यैष्येताम्	अध्यैष्यन्त
अध्यैष्यथाः	अध्यैष्येथाम्	अध्यैष्यध्वम्
अध्यैष्ये	अध्यैष्यावहि	अध्यैष्यामहि

अभ्यास

१. आप सब कहां पढ़ते हैं ?=भवन्तः कुत्र अधीयते ?

२. पहिले सब गुरुकुल में पढ़ते थे=पुरा सर्वे गुरुकुले अधिजगिरे।

३. आज हम वैशेषिक पढ़ेंगे और कल न्याय पढ़ेंगे।
अद्य वयं वैशेषिकम् अध्येष्यामहे श्वः च न्यायमध्येतास्महे।

४. वास्तविक ज्ञान प्राप्त करना हो, तो आर्ष ग्रन्थों को पढ़ो।
सत्यज्ञानस्य लिप्सा अस्ति चेत् आर्षग्रन्थान् अधीध्वम्।

५. कल उसने गुरु से योगदर्शन का साधन-पाद पढ़ा।
ह्यः सः गुरोः योगदर्शनस्य साधनपादम् अध्यैत।

६. तुम सबको उदयन की न्याय कुसुमाञ्जलि अवश्य पढ़नी चाहिए।
यूयम् उदयनस्य न्यायकुसुमाञ्जलिम् अवश्यम् अधीयीध्वम्।

७. आज तूने आचार्य जी से क्या-क्या पढ़ा।
अद्य त्वम् आचार्यपादेभ्यः किं किम् अध्यैष्ठाः (अध्यगीष्ठाः)।

८- अनार्ष ग्रन्थ मत पढ़, मन में कुसंस्कार जम जायेंगे।
अनार्षग्रन्थान् मा अधिगीष्ठाः (मा अध्येष्ठाः, मा स्म अधीथाः) मनसि कुसंस्काराः पदं करिष्यन्ति (बद्धमूलाः भविष्यन्ति)।

९. यदि तू अष्टाध्यायी पढ़ता तो व्याकरण का विद्वान् हो जाता।
यदि त्वम् अष्टाध्यायीम् अध्यगीष्यथाः (अध्यैष्यथाः) तर्हि व्याकरणं[1] विद्वान् अभविष्यः।

(१३) आस् (आस) उपवेशने=बैठना [आत्मने०]

लट्—आस्ते आसाते आसते
आस्से आसाथे आद्ध्वे
आसे आस्वहे आस्महे

लिट्[2]—आसाञ्चक्रे आसाञ्चक्राते आसाञ्चक्रिरे
(२) आसाम्बभूव आसाम्बभूवतुः आसाम्बभूवुः
(३) आसामास आसामासतुः आसामासुः

लुट्—आसिता आसितारौ आसितारः

लृट्—आसिष्यते आसिष्येते आसिष्यन्ते

लोट्—आस्ताम् आसाताम् आसताम्
आस्स्व आसाथाम् {आद्ध्वम् / आध्वम्}
आसै आसावहै आसामहै

लङ्
आस्त आसाताम् आसत
आस्थाः आसाथाम् {आद्ध्वम् / आध्वम्}

वि०लि०—आसीत आसीयाताम् आसीरन्
आसीथाः आसीयाथाम् आसीध्वम्
आसीय आसीवहि आसीमहि

लुङ्—आसिष्ट आसिषाताम् आसिषत
आसिष्ठाः आसिषाथाम् आसिढ्वम् / आसिड्ढ्वम्
आसिषि आसिष्वहि आसिष्महि

लृङ्—आसिष्यत आसिष्येताम् आसिष्यन्त

---

१. यहाँ 'कर्तृकर्मणोः कृति' (अष्टा० २.३.६५.) से षष्ठी विभक्ति प्राप्त थी; उसका 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (अष्टा० २.३.६९) से निषेध हो गया। विद्वान् शब्द शतृ प्रत्ययान्त है अतः 'ल्' से उसका भी ग्रहण होगा। (विद+लट्→विद्+ल्→विद्+शतृ→विद्+वस्=विद्वान्) विदेःशतुर्वसुः। अष्टा० ७.१.३६

२. 'दयायासश्च' (अष्टा० ३.१.३६) से आम् प्रत्यय।

अभ्यास

१. तुम सब यहां क्यों नहीं बैठते ?=यूयम् अत्र कथं न आध्वे ।

२. राम के साथ सीता भी रथ पर बैठी ।
रामेण सत्रा सीता अपि रथे आसाञ्चक्रे (आसाम्बभूव, आसामास)

३. कल वे दोनों मेरी कुर्सी के पास बैठेंगे ।
श्वः तौ मम आसन्द्याः समीपम् आसितारौ

४. मैं आज प्रवचन में सबसे आगे बैठूंगा ।
अहम् अद्य प्रवचनसमये सर्वेभ्यः अग्रे आसिष्ये ।

५. तू वहीं बैठ जहां योगेन्द्र बैठता है ।=त्वं तत्रैव आस्स्व यत्र योगेन्द्रः आस्ते ।

६. कल ट्रेन में शास्त्री जी के पास ही मैं बैठा था ।
ह्यः वाष्पयाने शास्त्रिमहोदयस्य समीपे एव अहम् आसि ।

७. भोजन के समय वे दोनों कल जहां बैठे थे वहीं आज भी बैठें ।
भोजनवेलायां यत्र तौ ह्यः आसातां तत्रैव अद्यापि आसाताम् ।

८. हमें दुष्टों की संगति में नहीं बैठना चाहिये ।
वयं खलानां सङ्गतौ न आसीमहि ।

९. आज ये हलवाई कड़ाह के पास बैठे थे ।
अद्य एते कान्दविकाः कटाहस्य समीपम् आसिषत ।

१०. तेरी आँखें खराब हैं, धूल, धूप और धुएँ में मत बैठ ।
रुग्णे तव चक्षुषी, धूमातपधूलिषु मा आसिष्ठाः (मा स्म आस्थाः) ।

११. यदि तुम विद्वानों के बीच बैठते तो गुणी बनते ।
यदि त्वं विदुषां मध्ये आसिष्यथाः तर्हि गुणवान् अभविष्यः ।

१२. कल तुम लोग वहाँ बैठे थे, आज यहाँ बैठो ।
ह्यः यूयं तत्र आध्वम् (आद्ध्वम्), अद्य अत्र आध्वम् (आद्ध्वम्) ।

(१४) शी (शीङ्) स्वप्ने=सोना [आत्मने०]

लट्—शेते	शयाते	शेरते[1]	लृट्—शयिष्यते	शयिष्येते	शयिष्यन्ते
शेषे	शयाथे	शेध्वे	लोट्—शेताम्	शयाताम्	शेरताम्[1]
शये	शेवहे	शेमहे	शेष्व	शयाथाम्	शेध्वम्
लिट्—शिश्ये	शिश्याते	शिश्यिरे	शयै	शयावहै	शयामहै
लुट्—शयिता	शयितारौ	शयितारः			

---

१. शीङो रुट् (अष्टा.७.१.६) से र् (=रुट्) आगम हुआ ।

लङ्—अशेत अशयाताम् अशेरत
अशेथाः अशयाथाम् अशेध्वम्
अशयि अशेवहि अशेमहि

वि. लिङ्—शयीत शयीयाताम् शयीरन्
शयीथाः शयीयाथाम् शयीध्वम्
शयीय शयीवहि शयीमहि

लुङ्—अशयिष्ट अशयिषाताम् अशयिषत
अशयिष्ठाः अशयिषाथाम् अशयिढ्वम् (-ढ्वम्)
अशयिषि अशयिष्वहि अशयिष्महि

लृङ्-अशयिष्यत अशयिष्येताम् अशयिष्यन्त

अभ्यास

१. परीक्षा के दिनों में आप लोग कब सोते हैं ?
परीक्षादिवसेषु भवन्तः कदा शेरते ?

२. राम, लक्ष्मण और सीता पहिले दिन एक पेड़ के नीचे सोये।
सीतारामलक्ष्मणाः प्रथमे दिने एकस्य वृक्षस्य अधस्तात् शिश्यिरे।

३. ये संन्यासी कल उस साधु की कुटिया में सोयेंगे।
एते संन्यासिनः श्वः तस्य साधोः उटजे शयितारः।

४. छत से जल टपक रहा है, आज कहाँ सोयेंगे ?
छदिषः जलं स्रवति, अद्य क्व शयिष्यामहे ?

५. आज तू दादा जी के कमरे में सो जा।
अद्य त्वं पितामहस्य प्रकोष्ठे शेष्व।

६. कल जब हम सोये थे, कुत्ते भौंक रहे थे।
ह्यः यदा वयम् अशेमहि, कुक्कुराः बुक्कन्ति स्म।

७. सबको रात्रि में द्वितीय प्रहर के आरम्भ में सो जाना चाहिये।
सर्वे रात्रौ द्वितीयप्रहरस्य प्रारम्भे शयीरन्।

८. ये दोनों छात्र तो आठ बजे ही सो गये, ये कैसे व्याकरण याद करेंगे।
एतौ छात्रौ तु अष्टवादनवेलायाम् एव अशयिषातां कथमेतौ व्याकरणं स्मर्तारौ (स्मरिष्यतः)।

९. दसवीं के छात्र मध्यरात्रि से पहिले न सोयें।
दशम्याः छात्राः निशीथात् पूर्वं मा शयिषत (मा स्म शेरत)।

१०. यदि तू जल्दी सो जाता तो जल्दी उठ जाता।
यदि त्वं शीघ्रम् अशयिष्यथाः तर्हि शीघ्रम् उदस्थास्यः।

(१५) सू (षूङ्) प्राणिगर्भविमोचने (उत्पन्न करना) [आत्मने०]

सू धातु के लुट्, लृट्, लुङ् तथा लृङ् इन चार लकारों में विकल्प से इट् आगम होता है[1], फलतः इन लकारों में दो-दो रूप बनेंगे।

---

१. स्वरतिसूतिसूयतिधूञूदितो वा। अष्टा.७.२.४४.

लट्—सूते	सुवाते	सुवते
सूषे	सुवाथे	सूध्वे
सुवे	सूवहे	सूमहे
लिट्—सुषुवे	सुषुवाते	सुषुविरे
लुट् (१) सोता	सोतारौ	सोतारः
(२) सविता	सवितारौ	सवितारः
लृट् (१) सोष्यते	सोष्येते	सोष्यन्ते
(२) सविष्यते	सविष्येते	सविष्यन्ते
लोट्— सूताम्	सुवाताम्	सुवताम्
सूष्व	सुवाथाम्	सूध्वम्
सुवै	सुवावहै	सुवामहै
लङ्—असूत	असुवाताम्	असुवत
असूथाः	असुवाथाम्	असूध्वम्
असुवि	असूवहि	असूमहि

वि॰ लिङ्—सुवीत	सुवीयाताम्	सुवीरन्
सुवीथाः	सुवीयाथाम्	सुवीध्वम्
सुवीय	सुवीवहि	सुवीमहि
लुङ् (१) असोष्ट	असोषाताम्	असोषत
असोष्ठाः	असोषाथाम्	असोढ्वम् / असोड्ढ्वम्
असोषि	असोष्वहि	असोष्महि
(२) असविष्ट	असविषाताम्	असविषत
असविष्ठाः	असविषाथाम्	असविड्ढ्वम् / असविध्वम्
असविषि	असविष्वहि	असविष्महि
लृङ् (१) असोष्यत	असोष्येताम्	असोष्यन्त
(२) असविष्यत	असविष्येताम्	असविष्यन्त

अभ्यास

१. वास्तव में वही माता है, जो वीर बालकों को जन्म देती है।
वस्तुगत्या सा एव माताऽस्ति या वीरबालकान् सूते।

२. दशरथ की तीन रानियों ने चार पुत्रों को जन्म दिया।
दशरथस्य तिस्रः राज्ञ्यः चतुरः सुतान् सुषुविरे।

३. हमारी बकरियाँ परसों ब्यायेंगी।
अस्माकम् अजाः परश्वः सोतारः (सवितारः)।

४. कल जब सूर्य उगेगा, यह गाय ब्यायेगी।
श्वः यदा सविता उदेता, इयं गौः सविता (सोता)।

५. इस ग्याबिन गाय की चाल बहुत धीमी है, आज शाम को यह ब्या जायेगी।
अस्याः अन्तर्वत्न्याः गोः गतिः अतिमन्थरा अस्ति, अद्य सायम् इयं सोष्यते (सविष्यते)

६. हे देश की माताओ ! वीर और विद्वान् पुत्रों को ही जन्म दो।
भो राष्ट्रमातरः ! वीरान् विदुषः च सुतान् एव सूध्वम्।

७. इस कुतिया ने कल जो बच्चे दिये हैं, उन्हें मैं ले जाऊंगा।
इयं शुनी ह्यः यानि अपत्यानि असूत, तान्यहं नेष्यामि (नेता)।

८. बहुत पुत्रों वाले इस कुटुम्ब की महिलाओं को अब कन्याओं को जन्म देना चाहिये।

बहुपुत्रकस्य अस्य कुटुम्बस्य ललनाः अतोऽग्रे कन्याः सुवीरन् ।

९. आज इस घुड़साल में दो घोड़ियों ने बच्चे दिये ।

अद्य अस्यां मन्दुरायां द्वे वडवे असोषाताम् (असविषाताम्) ।

१०. हे देवि ! तू कायर और नास्तिक सन्तान को जन्म मत देना ।

हे देवि ! त्वं क्लीबां नास्तिकां च सन्तति मा सोष्ठाः (सविष्ठाः, मा स्म सूथाः) ।

११. यदि हमारी भैंसें न ब्यातीं, तो हम घी कहाँ से खाते ।

यदि अस्मदीयाः महिष्यः न असोष्यन्त (असविष्यन्त) तर्हि वयं सर्पिः कुतः (अखादिष्याम)

(१६) ब्रू (ब्रूञ्) व्यक्तायां वाचि=(बोलना, कहना) [उभयपदी]

अब अदादि गण की एक उभयपदी धातु के रूप दे रहे हैं। ब्रू धातु के लट् लकार में परस्मैपदी प्रत्ययों में आरम्भ के पांच प्रत्ययों (तिप्, तस्, झि, सिप्, थस्,) के स्थान पर क्रमशः णल् (अ), अतुस्, उस्, थल् (थ), अथुस् ये पांच आदेश विकल्प से होते हैं और उस अवस्था में ब्रू के स्थान पर आह् आदेश हो जाता है।[1] इन पांचों प्रत्ययों में दो प्रकार के रूप बनेंगे। लिट्, लुट्, लृट्, लुङ् और लृङ् इन लकारों में ब्रू के स्थान पर वच् आदेश हो जाता है।[2] लुङ् लकार में ब्रू (वच्) धातु से परे वर्तमान च्लि के स्थान पर अङ् (=अ) आदेश होता है।[3] साथ ही लुङ् में 'वच्' के अ के बाद उ (उम्) अक्षर भी आ जाता है।[4] अ और उ को गुण एकादेश[5] होकर ओ हो जाता है, फलतः 'वोच्' का प्रयोग होता है। लट्, लोट्, लङ् इन तीन लकारों में परस्मैपद में लट् के तीनों एकवचनों में, लोट् के प्र० पु० एकवचन में और लङ् के प्र० पु० तथा म० पु० के एकवचन में ईट् (ई) आगम हो जाता है।[6]

परस्मैपद			आत्मनेपद		
लट्			लट्		
(१) ब्रवीति	ब्रूतः	ब्रुवन्ति	ब्रूते	ब्रुवाते	ब्रुवते
ब्रवीषि	ब्रूथः	ब्रूथ	ब्रूषे	ब्रुवाथे	ब्रूध्वे
ब्रवीमि	ब्रूवः	ब्रूमः	ब्रुवे	ब्रूवहे	ब्रूमहे

१. ब्रुवः पञ्चानामादित आहो ब्रुवः । अष्टा० ३.४.८४.

२. ब्रुवो वचिः । अष्टा० २.४.५३ ।

३. अस्यतिवक्तिख्यातिभ्योऽङ् । अष्टा० ३.१.५२ ।

४. वच उम् । अष्टा० ७.४.२० ।

५. आद्गुणः । अष्टा० ६.१.८७ ।

६. ब्रुव ईट् अष्टा० ७.३.९३ ।

(२) आह	आहतुः	आहुः
आत्थ	आहथुः	ब्रूथ
ब्रवीमि	ब्रूवः	ब्रूमः
	लिट्	
उवाच	ऊचतुः	ऊचुः
	लुट्	
वक्ता	वक्तारौ	वक्तारः
	लृट्	
वक्ष्यति	वक्ष्यतः	वक्ष्यन्ति
	लोट्	
ब्रवीतु (ब्रूतात्)	ब्रूताम्	ब्रुवन्तु
ब्रूहि (ब्रूतात्)	ब्रूतम्	ब्रूत
ब्रवाणि	ब्रवाव	ब्रवाम
	लङ्	
अब्रवीत्	अब्रूताम्	अब्रुवन्
अब्रवीः	अब्रूतम्	अब्रूत
अब्रवम्	अब्रूव	अब्रूम
	विधिलिङ्	
ब्रूयात्	ब्रूयाताम्	ब्रूयुः
	लुङ्	
अवोचत्	अवोचताम्	अवोचन्
अवोचः	अवोचतम्	अवोचत
अवोचम्	अवोचाव	अवोचाम
	लृङ्	
अवक्ष्यत्	अवक्ष्यताम्	अवक्ष्यन्

	लिट्	
ऊचे	ऊचाते	ऊचिरे
	लुट्	
वक्ता	वक्तारौ	वक्तारः
वक्तासे	वक्तासाथे	वक्ताध्वे
वक्ताहे	वक्तास्वहे	वक्तास्महे
	लृट्	
वक्ष्यते	वक्ष्येते	वक्ष्यन्ते
	लोट्	
ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्
ब्रवै	ब्रवावहै	ब्रवामहै
	लङ्	
अब्रूत	अब्रुवाताम्	अब्रुवत
अब्रूथाः	अब्रुवाथाम्	अब्रूध्वम्
अब्रुवि	अब्रूवहि	अब्रूमहि
	वि० लिङ्	
ब्रुवीत	ब्रुवीयाताम्	ब्रुवीरन्
ब्रुवीथाः	ब्रुवीयाथाम्	ब्रुवीध्वम्
ब्रुवीय	ब्रुवीवहि	ब्रुवीमहि
	लुङ्	
अवोचत	अवोचेताम्	अवोचन्त
अवोचथाः	अवोचेथाम्	अवोचध्वम्
अवोचे	अवोचावहि	अवोचामहि
	लृङ्	
अवक्ष्यत	अवक्ष्येताम्	अवक्ष्यन्त

अभ्यास

१. तू धीरे धीरे क्या कहता है ?=त्वं शनैः किं ब्रवीषि (आत्थ, ब्रूषे) ?

२. श्रीकृष्ण ने दुर्योधन से दो बातें कहीं=श्रीकृष्णः दुर्योधनं द्वे वार्ते उवाच (ऊचे)।

३. मैं यह बात तुझे कल बताऊँगा=अहम् इमां वार्तां त्वां श्वः वक्तास्मि (वक्ताहे)।

४. ये गवाह आज सारी बातें कहेंगे।
एते साक्षिणः अद्य सर्वाः वार्ताः वक्ष्यन्ति वक्ष्यन्ते।

५. जल्दी बताओ, उसने कल तुझे क्या कहा था।
सपदि ब्रूहि ((ब्रूष्व) सः ह्यः त्वां किम् अब्रवीत् (अब्रूत)।

६. तुम्हारा नाम सत्येन्द्र है, तुम्हें कभी झूठ नहीं बोलना चाहिए।
तव नाम सत्येन्द्रः अस्ति, त्वं जातुचित् मिथ्या न ब्रूयाः (ब्रुवीथाः)।

७. आज उन्होंने जो कुछ कहा, उसे हमने टेपरेकार्ड कर लिया है।
अद्य ते यदपि अवोचन् (अवोचन्त), तद् वयं वाक्संरक्षणयन्त्रे समरक्षिष्म।

८. अंग्रेजी मत बोल, हम सब हिन्दी समझते हैं।
आंग्लभाषां मा वोचः (मा वोचथाः, मा स्म ब्रवीः, मा स्म ब्रूथाः) वयं समे हिन्दीं बोधामः।

९. यदि वह सत्य कह देता, तो उस पर कोई क्रोध नहीं करता।
यदि सः सत्यम् अवक्ष्यत् (अवक्ष्यत), तर्हि कोऽपि तस्मै न अद्रोहिष्यत् (अध्रोक्ष्यत्)।

जुहोत्यादि गण

अब जुहोत्यादि गण की कुछ धातुएँ समझाते हैं। इस गण में कुल २४ धातुएँ हैं। इस गण की धातुओं से लट्, लोट्, लङ्, विधिलिङ् इन चार लकारों में जो शप् (अ) प्रत्यय आता है उसका श्लु (=लोप) हो जाता है[1]। उसअवस्था में धातु का स्वरूप दुगुना (=द्वित्वयुक्त) हो जाता है[2] और पूर्व अंश में यथावसर परिवर्तन भी हो जाता है[3]। जैसे—हु तिप्। हु शप् ति। हु ति। हु हु ति। जुहुति। जुहोति। हु (जुहोति) धातु इस गण के आरम्भ में है, इसलिये इसे जुहोत्यादिगण कहते हैं।

(१) भी (ञिभी) भये=डरना [परस्मैपदी]

लट्, लोट्, लङ् और विधिलिङ् में व्यञ्जनादि कित् अथवा ङित् प्रत्यय परे रहने पर 'भी' के ई को विकल्प से इ आदेश हो जाता है[4]। इसलिये विधिलिङ् में सभी रूप दो प्रकार के और शेष तीन लकारों में कुछ रूप दो प्रकार के बनेंगे। लिट् लकार में विकल्प से आम् प्रत्यय (कृञ् अनुप्रयोग सहित) होगा और उसको श्लुवद् भाव भी होगा[5]; इसलिये लिट् में चार प्रकार के रूप बनेंगे।

---

१. जुहोत्यादिभ्यः श्लुः। अष्टा.२.४.७५.

२. श्लौ। अष्टा.६.१.१०.

३. कुहोश्चुः (अष्टा.७.४.६२), अभ्यासे चर्च (अष्टा.८.४.५४)

४. भियोऽन्यतरस्याम्। अष्टा.६.४.११५.

५. भीह्रीभृहुवां श्लुवच्च (अष्टा.३.१.३९)

लट्

बिभेति — बिभीतः (बिभितः) — बिभ्यति

बिभेषि — बिभीथः (बिभिथः) — बिभीथ (बिभिथ:)

बिभेमि — बिभीवः (बिभिवः) — बिभीमः (बिभिमः)

लिट्

(१) बिभाय — बिभ्यतुः — बिभ्युः

(२) बिभयाञ्चकार — बिभयाञ्चक्रतुः — बिभयाञ्चक्रुः

(३) बिभयाम्बभूव — बिभयाम्बभूवतुः — बिभयाम्बभूवुः

(४) बिभयामास — बिभयामासतुः — बिभयामासुः

लुट्

भेता — भेतारौ — भेतारः

लृट्

भेष्यति — भेष्यतः — भेष्यन्ति

लोट्

प्र०—बिभेतु — {बिभीतात्, बिभितात्} — {बिभीताम्, बिभिताम्} — बिभ्यतु

म०—{बिभीहि (बिभीतात्), बिभिहि (बिभितात्)} — {बिभीतम्, बिभितम्} — {बिभीत, बिभित}

उ०—बिभयानि — बिभयाव — बिभयाम

लङ्

अबिभेत् (—द्) — {अबिभीताम्, अबिभिताम्} — अबिभयुः

अबिभेः — {अबिभीतम्, अबिभितम्} — {अबिभीत, अबिभित}

अबिभयम् — {अबिभीव, अबिभिव} — {अबिभीम, अबिभिम}

विधिलिङ्

(१) बिभीयात् — बिभीयाताम् — बिभीयुः

बिभीयाः — बिभीयातम् — बिभीयात

बिभीयाम् — बिभीयाव — बिभीयाम

(२) बिभियात् — बिभियाताम् — बिभियुः

बिभियाः — बिभियातम् — बिभियात

बिभियाम् — बिभियाव — बिभियाम

लुङ्

अभैषीत् — अभैष्टाम् — अभैषुः

अभैषीः — अभैष्टम् — अभैष्ट

अभैषम् — अभैष्व — अभैष्म

लृङ्

अभेष्यत् — अभेष्यताम् — अभेष्यन्

अभ्यास

१. गुरुकुल के ब्रह्मचारी शेर से भी नहीं डरते हैं।
गुरुकुलस्य ब्रह्मचारिणः सिंहाद् अपि न बिभ्यति।

२. पहिले भी ब्रह्मचारी जङ्गल में रहते थे और किसी से नहीं डरते थे।
पुराऽपि ब्रह्मचारिणः अरण्ये ऊषुः कस्मादपि च न बिभ्युः (न बिभयाञ्चक्रुः, न बिभयाम्बभूवुः, न बिभयामासुः)।

३. तीन साल के बच्चे सर्वमित्र ने राम शास्त्री से कहा—'मैं तेरे पास खड़ा हूं, कभी तू डर जाये।'

त्रिवर्षदेशीयः बालकः सर्वमित्रः रामशास्त्रिणम् अवादीत् (अवदत्)—'अहं तव पार्श्वे स्थितः अस्मि, कदाचित् त्वं बिभीयाः (बिभियाः)।

४. हम शत्रुओं से कभी नहीं डरेंगे ।
वयं रिपुभ्यः कदापि न भेतास्मः (भेष्यामः) ।
५. पाप से सदा डरो=पापात् सर्वदा बिभीहि (बिभिहि) ।
६. जब मैंने कङ्कन चुराया ही नहीं है तो मैं क्यों डरूँ ?
यदा अहं कङ्कणं नैव अमूषिषम् (अमूषम्) तर्हि कथं बिभयानि ?
७. परसों बहुत से हमलावर आ गये, किन्तु वे लोग जरा भी नहीं डरे ।
परह्यः बहवः आक्रान्तारः आगच्छन्, परं ते मनाग् अपि न अविभयुः ।
८. ईश्वर बड़ा जबरदस्त है, उससे हमें डरना चाहिये ।
महाशक्तिमान् खलु परमेश्वरः, तस्मात् वयं बिभीयाम (बिभियाम) ।
९. उस काले रीछ को देखकर, ये दोनों बच्चे आज डर गये ।
तं कृष्णम् ऋक्षं दृष्ट्वा, एतौ बालकौ अद्य अभैष्टाम् ।
१०. मोटा देखकर मत डरो=स्थूलं दृष्ट्वा मा भैषीः (मा स्म बिभेः) ।
११. यदि वे न डरते, तो सेना में भरती हो जाते ।
यदि ते न अभेष्यन्, तर्हि सेनां प्राविक्ष्यन् ।

(२) हा (ओहाक्) त्यागे (=छोड़ना) [परस्मै०]

लट्, लोट्, और लङ् में कित् अथवा ङित् व्यञ्जनादि प्रत्यय परे रहने पर विकल्प से हा के आ को इकार आदेश होगा[१] । पक्ष में ईकार रहेगा[२] । लोट् लकार में म० पु० एकवचन में 'हि' परे रहने पर एक पक्ष में आ भी रहेगा[३] अतः वहाँ तीन रूप बनेंगे । विधिलिङ् में 'या' परे रहने पर 'हा' के आ का लोप हो जायेगा[४] ।

लट्		
जहाति	जहितः / जहीतः	जहति
जहासि	जहिथः / जहीथः	जहिथ / जहीथ
जहामि	जहिवः / जहीवः	जहिमः / जहीमः

लिट्		
जहौ	जहतुः	जहुः

लुट्		
हाता	हातारौ	हातारः

लृट्		
हास्यति	हास्यतः	हास्यन्ति

लोट्		
जहातु / जहितात् / जहीतात्	जहिताम् / जहीताम्	जहतु

१. जहातेश्च (अष्टा.६.४.११६) ।
२. ई हल्यघोः (अष्टा.६.४.११३) ।
३. आ च हौ (अष्टा.६.४.११७) ।
४. लोपो यि (अष्टा.६.४.११८) ।

जहाहि, जहिहि, जहीहि (जहितात्, जहीतात्)	जहितम्, जहीतम्	जहित, जहीत
जहानि	जहाव	जहाम

लङ्

अजहात्	अजहिताम्, अजहीताम्	अजहुः
अजहाः	अजहितम्, अजहीतम्	अजहित, अजहीत
अजहाम्	अजहिव, अजहीव	अजहिम, अजहीम

विधिलिङ्

जह्यात्	जह्याताम्	जह्युः
जह्याः	जह्यातम्	जह्यात
जह्याम्	जह्याव	जह्याम

लुङ्

अहासीत्	अहासिष्टाम्	अहासिषुः
अहासीः	अहासिष्टम्	अहासिष्ट
अहासिषम्	अहासिष्व	अहासिष्म

लृङ्

अहास्यत्	अहास्यताम्	अहास्यन्

अभ्यास

१. उद्धवानन्द बोला—मैं चित्तौड़गढ़ कन्या गुरुकुल के लिये दस हजार रुपये त्यागता हूं।

उद्धवानन्दः प्रोवाच—अहं चित्तौड़गढ़स्थाय कन्यागुरुकुलाय दश सहस्राणि रूप्यकाणि जहामि।

२. राम ने भरत के लिये राजगद्दी छोड़ दी=रामः भरताय राज्यसिंहासनं जहौ।

३. कल ये धूमपान छोड़ देंगे=श्वः एते धूमपानं हातारः।

४. आज से हम कड़वा बोलना छोड़ देंगे=अद्यप्रभृति वयं कटुभाषणं हास्यामः।

५. काम, क्रोध और लोभ का त्याग कर दे।

कामक्रोधलोभान् जहाहि (जहिहि, जहीहि)।

६. कल मैंने महाराज के सामने भांग पीना त्याग दिया।

ह्यः अहं महाराजस्य समक्षं विजयापानम् अजहाम्।

७. तुमको दुष्टों से गप्पें लड़ाना छोड़ देना चाहिये।

यूयं खलैः गोष्ठीं जह्यात।

८. आज जिस दुर्गुण को सुरेन्द्र ने त्यागा है उसे हमने भी त्याग दिया है।

अद्य यं दुर्गुणं सुरेन्द्रः अहासीत् तं वयमपि अहासिष्म।

९. मौत के डर से भी धर्म को मत छोड़ो।

मृत्युभयेऽपि समुपस्थिते धर्मं मा हासीः (मा स्म जहाः)।

१०. यदि तू पढ़ना न छोड़ता, तो अध्यापक बन जाता।

यदि त्वम् अध्ययनं न अहास्यः, तर्हि अध्यापकः अभविष्यः।

(३) भृ (डुभृञ्) धारणपोषणयोः (=पालन पोषण करना) [उभयपदी]

लट्, लोट्, लङ् और विधिलिङ्, इन चार लकारों में शप् का श्लु (=लोप) हो जाने पर जो धातु को द्वित्व होता है उस द्वित्व में से प्रथम भाग (=अभ्यास) के स्वर को इकार आदेश होगा।[1] लिट् लकार में विकल्प से आम् प्रत्यय (कृञ् अनु-प्रयोग सहित) होगा और श्लुवद् भाव होने से धातु को द्वित्व तथा अभ्यास को इत्व[2] भी होगा। फलतः लिट् में चार प्रकार के रूप बनेंगे।

परस्मैपद

लट्

बिभर्ति	बिभृतः	बिभ्रति
बिभर्षि	बिभृथः	बिभृथ
बिभर्मि	बिभृवः	बिभृमः

लिट्

(१) बभार	बभ्रतुः	बभ्रुः
(२) बिभराञ्चकार	बिभराञ्चक्रतुः	बिभराञ्चक्रुः
(३) बिभराम्बभूव	बिभराम्बभूवतुः	बिभराम्बभूवुः
(४) बिभरामास	बिभरामासतुः	बिभरामासुः

लुट्

भर्ता	भर्तारौ	भर्तारः

लृट्

भरिष्यति	भरिष्यतः	भरिष्यन्ति

लोट्

बिभर्तु (बिभृतात्)	बिभृताम्	बिभ्रतु
बिभृहि (")	बिभृतम्	बिभृत
बिभराणि	बिभराव	बिभराम

लङ्

अबिभः	अबिभृताम्	अबिभरुः
अबिभः	अबिभृतम्	अबिभृत
अबिभरम्	अबिभृव	अबिभृम

विधिलिङ्

बिभ्रियात्	बिभ्रियाताम्	बिभ्रियुः

आत्मनेपद

लट्

बिभृते	बिभ्राते	बिभ्रते
बिभृषे	बिभ्राथे	बिभृध्वे
बिभ्रे	बिभृवहे	बिभृमहे

लिट्

(१) बभ्रे	बभ्राते	बभ्रिरे
(२) बिभराञ्चक्रे	बिभराञ्चक्राते	बिभराञ्चक्रिरे

लुट्

भर्ता	भर्तारौ	भर्तारः

लृट्

भरिष्यते	भरिष्येते	भरिष्यन्ते

लोट्

बिभृताम्	बिभ्राताम्	बिभ्रताम्
बिभृष्व	बिभ्राथाम्	बिभृध्वम्
बिभरै	बिभरावहै	बिभरामहै

लङ्

अबिभृत	अबिभ्राताम्	अबिभ्रत
अबिभृथाः	अबिभ्राथाम्	अबिभृध्वम्
अबिभ्रि	अबिभृवहि	अबिभृमहि

विधिलिङ्

बिभ्रीत	बिभ्रीयाताम्	बिभ्रीरन्
बिभ्रीथाः	बिभ्रीयाथाम्	बिभ्रीध्वम्
बिभ्रीय	बिभ्रीवहि	बिभ्रीमहि

---

१. भृञामित्। अष्टा.७.४.७६॥

२. भीह्रीभृहुवां श्लुवच्च। अष्टा.३.१.३९॥

बिभ्रियाः	बिभ्रियातम्	बिभ्रियात
बिभ्रियाम्	बिभ्रियाव	बिभ्रियाम
	लुङ्	
अभार्षीत्	अभार्ष्टाम्	अभार्षुः
अभार्षीः	अभार्ष्टम्	अभार्ष्ट
अभार्षम्	अभार्ष्व	अभार्ष्म
	लृङ्	
अभरिष्यत्	अभरिष्यताम्	अभरिष्यन्

	लुङ्	
अभृत	अभृषाताम्	अभृषत
अभृथाः	अभृषाथाम्	अभृढ्वम् (अभृड्ढ्वम्)
अभृषि	अभृष्वहि	अभृष्महि
	लृङ्	
अभरिष्यत	अभरिष्येताम्	अभरिष्यन्त

अभ्यास

१. ये सबका पालन करते हैं=एते सर्वान् बिभ्रति (बिभ्रते)।

२. सतयुग में जो दस हजार ब्रह्मचारियों का पालन करता था उसे कुलपति कहते थे।

कृतयुगे यः दश सहस्राणि ब्रह्मचारिणः बभार (बिभराञ्चकार; बभ्रे, बिभराञ्चक्रे; बिभराम्बभूव, बिभरामास) तं कुलपतिम् ऊचिरे।

३. क्या तू सारे गुरुकुल का पालन करेगा?

किं त्वं सकलं गुरुकुलं भर्तासि (भर्तासे; भरिष्यसि, भरिष्यसे)।

४. मैं इन सबका पालन करूँगा=अहम् एतान् सर्वान् भरिष्यामि (भरिष्ये)।

५. वे परिवार इन अनाथों का पालन करें।

ते परिवाराः एतान् अनाथान् बिभ्रतु (बिभ्रताम्)।

६. उस वृद्ध का पालन न तूने किया न तेरे पिता ने।

तं वृद्धं न त्वम् अबिभः (अबिभृथाः) न च तव पिता अबिभः (अबिभृत)।

७. हमको अपने पुत्रों का भरणपोषण स्वयं करना चाहिये, गुरुकुल क्यों करे?

वयं स्वपुत्रान् स्वयं बिभ्रियाम (बिभ्रीमहि), गुरुकुलं कथं बिभ्रीत (बिभ्रियात्)?

८. मैंने इस भानजे का पालन नहीं किया।

अहम् एतं भागिनेयं न अभार्षम् (अभृषि; अबिभरम्, अबिभ्रि)।

९. इन अध्ययनशून्य और पेटू छात्रों का पालन मत कर।

एतान् अध्ययनशून्यान् औदरिकान् च छात्रान् मा भार्षीः (मा भृथाः; मा स्म बिभः, मा स्म बिभृथाः)।

१०. यदि तू इन अन्धों का पालन करता तो पुण्य का भागी होता।

यदि त्वम् इमान् नेत्रहीनान् अभरिष्यः (अभरिष्यथाः) तर्हि पुण्यस्य भागी अभविष्यः।

(४) दा (डुदाञ्) दाने =देना [उभयपदी]

दा धातु के लट्, लोट्, लङ्, विधिलिङ् इन चार लकारों में कित् अथवा ङित् प्रत्यय (चाहे व्यञ्जनादि हो चाहे स्वरादि) परे रहने पर 'दा' के आ का लोप हो जाता है।[1] लोट् लकार म० पु० एक वचन (सि=हि) परे रहने पर 'दा' के आ को एकार आदेश होगा और अभ्यास (=धातुद्वित्व का पूर्वभाग) का लोप हो जायेगा।[2] लुङ् लकार में परस्मैपद में सिच् का लुक् हो जायेगा।[3] आत्मनेपद में 'दा' के आ को इकार आदेश होगा।[4]

परस्मैपद				आत्मनेपद			
लट्—	ददाति	दत्तः	ददति	लट्—	दत्ते	ददाते	ददते
	ददासि	दत्थः	दत्थ		दत्से	ददाथे	दद्ध्वे
	ददामि	दद्वः	दद्मः		ददे	दद्वहे	दद्महे
लिट्—	ददौ	ददतुः	ददुः	लिट्—	ददे	ददाते	ददिरे
लुट्—	दाता	दातारौ	दातारः	लुट्—	दाता	दातारौ	दातारः
लृट्—	दास्यति	दास्यतः	दास्यन्ति	लृट्—	दास्यते	दास्येते	दास्यन्ते
लोट्—	ददातु (दत्तात्)	दत्ताम्	ददतु	लोट्—	दत्ताम्	ददाताम्	ददताम्
	देहि (दत्तात्)	दत्तम्	दत्त		दत्स्व	ददाथाम्	दद्ध्वम्
	ददानि	ददाव	ददाम		ददै	ददावहै	ददामहै
लङ्—	अददात्	अदत्ताम्	अददुः	लङ्—	अदत्त	अददाताम्	अददत
	अददाः	अदत्तम्	अदत्त		अदत्थाः	अददाथाम्	अदद्ध्वम्
	अददाम्	अदद्व	अदद्म		अददि	अदद्वहि	अदद्महि
वि. लिङ्—	दद्यात्	दद्याताम्	दद्युः	वि. लिङ्—	ददीत	ददीयाताम्	ददीरन्
	दद्याः	दद्यातम्	दद्यात		ददीथाः	ददीयाथाम्	ददीध्वम्
	दद्याम्	दद्याव	दद्याम		ददीय	ददीवहि	ददीमहि
लुङ्—	अदात्	अदाताम्	अदुः	लुङ्—	अदित	अदिषाताम्	अदिषत
	अदाः	अदातम्	अदात		अदिथाः	अदिषाथाम्	अदिढ्वम्
	अदाम्	अदाव	अदाम		अदिषि	अदिष्वहि	अदिष्महि
लृङ्—	अदास्यत्	अदास्यताम्	अदास्यन्	लृङ्—	अदास्यत	अदास्येताम्	अदास्यन्त

१. श्नाभ्यस्तयोरातः (अष्टा.६.४.११२)
२. घ्वसोरेद्धावभ्यासलोपश्च (अष्टा० ६.४.११९)
३. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (अष्टा० २.४.७७)
४. स्थाघ्वोरिच्च (अष्टा० १.२.१७)

अभ्यास

१. वे अपनी चीजें किसी को नहीं देते=ते स्ववस्तूनि कस्मैचित् अपि न ददति (ददते)

२. पाण्डवों ने वेदपाठियों को गौएँ दीं=पाण्डवाः वेदपाठिभ्यः गाः ददुः (ददिरे)।

३. जैसे राम ने ब्राह्मण को गौएँ दीं, वैसे ही मैं भी तुम्हें गौएँ देता हूं।
यथा रामः ब्राह्मणाय गाः ददे (ददौ), तथा अहमपि तुभ्यं गाः ददे (ददामि)।

४. मित्र लोग इस पुस्तक के छपवाने के लिए धन जरूर देंगे।
मित्राणि अस्य पुस्तकस्य मुद्रापणाय धनम् अवश्यं दातारः (दास्यन्ति, दास्यन्ते)

५. तू कुछ कन्या गुरुकुल के लिये देदे=त्वं किञ्चित् कन्या-गुरुकुलाय देहि (दत्स्व)

६. जिसने कभी किसी को कुछ नहीं दिया, वह आज वेद-प्रचार के लिये हमें क्या देगा ?=यः कदापि कस्मैचिदपि किमपि न अददात् (अदत्त; अदात्, अदित; ददौ, ददे) सः अद्य वेदप्रचाराय अस्मभ्यं किं दास्यति ?

७. सब गृहस्थों को प्रतिदिन ब्रह्मचारियों को अन्न देना चाहिए।
सर्वे गृहाश्रमिणः प्रतिदिनं ब्रह्मचारिभ्यः अन्नं दद्युः (ददीरन्)

८. उन्होंने आज अपना सर्वस्व चित्तौड़गढ़ गुरुकुल को दे दिया।
ते अद्य निजं सर्वस्वं चित्तौड़गढ़गुरुकुलाय अदुः (अदिषत)

९. इस नशेबाज को कुछ मत दे, नशे में उड़ा देगा।
अस्मै मादकिने किमपि मा दाः (मा दिथाः; मा स्म ददाः, मा स्म दत्थाः), मदे नाशयिष्यति।

१०. यदि तू दान करता तो भगवान् भी तुझे देता।
यदि त्वं किञ्चिद् अदास्यः (अदास्यथाः) तर्हि परमेश्वरः अपि तुभ्यम् अदास्यत्/अदास्यत।

(५) धा (डुधाञ्) धारणपोषणयोः=धारण करना या पालन करना [उभय०]

धा धातु के भी आकार का लोप, एत्व तथा इकार आदि आदेश कार्य दा धातु के समान ही होंगे।

परस्मैपद				आत्मनेपद		
लट्—दधाति	धत्तः	दधति		लट्—धत्ते	दधाते	दधते
दधासि	धत्थः	धत्थ		धत्से	दधाथे	धद्ध्वे
दधामि	दध्वः	दध्मः		दधे	दध्वहे	दध्महे
लिट्—दधौ	दधतुः	दधुः		लिट्—दधे	दधाते	दधिरे
लुट्—धाता	धातारौ	धातारः		लुट्—धाता	धातारौ	धातारः
लृट्—धास्यति	धास्यतः	धास्यन्ति		लृट्—धास्यते	धास्येते	धास्यन्ते
लोट्—दधातु (धत्तात्)	धत्ताम्	दधतु		लोट्—धत्ताम्	दधाताम्	दधताम्

	धेहि (धत्तात्)	धत्तम्	धत्त	धत्स्व	दधाथाम्	धद्ध्वम्
	दधानि	दधाव	दधाम	दधै	दधावहै	दधामहै
लङ्—	अदधात्	अधत्ताम्	अदधुः	लङ्—अधत्त	अदधाताम्	अदधत
	अदधाः	अधत्तम्	अधत्त	अधत्थाः	अदधाथाम्	अधद्ध्वम्
	अदधाम्	अदध्व	अदध्म	अदधि	अदध्वहि	अदध्महि
वि. लिङ्—	दध्यात्	दध्याताम्	दध्युः	वि. लिङ्—दधीत	दधीयाताम्	दधीरन्
	दध्याः	दध्यातम्	दध्यात	दधीथाः	दधीयाथाम्	दधीध्वम्
	दध्याम्	दध्याव	दध्याम	दधीय	दधीवहि	दधीमहि
लुङ्—	अधात्	अधाताम्	अधुः	लुङ्—अधित	अधिषाताम्	अधिषत
	अधाः	अधातम्	अधात	अधिथाः	अधिषाथाम्	अधिढ्वम्
	अधाम्	अधाव	अधाम	अधिषि	अधिष्वहि	अधिष्महि
लृङ्—	अधास्यत्	अधास्यताम्	अधास्यन्	लृङ्—अधास्यत	अधास्येताम्	अधास्यन्त

धा धातु के अभ्यास वाक्य, सोपसर्ग धातुओं के प्रकरण में समझायेंगे ।

दिवादिगण

अब दिवादिगण की धातुओं का अभ्यास करायेंगे । दिवादिगण की धातुओं से लट्, लोट्, लङ् और वि० लिङ् में श्यन् (=य) विकरण आयेगा ।[1] य (=श्यन्) शित् होने से सार्वधातुक[2] और पित् न होने से ङिद्वत् माना जायेगा ।[3] शेष लकारों में पूर्ववत् सामान्य कार्य होंगे ।

(१) सिव् (षिवु) तन्तुसन्ताने=सीना [परस्मैपदी]

सिव् के उपधा के इकार को लट्, लोट्, लङ् और विधिलिङ् में दीर्घ ईकार हो जायेगा क्योंकि वहां ङित् हलादि प्रत्यय य (=श्यन्) परे है ।[4]

	लट्			लुट्	
सीव्यति	सीव्यतः	सीव्यन्ति	सेविता	सेवितारौ	सेवितारः
सीव्यसि	सीव्यथः	सीव्यथ	सेवितासि	सेवितास्थः	सेवितास्थ
सीव्यामि	सीव्यावः	सीव्यामः	सेवितास्मि	सेवितास्वः	सेवितास्मः
	लिट्			लृट्	
सिषेव	सिषिवतुः	सिषिवुः	सेविष्यति	सेविष्यतः	सेविष्यन्ति

१. दिवादिभ्यः श्यन् (अष्टा० ३.१.६९)
२. तिङ्शित् सार्वधातुकम् (अष्टा० ३.४.११३)
३. सार्वधातुकमपित् (अष्टा० १.२.४)
४. हलि च (अष्टा० ८.२.७७)

सेविष्यसि	सेविष्यथः	सेविष्यथ
सेविष्यामि	सेविष्यावः	सेविष्यामः

लोट्

सीव्यतु (सीव्यतात्)	सीव्यताम्	सीव्यन्तु
सीव्य (सीव्यतात्)	सीव्यतम्	सीव्यत
सीव्यानि	सीव्याव	सीव्याम

लङ्

असीव्यत्	असीव्यताम्	असीव्यन्
असीव्यः	असीव्यतम्	असीव्यत
असीव्यम्	असीव्याव	असीव्याम

वि० लिङ्

सीव्येत्	सीव्येताम्	सीव्येयुः
सीव्येः	सीव्येतम्	सीव्येत
सीव्येयम्	सीव्येव	सीव्येम

लुङ्

असेवीत्	असेविष्टाम्	असेविषुः
असेवीः	असेविष्टम्	असेविष्ट
असेविषम्	असेविष्व	असेविष्म

लृङ्

असेविष्यत्	असेविष्यताम्	असेविष्यन्
असेविष्यः	असेविष्यतम्	असेविष्यत
असेविष्यम्	असेविष्याव	असेविष्याम

अभ्यास

१. साधु मनुष्य अपनी चिन्ता नहीं करते, सुई स्वयं नंगी रहती है तथा औरों के कपड़े सीती है।
   साधवः निजार्थं न चिन्तयन्ति, सूचिका नग्निका सती अन्येषां वस्त्राणि सीव्यति
२. पहिले लोग पेड़ों की छाल के कपड़े सीते थे।
   पुरा जनाः वल्कलानां वस्त्राणि असीव्यन् (सिषिवुः, असेविषुः)।
३. यह दर्जी कल मेरे कपड़े सिलेगा=अयं सूचिकारः श्वः मे वस्त्राणि सेविता।
४. आज ये तो कपड़े सिलेंगे और वे गुरु की सेवा करेंगे।
   अद्य एते तु वस्त्राणि सेविष्यन्ति ते च गुरुं सेविष्यन्ते।
५. 'इसके घाव जल्दी सिल दे' डाक्टर ने कम्पाउण्डर से कहा।
   'अस्य व्रणान् सपदि सीव्य (सीव्याः)' इति चिकित्सकः उपचिकित्सकम् अब्रवीत् (अवोचत्)।
६. आज तूने जो जूते सिले हैं, वे तो मोहन के हैं।
   अद्य त्वं ये उपानहौ असेवीः ते तु मोहनस्य स्तः।
७. इसका कुर्ता मत सी, यह पैसे नहीं देगा।
   अस्य कञ्चुकं मा सेवीः (मा स्म सीव्यः), अयं मूल्यं न दास्यति।
८. यदि राजेश मेरे कपड़े सिल देता तो मैं भी बरात में जाता।
   यदि राजेशः मम वस्त्राणि असेविष्यत् तर्हि अहमपि वरयात्रायाम् अगमिष्यम्।
९. रात्रि में तुम्हें कपड़े नहीं सीने चाहियें, आंखें कमजोर होंगी।
   रात्रौ त्वं वस्त्राणि न सीव्येः नेत्रे निर्बले भविष्यतः।

(२) नृत् ('नृती) गात्र विक्षेपे'=नाचना [परस्मै०]

नृत् धातु के लृट् और लृङ् लकार में 'स्य' को विकल्प से इ (इट्) आगम होगा अतः दो दो रूप बनेंगे।[1]

लट्—नृत्यति नृत्यतः नृत्यन्ति
लिट्—ननर्त ननृततुः ननृतुः
लुट्—नर्तिता नर्तितारौ नर्तितारः
लृट्—(१) नर्त्स्यति नर्त्स्यतः नर्त्स्यन्ति
नर्त्स्यसि नर्त्स्यथः नर्त्स्यथ
नर्त्स्यामि नर्त्स्यावः नर्त्स्यामः
(२) नर्तिष्यति नर्तिष्यतः नर्तिष्यन्ति
नर्तिष्यसि नर्तिष्यथः नर्तिष्यथ
नर्तिष्यामि नर्तिष्यावः नर्तिष्यामः
लोट् नृत्यतु(नृत्यतात्) नृत्यताम् नृत्यन्तु
लङ्—अनृत्यत् अनृत्यताम् अनृत्यन्

वि० लिङ्—नृत्येत् नृत्येताम् नृत्येयुः
लुङ्—अनर्तीत् अनर्तिष्टाम् अनर्तिषुः
अनर्तीः अनर्तिष्टम् अनर्तिष्ट
अनर्तिषम् अनर्तिष्व अनर्तिष्म
लृङ् (१) अनर्त्स्यत् अनर्त्स्यताम् अनर्त्स्यन्
अनर्त्स्यः अनर्त्स्यतम् अनर्त्स्यत
अनर्त्स्यम् अनर्त्स्याव अनर्त्स्याम
(२)अनर्तिष्यत् अनर्तिष्यताम् अनर्तिष्यन्
अनर्तिष्यः अनर्तिष्यतम् अनर्तिष्यत
अनर्तिष्यम् अनर्तिष्याव अनर्तिष्याम

अभ्यास

१. दस हजार के दान की बात सुन कर, ये सब नाचते हैं।
दशानां सहस्राणां दानस्य वार्तां निशम्य, एते नृत्यन्ति।

२. शूर्पणखा राम को देखकर नाचने लगी=शूर्पणखा रामं दृष्ट्वा ननर्त।

३. कल वसन्त पंचमी है, वे सब पीले कपड़े पहनकर नाचेंगी।
श्वः वसन्तपञ्चमी वर्तिता, ताः पीतानि वासांसि परिधाय नर्तितारः।

४. आज दशहरा है, ये वनवासी मस्त होकर नाचेंगे।
अद्य विजयादशमी वर्त्तते, एते वनवासिनः प्रहृष्टाः भूत्वा नर्त्स्यन्ति/नर्तिष्यन्ति।

५. आज मेरी ननंद का विवाह है, हे सहेलियो! तुम सब नाचो।
अद्य मम ननान्दुः विवाहः अस्ति, भो सख्यः! यूयं नृत्यत।

६. ये नर्तकियाँ जैसा कल नाचीं वैसा ही आज भी नाचीं।
इमाः नर्तक्यः यथा ह्यः अनृत्यन् तथैव अद्यापि अनर्तिषुः।

७. किसी को भी असभ्यता से नाचना चाहिये क्या?
कोऽपि असभ्यतापूर्वकं नृत्येत् किमु?

८. आज शोक का दिन है, आज मत नाचो।
अद्य शोकदिवसः अस्ति, अद्य मा नर्तीः (मा स्म नृत्यः)

९. यदि ये उत्तीर्ण हो गये होते तो अवश्य नाचते।
यदि एते उत्तीर्णाः अभविष्यन, तर्हि अवश्यम् अनर्त्स्यन् (अनर्तिष्यन्)।

---

१. से ऽसिचि कृतचृतछृदतृदनृतः। (अष्टा० ७.२.५७)

(३) पुष् (पुष्टौ)=पुष्ट होना [परस्मै०] अकर्मक

पुष् धातु के लुङ् लकार में च्लि के स्थान पर अङ् (=अ) आदेश होगा।[1] इसी प्रकार दिवादिगण की प्रायः ६४ धातुओं के लुङ् में परस्मैपद में च्लि के स्थान पर अङ् होगा, उनमें से—तुष्, श्लिष्, क्रुध्, सिध्, नश्, द्रुह्, तृप्, मुह्, स्निह्, शम्, हृष्, कुप् ये धातुएँ यहाँ दी जा रही हैं।

लट्—पुष्यति	पुष्यतः	पुष्यन्ति
लिट्—पुपोष	पुपुषतुः	पुपुषुः
लुट्—पोष्टा	पोष्टारौ	पोष्टारः
पोष्टासि	पोष्टास्थः	पोष्टास्थ
पोष्टास्मि	पोष्टास्वः	पोष्टास्मः
लृट्—पोक्ष्यति	पोक्ष्यतः	पोक्ष्यन्ति
पोक्ष्यसि	पोक्ष्यथः	पोक्ष्यथ
पोक्ष्यामि	पोक्ष्यावः	पोक्ष्यामः

लोट्—पुष्यतु (पुष्यतात्)	पुष्यताम्	पुष्यन्तु
पुष्य (पुष्यतात्)	पुष्यतम्	पुष्यत
पुष्याणि	पुष्याव	पुष्याम
लङ्—अपुष्यत्	अपुष्यताम्	अपुष्यन्
वि. लिङ्—पुष्येत्	पुष्येताम्	पुष्येयुः
लुङ्—अपुषत्	अपुषताम्	अपुषन्
अपुषः	अपुषतम्	अपुषत
अपुषम्	अपुषाव	अपुषाम
लृङ्—अपोक्ष्यत्	अपोक्ष्यताम्	अपोक्ष्यन्

अभ्यास

१. इस मेरी दवाई से सब पुष्ट हो जाते हैं=अनेन मम अगदेन सर्वे पुष्यन्ति।

२. अयोध्या में रहते हुए हनुमान् हृष्ट पुष्ट हो गया था।
अयोध्यायां वसन् हनुमान् पुपोष।

३. तुम जल्दी पुष्ट हो जाओगे=त्वं शीघ्रं पोष्टासि (पोक्ष्यसि)

४. काञ्चन भस्म खाओ और शीघ्र पुष्ट हो जाओ।
काञ्चनभस्म सेवध्वं सपदि च पुष्यत (पुष्येत)।

५. जितने हम गुरुकुल में पुष्ट हुए उतने कहीं नहीं हुए।
यादृशाः वयं गुरुकुले अपुष्याम (अपुषाम) तादृशाः न क्वापि अन्यत्र।

६. हे पहलवान! इतना पुष्ट मत हो कि चलना फिरना कठिन हो जाय।
भो मल्ल! एतादृशः मा पुषः (मा स्म पुष्यः) यद् विहरणं ते कठिनं स्यात्।

७. यदि वे दवाई खाते तो पुष्ट हो जाते।
यदि ते औषधम् अभक्षयिष्यन् तर्हि अपोक्ष्यन्।

(४) तुष् (प्रीतौ)=प्रसन्न होना, सन्तुष्ट होना [परस्मैपदी]

लट्—तुष्यति	तुष्यतः	तुष्यन्ति
लिट्—तुतोष	तुतुषतुः	तुतुषुः
लुट्—तोष्टा	तोष्टारौ	तोष्टारः

लृट्—तोक्ष्यति	तोक्ष्यतः	तोक्ष्यन्ति
लोट्—तुष्यतु (तुष्यतात्)	तुष्यताम्	तुष्यन्तु

---

१. पुषादिद्युताद्य्लृदितः परस्मैपदेषु (अष्टा० ३.१.५५)

लङ्—अतुष्यत्	अतुष्यताम्	अतुष्यन्		लुङ्—अतुषत्	अतुषताम्	अतुषन्
वि०लिङ्—तुष्येत्	तुष्येताम्	तुष्येयुः		लृङ् अतोक्ष्यत्	अतोक्ष्यताम्	अतोक्ष्यन्

अभ्यास

१. ये कभी सन्तुष्ट नहीं होते=एते कदापि न तुष्यन्ति ।

२. पहिले शिष्यों की सेवा से गुरु सन्तुष्ट हो जाते थे ।
पुरा शिष्याणां सेवया गुरवः तुतुषुः (अतुषन्, अतुष्यन्) ।

३. आप कुछ दीजिये, वे प्रसन्न हो जायेंगे ।
भवान् किमपि ददातु ते तोष्टारः (तोक्ष्यन्ति) ।

४. अरे ! थोड़े से पैसों से सन्तुष्ट मत हो जाना ।
अयि ! स्तोकेन धनेन मा तुषः (मा स्म तुष्यः) ।

५. अब तुम्हें सन्तुष्ट हो जाना चाहिये=अधुना यूयं तुष्यत (तुष्येत)

६. ये बड़े लोभी हैं, न ये आज सन्तुष्ट होंगे न कल ।
एते अतीव लोभिनः सन्ति, इमे नाद्य तोक्ष्यन्ति न च श्वः तोष्टारः ।

७. यदि तू मेरी सेवा न करता तो मैं सन्तुष्ट कैसे होता ।
यदि त्वं मां न असेविष्यथाः तर्हि कथम् अहम् अतोक्ष्यम् ।

८. कल तुम इतनी भेंटों से भी सन्तुष्ट नहीं हुए थे, आज तो वचन से ही सन्तुष्ट हो गये=ह्यः त्वम् एतावद्भिः उपायनैः अपि न अतुष्यः, अद्य तु वचनमात्रेण अपि अतुषः ।

(५) श्लिष् (आलिङ्गने)=आलिङ्गन करना [परस्मै०]

यह धातु अधिकतर आलिङ्गन अर्थ में ही आती है किन्तु कभी-कभी सटने अथवा चिपकने आदि अर्थों में भी इसका प्रयोग होता है । इस अर्थभेद के कारण लुङ् लकार में रूप में भी भेद होगा । जब आलिङ्गन अर्थ ही होगा तब तो च्लि के स्थान पर क्स (स) आदेश होगा[1] और 'अश्लिक्षत्' आदि रूप बनेंगे; किन्तु जब चिपकना आदि अर्थ होगा तब च्लि के स्थान पर पूर्ववत् 'अङ्' (अ) आदेश ही होगा । जैसे 'अश्लिषत् जतु काष्ठम्'=लाख लकड़ी पर चिपक गई ।

लट्—श्लिष्यति	श्लिष्यतः	श्लिष्यन्ति
लिट्—शिश्लेष	शिश्लिषतुः	शिश्लिषुः
लुट्—श्लेष्टा	श्लेष्टारौ	श्लेष्टारः
लृट्—श्लेक्ष्यति	श्लेक्ष्यतः	श्लेक्ष्यन्ति
लोट्—श्लिष्यतु, श्लिष्यतात्	शिष्यताम्	श्लिष्यन्तु
लङ्—अश्लिष्यत्	अश्लिष्यताम्	अश्लिष्यन्

वि०लिङ्—श्लिष्येत्	श्लिष्येताम्	श्लिष्येयुः
लुङ्-(१)अश्लिक्षत्	अश्लिक्षताम्	अश्लिक्षन्
अश्लिक्षः	अश्लिक्षतम्	अश्लिक्षत
अश्लिक्षम्	अश्लिक्षाव	अश्लिक्षाम
(२)अश्लिषत्	अश्लिषताम्	अश्लिषन्
अश्लिषः	अश्लिषतम्	अश्लिषत
अश्लिषम्	अश्लिषाव	अश्लिषाम
लृङ्—अश्लेक्ष्यत्	अश्लेक्ष्यताम्	अश्लेक्ष्यन्

१. श्लिष आलिङ्गने (अष्टा० ३.१.४६)

अभ्यास

१. विजय की खुशी में मित्र आपस में आलिङ्गन करते हैं।
विजयोल्लासे मित्राणि परस्परम् आश्लिष्यन्ति।

२. राम ने सुग्रीव का आलिङ्गन किया = रामः सुग्रीवं शिश्लेष (अश्लिष्यत्, अश्लिक्षत्)

३. कल इसका पुत्र विदेश से लौटेगा, यह उसका आलिङ्गन करेगी और बहुत सन्तुष्ट होगी।

श्वः अस्याः सुतः विदेशात् निर्वर्तिता, इयं तम् आश्लेष्टा सुतरां तोष्टा च।

४. आज ये दोनों बहिनें अपनी छोटी बहिनों का आलिङ्गन करेंगी।
अद्य एते भगिन्यौ स्वाः कनिष्ठाः भगिनीः श्लेक्ष्यन्ति।

५. मैं अपने शूरवीर पुत्र का आलिङ्गन क्यों न करूँ?
अहं निजं शूरं पुत्रं कथं न आश्लिष्याणि?

६. इस धोखेबाज का आलिङ्गन मत कर।
इमं विश्वासघातकं मा श्लिक्षः (मा स्म श्लिष्यः)।

७. कल जीतने पर इसने अपने पुत्र को सीने से लगा लिया, पर आज हारने पर नहीं लगाया।

ह्यः विजये सति अयं निजं सुतम् अश्लिष्यत्, किन्तु अद्य पराजये सति तं न अश्लिक्षत्।

८. यदि तू मेरा आलिङ्गन न करता, तो मैं तुझे नहीं पहिचानने पाता।

यदि त्वं मां न अश्लेक्ष्यः, तर्हि अहं त्वां न पर्यचेष्यम्।

(६) क्रुध् (क्रोधे) = क्रोध करना [परस्मै०]

लट् —	क्रुध्यति	क्रुध्यतः	क्रुध्यन्ति
लिट् —	चुक्रोध	चुक्रुधतुः	चुक्रुधुः
लुट् —	क्रोद्धा	क्रोद्धारौ	क्रोद्धारः
लृट् —	क्रोत्स्यति	क्रोत्स्यतः	क्रोत्स्यन्ति
लोट्	क्रुध्यतु, क्रुध्यतात्	क्रुध्यताम्	क्रुध्यन्तु
लङ् —	अक्रुध्यत्	अक्रुध्यताम्	अक्रुध्यन्
वि. लिङ् —	क्रुध्येत्	क्रुध्येताम्	क्रुध्येयुः
लुङ् —	अक्रुधत्	अक्रुधताम्	अक्रुधन्
लृङ्	अक्रोत्स्यत्	अक्रोत्स्यताम्	अक्रोत्स्यन्

अभ्यास

१. आप सब पर क्रोध करते हैं = भवान् सर्वेभ्यः[1] क्रुध्यति।

---

१. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (अष्टा.१.४.३७) चतुर्थी सम्प्रदाने (अष्टा. २.३.१३)॥ क्रोध, द्रोह, ईर्ष्या और असूया अर्थ वाली धातुओं के प्रयोग में जिस पर क्रोध, द्रोह आदि किया जाय उसकी सम्प्रदान संज्ञा होती है और अतएव उसमें चतुर्थी विभक्ति लगती है॥ यदि क्रोधार्थक और द्रोहार्थक धातु से पूर्व उपसर्ग होगा तो वहां कर्म संज्ञा होगी और द्वितीया विभक्ति होगी। क्रुधद्रुहोरुप-सृष्टयोः कर्म। अष्टा १.४.३८.

२. परशुराम ने कर्ण पर क्रोध किया=परशुरामः कर्णाय चुक्रोध (अक्रुध्यत्, अक्रुधत्)

३. तू किस पर क्रोध करेगा, वे तो घर चले गये।
त्वं कस्मै क्रोद्धासि (क्रोत्स्यसि) ते तु गृहम् अगमन्।

४. मैं उस पर क्रोध क्यों करूँ?=अहं तस्मै कथं क्रुध्यानि (क्रुध्येयम्)।

५. किसी पर क्रोध मत कर=कस्मैचिद् अपि मा क्रुधः (मा स्म क्रुध्यः)।

६. यदि तू दुर्बलों पर क्रोध करता तो लोग तेरी निन्दा करते।
यदि त्वं दुर्बलेभ्यः अक्रोत्स्यः तर्हि जनाः त्वाम् अनिन्दिष्यन्।

(७) सिध् (षिधु) संराद्धौ [=सिद्ध होना] परस्मै०

लट्	सिध्यति	सिध्यतः	सिध्यन्ति
लिट्—	सिषेध	सिषिधतुः	सिषिधुः
लुट्—	सेद्धा	सेद्धारौ	सेद्धारः
लृट्—	सेत्स्यति	सेत्स्यतः	सेत्स्यन्ति
लोट्—	सिध्यतु / सिध्यतात्	सिध्यताम्	सिध्यन्तु
लङ्—	असिध्यत्	असिध्यताम्	असिध्यन्
वि. लिङ्—	सिध्येत्	सिध्येताम्	सिध्येयुः
लुङ्	असिधत्	असिधताम्	असिधन्
लृङ्—	असेत्स्यत्	असेत्स्यताम्	असेत्स्यन्

अभ्यास

१. मूर्खों के काम सिद्ध नहीं होते=मूर्खाणां कार्याणि न सिध्यन्ति।

२. हनुमान् की सहायता से राम के सब कार्य सिद्ध हुए।
हनूमतः साहाय्येन रामस्य सर्वाणि कार्याणि सिषिधुः।

३. परशुराम ने कर्ण से कहा—तेरा कोई कार्य सिद्ध मत हो।
परशुरामः कर्णम् अवादीत् (उवाद, अवदत्)—तव किमपि कार्यं मा सिधत् (मा स्म सिध्यत्)।

४. तेरे सब कार्य कल सिद्ध हो जायेंगे—तव सर्वाणि कार्याणि श्वः सेद्धारः।

५. मेरा कार्य आज ही सिद्ध होगा=मम कार्यम् अद्यैव सेत्स्यति।

६. ईश्वर करे तेरे सब कार्य सिद्ध हों।
ईश्वरकृपया तव सर्वाणि कार्याणि सिध्यन्तु।

७. तेरे क्रोध के कारण न तो कल कार्य सिद्ध हुआ न आज।
तव क्रोधस्य हेतोः[1] न ह्यः कार्यम् असिध्यत् नापि अद्य असिधत्।

८. यदि तू यहाँ आता तो तेरे सारे कार्य सिद्ध हो जाते।
यदि त्वम् अत्र आगमिष्यः तर्हि तव सर्वाणि कार्याणि असेत्स्यन्।

(८) नश् (णश) अदर्शने=नष्ट होना, खोना [परस्मैपदी]

नश् धातु के लुट्, लृट्, और लृङ् में विकल्प से इ (इट् आगम) होगा।[2]

---

१. षष्ठी हेतुप्रयोगे (अष्टा.२.३.२६) २. रधादिभ्यश्च (अष्टा.७.२.४५)

अतः इन लकारों में दो-दो रूप बनेंगे। यही बात तृप्, द्रुह्, मुह्, स्निह् आदि धातुओं के रूपों में भी समझनी चाहिये।

लट्—नश्यति नश्यतः नश्यन्ति
लिट्—ननाश नेशतुः नेशुः
लुट्-(१) नशिता नशितारौ नशितारः
नशितासि नशितास्थः नशितास्थ
नशितास्मि नशितास्वः नशितास्मः
(२)[1] नंष्टा नंष्टारौ नंष्टारः
नंष्टासि नंष्टास्थः नंष्टास्थ
नंष्टास्मि नंष्टास्वः नंष्टास्मः
लृट्-(१) नशिष्यति नशिष्यतः नशिष्यन्ति
नशिष्यसि नशिष्यथः नशिष्यथ
नशिष्यामि नशिष्यावः नशिष्यामः
(२) नंक्ष्यति नंक्ष्यतः नंक्ष्यन्ति
नंक्ष्यसि नंक्ष्यथः नंक्ष्यथ
नंक्ष्यामि नंक्ष्यावः नंक्ष्यामः
लोट्-नश्यतु (नश्यतात्) नश्यताम् नश्यन्तु
लङ्—अनश्यत् अनश्यताम् अनश्यन्
वि. लिङ्—नश्येत् नश्येताम् नश्येयुः
लुङ्—अनशत् अनशताम् अनशन्
लृङ् (१) अनशिष्यत् अनशिष्यताम् अनशिष्यन्
(२) अनङ्क्ष्यत् अनङ्क्ष्यताम् अनङ्क्ष्यन्

अभ्यास

१. जो न देता है और न भोगता है, उसका धन नष्ट हो जाता है।
यो न ददाति न भुङ्क्ते, तस्य धनं नश्यति।

२. अति अभिमान से रावण नष्ट हो गया=अतिदर्पात् रावणः ननाश।

३. तेरे आदमी कहाँ खो गये=तव मनुष्याः क्व अनश्यन् (अनशन्)?

४. तेरा धन नष्ट हो जायेगा=तव धनं नंष्टा (नशिता; नशिष्यति, नङ्क्ष्यति)।

५. किसी का धन नष्ट क्यों हो=कस्यचिद् अपि धनं कथं नश्यतु (नश्येत्)।

६. यदि तू आज मेरा कहना नहीं मानता तो तेरा धन नष्ट हो जाता।
यदि त्वम् अद्य मम वचनं न अमंस्यथाः तर्हि त्वदीयं धनम् अनङ्क्ष्यत् (अनशिष्यत्)

७. तेरा प्रभाव कभी नष्ट मत हो।
त्वदीयः प्रभावः कदापि न नश्यतु।

८. मैं नहीं चाहता कि तुम्हारा रोग नष्ट न हो।
नाहं कामये यत् तव रोगः मा नशत् (मा स्म नश्यत्)।

---

१. लुट्, लृट् और लृङ् में जिस पक्ष में इट् नहीं होगा वहाँ 'मस्जिनशोर्झलि' (अष्टा. ७.१.६०) से 'नश्' के मध्य में न् (नुम्) होगा और न् को अनुस्वार (नश्चापदा० अष्टा. ८.३.२४)।

(९) द्रुह (जिघांसायाम्)=द्रोह करना [परस्मै०]

लट्—द्रुह्यति द्रुह्यतः द्रुह्यन्ति

लिट्—दुद्रोह दुद्रुहतुः दुद्रुहुः

लुट्—[1] (१) द्रोग्धा द्रोग्धारौ द्रोग्धारः

(२) द्रोढा द्रोढारौ द्रोढारः

(३) द्रोहिता द्रोहितारौ द्रोहितारः

लृट् (१)[2] ध्रोक्ष्यति ध्रोक्ष्यतः ध्रोक्ष्यन्ति

(२) द्रोहिष्यति द्रोहिष्यतः द्रोहिष्यन्ति

लोट्—द्रुह्यतु, द्रुह्यतात् द्रुह्यताम् द्रुह्यन्तु

लङ्—अद्रुह्यत् अद्रुह्यताम् अद्रुह्यन्

वि. लिङ्—द्रुह्येत् द्रुह्येताम् द्रुह्येयुः

लुङ्—अद्रुहत् अद्रुहताम् अद्रुहन्

लृङ्—(१)[2] अध्रोक्ष्यत् अध्रोक्ष्यताम् अध्रोक्ष्यन्

(२) अद्रोहिष्यत् अद्रोहिष्यताम् अद्रोहिष्यन्

अभ्यास

१. सज्जन किसी से द्रोह नहीं करते=सज्जनाः न कस्मैचिदपि द्रुह्यन्ति ।

२. राक्षसों ने देवताओं से द्रोह किया=राक्षसाः देवेभ्यः दुद्रुहुः ।

३. बच के रहना, ये तुम से द्रोह करेंगे ।

सावहितो भव, एते तुभ्यं द्रोढारः (द्रोग्धारः, द्रोहितारः) द्रोहिष्यन्ति, ध्रोक्ष्यन्ति ।

४. विद्यार्थी को किसी से द्रोह नहीं करना चाहिए ।

विद्यार्थी कस्मैचिद् अपि न द्रुह्येत् (द्रुह्यतु) ।

५. गुरुजनों से कभी द्रोह मत कर=गुरुजनेभ्यः कदापि मा द्रुहः (मा स्म द्रुह्यः) ।

६. यदि ये आचार्य से द्रोह न करते तो विद्या पाते ।

यदि एते आचार्याय न अद्रोहिष्यन् (अध्रोक्ष्यन्) तर्हि विद्याम् अलप्स्यन्त ।

(१०) तृप् (प्रीणने)=तृप्त होना तथा तृप्त करना [परस्मै०]

तृप् धातु अकर्मक भी है और सकर्मक भी। 'स्वयं तृप्त होना' तथा 'दूसरों को तृप्त करना' इन दोनों ही अर्थों में तृप् का प्रयोग होता है[3]। लुट्, लृट्, और लृङ् तीनों लकारों में पूर्ववत् विकल्प से इट् आगम होगा। अनिट् (=इट् रहित) पक्ष में

---

१. लुट् में जब इट् नहीं होगा उस पक्ष में ('वा द्रुहमुहष्णुहष्णिहाम्' अष्टा.८.२.३३ से) द्रुह के ह् को विकल्प से घ् होगा और 'द्रोग्धा' आदि रूप बनेंगे। एक पक्ष में ह् को ढ् होगा और 'द्रोढा' आदि रूप बनेंगे। इट् के पक्ष में 'द्रोहिता' आदि।

२. लृट् और लृङ् में अनिट् पक्ष में स्य परे रहने पर द्रुह के द् को ध् होगा। (एकाचो बशो० अष्टा. ८.२.३७)

३. "तृप प्रीणने ॥ इह प्रीणनं तृप्तिस्तर्पणं च । दृश्यते चोभयथा । 'तृप्यन्तु भवन्तः,' 'पितृनतार्प्सीत् सममंस्त बन्धून्' इति" माधवीय-धातुवृत्तिः (दिवादि०)

विकल्प से धातु के स्वर से बाद 'अ' (=अम्) आगम होगा।[1] और ऋ को र् हो जायेगा अर्थात् 'त्रप्' बन जायेगा, अतः तीन प्रकार के रूप बनेंगे। लुङ् में च्लि के स्थान पर यथापूर्व अङ् (=अ) तो होगा ही, पक्ष में सिच् भी होगा।[2] जब सिच् (=स्) होगा तब एक पक्ष में इट् (=इ) आगम होगा।[3] सिच् रहने पर जब इडागम नहीं होगा, तब लुट् आदि लकारों के समान विकल्प से धातु को अम् (=अ) आगम होगा; इस प्रकार लुङ् लकार में कुल चार प्रकार के रूप बनेंगे।

लट्—तृप्यति तृप्यतः तृप्यन्ति

लिट्—ततर्प ततृपतुः ततृपुः

लुट् (१) तर्पिता तर्पितारौ तर्पितारः
तर्पितासि तर्पितास्थः तर्पितास्थ
तर्पितास्मि तर्पितास्वः तर्पितास्मः

(२) त्रप्ता त्रप्तारौ त्रप्तारः
त्रप्तासि त्रप्तास्थः त्रप्तास्थ
त्रप्तास्मि त्रप्तास्वः त्रप्तास्मः

(३) तर्प्ता तर्प्तारौ तर्प्तारः
तर्प्तासि तर्प्तास्थः तर्प्तास्थ
तर्प्तास्मि तर्प्तास्वः तर्प्तास्मः

लृट्—(१) तर्पिष्यति तर्पिष्यतः तर्पिष्यन्ति
तर्पिष्यसि तर्पिष्यथः तर्पिष्यथ
तर्पिष्यामि तर्पिष्यावः तर्पिष्यामः

(२) त्रप्स्यति त्रप्स्यतः त्रप्स्यन्ति
त्रप्स्यसि त्रप्स्यथः त्रप्स्यथ
त्रप्स्यामि त्रप्स्यावः त्रप्स्यामः

(३) तर्प्स्यति तर्प्स्यतः तर्प्स्यन्ति
तर्प्स्यसि तर्प्स्यथः तर्प्स्यथ
तर्प्स्यामि तर्प्स्यावः तर्प्स्यामः

लोट्—तृप्यतु / तृप्यतात् तृप्यताम् तृप्यन्तु

लङ्—अतृप्यत् अतृप्यताम् अतृप्यन्

वि० लिङ्—तृप्येत् तृप्येताम् तृप्येयुः

लुङ्—(१) अतृपत् अतृपताम् अतृपन्
अतृपः अतृपतम् अतृपत
अतृपम् अतृपाव अतृपाम

(२) अतर्पीत् अतर्पिष्टाम् अतर्पिषुः
अतर्पीः अतर्पिष्टम् अतर्पिष्ट
अतर्पिषम् अतर्पिष्व अतर्पिष्म

(३) अत्राप्सीत् अत्राप्ताम् अत्राप्सुः
अत्राप्सीः अत्राप्तम् अत्राप्त
अत्राप्सम् अत्राप्स्व अत्राप्स्म

(४) अतार्प्सीत् अतार्प्ताम् अतार्प्सुः
अतार्प्सीः अतार्प्तम् अतार्प्त
अतार्प्सम् अतार्प्स्व अतार्प्स्म

लृङ्—(१) अतर्पिष्यत् अतर्पिष्यताम् अतर्पिष्यन्
अतर्पिष्यः अतर्पिष्यतम् अतर्पिष्यत
अतर्पिष्यम् अतर्पिष्याव अतर्पिष्याम

(२) अत्रप्स्यत् अत्रप्स्यताम् अत्रप्स्यन्
अत्रप्स्यः अत्रप्स्यतम् अत्रप्स्यत
अत्रप्स्यम् अत्रप्स्याव अत्रप्स्याम

(३) अतर्प्स्यत् अतर्प्स्यताम् अतर्प्स्यन्
अतर्प्स्यः अतर्प्स्यतम् अतर्प्स्यत
अतर्प्स्यम् अतर्प्स्याव अतर्प्स्याम

---

१. अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् (अष्टा० ६.१.५९)।

२. स्पृशमृशकृषतृपदृपां सिज् वा वक्तव्यः (वार्त्तिक) [अष्टा० ३.१.४४]

३. रधादिभ्यश्च (अष्टा० ७.२.४५)

अभ्यास

१. ब्राह्मण खीर से तृप्त होते हैं=ब्राह्मणाः पायसान्नेन तृप्यन्ति ।

२. यह गृहस्थ प्रतिदिन अपने वृद्ध माता पिता को अन्नादि से तृप्त करता है ।
अयं गृहस्थः प्रत्यहं स्वौ वृद्धौ पितरौ अन्नादिना तृप्यति ।

३. ऋषियों के प्रवचन सुनकर जनक तृप्त हुए और और फिर उन्होंने धनादि से विद्वानों को तृप्त किया ।
ऋषीणां प्रवचनानि श्रुत्वा जनकः ततर्प, तदनन्तरं च सः धनादिभिः विदुषः ततर्प ।

४. कल यह यजमान ऋत्विजों को मोदक खिलाकर तृप्त करेगा ।
श्वः अयं यजमानः ऋत्विजः मोदकभोजनेन तर्पिता (त्रप्ता, तर्प्ता)

५. परसों गुरुजी का व्याख्यान है, क्या हम एक दिन के व्याख्यान से तृप्त हो जायेंगे ।
परश्वः गुरोः व्याख्यानं भविता, किं वयम् एकाहस्य प्रवचनेन तर्पितास्मः (त्रप्तास्मः, तर्प्तास्मः) ?

६. आज हम इन छात्रों को पुए खिलाकर तृप्त करेंगे, किन्तु क्या ये केवल मीठे से तृप्त हो जायेंगे ?
अद्य वयम् एतान् छात्रान् अपूपभोजनेन तर्पिष्यामः (त्रप्स्यामः, तर्प्स्यामः) किन्तु किमेते मिष्टान्नमात्रेण तर्पिष्यन्ति (त्रप्स्यन्ति, तर्प्स्यन्ति)

७. हे वृद्ध पितरजनो ! आप लोग खूब खीर खाओ और तृप्त होओ ।
हे वृद्धाः पितृजनाः ! भवन्तः पायसान्नं सुतरां खादन्तु तृप्यन्तु च ।

८. हे पुत्र ! इन दादा-दादी को नित्य सेवा से तृप्त किया कर ।
हे पुत्र ! इमं पितामहम् इमां पितामहीं च नित्यसेवया तृप्य ।

९. बढ़िया भोजन से हमें स्वयं ही तृप्त नहीं होना चाहिये अपितु सबको तृप्त करना चाहिये ।
उत्तमाशनेन वयं स्वयमेव न तृप्येम, अपितु सर्वान् तृप्येम ।

१०. ये लोग कल स्वादिष्ठ व्यञ्जन से भी तृप्त नहीं हुए थे, तो आज के शाक से कैसे तृप्त हो गये ?
एते ह्यः स्वादिष्ठेन व्यञ्जनेन अपि न अतृप्यन्, तर्हि अद्यतनेन शाकेन कथम् अतृपन् (अतर्पिषुः, अत्राप्सुः, अतार्प्सुः) ?

११. कल हमने इन विद्वानों को तृप्त किया था, आज इनके बच्चों को तृप्त किया ।

ह्यः वयम् एतान् विदुषः अतृप्याम, अद्य एतेषाम् अपत्यानि अतृपाम (अतर्पिष्म, अत्राप्स्म, अताप्स्म)।

१२. यदि मैं तुम्हें रसगुल्ले खिलाता तो तुम लोग तृप्त हो जाते।
यद्यहं युष्मान् रसगोलान् अभोजयिष्यं तर्हि यूयम् अतर्पिष्यत (अत्रप्स्यत, अतप्स्यत)।

१३. यदि मेरे पास खूब धन होता, तो मैं सब विद्वानों को तृप्त कर देता।
यदि अहं पुष्कलं धनम् अधारयिष्यं तर्हि सर्वान् विपश्चितः अतर्पिष्यम् (अत्रप्स्यम्, अतप्स्यम्)।

१४. कामो के उपभोग से अपनी इन्द्रियों को तृप्त न करो।
कामानाम् उपभोगेन निजेन्द्रियाणि मा तृपत [मा तर्पिष्ट, मा त्राप्त, मा ताप्त, मा स्म तृप्यत]।

(११) मुह् (वैचित्ये) बेहोश होना, मोहित होना [परस्मै०]

मुह् धातु के लुट् लकार में द्रुह् के समान तीन प्रकार के रूप बनेंगे तथा लृट् और लृङ् में दो प्रकार के।

लट्—	मुह्यति	मुह्यतः	मुह्यन्ति
लिट्—	मुमोह	मुमुहतुः	मुमुहुः
लुट्—	[१] मोहिता	मोहितारौ	मोहितारः
	[२] मोग्धा	मोग्धारौ	मोग्धारः
	[३] मोढा	मोढारौ	मोढारः
लृट्—	(१) मोहिष्यति	मोहिष्यतः	मोहिष्यन्ति
	[२] मोक्ष्यति	मोक्ष्यतः	मोक्ष्यन्ति
लोट्—	मुह्यतु / मुह्यतात्	मुह्यताम्	मुह्यन्तु
लङ्—	अमुह्यत्	अमुह्यताम्	अमुह्यन्
वि० लिङ्—	मुह्येत्	मुह्येताम्	मुह्येयुः
लुङ्—	अमुहत्	अमुहताम्	अमुहन्
	अमुहः	अमुहतम्	अमुहत
	अमुहम्	अमुहाव	अमुहाम
लृङ्—	[१] अमोहिष्यत्	अमोहिष्यताम्	अमोहिष्यन्
	[२] अमोक्ष्यत्	अमोक्ष्यताम्	अमोक्ष्यन्

अभ्यास

१. धन से सब मोहित हो जाते हैं=धनेन सर्वे मुह्यन्ति।

२. ब्राह्मण धूर्तों की चिकनी चुपड़ी बातों से मोहित हुआ और पशु को छोड़कर चला गया।

ब्राह्मणः धूर्तानाम् उपात्तरम्यैः वचोभिः मुमोह [अमुह्यत्, अमुहत्] पशुं परित्यज्य च जगाम [अगच्छत्, अगमत्]।

३. मेघनाद की शक्ति से लक्ष्मण युद्ध के मैदान में बेहोश हो गया।
मेघनादस्य शक्त्या लक्ष्मणः समराङ्गणे मुमोह।

४. तेरी बात सुनकर वह मोहित हो जायेगा।
तव वार्तां निशम्य स मोहिता [मोढा, मोग्धा; मोहिष्यति, मोक्ष्यति]

५. मैं मोहित क्यों होऊँ=अहं कथं मुह्यानि [मुह्येयम्] ?

६. यदि तू उदयपुर का दृश्य देखता, तो मोहित हो जाता।
यदि त्वम् उदयपुरस्य दृश्यम् अद्रक्ष्यः, तर्हि अमोहिष्यः [अमोक्ष्यः]।

७. अरे ! तू स्त्रियों के कटाक्षों से मोहित मत हो।
अयि ! त्वं रमणीकटाक्षैः मा मुहः [मा स्म मुह्यः]।

(१२) स्निह् (ष्णिह) प्रीतौ=प्रीति करना [परस्मै०]

स्निह् धातु के रूपों में भी द्रुह् धातु के समान ही कार्य होंगे।

लट्—स्निह्यति स्निह्यतः स्निह्यन्ति
लिट्—सिष्णेह सिष्णिहतुः सिष्णिहुः
लुट्—[१] स्नेहिता स्नेहितारौ स्नेहितारः
[२] स्नेग्धा स्नेग्धारौ स्नेग्धारः
[३] स्नेढा स्नेढारौ स्नेढारः
लृट्—स्नेहिष्यति स्नेहिष्यतः स्नेहिष्यन्ति
[२] स्नेक्ष्यति स्नेक्ष्यतः स्नेक्ष्यन्ति

लोट्—{स्निह्यतु / स्निह्यतात्} स्निह्यताम् स्निह्यन्तु
लङ्—अस्निह्यत् अस्निह्यताम् अस्निह्यन्
वि. लिङ्—स्निह्येत् स्निह्येताम् स्निह्येयुः
लुङ्—अस्निहत् अस्निहताम् अस्निहन्
लृङ् [१] अस्नेहिष्यत् अस्नेहिष्यताम् अस्नेहिष्यन्
[२] अस्नेक्ष्यत् अस्नेक्ष्यताम् अस्नेक्ष्यन्

अभ्यास

१. अच्छे गुरु सदा शिष्यों से स्नेह करते हैं=सद्गुरवः सदा शिष्येभ्यः स्निह्यन्ति

२. श्रीकृष्ण ने प्रद्युम्न से स्नेह किया।
श्रीकृष्णः प्रद्युम्नाय सिष्णेह [अस्निह्यत्, अस्निहत्]

३. अगस्त्य और लोपामुद्रा ने राम, लक्ष्मण और सीता से स्नेह किया।
अगस्त्यलोपामुद्रे सीतारामलक्ष्मणेभ्यः सिष्णिहतुः [अस्निह्यताम्, अस्निहताम्]

४. कौन मनुष्य तेरे जैसे भोले बच्चे पर स्नेह नहीं करेगा।
कः पुरुषः त्वादृशाय मुग्धाय बालाय न स्नेहिता [स्नेग्धा, स्नेढा; स्नेहिष्यति, स्नेक्ष्यति]।

५. आपको अपने शिष्यों से स्नेह करना चाहिये।
भवन्तः स्वशिष्येभ्यः स्निह्यन्तु [स्निह्येयुः]

६. मैं इस दुष्ट से कैसे स्नेह करूँ=अहम् अस्मै दुष्टाय कथं स्निह्यानि [स्निह्येयम्]

७. यदि हम सबसे स्नेह करते तो सब हमसे भी स्नेह करते।
यदि वयं सर्वेभ्यः अस्नेहिष्याम [अस्नेक्ष्याम] तर्हि सर्वे अस्मभ्यम् अपि अस्नेहिष्यन् [अस्नेक्ष्यन्]।

८. दुष्टों से स्नेह मत कर=दुष्टेभ्यः मा स्निहः [मा स्म स्निह्यः]।

(१३) शम् (शमु) उपशमे [=शान्त होना] परस्मै०

शम् आदि आठ धातुओं के अच् [अ] को लट्, लोट्, लङ् और वि० लिङ् में दीर्घ हो जाता है।[1]

लट्—शाम्यति शाम्यतः शाम्यन्ति
लिट्—शशाम शेमतुः शेमुः
लुट्—शमिता शमितारौ शमितारः
लृट्—शमिष्यति शमिष्यतः शमिष्यन्ति
लोट्—{शाम्यतु / शाम्यतात्} शाम्यताम् शाम्यन्तु
लङ्—अशाम्यत् अशाम्यताम् अशाम्यन्
वि० लिङ्—शाम्येत् शाम्येताम् शाम्येयुः
लुङ्—अशमत् अशमताम् अशमन्
लृङ्—अशमिष्यत् अशमिष्यताम् अशमिष्यन्

अभ्यास

१. यदि चिकित्सा जल्दी की जाय तो आयुर्वेदिक औषधों से बड़ी से बड़ी बिमारियां भी शांत हो जाती हैं।
यदि शीघ्रं चिकित्स्येत तर्हि आयुर्वेदीयैः औषधैः महान्तोऽपि व्याधयः शाम्यन्ति [शीघ्रचिकित्सया नास्ति कश्चिद् गदः यः आयुर्वेदीयैः अगदैः न शाम्यति]।

२. राम को देखकर परशुराम का क्रोध शांत हो गया।
रामं विलोक्य परशुरामस्य कोपाटोपः शशाम [अशाम्यत्, अशमत्]।

३. आपके जाने से वे शांत हो जायेंगे।
भवतः गमनेन [गमनात्] ते शमितारः [शमिष्यन्ति]।

४. यदि पित्त मिश्री से शांत हो जाये तो कड़वी कुटकी क्यों खाई जाय।
यदि पित्तं सितया शाम्येत् [शाम्यतु] तर्हि किं तिक्तेन कटुकेन।

५. तेरी क्रोधाग्नि शांत हो=तव कोपाग्निः शाम्यतु।

६. शायद उस योगी के दर्शन से इसकी क्रोधाग्नि शांत हो जाये।
मन्ये तस्य योगिनः दर्शनेन अस्य क्रोधाग्निः शाम्येत्।

७. तुम्हारी क्रोधाग्नि शांत मत हो, उस अग्नि में इन पापियों को जला दो।
युष्माकं क्रोधदावानलः मा शमत् [मा स्म शाम्यत्], तस्मिन् वह्नौ दहत इमान् पापिनः।

---

१. शमामष्टानां दीर्घः श्यनि [अष्टा० ८.३.७४] [शमु, तमु, दमु, श्रमु, भ्रमु, क्षमूष्, क्लमु, मदी, इत्यष्टौ शमादयः]

८. यदि वह थोड़ी देर शांत न होता तो मैं उसे बहुत पीटता।
यदि सः मुहूर्तं न अशमिष्यत् तर्हि अहं तं भृशम् अताडयिष्यम्।

९. आपके प्रवचन से वे लोग तो कल ही शांत हो गये थे, यह आज शांत हुआ है।
भवतः प्रवचनेन ते तु ह्यः एव अशाम्यन्, अयम् अद्य अशमत्।

(१४) हृष् (तुष्टौ) = प्रसन्न होना [परस्मै०]

लट्—	हृष्यति	हृष्यतः	हृष्यन्ति
लिट्—	जहर्ष	जहृषतुः	जहृषुः
लुट्—	हर्षिता	हर्षितारौ	हर्षितारः
लृट्—	हर्षिष्यति	हर्षिष्यतः	हर्षिष्यन्ति
लोट्—	हृष्यतु / हृष्यतात्	हृष्यताम्	हृष्यन्तु
लङ्—	अहृष्यत्	अहृष्यताम्	अहृष्यन्
वि० लिङ्—	हृष्येत्	हृष्येताम्	हृष्येयुः
लुङ्—	अहृषत्	अहृषताम्	अहृषन्
लृङ्—	अहर्षिष्यत्	अहर्षिष्यताम्	अहर्षिष्यन्

अभ्यास

१. धन के लोभी बनिये ग्राहकों को देखकर बड़े प्रसन्न होते हैं।
धनलोलुपाः वणिजः ग्राहकान् दृष्ट्वा अत्यन्तं हृष्यन्ति।

२. हनुमान् से सीता का समाचार सुनकर सब ऋष्यमूक वासी बहुत हर्षित हुए।
हनूमतः सीतायाः वृत्तान्तं निशम्य सर्वे ऋष्यमूकवासिनः नितराम् जहृषुः (अहृष्यन्, अहृषन्)।

३. तेरी उन्नति होगी इसलिए, तू जल्दी खुश होगा।
तव पदोन्नतिः भविता (भविष्यति), अतः त्वं सत्वरं हर्षितासि (हर्षिष्यसि)

४. वे अब तो प्रसन्न हो जावें, उनका मनीआर्डर आयेगा।
ते अधुना तु हृष्यन्तु (हृष्येयुः), इदानीं तेषां धनादेशः आगन्ता (आगमिष्यति)।

५. गावस्कर के आउट हो जाने से कल आस्ट्रेलिया वाले खुश हुए थे।
गावस्करस्य विसीमगमनात् ह्यः आस्ट्रेलियादेशवासिनः अहृष्यन्।

६. आज तिरासी रनों पर ही चैपल के दल के आउट हो जाने से भारतीय बहुत प्रसन्न हुए।
अद्य त्र्यशीतौ धावनेषु एव चैपलदलस्य विसीमगमनात् भारतीयाः अतितराम् अहृषन्।

७. यदि कपिलदेव पांच विकिट नहीं गिराता, तो हम प्रसन्न कैसे होते।
यदि कपिलदेवः पञ्च विकिटानि न अपातयिष्यत् तर्हि वयं कथम् अहर्षिष्याम।

(१५) कुप् (क्रोधे)=क्रोध करना (परस्मै०)

लट्—	कुप्यति	कुप्यतः	कुप्यन्ति
लिट्—	चुकोप	चुकुपतुः	चुकुपुः
लुट्—	कोपिता	कोपितारौ	कोपितारः
लृट्—	कोपिष्यति	कोपिष्यतः	कोपिष्यन्ति
लोट्—	कुप्यतु / कुप्यतात्	कुप्यताम्	कुप्यन्तु
लङ्—	अकुप्यत्	अकुप्यताम्	अकुप्यन्
वि० लिङ्—	कुप्येत्	कुप्येताम्	कुप्येयुः
लुङ्—	अकुपत्	अकुपताम्	अकुपन्
लृङ्—	अकोपिष्यत्	अकोपिष्यताम्	अकोपिष्यन्

अभ्यास

१. यमनियमों का पालन करने वाले क्रोध नहीं करते ।
यमनियमसेविनः न कुप्यन्ति ।

२. भीमसेन ने दुर्योधन और दुःशासन पर बहुत क्रोध किया ।
भीमसेनः दुर्योधनदुःशासनाभ्याम् अतितरां चुकोप ।

३. क्या तू इस दीन पर क्रोध करेगा ?
किं त्वम् अस्मै दीनाय कोपितासि (कोपिष्यसि) ?

४. मैं इस बेचारे पर क्यों क्रोध करूं ?
अहम् अस्मै वराकाय कथं कुप्यानि (कुप्येयम्) ?

५. दीन पर गुस्सा मत कर, दया कर ।
दीनाय मा कुपः (मा स्म कुप्यः) दयस्व (दयेथाः) ।

६. यदि तू उस बेचारे पर क्रोध करता, तो भगवान् तुझे क्षमा नहीं करता ।
यदि त्वं तस्मै वराकाय अकोपिष्यः तर्हि ईश्वरः त्वां न अक्षंस्यत (अक्षमिष्यत)

७. तूने बिना सोचे उस पर क्रोध क्यों किया ।
त्वम् अविचार्य तस्मै कथम् अकुपः (अकुप्यः)

(१६) जन् (जनी) प्रादुर्भावे [=उत्पन्न होना] आत्मनेपदी

लट्, लोट्, लङ् और वि० लिङ् में जन् के स्थान पर 'जा' आदेश होता है ।[1]

लट्—	जायते	जायेते	जायन्ते
	जायसे	जायेथे	जायध्वे
	जाये	जायावहे	जायामहे
लिट्—	जज्ञे	जज्ञाते	जज्ञिरे
लुट्—	जनिता	जनितारौ	जनितारः
लृट्—	जनिष्यते	जनिष्येते	जनिष्यन्ते
लोट्—	जायताम्	जायेताम्	जायन्ताम्
	जायस्व	जायेथाम्	जायध्वम्
	जायै	जायावहै	जायामहै
लङ्—	अजायत	अजायेताम्	अजायन्त
	अजायथाः	अजायेथाम्	अजायध्वम्
	अजाये	अजायावहि	अजायामहि

---

१. ज्ञाजनोर्जा (अष्टा० ७.३.७९)

वि० लिङ्—जायेत जायेयाताम् जायेरन्
जायेथाः जायेयाथाम् जायेध्वम्
जायेय जायेवहि जायेमहि

लुङ्— {अजनि[1] / अजनिष्ट} अजनिषाताम् अजनिषत
अजनिष्ठाः अजनिषाथाम् अजनिड्ढ्वम्
अजनिषि अजनिष्वहि अजनिष्महि

लृङ्—
अजनिष्यत अजनिष्येताम् अजनिष्यन्त
अजनिष्यथाः अजनिष्येथाम् अजनिष्यध्वम्
अजनिष्ये अजनिष्यावहि अजनिष्यामहि

अभ्यास

१. प्रतिदिन सैकड़ों आदमी जन्मते और मरते हैं।
प्रत्यहं शतानि जनाः जायन्ते म्रियन्ते च।

२. इक्ष्वाकु वंश में कई प्रतापी राजा उत्पन्न हुए।
इक्ष्वाकुवंशे नैके प्रतापिनः नरपतयः जज्ञिरे।

३. जो जन्म लेगा वह अवश्य मरेगा।
यः जनिता स अवश्यं मर्ता (यः जनिष्यते स अवश्यं मरिष्यति)।

४. 'आ ब्रह्मन् ! ब्राह्मणो ब्रह्मवर्चसी जायताम्'[2]।
हे परमेश्वर ! (हमारे राष्ट्र में) ब्रह्मतेजधारी ब्राह्मण उत्पन्न होवे।

५. 'जन्मो, मरो, फिर जन्मो फिर मरो' यह एक ऐसा चक्कर है जिससे छूटना अति कठिन है।
'जायस्व, म्रियस्व, पुनर्जायस्व पुनर्म्रियस्व' अयमेकः ईदृशः चक्रः अस्ति यस्मात् मोक्षः दुर्लभः।

६. 'यजुस्तस्मादजायत'[3]=यजुर्वेद भी उसी परमेश्वर से प्रादुर्भूत हुआ।

७. शायद अगले जन्म में हम भारत में ही जन्म लें।
मन्ये, पुनर्जन्मनि वयं भारतवर्षे एव जायेमहि।

८. यह बछड़ा आज ही जन्मा है=अयं वत्सः अद्यैव अजनि (अजनिष्ट)।

९. यदि दयानन्द जन्म न लेता तो भारत में अन्धकार ही रहता।
यदि दयानन्दः न अजनिष्यत तर्हि भारते अन्धकारः हि अवर्त्स्यत् (अवर्तिष्यत)।

१०. हे दुर्वासना ! तू मेरे मन में फिर उत्पन्न मत हो।
हे दुर्वासने ! त्वं मम मनसि पुनः मा जनिष्ठाः (मा स्म जायथाः)।

---

१. लुङ् में प्रथम पुरुष एकवचन (त) परे रहने पर च्लि के स्थान पर विकल्प से इ (=चिण्) होता है और त का लुक् हो जाता है। (दीपजनबुधपूरीतायीप्यायिभ्यो ऽन्यतरस्याम् (अष्टा० ३.१.६१); चिणो लुक् (अष्टा० ६.४.१०४)।

२. यजुर्वेद २२.२२.

३. यजुर्वेद ३१.७.

(१७) पद् (गतौ)=जाना [आत्मने०]

लट्—	पद्यते	पद्येते	पद्यन्ते
लिट्—	पेदे	पेदाते	पेदिरे
लुट्—	पत्ता	पत्तारौ	पत्तारः
लृट्—	पत्स्यते	पत्स्येते	पत्स्यन्ते
लोट्—	पद्यताम्	पद्येताम्	पद्यन्ताम्
लङ्—	अपद्यत	अपद्येताम्	अपद्यन्त
वि० लिङ्—	पद्येत	पद्येयाताम्	पद्येरन्
लुङ्—	अपादि[1]	अपत्साताम्	अपत्सत
	अपत्थाः	अपत्साथाम्	अपद्ध्वम्
	अपत्सि	अपत्स्वहि	अपत्स्महि
लृङ्—	अपत्स्यत	अपत्स्येताम्	अपत्स्यन्त

इस धातु के अभ्यास-वाक्य सोपसर्ग धातुओं के प्रकरण में समझायेंगे।

(१८) मन् (ज्ञाने)=जानना [आत्मने०]

लट्—	मन्यते	मन्येते	मन्यन्ते
लिट्—	मेने	मेनाते	मेनिरे
लुट्—	मन्ता	मन्तारौ	मन्तारः
लृट्—	मंस्यते	मंस्येते	मंस्यन्ते
लोट्—	मन्यताम्	मन्येताम्	मन्यन्ताम्
लङ्—	अमन्यत	अमन्येताम्	अमन्यन्त
वि० लिङ्—	मन्येत	मन्येयाताम्	मन्येरन्
लुङ्—	अमंस्त	अमंसाताम्	अमंसत
	अमंस्थाः	अमंसाथाम्	अमन्ध्वम्
	अमंसि	अमंस्वहि	अमंस्महि
लृङ्—	अमंस्यत	अमंस्येताम्	अमंस्यन्त

अभ्यास

जहाँ परिहास (=हँसी मजाक) का विषय हो तो वहाँ मन् धातु के प्रयोग में उपपद क्रिया के धातु के उत्तम पुरुष के स्थान पर मध्यम पुरुष और मन्य (मन्) धातु के मध्यम पुरुष के स्थान पर उत्तम पुरुष होता है और एकवद्भाव हो जाता है[2]। जहाँ परिहास नहीं होगा वहाँ सामान्य प्रयोग होंगे।

१. (परिहास में—) तू ऐसा मानता है कि लड्डू खाऊँगा, वे तो देवेन्द्र खा गया।
त्वं मन्ये मोदकान् भोक्ष्यसे इति तानि तु देवेन्द्रः अखादीत्।
(परिहास के अभाव में)—त्वं मन्यसे मोदकान् भोक्ष्ये इति तानि तु देवेन्द्रः अखादीत्।

२. सीता ने लक्ष्मण की बात नहीं मानी इसलिए दुःख प्राप्त हुआ।
सीता लक्ष्मणस्य वार्तां न मेने (न अमंस्त, न अमन्यत) अतएव दुःखम् आप (आप्नोत्, आपत्)।

३. मैं तेरी सब बातें मान लूंगा=अहं तव सर्वाः वार्ताः मन्ताहे (मंस्ये)।

---

१. चिण् ते पदः (अष्टा. ३.१.६०) से च्लि के स्थान पर चिण् (=इ) तथा त का पूर्ववत् (चिणो लुक्) से लुक्।

१ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ अष्टा० १.४.१०६ ॥

४. इस महात्मा की बात मान ले सुख पायेगा।
अस्य महात्मनः वार्तां मन्यस्व (मन्येथाः) सुखम् लप्स्यसे।

५. आज मैंने तुम लोगों की सलाह नहीं मानी, इसीलिए कष्ट उठाया।
अद्य अहं युष्माकं सम्मतिं न अमंसि, अतएव कष्टम् असहिषि।

६. इस मूर्ख की बात मत मानना=अस्य मूढस्य वार्तां मा मंस्थाः (मा स्म मन्यथाः)

७. यदि भारतवासी स्वामी दयानन्द की बात मान लेते तो सुखी होते।

७. यदि भारतवासिनः स्वामिदयानन्दचरणानां वार्ताम् अमंस्यन्त तर्हि सुखिनः अभविष्यन्।

स्वादिगण

स्वादिगण की धातुओं से लट्, लोट्, लङ् और विधिलिङ् इन चार लकारों में नु (=श्नु) विकरण होता है[1]। नु के ङिद्वत् होने से धातु को प्राप्त गुण आदि का निषेध हो जायेगा।

(१) आप् (आप्लृ) व्याप्तौ=प्राप्त करना [परस्मैपदी]

लकार			
लट्—	आप्नोति	आप्नुतः	आप्नुवन्ति
	आप्नोषि	आप्नुथः	आप्नुथ
	आप्नोमि	आप्नुवः	आप्नुमः
लिट्—	आप	आपतुः	आपुः
लुट्—	आप्ता	आप्तारौ	आप्तारः
लृट्—	आप्स्यति	आप्स्यतः	आप्स्यन्ति
लोट्—	आप्नोतु, आप्नुतात्	आप्नुताम्	आप्नुवन्तु
	आप्नुहि (आप्नुतात्)	आप्नुतम्	आप्नुत
	आप्नवानि	आप्नवाव	आप्नवाम
लङ्—	आप्नोत्	आप्नुताम्	आप्नुवन्
	आप्नोः	आप्नुतम्	आप्नुत
	आप्नवम्	आप्नुव	आप्नुम
वि.लि.—	आप्नुयात्	आप्नुयाताम्	आप्नुयुः
	आप्नुयाः	आप्नुयातम्	आप्नुयात
	आप्नुयाम्	आप्नुयाव	आप्नुयाम
लुङ्—	आपत्	आपताम्	आपन्
	आपः	आपतम्	आपत
	आपम्	आपाव	आपाम
लृङ्—	आप्स्यत्	आप्स्यताम्	आप्स्यन्

अभ्यास

१. जो वृद्धों की बात मानते हैं, वे सुख प्राप्त करते हैं।
ये वृद्धानां वार्तां मन्यन्ते ते सुखम् आप्नुवन्ति।

२. रावण ने विभीषण की सलाह नहीं मानी इसलिये दुःख प्राप्त किया।
रावणः विभीषणस्य सम्मतिं न मेने (अमंस्त, अमन्यत) अतएव दुःखम् अवाप (आप्नोत्, आपत्)।

---

१. स्वादिभ्यः श्नुः (अष्टा० ३.१.७३)

३. परिश्रम से ही तू सुख पायेगा=परिश्रमेण एव त्वं सुखम् आप्तासि (आप्स्यसि)।
४. विद्या प्राप्त कर=विद्याम् आप्नुयाः (आप्नुहि)।
५. काला धन्धा करके अपकीर्ति मत प्राप्त कर।
तस्करव्यापारेण अपकीर्तिम् मा आपः [मा स्म आप्नोः]।
६. यदि तू मेरे पास पहिले आ जाता तो विद्या प्राप्त करता।
यदि त्वं मम समीपम् पूर्वम् आगमिष्यः तर्हि विद्याम् आप्स्यः।

(२) शक् (शक्लृ) शक्तौ=समर्थ होना, सकना [परस्मै०]

लट्—शक्नोति शक्नुतः शक्नुवन्ति
लिट्—शशाक शेकतुः शेकुः
लुट्—शक्ता शक्तारौ शक्तारः
लृट्—शक्ष्यति शक्ष्यतः शक्ष्यन्ति
लोट्—{शक्नोतु / शक्नुतात्} शक्नुताम् शक्नुवन्तु
{शक्नुहि / शक्नुतात्} शक्नुतम् शक्नुत
शक्नवानि शक्नवाव शक्नवाम

लङ्—अशक्नोत् अशक्नुताम् अशक्नुवन्
अशक्नोः अशक्नुतम् अशक्नुत
अशक्नवम् अशक्नुव अशक्नुम
वि० लिङ्—शक्नुयात् शक्नुयाताम् शक्नुयुः
लुङ्—अशकत् अशकताम् अशकन्
लृङ्—अशक्ष्यत् अशक्ष्यताम् अशक्ष्यन्

अभ्यास

१. क्या वे वहां जा सकते हैं?=किं ते तत्र गन्तुं शक्नुवन्ति?
२. हनुमान् के बिना कोई भी समुद्र पार न कर सका।
विना हनूमता न कश्चित् समुद्रं तर्तुं शशाक (अशकत्, अशक्नोत्)।
३. मैं तुम्हारे कार्य अवश्य कर सकूंगा।
अहं तव कार्याणि अवश्यं कर्त्तुं शक्ष्यामि (शक्तास्मि)।
४. शायद वह यह कठिन काम न कर सके।
मन्ये सः एतत् कठिनं कार्यं कर्त्तुं न शक्नुयात्।
५. ईश्वर करे तू विद्या पढ़ सके=ईश्वरकृपया त्वं विद्यां पठितुं शक्नुहि।
६. आज मैं तुझे यह बात न कह सका=अद्य अहं त्वाम् एतां वार्तां वक्तुं न अशकम्।
७. तू कभी झूठ न बोल सके=त्वं कदापि असत्यं वक्तुं मा शकः (मा स्म शक्नोः)।
८. यदि तू वहां जा सकता तो अच्छा होता।
यदि त्वं तत्र गन्तुम् अशक्ष्यः तर्हि शुभम् अभविष्यत्।
९. क्या मैं यह कार्य कर सकूंगा?=किम् अहम् एतत् कार्यं कर्त्तुं शक्नवानि।
१०. शायद मैं यह कार्य न कर सकूं=मन्ये अहम् एतत् कार्यं कर्त्तुं न शक्नुयाम्।

(३) चि (चिञ्) चयने=चुनना [उभयपदी]

परस्मैपद

लट्[1]—	चिनोति	चिनुतः	चिन्वन्ति
	चिनोषि	चिनुथः	चिनुथ
	चिनोमि	चिनुवः / चिन्वः	चिनुमः / चिन्मः
लिट्[2]-(१)	चिकाय	चिक्यतुः	चिक्युः
(२)	चिचाय	चिच्यतुः	चिच्युः
लुट्—	चेता	चेतारौ	चेतारः
लृट्—	चेष्यति	चेष्यतः	चेष्यन्ति
लोट्-	चिनोतु(चिनुतात्)	चिनुताम्	चिन्वन्तु
	चिनु (चिनुतात्)	चिनुतम्	चिनुत
	चिनवानि	चिनवाव	चिनवाम
लङ्—	अचिनोत्	अचिनुताम्	अचिन्वन्
	अचिनोः	अचिनुतम्	अचिनुत
	अचिनवम्	अचिनुव / अचिन्व	अचिनुम / अचिन्म
वि. लिङ्—	चिनुयात्	चिनुयाताम्	चिनुयुः
	चिनुयाः	चिनुयातम्	चिनुयात
	चिनुयाम्	चिनुयाव	चिनुयाम
लुङ्—	अचैषीत्	अचैष्टाम्	अचैषुः
	अचैषीः	अचैष्टम्	अचैष्ट
	अचैषम्	अचैष्व	अचैष्म
लृङ्—	अचेष्यत्	अचेष्यताम्	अचेष्यन्
	अचेष्यः	अचेष्यतम्	अचेष्यत
	अचेष्यम्	अचेष्याव	अचेष्याम

आत्मनेपद

लट्—	चिनुते	चिन्वाते	चिन्वते
	चिनुषे	चिन्वाथे	चिनुध्वे
	चिन्वे	चिनुवहे	चिनुमहे
लिट् (१)-	चिक्ये	चिक्याते	चिक्यिरे
(२)	चिच्ये	चिच्याते	चिच्यिरे
लुट्—	चेता	चेतारौ	चेतारः
लृट्—	चेष्यते	चेष्येते	चेष्यन्ते
लोट्—	चिनुताम्	चिन्वाताम्	चिन्वताम्
	चिनुष्व	चिन्वाथाम्	चिनुध्वम्
	चिनवै	चिनवावहै	चिनवामहै
लङ्-	अचिनुत	अचिन्वाताम्	अचिन्वत
	अचिनुथाः	अचिन्वाथाम्	अचिनुध्वम्
	अचिन्वि	अचिनुवहि / अचिन्वहि	अचिनुमहि / अचिन्महि
वि. लिङ्-	चिन्वीत	चिन्वीयाताम्	चिन्वीरन्
	चिन्वीथाः	चिन्वीयाथाम्	चिन्वीध्वम्
	चिन्वीय	चिन्वीवहि	चिन्वीमहि
लुङ्—	अचेष्ट	अचेषाताम्	अचेषत
	अचेष्ठाः	अचेषाथाम्	अचेढ्वम्
	अचेषि	अचेष्वहि	अचेष्महि
लृङ्	अचेष्यत	अचेष्येताम्	अचेष्यन्त
	अचेष्यथाः	अचेष्येथाम्	अचेष्यध्वम्
	अचेष्ये	अचेष्यावहि	अचेष्यामहि

चिञ् धातु के अभ्यासवाक्य उपसर्ग वाले प्रकरण में समझायेंगे।

---

१. 'लोपश्चास्यान्यतरस्यां म्वोः' अष्टा० ६.४.१०७ से वस् और मस् में विकल्प से नु के उ का लोप।

२. लिट् में 'विभाषा चेः (अष्टा० ७.३.५८) से विकल्प से च् को क् होता है।

तुदादिगण

तुदादिगण की धातुओं से लट्, लोट्, लङ् और विधिलिङ् में श (=अ) विकरण आता है[१]। यह अ (=श) विकरण ङित् माना जाता है[२], अतः धातु में होने वाले गुण वृद्धि आदि कार्यों का निषेध हो जाता है[३]।

(१) इष् (इषु) इच्छायाम्=इच्छा करना [परस्मै०]

लट्, लोट्, लङ् और विधिलिङ् में इष् के ष् को छ् हो जाता है[४]। उस छ् से पहिले त् (=तुक्) होता है[५] और त् के स्थान पर च् हो जाता है[६]। अर्थात् 'इच्छ्' रूप का प्रयोग होता है। लुट् लकार में विकल्प से इट् आगम होता है[७], अतः 'एषिता' आदि और 'एष्टा' आदि दो प्रकार के रूप बनेंगे।

लट्—	इच्छति	इच्छतः	इच्छन्ति
	इच्छसि	इच्छथः	इच्छथ
	इच्छामि	इच्छावः	इच्छामः
लिट्—	इयेष	ईषतुः	ईषुः
लुट्-(१)	एषिता	एषितारौ	एषितारः
	एषितासि	एषितास्थः	एषितास्थ
	एषितास्मि	एषितास्वः	एषितास्मः
(२)	एष्टा	एष्टारौ	एष्टारः
	एष्टासि	एष्टास्थः	एष्टास्थ
	एष्टास्मि	एष्टास्वः	एष्टास्मः
लृट्—	एषिष्यति	एषिष्यतः	एषिष्यन्ति

लोट्-	इच्छतु (इच्छतात्)	इच्छताम्	इच्छन्तु
	इच्छ (इच्छतात्)	इच्छतम्	इच्छत
	इच्छानि	इच्छाव	इच्छाम
लङ्—	ऐच्छत्	ऐच्छताम्	ऐच्छन्
	ऐच्छः	ऐच्छतम्	ऐच्छत
	ऐच्छम्	ऐच्छाव	ऐच्छाम
वि. लिङ्-	इच्छेत्	इच्छेताम्	इच्छेयुः
	इच्छेः	इच्छेतम्	इच्छेत
	इच्छेयम्	इच्छेव	इच्छेम
लुङ्—	ऐषीत्	ऐषिष्टाम्	ऐषिषुः
	ऐषीः	ऐषिष्टम्	ऐषिष्ट
	ऐषिषम्	ऐषिष्व	ऐषिष्म
लृङ्—	ऐषिष्यत्	ऐषिष्यताम्	ऐषिष्यन्

अभ्यास

१. क्या तुम वहाँ जाना चाहते हो=किं यूयं तत्र गन्तुम् इच्छथ ?
२. मैं इस समय किसी को नहीं चाहता=अहम् इदानीं कम् अपि न इच्छामि।
३. सीता ने सोने के मृग को चाहा=सीता स्वर्णमृगम् इयेष (ऐच्छत्, ऐषीत्)।
४. मैं आगे किसी वस्तु की इच्छा नहीं करूँगा।

---

१. तुदादिभ्यः शः (अष्टा. ३.१.७७)।
२. सार्वधातुकमपित् (अष्टा. १.२.४)।
३. क्ङिति च (अष्टा. १.१.५)।
४. इषुगमियमां छः (अष्टा. ७.३.७७)
५. छे च (अष्टा. ६.१.७३)।
६. स्तोः श्चुना श्चुः (अष्टा. ८.४.४०)।
७. तीषसहलुभरुषरिषः अष्टा. ७.२.४८)।

अहम् अग्रे किमपि वस्तु न एषितास्मि (एष्टास्मि, एषिष्यामि)।

५. तुम उन्हीं वस्तुओं को चाहो, जिनको तुम प्राप्त कर सको।
यूयं तानि एव वस्तूनि इच्छत (इच्छेत) यानि प्राप्तुं शक्नुथ।

६. झूठी प्रतिष्ठा को मत चाह—मिथ्या प्रतिष्ठां मा एषीः (मा स्म इच्छः)

७. जो तू चाहता तो मिल जाता—यदि त्वम् ऐषिष्यः तर्हि प्राप्स्यः।

(२) लिख् (अक्षरविन्यासे)—लिखना [परस्मै०]

लट्—लिखति	लिखतः	लिखन्ति		लङ्—अलिखत्	अलिखताम्	अलिखन्
लिट्—लिलेख	लिलिखतुः	लिलिखुः		वि० लिङ्—लिखेत्	लिखेताम्	लिखेयुः
लुट्—लेखिता	लेखितारौ	लेखितारः		लुङ्—अलेखीत्	अलेखिष्टाम्	अलेखिषुः
लृट्—लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति		लृङ्—अलेखिष्यत्	अलेखिष्यताम्	अलेखिष्यन्
लोट्—{लिखतु / लिखतात्	लिखताम्	लिखन्तु				

अभ्यास

१. मैं रात्रि में समय निकाल कर पत्र लिखता हूं।
अहं रात्रौ समयं निस्सार्य पत्रं लिखामि।

२. कालिदास ने बहुत सी पुस्तकें लिखीं—कालिदासः बहूनि पुस्तकानि लिलेख।

३. आज मैंने कोई भी पत्र नहीं लिखा—अद्य अहं किमपि पत्रं न अलेखिषम्।

४. क्या तू मेरी पुस्तक लिखेगा—किं त्वं मम पुस्तकं लेखितासि (लेखिष्यसि)।

५. बच्चो! अपने अपने नाम लिखो।
बालकाः! स्वानि स्वानि नामानि लिखत (लिखेत)।

६. आपको मेरे पास पत्र लिखना चाहिए।—भवान् मह्यं पत्रं लिखेत्

७. किसी को पत्र में कटुवाक्य मत लिखना।
कस्मैचित् अपि पत्रे कटुवचनानि मा लेखीः (मा स्म लिखः)।

८. जितने पन्ने तूने कल लिखे थे, उसके दुगुने आज मैंने लिख दिये।
यावन्ति पत्राणि त्वं ह्यः अलिखः, तावतां द्विगुणानि अद्य अहम् अलेखिषम्।

९. यदि तू निबन्ध लिखता तो, उसे अधिवेशन में पढ़ता।
यदि त्वं निबन्धम् अलेखिष्यः, तर्हि अधिवेशने तम् अवाचयिष्यः।

(३) प्रच्छ्[1] (ज्ञीप्सायाम्)—पूछना [परस्मै०] द्विकर्मक

लट्—पृच्छति	पृच्छतः	पृच्छन्ति		लुट्—प्रष्टा	प्रष्टारौ	प्रष्टारः
लिट्—पप्रच्छ	पप्रच्छतुः	पप्रच्छुः		लृट्—प्रक्ष्यति	प्रक्ष्यतः	प्रक्ष्यन्ति

---

१. लट्, लोट्, लङ् और वि० लिङ् में प्रच्छ् के र् के स्थान पर ऋ आदेश होगा। पूर्ववत् छ् से पहिले च् (तुक्→त्→च्) आ जायेगा और 'पृच्छ' स्वरूप बनेगा [ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। अष्टा० ६.१.१६]

लोट्— पृच्छतु (पृच्छतात्) पृच्छताम् पृच्छन्तु

लङ्—अपृच्छत् अपृच्छताम् अपृच्छन्

वि० लिङ्—पृच्छेत् पृच्छेताम् पृच्छेयुः

लुङ्—अप्राक्षीत् अप्राष्टाम् अप्राक्षुः
अप्राक्षीः अप्राष्टम् अप्राष्ट
अप्राक्षम् अप्राक्ष्व अप्राक्ष्म

लृङ्—अप्रक्ष्यत् अप्रक्ष्यताम् अप्रक्ष्यन्

अभ्यास

१. बच्चा माता पिता को बहुत प्रश्न पूछता है।
बालकः पितरौ बहून् प्रश्नान् पृच्छति।

२. राम ने विश्वामित्र से पूछा—'इस नदी का क्या इतिहास है?'
रामः विश्वामित्रं पप्रच्छ (अपृच्छत्, अप्राक्षीत्) 'अस्याः नद्याः किम् ऐतिह्यम् अस्ति'?

३. मैं यह पाठ तुम्हें कल पूछूंगा, याद करना।
अहं पाठमिमं युष्मान् श्वः प्रष्टास्मि, स्मरत।

४. सायङ्काल जब वह मुझे तुम्हारे जाने का कारण पूछेगा तो मैं क्या उत्तर दूंगा।
सायं यदा सः मां तव गमनकारणं प्रक्ष्यति तदा अहं किं प्रतिवक्ष्यामि।

५. ऐसी बातें किसी से मत पूछना।
एतादृशीः वार्ताः कमपि मा प्राक्षीः (मा स्म पृच्छः)।

६. यदि वह मुझे 'समर्थः पदविधिः' सूत्र का भाष्य पूछता तो मैं समझा देता।
यदि सः मां 'समर्थः पदविधिः' इति सूत्रस्य भाष्यम् अप्रक्ष्यत् तर्हि अहं तम् अबोधयिष्यम्।

७. वे ही जाकर पिताजी से इस समस्या का हल पूछें।
ते एव गत्वा पितरम् अस्याः समस्यायाः समाधानं पृच्छन्तु (पृच्छेयुः)।

८. कल जो बात मैंने उससे पूछी थी वही बात आज मैंने आप से पूछी है।
ह्यः यां वार्ताम् अहं तम् अपृच्छम् तामेव वार्ताम् अद्य भवन्तम् अप्राक्षम्।

(४) मस्ज् (टुमस्जो) शुद्धौ=शुद्ध होना [परस्मै०]

यह धातु हाथी आदि के नहाने में अथवा नि उपसर्ग साथ लग जाने पर डूबने के अर्थ में आती है। मनुष्य के स्नान करने के अर्थ में भी कभी कभी प्रयुक्त होती है। लट्, लिट्, लोट्, लङ् और वि० लिङ् में (जहां झलादि अक्षर परे न हो) मस्ज् के स् के स्थान पर द् आदेश होगा[1]। उस द् को ज् आदेश होगा[2]।

---

१. झलां जश् झशि (अष्टा० ८.४.५३)

२. स्तोः श्चुना श्चुः (अष्टा० ८.४.४०)

फलतः 'मज्ज्' रूप प्रयुक्त होगा। लुट्, लृट्, लुङ् और लृङ् में न् (=नुम्) आगम होगा।[1] वह न् सकार और जकार के बीच होगा।[2] स् का लोप हो जाएगा।[3] ज् को ग्[4] और फिर क् होगा।[5] न् का अनुस्वार[6] और फिर परसवर्ण ङ् होगा।[7] [मस्ज् ता → मस्न्ज् ता → मन्ज् ता। मन्ग् ता। → मन् क् ता → मंक्ता → मङ्क्ता (लुट् में)।

लट्—मज्जति	मज्जतः	मज्जन्ति
लिट्—ममज्ज	ममज्जतुः	ममज्जुः
लुट्—मङ्क्ता	मङ्क्तारौ	मङ्क्तारः
लृट्—मङ्क्ष्यति	मङ्क्ष्यतः	मङ्क्ष्यन्ति
लोट्— {मज्जतु / मज्जतात्}	मज्जताम्	मज्जन्तु

लङ्—अमज्जत्	अमज्जताम्	अमज्जन्
वि०लिङ्—मज्जेत्	मज्जेताम्	मज्जेयुः
लुङ्-अमाङ्क्षीत्	अमाङ्क्ताम्	अमाङ्क्षुः
अमाङ्क्षीः	अमाङ्क्तम्	अमाङ्क्त
अमाङ्क्षम्	अमाङ्क्ष्व	अमाङ्क्ष्म
लृङ्-अमङ्क्ष्यत्	अमङ्क्ष्यताम्	अमङ्क्ष्यन्

अभ्यास

१. सागर के जल में हाथी नहाते हैं = समुद्रस्य जले हस्तिनः मज्जन्ति।

२. वह तालाब में डूब गया था = सः तडागे निममज्ज [न्यमाङ्क्षीत्, न्यमज्जत्]।

३. इस तालाब में मत घुसना डूब जायेगा।
इदं सरः मा प्रविक्षः [मा स्म प्रविशः] निमङ्क्ष्यसि [निमङ्क्तासि]।

४. आज बावड़ी में कौन डूब गया = अद्य वाप्यां कः न्यमाङ्क्षीत्?

५. यदि वह डूब जाता तो बड़ा दुःख होता।
यदि सः न्यमङ्क्ष्यत् तर्हि महद् दुःखम् अभविष्यत्।

६. राजा के हाथी जयसमुद्र के जल में नहावें।
राज्ञः गजाः जयसमुद्रस्य जले मज्जन्तु [मज्जेयुः]।

७. भगवान् करे जल में कोई न डूबे।
ईश्वरकृपया, तोये कश्चिदपि मा निमाङ्क्षीत् [मा स्म निमज्जत्]।

---

१. मस्जिनशोर्झलि (अष्टा० ७.१.६०)
२. मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् (वा०) अष्टा० १.१.४७
३. स्कोः संयोगाद्योरन्ते च (अष्टा० ८.२.२९)
४. चोः कुः (अष्टा० ८.२.३०)
५. खरि च (अष्टा० ८.४.५५)
६. नश्चापदान्तस्य झलि (अष्टा० ८.३.२४)
७. अनुस्वारस्य ययि परसवर्णः (अष्टा० ७.४.५८)

(५) स्पृश् (संस्पर्शने)=छूना [परस्मै०]

लुट्, लृट्, लुङ् और लृङ् में विकल्प से अम् आगम होगा[1]। तब ऋ को र् होगा[2]। [स्पृश् स्पृअश् स्प्र् अश्=स्प्रश्] अतः इन लकारों में दो रूप बनेंगे। लुङ् में च्लि के स्थान पर विकल्प से सिच् [स्] होगा[3]। एक पक्ष में क्स [स] होगा[4]। सिच्-पक्ष में विकल्प से पूर्ववत् अम् [अ] आगम होगा। अतः तीन प्रकार के रूप बनेंगे।

लट्—स्पृशति स्पृशतः स्पृशन्ति

लिट्—पस्पर्श पस्पृशतुः पस्पृशुः

लुट्-(१) स्प्रष्टा स्प्रष्टारौ स्प्रष्टारः
(२) स्पर्ष्टा स्पर्ष्टारौ स्पर्ष्टारः

लृट्—(१) स्प्रक्ष्यति स्प्रक्ष्यतः स्प्रक्ष्यन्ति
(२) स्पर्क्ष्यति स्पर्क्ष्यतः स्पर्क्ष्यन्ति

लोट्— {स्पृशतु स्पृशताम् स्पृशन्तु
{स्पृशतात्

लङ्—अस्पृशत् अस्पृशताम् अस्पृशन्

वि० लिङ्—स्पृशेत् स्पृशेताम् स्पृशेयुः

लुङ्-(१) अस्प्राक्षीत् अस्प्राष्टाम् अस्प्राक्षुः
अस्प्राक्षीः अस्प्राष्टम् अस्प्राष्ट
अस्प्राक्षम् अस्प्राक्ष्व अस्प्राक्ष्म
(२) अस्पार्क्षीत् अस्पार्ष्टाम् अस्पार्क्षुः
अस्पार्क्षीः अस्पार्ष्टम् अस्पार्ष्ट
अस्पार्क्षम् अस्पार्क्ष्व अस्पार्क्ष्म
(३) अस्पृक्षत् अस्पृक्षताम् अस्पृक्षन्
अस्पृक्षः अस्पृक्षतम् अस्पृक्षत
अस्पृक्षम् अस्पृक्षाव अस्पृक्षाम

लृङ्-(१)अस्प्रक्ष्यत् अस्प्रक्ष्यताम् अस्प्रक्ष्यन्
(२) अस्पर्क्ष्यत् अस्पर्क्ष्यताम् अस्पर्क्ष्यन्

अभ्यास

१. क्षमाप्रार्थी लोग पहिले जमीन छूते हैं और फिर कान छूते हैं।
क्षमाप्रार्थिनः पूर्वं भूमिं स्पृशन्ति तदनन्तरं च कर्णौ स्पृशन्ति।

२. मल्लाह ने पहिले राम के पांव छुए।
कैवर्तः पूर्वं रामचन्द्रस्य चरणौ पस्पर्श (अस्पृशत्; अस्पार्क्षीत्, अस्प्राक्षीत् अस्पृक्षत्)।

३. सबको प्रातःकाल उठकर माता पिता के चरण छूने चाहिये।
सर्वे प्रातः उत्थाय पित्रोः चरणान् स्पृशेयुः (स्पृशन्तु)।

४. पराये धन को मत छूना।
परवित्तं मा स्पार्क्षीः (मा स्प्राक्षीः, मा स्पृक्षः; मा स्म स्पृशः)।

५. यदि तू वृद्धों के पैर छूता तो आशीर्वाद पाता।

---

१. अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् (अष्टा ६. १. ५९)
२. इको यणचि (अष्टा. ६. १. ७७)
३. स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः (वा० अष्टा. ३. १. ४४.
४. शल इगुपधादनिटः क्सः (अष्टा. ३. १. ४५)

यदि त्वं वृद्धानां चरणान् अस्पर्क्ष्यः (अस्प्रक्ष्यः) तर्हि आशीर्वादम् आप्स्यः ।

६. मैं आज से बड़ों के पैर छूऊँगा ।
अहम् अद्यप्रभृति ज्येष्ठानां पादान् स्पर्क्ष्यामि (स्प्रक्ष्यामि) ।

७. क्या तूने कभी किसी के चरण छुए ?
किं त्वं कदाचित् कस्यचित् चरणौ अस्पार्क्षीः [अस्प्राक्षीः, अस्पृक्षः; अस्पृशः] ।

८. कल विमान से उतरने पर मैं श्री ईश्वरचन्द्र जी के चरण छूऊँगा ।
श्वः वायुयानाद् अवतरति श्रीमति ईश्वरचन्द्रमहाभागे अहं तच्चरणौ स्पर्ष्टास्मि (स्प्रष्टास्मि) ।

(६) विश् (प्रवेशने)=प्रवेश करना [परस्मै०]

लट्—विशति	विशतः	विशन्ति	लङ्—अविशत्	अविशताम्	अविशन्
लिट्—विवेश	विविशतुः	विविशुः	वि. लिङ्—विशेत्	विशेताम्	विशेयुः
लुट्—वेष्टा	वेष्टारौ	वेष्टारः	लुङ्—अविक्षत्	अविक्षताम्	अविक्षन्
लृट्—वेक्ष्यति	वेक्ष्यतः	वेक्ष्यन्ति	लृङ्—अवेक्ष्यत्	अवेक्ष्यताम्	अवेक्ष्यन्
लोट्-विशतु (विशतात्)	विशताम्	विशन्तु			

इस धातु के रूपों का वाक्यप्रयोग उपसर्ग वाले प्रकरण में किया जायेगा ।

(७) जुष् (जुषो) प्रीतिसेवनयोः=प्रयोग करना, प्रीति करना [आत्मने०]

लट्—जुषते	जुषेते	जुषन्ते	लङ्—अजुषत	अजुषेताम्	अजुषन्त
लिट्—जुजुषे	जुजुषाते	जुजुषिरे	वि० लिङ्—जुषेत	जुषेयाताम्	जुषेरन्
लुट्—जोषिता	जोषितारौ	जोषितारः	लुङ्—अजोषिष्ट	अजोषिषाताम्	अजोषिषत
लृट्—जोषिष्यते	जोषिष्येते	जोषिष्यन्ते	लृङ्—अजोषिष्यत	अजोषिष्येताम्	अजोषिष्यन्त
लोट्—जुषताम्	जुषेताम्	जुषन्ताम्			

अभ्यास

१. अच्छे शिष्य सदा गुरुओं की सेवा करते हैं ।
सुशिष्याः सर्वदा गुरुचरणान् जुषन्ते ।

२. भिलनी ने बेरों से रामचन्द्र जी की सेवा की ।
शबरी बदरीफलैः रामचन्द्रं जुजुषे ।

३. हम अपने आने वाले अतिथियों की सेवा करेंगे ।
वयं स्वान् आगमिष्यतः अतिथीन् जोषितास्महे (जोषिष्यामहे) ।

४. जिस संन्यासी की तूने सेवा की वह आर्यसमाज में उपदेश देगा ।
यं संन्यासिनं त्वम् अजुषथाः (अजोषिष्ठाः) असौ आर्यसमाजे उपदेक्ष्यति ।

५. रात दिन उत्तम आचरण का सेवन कर।
अहर्निशं सदाचरणं जुषस्व (जुषेथाः)।

६. सबको माता पिता की सेवा करनी चाहिए।
सर्वे पितरौ जुषेरन्।

७. दुष्टों से प्रीति न रख=खलान् मा जोषिष्ठाः (मा स्म जुषथाः)।

८. यदि वह उस वृद्ध की सेवा करता तो उसकी सम्पत्ति का स्वामी बनता।
यदि सः तं वृद्धम् अजोषिष्यत तर्हि तस्य सम्पदः स्वामी अभविष्यत्।

(८) विज् (ओविजी) भयचलनयोः=डरना, कांपना, उद्विग्न होना [आत्मने०]

विज् धातु का प्रयोग प्रायः उत् उपसर्ग पूर्वक ही होता है। विज् से परे जो इडादि प्रत्यय (ञित् णित् को छोड़कर) आते हैं वे ङिद्वत् समझे जाते हैं।[1] इस लिए लुट्, लृट्, लुङ् और लृङ् में भी लघूपधगुण का निषेध रहेगा।[2]

लट्—	उद्विजते	उद्विजेते	उद्विजन्ते
लिट्—	उद्विविजे	उद्विविजाते	उद्विविजिरे
लुट्—	उद्विजिता	उद्विजितारौ	उद्विजितारः
लृट्—	उद्विजिष्यते	उद्विजिष्येते	उद्विजिष्यन्ते
लोट्—	उद्विजताम्	उद्विजेताम्	उद्विजन्ताम्
लङ्—	उदविजत	उदविजेताम्	उदविजन्त
वि० लिङ्—	उद्विजेत	उद्विजेयाताम्	उद्विजेरन्
लुङ्—	उदविजिष्ट	उदविजिषाताम्	उदविजिषत
लृङ्—	उदविजिष्यत	उदविजिष्येताम्	उदविजिष्यन्त

इसके अभ्यास-वाक्य सोपसर्ग धातुओं के प्रकरण में समझायेंगे।

(९) मृ (मृङ्) प्राणत्यागे=मरना [आत्मनेपदी]

यद्यपि, मृ (मृङ्) धातु ङित् है, अतः सामान्य नियमानुसार[3] इससे सब लकारों में आत्मनेपद प्रत्यय ही होने चाहियें, किन्तु विशेष व्यवस्था[4] के कारण लट्, लोट्, लङ्, लिङ्, (वि० लिङ् और आशीर्लिङ् दोनों) और लुङ् इन छः लकारों में ही आत्मनेपद प्रत्यय होंगे, शेष लिट्, लुट्, लृट्, और लृङ् इन चार लकारों में परस्मैपद प्रत्यय ही होंगे।[5]

---

१. विज इट् (अष्टा० १.२.२)।
२. क्ङिति च (अष्टा १.१.५)।
३. अनुदात्तङित आत्मनेपदम् (अष्टा० १.३.१२)
४. म्रियतेर्लुङ्लिङोश्च (अष्टा० १.३.६१)
५. शेषात् कर्त्तरि परस्मैपदम् (अष्टा १.३.७८)

लट्—	म्रियते	म्रियेते	म्रियन्ते
	म्रियसे	म्रियेथे	म्रियध्वे
	म्रिये	म्रियावहे	म्रियामहे
लिट्—	ममार	मम्रतुः	मम्रुः
लुट्—	मर्ता	मर्तारौ	मर्तारः
	मर्तासि	मर्तास्थः	मर्तास्थ
	मर्तास्मि	मर्तास्वः	मर्तास्मः
लृट्—	मरिष्यति	मरिष्यतः	मरिष्यन्ति
लोट्—	म्रियताम्	म्रियेताम्	म्रियन्ताम्
	म्रियस्व	म्रियेथाम्	म्रियध्वम्
	म्रियै	म्रियावहै	म्रियामहै
लङ्—	अम्रियत	अम्रियेताम्	अम्रियन्त
	अम्रियथाः	अम्रियेथाम्	अम्रियध्वम्
	अम्रिये	अम्रियावहि	अम्रियामहि
वि॰लिङ्—	म्रियेत	म्रियेयाताम्	म्रियेरन्
	म्रियेथाः	म्रियेयाथाम्	म्रियेध्वम्
	म्रियेय	म्रियेवहि	म्रियेमहि
लुङ्—	अमृत	अमृषाताम्	अमृषत
	अमृथाः	अमृषाथाम्	अमृड्ढ्वम्
	अमृषि	अमृष्वहि	अमृष्महि
लृङ्—	अमरिष्यत्	अमरिष्यताम्	अमरिष्यन्

अभ्यास

१. सैकड़ों आदमी दुःख सुख की परवाह न करके धन के लिए मरते हैं।
शतानि मनुष्याः सुखदुःखे अनपेक्ष्य अहर्निशं धनाय म्रियन्ते।

२. किन्तु उनका नाम कोई नहीं जानता, परन्तु जो देश के लिए या दूसरों के लिए मरते हैं, वे मरने के बाद भी पूजे जाते हैं।
किन्तु न कोऽपि तान् जानीते, परन्तु ये देशार्थं परेषां वा कृते म्रियन्ते, ते मरणानन्तरमपि पूज्यन्ते।

३. दधीचि आदि बहुत से महापुरुष देश के लिए मरे और आज भी पूजे जा रहे हैं।
दधीचिप्रभृतयः बहवः महापुरुषाः देशाय मम्रुः (अम्रियन्त, अमृषत) ते अद्यापि पूज्यन्ते च।

४. कौन कहता है तू अभी मरेगा, तू सौ वर्षों से पहिले नहीं मरेगा।
भोः! कः एवमाह 'त्वं मरिष्यसि' इति न खलु त्वं शतात् वर्षेभ्यः प्राक् मर्तासि (मरिष्यसि)।

५. भूखा मत मर, काम कर=बुभुक्षया मा मृथाः (मा स्म म्रियथाः), परिश्रमं कुरु।

६. बहुत से आदमी परिश्रम से जी चुराते हैं इसलिये भूखे मरते हैं।
भूयिष्ठाः जनाः श्रमात् जुगुप्समानाः क्षुधया म्रियन्ते।

७. यदि उसकी चिकित्सा समय पर हो जाती तो वह नहीं मरता।
यदि समये सः अचिकित्सिष्यत, तर्हि नामरिष्यत्।

(१०) दृ (दृङ्) आदरे=आदर करना [आत्मने॰]

दृ धातु का प्रयोग प्रायः आङ् उपसर्ग पूर्वक ही होता है। लट्, लोट्, लङ्, विधिलिङ् में (श विकरण परे रहने के कारण) दृ के ऋ के स्थान पर रिङ्

(=रि) आदेश होगा[1] और द्रि बनेगा तब द्रि के इ के स्थान पर इयङ्[2] आदेश होगा।

लट्—आद्रियते आद्रियेते आद्रियन्ते
आद्रियसे आद्रियेथे आद्रियध्वे
आद्रिये आद्रियावहे आद्रियामहे
लिट्—आदद्रे आदद्राते आदद्रिरे
लुट्—आदर्ता आदर्तारौ आदर्तारः
लृट्—आदरिष्यते आदरिष्येते आदरिष्यन्ते
लोट्—आद्रियताम् आद्रियेताम् आद्रियन्ताम्
लङ्—आद्रियत आद्रियेताम् आद्रियन्त

वि. लिङ्—आद्रियेत आद्रियेयाताम् आद्रियेरन्
लुङ्—आदृत आदृषाताम् आदृषत
आदृथाः आदृषाथाम् आदृढ्वम्
आदृषि आदृष्वहि आदृष्महि
लृङ्—आदरिष्यत आदरिष्येताम् आदरिष्यन्त

अभ्यास

१. विद्वानों का सब सदा आदर करते हैं=विदुषः सर्वे सदा आद्रियन्ते।

२. सबको बड़ों का आदर करना चाहिए=सर्वे ज्येष्ठान् आद्रियेरन् (आद्रियन्ताम्)

३. ये सज्जन हैं, इसलिये सबका आदर ही करेंगे।
एते सज्जनाः सन्ति, अतः सर्वान् आदर्तारः (आदरिष्यन्ते)।

४. तूने किसी का आदर नहीं किया=त्वं कमपि न आदृथाः (आद्रियथाः)।

५. पहिले राजा ऋषियों का सबसे अधिक आदर करते थे।
पुरा नृपाः ऋषीन् सर्वेभ्यः अधिकम् आदद्रिरे।

६. इस दुष्ट का आदर मत करना, नहीं तो रोज भोजन के समय उपस्थित हो जायेगा।
इमं दुष्टं मा आदृथाः (मा स्म आद्रियथाः) अन्यथा
प्रत्यहम् एष भोजनवेलायाम् उपस्थास्यते[3]।

७. इन मूर्खों में से मैं किसका आदर करूं?
एषु मूर्खेषु कम् आद्रियै (आद्रियेय)।

८. मैंने उनका आदर किया=अहं तान भृशम् आदृषि (आद्रिये)।

९. यदि तू सबका आदर करता तो तेरा सब आदर करते।
यदि त्वं सर्वान् आदरिष्यथाः तर्हि सर्वे त्वाम् आदरिष्यन्त।

---

१. रिङ् शयग्लिङ्क्षु (अष्टा.७.४.२८)
२. अचिश्नुधातुभ्रुवां य्वोरियङुवङौ (अष्टा.६.४.७७)।
३. उप उपसर्ग पूर्वक स्था धातु से 'वा लिप्सायामिति वक्तव्यम् वा०, (अष्टा.१.३.२५) आत्मनेपद।

(११) मिल् (सङ्गमे)=मिलना [उभयपदी]

परस्मैपद

लट्—	मिलति	मिलतः	मिलन्ति
लिट्—	मिमेल	मिमिलतुः	मिमिलुः
लुट्—	मेलिता	मेलितारौ	मेलितारः
लृट्—	मेलिष्यति	मेलिष्यतः	मेलिष्यन्ति
लोट्—	मिलतु / मिलतात्	मिलताम्	मिलन्तु
लङ्—	अमिलत्	अमिलताम्	अमिलन्
वि. लिङ्—	मिलेत्	मिलेताम्	मिलेयुः
लुङ्—	अमेलीत्	अमेलिष्टाम्	अमेलिषुः
	अमेलीः	अमेलिष्टम्	अमेलिष्ट
	अमेलिषम्	अमेलिष्व	अमेलिष्म
लृङ्—	अमेलिष्यत्	अमेलिष्यताम्	अमेलिष्यन्

आत्मनेपद

लट्—	मिलते	मिलेते	मिलन्ते
लिट्—	मिमिले	मिमिलाते	मिमिलिरे
लुट्—	मेलिता	मेलितारौ	मेलितारः
लृट्—	मेलिष्यते	मेलिष्येते	मेलिष्यन्ते
लोट्—	मिलताम्	मिलेताम्	मिलन्ताम्
लङ्—	अमिलत	अमिलेताम्	अमिलन्त
वि. लिङ्—	मिलेत	मिलेयाताम्	मिलेरन्
लुङ्—	अमेलिष्ट	अमेलिषाताम्	अमेलिषत
	अमेलिष्ठाः	अमेलिषाथाम्	अमेलिढ्वम्
	अमेलिषि	अमेलिष्वहि	अमेलिष्महि
लृङ्—	अमेलिष्यत	अमेलिष्येताम्	अमेलिष्यन्त

अभ्यास

१. दुर्जन जब मिलते हैं तो परस्पर दारुण दुःख देते हैं।
दुर्जनाः यदा मिलन्ति (मिलन्ते) तदा मिथः दारुणं दुःखाकुर्वन्ति।

२. दयानन्द चौदह वर्षों में सैकड़ों योगियों से मिला।
दयानन्दः चतुर्दशसु वर्षेषु शतैः योगिभिः मिमेल (मिमिले; अमिलत्, अमिलत; अमेलीत्, अमेलिष्ट)।

३. कल हम दोनों उस बाग में मिलेंगे।
श्वः आवां तस्मिन् उद्याने मेलितास्वः (मेलितास्वहे)।

४. आज वेदपरिषद् में वे अपने मित्रों से मिलेंगे और हम विद्वानों से मिलेंगे।
अद्य वेदपरिषदि ते स्वमित्रैः मेलिष्यन्ति (मेलिष्यन्ते) वयं च सुधीभिः मेलिष्यामः (मेलिष्यामहे)।

५. क्या मैं आज वित्तमन्त्री से मिलूं ?
किम् अहम् अद्य वित्तमन्त्रिणा मिलानि (मिलै) ?

६. शायद मेरी पुस्तकें इस कमरे में मिल जायें।
मन्ये, मदीयानि पुस्तकानि अस्मिन् प्रकोष्ठे मिलेयुः (मिलेरन्)।

७. दुष्ट से मत मिल—खलेन मा मेलीः (मा मेलिष्ठाः, मा स्म मिलः, मा स्म मिलथाः)

८. यदि तू उससे पहिले मिल लेता तो वह असलीयत जान लेता ।

यदि त्वं तेन पूर्वम् अमेलिष्यः [अमेलिष्यथाः] तर्हि सः वास्तविकताम् अज्ञास्यत् ।

(१२) मुच् (मुच्लृ) मोचने=छोड़ना, देना [उभयपदी]

मुच् धातु को शित् लकारों [=लट्, लोट्, लङ्, वि० लिङ्] में मुम् आगम होगा[1]। उ और म् की इत्सञ्ज्ञा[2] और उनका लोप[3] होने पर न् रहेगा। न् को अनुस्वार[4] और अनुस्वार के स्थान पर परसवर्ण[5] होने पर ञ् हो जायेगा—मुच्→ मुनुम्च्→मुन्च्→मुंच्→मुञ्च् ।

परस्मैपद

लट्—	मुञ्चति	मुञ्चतः	मुञ्चन्ति
लिट्—	मुमोच	मुमुचतुः	मुमुचुः
लुट्—	मोक्ता	मोक्तारौ	मोक्तारः
लृट्—	मोक्ष्यति	मोक्ष्यतः	मोक्ष्यन्ति
लोट्—	मुञ्चतु / मुञ्चतात्	मुञ्चताम्	मुञ्चन्तु
लङ्—	अमुञ्चत्	अमुञ्चताम्	अमुञ्चन्
वि० लिङ्—	मुञ्चेत्	मुञ्चेताम्	मुञ्चेयुः
लुङ्—	अमुचत्	अमुचताम्	अमुचन्
	अमुचः	अमुचतम्	अमुचत
	अमुचम्	अमुचाव	अमुचाम
लृङ्—	अमोक्ष्यत्	अमोक्ष्यताम्	अमोक्ष्यन्

आत्मनेपद

लट्—	मुञ्चते	मुञ्चेते	मुञ्चन्ते
लिट्—	मुमुचे	मुमुचाते	मुमुचिरे
लुट्—	मोक्ता	मोक्तारौ	मोक्तारः
लृट्—	मोक्ष्यते	मोक्ष्येते	मोक्ष्यन्ते
लोट्—	मुञ्चताम्	मुञ्चेताम्	मुञ्चन्ताम्
लङ्—	अमुञ्चत	अमुञ्चेताम्	अमुञ्चन्त
वि० लिङ्—	मुञ्चेत	मुञ्चेयाताम्	मुञ्चेरन्
लुङ्—	अमुक्त	अमुक्षाताम्	अमुक्षत
	अमुक्थाः	अमुक्षाथाम्	अमुग्ध्वम्
	अमुक्षि	अमुक्ष्वहि	अमुक्ष्महि
लृङ्—	अमोक्ष्यत	अमोक्ष्येताम्	अमोक्ष्यन्त

अभ्यास

१. ये अपना धन सत्पात्रों को देते हैं।

एते स्वं धनं सत्पात्रेभ्यः मुञ्चन्ति [मुञ्चन्ते] ।

२. राम ने वन में किसी राक्षस को जिन्दा नहीं छोड़ा ।

रामः वने कमपि राक्षसं जीवन्तं न मुमोच [मुमुचे] ।

३. उस अपराधी को मैंने इसलिये नहीं छोड़ा, यदि मैं उसे छोड़ देता तो लोगों को दुःख देता ।

---

१. शे मुचादीनाम् [अष्टा. ७. १. ५९] ।

२. उपदेशेऽजनुनासिक इत्; हलन्त्यम् [अष्टा. १. ३. २, ३] ।

३. तस्य लोपः [अष्टा. १. ३. ९] ।

४. नश्चापदान्तस्य झलि [अष्टा. ८. ३. २४] ।

५. अनुस्वारस्य ययि परसवर्णः [अष्टा. ८. ४. ५८] ।

अहं तम् अपराधिनम् अतः न अमुक्षि [अमुचम्] यदि अहं तम् अमोक्ष्यम् [अमोक्ष्ये] तर्हि सः लोकेभ्यः अधोक्ष्यत् ।

४. यदि तू सत्य बोलेगा तो मैं तुझे छोड़ दूंगा, नहीं तो दण्ड दूंगा ।
यदि त्वं सत्यं वक्ष्यसि [वक्तासि] तर्हि त्वाम् मोक्तास्मि (मोक्ताहे; मोक्ष्यामि, मोक्ष्ये) अन्यथा दण्डयिष्यामि त्वाम् ।

५. यह बार बार अपराध करता है, मैं इसे कैसे छोड़ूं ?
अयं मुहुः मुहुः अपराध्यति कथमिमम् अहं मुञ्चानि [मुञ्चै, मुञ्चेयम्, मुञ्चेय] ?

६. इस अपराधी को कभी मत छोड़ना ।
इमम् अपराधिनं कदापि मा मुचः [मा मुक्थाः, मा स्म मुञ्चः, मा स्म मुञ्चथाः] ।

७. जज ने कल जिसे छोड़ा था, आज उसने पुनः चोरी कर ली ।
न्यायाधीशः ह्यः यम् अमुञ्चत् [अमुञ्चत] अद्य सः पुनः चौर्यम् अकार्षीत् ।

(१३) षिच (सिच्) क्षरणे=सींचना [उभयपदी]

शित् लकारों में मुच् के समान सिच् को भी नुम् आगम होगा ।

लट्—सिञ्चति सिञ्चतः सिञ्चन्ति
लिट्—सिषेच सिषिचतुः सिषिचुः
लुट्—सेक्ता सेक्तारौ सेक्तारः
लृट्—सेक्ष्यति सेक्ष्यतः सेक्ष्यन्ति
लोट्— {सिञ्चतु सिञ्चताम् सिञ्चन्तु (सिञ्चतात्)
लङ्—असिञ्चत् असिञ्चताम् असिञ्चन्
वि. लिङ्—सिञ्चेत् सिञ्चेताम् सिञ्चेयुः
लुङ्[1]—असिचत् असिचताम् असिचन्
असिचः असिचतम् असिचत
असिचम् असिचाव असिचाम
लृङ्—असेक्ष्यत् असेक्ष्यताम् असेक्ष्यन्

आत्मनेपद

लट्—सिञ्चते सिञ्चेते सिञ्चन्ते
लिट्—सिषिचे सिषिचाते सिषिचिरे
लुट्—सेक्ता सेक्तारौ सेक्तारः
लृट्—सेक्ष्यते सेक्ष्येते सेक्ष्यन्ते
लोट्—सिञ्चताम् सिञ्चेताम् सिञ्चन्ताम्
लङ्—असिञ्चत असिञ्चेताम् असिञ्चन्त
वि.लिङ्-सिञ्चेत सिञ्चेयाताम् सिञ्चेरन्
लुङ्[2]-[१]असिचत असिचेताम् असिचन्त
असिचथाः असिचेथाम् असिचध्वम्
असिचे असिचावहि असिचामहि
[२] असिक्त असिक्षाताम् असिक्षत
असिक्थाः असिक्षाथाम् असिग्ड्ढ्वम्
असिक्षि असिक्ष्वहि असिक्ष्महि
लृङ्—असेक्ष्यत असेक्ष्येताम् असेक्ष्यन्त

---

१. सिच् धातु के परस्मैपद के लुङ् में 'लिपिसिचिह्वश्च' [अष्टा. ३.१.५३] से नित्य च्लि के स्थान पर अ [=अङ्] आदेश होता है ।

२. सिच् धातु के आत्मनेपद के लुङ् में 'आत्मनेपदेष्वन्यतरस्याम्' [अष्टा ३.१.५४] से विकल्प से च्लि के स्थान पर अङ् होता है अतः दो प्रकार के रूप बनेंगे ।

अभ्यास

१. किसान खेतों को सींचते हैं = कृषकाः क्षेत्राणि सिञ्चन्ति [सिञ्चन्ते]।

२. देशभक्तों ने स्वतन्त्रता के पेड़ को अपने खून से सींचा था।
देशभक्ताः स्वातन्त्र्यपादपं निजरक्तेन सिषिचुः [सिषिचिरे; असिञ्चन्, असिञ्चन्त; असिचन्, असिचन्त, असिक्षत]।

३. प्राचीन आर्य लोग यदि अपने बलिदानों से आर्यसमाज रूपी पौधे को न सींचते तो इसका विकास न होता।
प्राचीनाः आर्यजनाः यदि निजबलिदानैः [स्वप्राणार्पणैः] आर्यसमाजक्षुपं न असेक्ष्यन् [असेक्ष्यन्त] तर्हि अस्य विकासः न अभविष्यत्।

४. बालको! रोज इन पेड़ों को सींचो = बालकाः! प्रत्यहम् इमान् तरून् सिञ्चत [सिञ्चध्वम्]।

५. हम तो इन फलदार वृक्षों को ही सींचेंगे = वयं तु इमान् फलिनः वृक्षान् एव सेक्ष्यामः [सेक्ष्यामहे; सेक्तास्मः, सेक्तास्महे]।

६. अब बगिया को मत सींच = इदानीं निष्कुटं मा सिचः [मा सिचथाः; मा सिक्थाः; मा स्म सिञ्चः, मा स्म सिञ्चथाः]।

७. हमें वृक्षारोपण के बाद, समय समय पर उन्हें सींचना भी चाहिये।
वयं वृक्षारोपणानन्तरं यथाकालं तान् सिञ्चेम [सिञ्चेमहि]।

रुधादिगण

रुधादिगण की धातुओं में, चार लकारों में (लट्, लोट्, लङ्, वि० लिङ् में) श्नम् विकरण होगा[1]। श् और म् की इत्सञ्ज्ञा[2] तथा लोप होने पर केवल 'न' रहेगा। पित् प्रत्ययों (तिप्, सिप्, मिप् आदि) को छोड़कर अन्य प्रत्यय (तस्, झि आदि तथा त, आताम् आदि) परे रहने पर उस 'न' के अकार का लोप हो जायगा[3]।

(१) रुध् (रुधिर्) आवरणे = रोकना [उभयपदी] द्विकर्मक

रुध् धातु इरित् है, इसलिये परस्मैपद में लुङ् में च्लि के स्थान पर विकल्प से अङ् आदेश होगा[4]। पक्ष में सिच् रहेगा। अतः दो प्रकार के रूप बनेंगे।

---

१. रुधादिभ्यः श्नम् (अष्टा० ३.१.७८)।
२. लशक्वतद्धिते; हलन्त्यम् (अष्टा० १.३.८;३)।
३. श्नसोरल्लोपः (अष्टा० ६.४.१११)।
४. इरितो वा (अष्टा० ३.१.५७)।

परस्मैपद

लट्—	रुणद्धि	रुन्धः	रुन्धन्ति
	रुणत्सि	रुन्द्धः	रुन्द्ध
	रुणध्मि	रुन्ध्वः	रुन्ध्मः
लिट्—	रुरोध	रुरुधतुः	रुरुधुः
लुट्—	रोद्धा	रोद्धारौ	रोद्धारः
लृट्—	रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति
लोट्—	रुणद्धु (रुन्द्धात्)	रुन्द्धाम्	रुन्धन्तु
	रुन्द्धि (रुन्द्धात्)	रुन्द्धम्	रुन्द्ध
	रुणधानि	रुणधाव	रुणधाम
लङ्—	अरुणत्	अरुन्द्धाम्	अरुन्धन्
	अरुणः (अरुणत्)	अरुन्द्धम्	अरुन्द्ध
	अरुणधम्	अरुन्ध्व	अरुन्ध्म
वि० लिङ्–	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
लुङ्–(१)	अरुधत्	अरुधताम्	अरुधन्
	अरुधः	अरुधतम्	अरुधत
	अरुधम्	अरुधाव	अरुधाम
(२)	अरौत्सीत्	अरौद्धाम्	अरौत्सुः
	अरौत्सीः	अरौद्धम्	अरौद्ध
	अरौत्सम्	अरौत्स्व	अरौत्स्म
लृङ्—	अरोत्स्यत्	अरोत्स्यताम्	अरोत्स्यन्

आत्मनेपद

लट्—	रुन्द्धे	रुन्धाते	रुन्धते
	रुन्त्से	रुन्धाथे	रुन्द्ध्वे
	रुन्धे	रुन्ध्वहे	रुन्ध्महे
लिट्—	रुरुधे	रुरुधाते	रुरुधिरे
लुट्—	रोद्धा	रोद्धारौ	रोद्धारः
	रोद्धासे	रोद्धासाथे	रोद्धाध्वे
	रोद्धाहे	रोद्धास्वहे	रोद्धास्महे
लृट्—	रोत्स्यते	रोत्स्येते	रोत्स्यन्ते
लोट्—	रुन्द्धाम्	रुन्धाताम्	रुन्धताम्
	रुन्त्स्व	रुन्धाथाम्	रुन्द्ध्वम्
	रुणधै	रुणधावहै	रुणधामहै
लङ्—	अरुन्द्ध	अरुन्धाताम्	अरुन्धत
	अरुन्द्धाः	अरुन्धाथाम्	अरुन्द्ध्वम्
	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि
वि० लिङ्—	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
	रुन्धीय	रुन्धीवहि	रुन्धीमहि
लुङ्—	अरुद्ध	अरुत्साताम्	अरुत्सत
	अरुद्धाः	अरुत्साथाम्	अरुद्ध्वम्
	अरुत्सि	अरुत्स्वहि	अरुत्स्महि
लृङ्—	अरोत्स्यत	अरोत्स्येताम्	अरोत्स्यन्त

रुध् धातु के अभ्यास-वाक्य द्विकर्मक धातुओं के प्रसङ्ग में तथा सोपसर्ग धातुओं के प्रकरण में समझायेंगे।

(२) भिद् (भिदिर्) विदारणे=फाड़ना [उभयपदी]

परस्मैपद

लट्—	भिनत्ति	भिन्तः	भिन्दन्ति
	भिनत्सि	भिन्त्थः	भिन्त्थ
	भिनद्मि	भिन्द्वः	भिन्द्मः
लिट्—	बिभेद	बिभिदतुः	बिभिदुः
लुट्—	भेत्ता	भेत्तारौ	भेत्तारः
लृट्—	भेत्स्यति	भेत्स्यतः	भेत्स्यन्ति

आत्मनेपद

लट्—	भिन्ते	भिन्दाते	भिन्दते
	भिन्त्से	भिन्दाथे	भिन्द्ध्वे
	भिन्दे	भिन्द्वहे	भिन्द्महे
लिट्—	बिभिदे	बिभिदाते	बिभिदिरे
लुट्—	भेत्ता	भेत्तारौ	भेत्तारः
लृट्—	भेत्स्यते	भेत्स्येते	भेत्स्यन्ते

लोट्—भिनत्त (भिन्तात्) भिन्ताम् भिन्दन्तु
भिन्द्धि (भिन्तात्) भिन्तम् भिन्त
भिनदानि भिनदाव भिनदाम

लङ्—अभिनत् अभिन्ताम् अभिन्दन्
अभिनः (अभिनत्) अभिन्तम् अभिन्त
अभिनदम् अभिन्द्व अभिन्द्म

वि० लिङ्—भिन्द्यात् भिन्द्याताम् भिन्द्युः
भिन्द्याः भिन्द्यातम् भिन्द्यात
भिन्द्याम् भिन्द्याव भिन्द्याम

लुङ्[1]—(१) अभिदत् अभिदताम् अभिदन्
अभिदः अभिदतम् अभिदत
अभिदम् अभिदाव अभिदाम
(२) अभैत्सीत् अभैत्ताम् अभैत्सुः
अभैत्सीः अभैत्तम् अभैत्त
अभैत्सम् अभैत्स्व अभैत्स्म

लृङ्—अभेत्स्यत् अभेत्स्यताम् अभेत्स्यन्

लोट्—भिन्ताम् भिन्दाताम् भिन्दताम्
भिन्त्स्व भिन्दाथाम् भिन्द्ध्वम्
भिनदै भिनदावहै भिनदामहै

लङ्—अभिन्त अभिन्दाताम् अभिन्दत
अभिन्त्थाः अभिन्दाथाम् अभिन्द्ध्वम्
अभिन्दि अभिन्द्वहि अभिन्द्महि

वि० लिङ्—भिन्दीत भिन्दीयाताम् भिन्दीरन्
भिन्दीथाः भिन्दीयाथाम् भिन्दीध्वम्
भिन्दीय भिन्दीवहि भिन्दीमहि

लुङ्[2]—अभित्त अभित्साताम् अभित्सत
अभित्थाः अभित्साथाम् अभिद्ध्वम्
अभित्सि अभित्स्वहि अभित्स्महि

लृङ्—अभेत्स्यत अभेत्स्येताम् अभेत्स्यन्त

अभ्यास

१. स्वार्थी मनुष्य आपस के स्नेह को फाड़ देते हैं।
स्वार्थिनः जनाः पारस्परिकं स्नेहं भिन्दन्ति (भिन्दते)।

२. भीम ने दुःशासन के सीने को फाड़ दिया।
भीमः दुःशासनस्य वक्षः बिभेद (बिभिदे)।

३. जिन लकड़ियों को तूने कल फाड़ा था, वे अभी तक नहीं सूखी हैं।
यानि काष्ठानि त्वं ह्यः अभिनः (अभिनत्, अभिन्त्थाः) तानि अधुनावधि न अशुषन्।

४. 'मैं संजीवक को पिङ्गलक से फाड़ दूंगा', यह दमनक ने करटक को कहा।
'अहं सञ्जीवकं पिङ्गलकात् भेत्तास्मि (भेत्ताहे; भेत्स्यामि, भेत्स्ये) इति दमनकः करटकम् आह।

---

१. भिद् धातु भी इरित् है अतः रुधिर् धातु के समान इसके भी लुङ् में (परस्मैपद में) दो प्रकार के रूप बनेंगे। यही बात छिदिर् और युजिर् में भी समझनी चाहिये।

२. लिङ्सिचावात्मनेपदेषु (अष्टा० १.२.११) से सिच् के कित् हो जाने के कारण लघूपध गुण का निषेध।

५. यदि क्रीप्स हिटलर को रूस के शासक से न फोड़ता तो युद्ध का परिणाम और ही होता।

यदि क्रीप्समहोदयः हिटलरं रूसदेशाध्यक्षात् न अभेत्स्यत् (अभेत्स्यत) तर्हि युद्धस्य फलम् अन्यदेव अभविष्यत्।

६. इस जूठे घड़ों को फोड़ दे=एतान् उच्छिष्टान् घटान् भिन्धि (भिन्त्स्व)

७. जैसे विनोद ने आज कपड़े फाड़ दिये वैसे किसी को नहीं फाड़ने चाहियें।

यथा विनोदः अद्य वासांसि अभिदत् (अभैत्सीत्, अभित्त) तथा कश्चिद् अपि न भिन्द्यात् (भिन्दीत)।

८. इन वस्त्रों को न तूने फाड़ा न उसने फाड़ा तो किसने फाड़ा।

इमानि वासांसि न त्वम् अभिनत् न सोऽभिनत् तर्हि कोऽभिनत्।

(३) छिद् (छिदिर्) द्वैधीकरणे=काटना, अलग करना [उभयपदी]

लट्—	छिनत्ति	छिन्तः	छिन्दन्ति
	छिनत्सि	छिन्त्थः	छिन्त्थ
	छिनद्मि	छिन्द्वः	छिन्द्मः
लिट्—	चिच्छेद	चिच्छिदतुः	चिच्छिदुः
लुट्—	छेत्ता	छेत्तारौ	छेत्तारः
लृट्—	छेत्स्यति	छेत्स्यतः	छेत्स्यन्ति
लोट्—	छिनत्तु, छिन्तात्	छिन्ताम्	छिन्दन्तु
	छिन्द्धि, छिन्तात्	छिन्तम्	छिन्त
	छिनदानि	छिनदाव	छिनदाम
लङ्—	अच्छिनत्	अच्छिन्ताम्	अच्छिन्दन्
	अच्छिनः, अच्छिनत्	अच्छिन्तम्	अच्छिन्त
	अच्छिनदम्	अच्छिन्द्व	अच्छिन्द्म
वि० लिङ्—	छिन्द्यात्	छिन्द्याताम्	छिन्द्युः
लुङ्—(१)	अच्छिदत्	अच्छिदताम्	अच्छिदन्
	अच्छिदः	अच्छिदतम्	अच्छिदत
	अच्छिदम्	अच्छिदाव	अच्छिदाम

लट्—	छिन्ते	छिन्दाते	छिन्दते
	छिन्त्से	छिन्दाथे	छिन्द्ध्वे
	छिन्दे	छिन्द्वहे	छिन्द्महे
लिट्—	चिच्छिदे	चिच्छिदाते	चिच्छिदिरे
लुट्—	छेत्ता	छेत्तारौ	छेत्तारः
लृट्—	छेत्स्यते	छेत्स्येते	छेत्स्यन्ते
लोट्—	छिन्ताम्	छिन्दाताम्	छिन्दताम्
	छिन्त्स्व	छिन्दाथाम्	छिन्द्ध्वम्
	छिनदै	छिनदावहै	छिनदामहै
लङ्—	अच्छिन्त	अच्छिन्दाताम्	अच्छिन्दत
	अच्छिन्थाः	अच्छिन्दाथाम्	अच्छिन्द्ध्वम्
	अच्छिन्दि	अच्छिन्द्वहि	अच्छिन्द्महि
वि. लिङ्—	छिन्दीत	छिन्दीयाताम्	छिन्दीरन्
	छिन्दीथाः	छिन्दीयाथाम्	छिन्दीध्वम्
	छिन्दीय	छिन्दीवहि	छिन्दीमहि
लुङ्—	अच्छित्त[1]	अच्छित्साताम्	अच्छित्सत

१. लिङ्सिचावात्मनेपदेषु (अष्टा० १.२.११) सिच् को किद्वद्भाव।

(२) अच्छैत्सीत् अच्छैत्ताम् अच्छैत्सुः	अच्छित्थाः अच्छित्साथाम् अच्छिद्ध्वम्
अच्छैत्सीः अच्छैत्तम् अच्छैत्त	अच्छित्सि अच्छित्स्वहि अच्छित्स्महि
अच्छैत्सम् अच्छैत्स्व अच्छैत्स्म	
लृङ्—अच्छेत्स्यत् अच्छेत्स्यताम् अच्छेत्स्यन्	लृङ्—अच्छेत्स्यत अच्छेत्स्येताम् अच्छेत्स्यन्त

अभ्यास

१. वह कुल्हाड़े से वृक्षों को काटता है=सः कुठारेण वृक्षान् छिनत्ति ।

२. परशुराम ने फरसे से हजारों क्षत्रियों के सिर काट डाले ।
परशुरामः परशुना सहस्राणां क्षत्रियाणां शिरांसि चिच्छेद (चिच्छिदे)

३. अन्दर की डालियाँ मैंने कल ही काट दी थीं, बाहर की डालियाँ आज बालकों ने काटी हैं ।
आन्तरिकीः शाखाः अहं ह्यः एव अच्छिनदम् (अच्छिन्दि), बाह्याः शाखाः अद्य बालकाः अच्छिदन् (अच्छैत्सुः, अच्छित्सत) ।

४. इन शत्रु सेनाओं को काट दो, फाड़ दो ।
इमाः शत्रुसेनाः छिन्धि भिन्धि (छिन्त्स्व, भिन्त्स्व) ।

५. इन बेलों को तुमने काटा या उसने ?
इमाः वल्लरीः त्वम् अच्छिनत् (अच्छिनः) उत सः अच्छिनत् ।

६. इस दुष्ट का सिर मत काट, जीवित मेरे पास ले आ ।
अस्य दुष्टस्य शिरः मा च्छिदः (मा च्छैत्सीः, मा च्छित्थाः; मा स्म च्छिनः, मा स्म च्छिनत्, मा स्म च्छिन्त्थाः) जीवन्तं माम् उपनय ।

७. मैं इनको जड़ से काट दूंगा ।
अहम् एतान् समूलं छेत्तास्मि (छेत्ताहे; छेत्स्यामि, छेत्स्ये) ।

८. इस पौधे को न उसने काटा न तूने काटा तो आखिर किस ने काटा ?
इमं क्षुपं न सः अच्छिनत् न त्वम् अच्छिनत् तर्हि अन्ततः कोऽच्छिनत् ?

९. हरे वृक्षों को नहीं काटना चाहिये=सरसान् पादपान् न छिन्द्यात् (छिन्दीत)

१०. यदि इस प्रकार वनों को न काटते तो समय पर खूब वर्षा होती ।
यदि एवं वनानि न अच्छेत्स्यन् (अच्छेत्स्यन्त) तर्हि काले पुष्कलः वर्षः अभविष्यत्

(४) युज् (युजिर्) योगे=जोड़ना [उभयपदी]

लट्—युनक्ति	युङ्क्तः	युञ्जन्ति	लट्—युङ्क्ते	युञ्जाते	युञ्जते
युनक्षि	युङ्क्थः	युङ्क्थ	युङ्क्षे	युञ्जाथे	युङ्ग्ध्वे
युनज्मि	युञ्ज्वः	युञ्ज्मः	युञ्जे	युञ्ज्वहे	युञ्ज्महे
लिट्—युयोज	युयुजतुः	युयुजुः	लिट्—युयुजे	युयुजाते	युयुजिरे

लुट्—	योक्ता	योक्तारौ	योक्तारः
लृट्—	योक्ष्यति	योक्ष्यतः	योक्ष्यन्ति
लोट्—	युनक्तु / युङ्क्तात्	युङ्क्ताम्	युञ्जन्तु
	युङ्ग्धि / युङ्क्तात्	युङ्क्तम्	युङ्क्त
	युनजानि	युनजाव	युनजाम
लङ्—	अयुनक्	अयुङ्क्ताम्	अयुञ्जन्
	अयुनक्	अयुङ्क्तम्	अयुङ्क्त
	अयुनजम्	अयुञ्ज्व	अयुञ्ज्म
वि० लिङ्—	युञ्ज्यात्	युञ्ज्याताम्	युञ्ज्युः
	युञ्ज्याः	युञ्ज्यातम्	युञ्ज्यात
	युञ्ज्याम्	युञ्ज्याव	युञ्ज्याम
लुङ्—	(१) अयुजत्	अयुजताम्	अयुजन्
	अयुजः	अयुजतम्	अयुजत
	अयुजम्	अयुजाव	अयुजाम
	(२) अयौक्षीत्	अयौक्ताम्	अयौक्षुः
	अयौक्षीः	अयौक्तम्	अयौक्त
	अयौक्षम्	अयौक्ष्व	अयौक्ष्म
लृङ्—	अयोक्ष्यत्	अयोक्ष्यताम्	अयोक्ष्यन्

लुट्—	योक्ता	योक्तारौ	योक्तारः
लृट्	योक्ष्यते	योक्ष्येते	योक्ष्यन्ते
लोट्—	युङ्क्ताम्	युञ्जाताम्	युञ्जताम्
	युङ्क्ष्व	युञ्जाथाम्	युङ्ग्ध्वम्
	युनजै	युनजावहै	युनजामहै
लङ्—	अयुङ्क्त	अयुञ्जाताम्	अयुञ्जत
	अयुङ्क्थाः	अयुञ्जाथाम्	अयुङ्ग्ध्वम्
	अयुञ्जि	अयुञ्ज्वहि	अयुञ्ज्महि
वि. लिङ्—	युञ्जीत	युञ्जीयाताम्	युञ्जीरन्
	युञ्जीथाः	युञ्जीयाथाम्	युञ्जीध्वम्
	युञ्जीय	युञ्जीवहि	युञ्जीमहि
लुङ्—	अयुक्त[1]	अयुक्षाताम्	अयुक्षत
	अयुक्थाः	अयुक्षाथाम्	अयुग्ध्वम्
	अयुक्षि	अयुक्ष्वहि	अयुक्ष्महि
लृङ्—	अयोक्ष्यत	अयोक्ष्येताम्	अयोक्ष्यन्त

युज् धातु का वाक्यों में अभ्यास उपसर्ग वाले उपकरण में कराया जायेगा।

पिष् (पिष्लृ) सञ्चूर्णने =पीसना [परस्मै०]

पिष् धातु लृदित् है अतः लुङ् में च्लि के स्थान पर अ (=अङ्) होगा।[2]

लट्—	पिनष्टि	पिंष्टः	पिंषन्ति
	पिनक्षि	पिंष्ठः	पिंष्ठ
	पिनष्मि	पिंष्वः	पिंष्मः
लिट्—	पिपेष	पिपिषतुः	पिपिषुः
लुट्—	पेष्टा	पेष्टारौ	पेष्टारः
लृट्—	पेक्ष्यति	पेक्ष्यतः	पेक्ष्यन्ति

लोट्—	पिनष्टु / पिंष्टात्	पिंष्टाम्	पिंषन्तु
	पिण्ड्ढि / पिंष्टात्	पिंष्टम्	पिंष्ट
	पिनषाणि	पिनषाव	पिनषाम
लङ्—	अपिनट्	अपिंष्टाम्	अपिंषन्
	अपिनट्	अपिंष्टम्	अपिंष्ट

१. लिङ्सिचावात्मनेपदेषु (अष्टा. १.२.११) से सिच् को किद्वद्भाव हुआ अतः धातु में लघूपध गुण न हुआ।

२. पुषादिद्युताद्यॢदितः परस्मैपदेषु (अष्टा. ३.१.५५)

	अपिनषम्	अपिष्व	अपिष्म	लुङ्—अपिषत्	अपिषताम्	अपिषन्
वि० लिङ्—	पिंष्यात्	पिंष्याताम्	पिंष्युः	अपिषः	अपिषतम्	अपिषत
	पिंष्याः	पिंष्यातम्	पिंष्यात	अपिषम्	अपिषाव	अपिषाम
	पिंष्याम्	पिंष्याव	पिंष्याम	लृङ्—अपेक्ष्यत्	अपेक्ष्यताम्	अपेक्ष्यन्

अभ्यास

१. वह तो गेहूं पीस रही है तुम दोनों क्या पीस रही हो ?
सा तु गोधूमान् पिनष्टि युवां किं पिंष्ठः ?

२. चन्दन के साथ केसर पीस=चन्दनेन सह केशरं पिण्ढि ।

३. तू यह दवाई कब पीसेगा=त्वम् इदम् औषधं कदा पेष्टासि (पेक्ष्यसि) ?

४. पहिले सब महिलाएँ हाथ चक्की से आटा पीसती थीं ।
पुरा सर्वाः वनिताः हस्तपेषणिकया चूर्णं पिपिषुः (पिंषन्ति स्म, अपिंषन्, अपिषन्)

५. न उषा ने गेहूं का आटा पीसा और न तूने जौ का आटा पीसा इसलिये सुपोषा ने भी कुछ नहीं पीसा ।
न उषा शमिताम् अपिनट् न च त्वं चिक्कसम् अपिनट् अतः सुपोषाऽपि किमपि नापिनट् ।

६. मसाले को अधिक मत पीस=उपस्करम् अधिकं मा पिषः (मा स्म पिनट्)

७. तुम्हें दवाइयों को अच्छी प्रकार पीसना चाहिए ।
त्वम् औषधानि सम्यक् पिंष्याः ।

८. यदि तू बंसलोचन और मिश्री अलग-अलग पीस देता तो पाँच रुपए पाता ।
यदि त्वं वंशरोचनां सितां च पृथक्-पृथक् अपेक्ष्यः तर्हि पञ्च रूप्यकाणि प्राप्स्यः ।

(६) भुज् (पालनाभ्यवहारयोः)=पालन करना और खाना [उभयपदी]

भुज् धातु उभयपदी है किन्तु आत्मनेपद और परस्मैपद की विशेष व्यवस्था है । खाने के अर्थ में आत्मनेपद होता है ।[1] और पालन करने के अर्थ में परस्मैपद होता है ।

परस्मैपद (पालन करने में)			आत्मनेपद (खाने के अर्थ में)		
लट्—भुनक्ति	भुङ्क्तः	भुञ्जन्ति	लट्—भुङ्क्ते	भुञ्जाते	भुञ्जते
भुनक्षि	भुङ्क्थः	भुङ्क्थ	भुङ्क्षे	भुञ्जाथे	भुङ्ग्ध्वे
भुनज्मि	भुञ्ज्वः	भुञ्ज्मः	भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे
लिट्—बुभोज	बुभुजतुः	बुभुजुः	लिट्—बुभुजे	बुभुजाते	बुभुजिरे

---

१. भुजोऽनवने (अष्टा० १.३.६६)

लुट्—भोक्ता भोक्तारौ भोक्तारः
लृट्—भोक्ष्यति भोक्ष्यतः भोक्ष्यन्ति
लोट्— {भुनक्तु / भुङ्क्तात्} भुङ्क्ताम् भुञ्जन्तु
{भुङ्ग्धि / भुङ्क्तात्} भुङ्क्तम् भुङ्क्त
भुनजानि भुनजाव भुनजाम
लङ्—अभुनक् अभुङ्क्ताम् अभुञ्जन्
अभुनक् अभुङ्क्तम् अभुङ्क्त
अभुनजम् अभुञ्ज्व अभुञ्ज्म
वि० लिङ्—भुञ्ज्यात् भुञ्ज्याताम् भुञ्ज्युः
भुञ्ज्याः भुञ्ज्यातम् भुञ्ज्यात
भुञ्ज्याम् भुञ्ज्याव भुञ्ज्याम
लुङ्—अभौक्षीत् अभौक्ताम् अभौक्षुः
अभौक्षीः अभौक्तम् अभौक्त
अभौक्षम् अभौक्ष्व अभौक्ष्म
लृङ्—अभोक्ष्यत् अभोक्ष्यताम् अभोक्ष्यन्

लुट्—भोक्ता भोक्तारौ भोक्तारः
लृट् भोक्ष्यते भोक्ष्येते भोक्ष्यन्ते
लोट्—भुङ्क्ताम् भुञ्जाताम् भुञ्जताम्
भुङ्क्ष्व भुञ्जाथाम् भुङ्ग्ध्वम्
भुनजै भुनजावहै भुनजामहै
लङ्—अभुङ्क्त अभुञ्जाताम् अभुञ्जत
अभुङ्क्थाः अभुञ्जाथाम् अभुङ्ग्ध्वम्
अभुञ्जि अभुञ्ज्वहि अभुञ्ज्महि
वि. लिङ्—भुञ्जीत भुञ्जीयाताम् भुञ्जीरन्
भुञ्जीथाः भुञ्जीयाथाम् भुञ्जीध्वम्
भुञ्जीय भुञ्जीवहि भुञ्जीमहि
लुङ् अभुक्त अभुक्षाताम् अभुक्षत
अभुक्थाः अभुक्षाथाम् अभुग्ध्वम्
अभुक्षि अभुक्ष्वहि अभुक्ष्महि
लृङ्—अभोक्ष्यत अभोक्ष्येताम् अभोक्ष्यन्त

अभ्यास (क)

१. तू प्रतिदिन प्रातः क्या खाता है।=त्वं प्रत्यहं प्रत्यूषे किं भुङ्क्षे ?

२. जो किसी को बिना दिए खाते हैं वे पाप खाते हैं।
ये अदत्वा कस्मैचित् भुञ्जते ते अघं भुञ्जते।

३. राम ने शबरी के बेर आनन्द से खाये।
रामः शबर्याः बदरीफलानि स्वादुङ्कारं बुभुजे।

४. अतिथियों ने न कल मक्खन खाया और न आज खाया।
अतिथयः नैव ह्यः नवनीतम् अभुञ्जत न च अद्य अभुक्षत।

५. कल हम जी भरकर मिठाई खायेंगे=श्वः वयं मनोहत्य मिष्टान्नं भोक्तास्महे।

६. आज जो जलेबियाँ खायेंगे वे कल नहीं पा सकेंगे।
अद्य ये कुण्डलिनीः भोक्ष्यन्ते ते श्वः नैव लब्धारः।

७. हरा शाक अवश्य खा, स्वस्थ रहेगा।
हरितशाकम् अवश्यं भुङ्क्ष्व स्वस्थः स्थास्यसि।

८. खून बढ़ाने के लिये तुझे प्रतिदिन अंगूर खाने चाहिएं।
रक्तवृद्धये त्वं प्रत्यहं द्राक्षाफलानि भुञ्जीथाः।

९. उस पापी के घर कुछ मत खाना।
तस्य पापिनः गृहे किमपि मा भुक्थाः (मा स्म भुङ्क्थाः)

१०. जैसे आज तूने दही के सिवाय कुछ नहीं खाया वैसे कल भी कुछ नहीं खाता तो तेरी पेचिश बन्द हो जाती।
यथा अद्य त्वम् ऋते दध्नः किमपि न अभुक्थाः तथा ह्यः अपि किमपि न अभोक्ष्यथाः तर्हि आमातिसाररोगः अशमिष्यत्।

अभ्यास (ख)

१. माता पिता पुत्रों को बुढ़ापे के सुख के लिए पालते हैं।
पितरौ सुतान् वार्द्धक्यसुखाय भुङ्क्तः।

२. राजा राम ने प्रजा का पुत्रवत् पालन किया।
नृपः रामः प्रजां पुत्रवत् बुभोज (अभुनक्, अभौक्षीत्)

३. दुष्टों का पालन मत कर=दुष्टान् मा भौक्षीः (मा स्म भुनक्)

४. क्या तू मेरे मरने पर मेरे पुत्रों का पालन करेगा?
अपि त्वं परलोकं गतवति मयि मम सुतान् भोक्तासि (भोक्ष्यसि)?

५. गुरुकुल में गुरुओं को शिष्यों का पुत्रवत् पालन करना चाहिये।
गुरुकुले गुरवः शिष्यान् पुत्रवत् भुञ्ज्युः (भुञ्जन्तु)।

६. यदि अध्यापक लोग शिष्यों को पढ़ाने के साथ उनका अच्छी तरह पालन भी करते तो मैं अपना सर्वस्व गुरुकुल को दे देता।
गुरवः शिष्यान् अध्यापनेन सह तान् अभोक्ष्यन् चेत् तर्हि निजसर्वस्वम् अहं गुरुकुलाय अत्यदेक्ष्यम् (अस्रक्ष्यम्)।

७. आजकल के नेता प्रजा का पालन नहीं करते अपितु उसका भोग करते हैं।
इदानीन्तनाः नेतारः न प्रजाः भुञ्जन्ति अपितु भुञ्जते।

तनादिगण

तनादिगण की धातुओं से लट्, लोट्, वि. लिङ्, लङ् में 'उ' विकरण लगता है[1]। तिप्, सिप्, मिप् आदि पित् (=अङित्) प्रत्यय परे होने पर 'उ' को ओ गुण हो जायेगा।[2] लट् और लङ् के वस्, मस् तथा वहि, महि परे रहने पर 'उ' का विकल्प से लोप होगा।[3]

---

१. तनादिकृञ्भ्य उः (अष्टा.३.१.७९).
२. सार्वधातुकार्धधातुकयोः (अष्टा. ७.३.८४).
३. लोपश्चास्यान्यतरस्यां म्वोः (अष्टा.६.४.१०७).

(१) तनु (=तन्) विस्तारे=फैलाना, विस्तार करना [उभयपदी]

लट्—	तनोति	तनुतः	तन्वन्ति
	तनोषि	तनुथः	तनुथ
	तनोमि	तन्वः / तनुवः	तन्मः / तनुमः
लिट्—	ततान	तेनतुः	तेनुः
लुट्—	तनिता	तनितारौ	तनितारः
लृट्—	तनिष्यति	तनिष्यतः	तनिष्यन्ति
लोट्—	तनोतु (तनुतात्)	तनुताम्	तन्वन्तु
	तनु (तनुतात्)	तनुतम्	तनुत
	तनवानि	तनवाव	तनवाम
लङ्—	अतनोत्	अतनुताम्	अतन्वन्
	अतनोः	अतनुतम्	अतनुत
	अतनवम्	अतन्व / अतनुव	अतन्म / अतनुम
वि. लिङ्—	तनुयात्	तनुयाताम्	तनुयुः
	तनुयाः	तनुयातम्	तनुयात
	तनुयाम्	तनुयाव	तनुयाम
लुङ्[१]—	(१) अतानीत्	अतानिष्टाम्	अतानिषुः
	अतानीः	अतानिष्टम्	अतानिष्ट
	अतानिषम्	अतानिष्व	अतानिष्म
	(२) अतनीत्	अतनिष्टाम्	अतनिषुः
	अतनीः	अतनिष्टम्	अतनिष्ट
	अतनिषम्	अतनिष्व	अतनिष्म
लृङ्—	अतनिष्यत्	अतनिष्यताम्	अतनिष्यन्

लट्—	तनुते	तन्वाते	तन्वते
	तनुषे	तन्वाथे	तनुध्वे
	तन्वे	तन्वहे / तनुवहे	तन्महे / तनुमहे
लिट्—	तेने	तेनाते	तेनिरे
लुट्—	तनिता	तनितारौ	तनितारः
लृट्—	तनिष्यते	तनिष्येते	तनिष्यन्ते
लोट्—	तनुताम्	तन्वाताम्	तन्वताम्
	तनुष्व	तन्वाथाम्	तनुध्वम्
	तनवै	तनवावहै	तनवामहै
लङ्—	अतनुत	अतन्वाताम्	अतन्वत
	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
	अतन्वि	अतन्वहि / अतनुवहि	अतन्महि / अतनुमहि
वि. लिङ्—	तन्वीत	तन्वीयाताम्	तन्वीरन्
	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
	तन्वीय	तन्वीवहि	तन्वीमहि
लुङ्[२]—	अतत / अतनिष्ट	अतनिषाताम्	अतनिषत
	अतथाः / अतनिष्ठाः	अतनिषाथाम्	अतनिड्ढ्वम्
	अतनिषि	अतनिष्वहि	अतनिष्महि
लृङ्—	अतनिष्यत	अतनिष्येताम्	अतनिष्यन्त

तन् धातु का अधिक प्रयोग वि उपसर्ग पूर्वक होता है।

---

१. परस्मैपद में लुङ् में 'अतो हलादेर्लघोः' (अष्टा.७.२.७) से एक पक्ष में वृद्धि का निषेध होगा। अतः दो प्रकार के रूप बनेंगे।

२. आत्मनेपद में, त और थास् परे रहने पर तनादिगणीय (कृञ् वर्जित) धातुओं से परे वर्त्तमान सिच् का 'तनादिभ्यस्तथासोः' (अष्टा.२.४.७९) से पक्ष में लुक् होगा।

अभ्यास

१. धन का लोभ पाप फैलाता है=धनस्य लोभः पापं वितनोति ।

२. सतयुग में राजाओं ने धर्म का विस्तार किया ।
कृतयुगे राजानः धर्मं तेनुः (तेनिरे; अतन्वन्, अतन्वत, अतानिषुः, अतनिषुः, अतनिषत) ।

३. हम संसार में विद्या फैलायेंगे ।
वयं संसारे विद्यां तनितास्मः (तनितास्महे; तनिष्यामः, तनिष्यामहे) ।

४. क्या मैं कृपालु गुरुओं का यश न फैलाऊँ ?
किम् अहं कृपालूनां गुरूणां यशः न वितनवानि (वितनवै; वितनुयाम्, वितन्वीय) ।

५. भ्रमजाल की बातें मत फैला ।
भ्रान्तिपूर्णाः वार्ताः मा तानीः (मा तनीः, मा तथाः; मा स्म तनोः, मा स्म तनुथाः)

६. धर्म का विस्तार कर पाप का नहीं=धर्मं वितनु (वितनुष्व) न पापम् ।

७. यदि दयानन्द वैदिक धर्म का विस्तार न करता तो यहाँ अवैदिक लोग अपने धर्म का विस्तार करते ।
यदि दयानन्दः वैदिकधर्मं न अतनिष्यत् (अतनिष्यत) तर्हि अवैदिकाः स्वमतम् अत्र अतनिष्यन् (अतनिष्यन्त) ।

(२) डुकृञ् (=कृ) करणे=करना [उभयपदी]

कृ धातु से भी 'उ' विकरण (लट्, लोट्, लङ् और विधिलिङ् में) लगता है । 'उ' परे रहने पर 'कृ' के ऋ को गुण और रपरत्व[1] होकर→'कर् उ' स्थिति होगी । तस्, झि आदि और त, आतां, झ आदि अपित् (=ङित्) सार्वधातुक प्रत्यय परे हो तो उस 'कर्' के अकार को उकार आदेश हो जाता है[2] । लट् और लङ् में वस्, मस् तथा वहि, महि परे रहने पर 'उ' विकरण का नित्य लोप होता है ।[3]

परस्मैपद			आत्मनेपद		
लट्—करोति	कुरुतः	कुर्वन्ति	लट्—कुरुते	कुर्वाते	कुर्वते
करोषि	कुरुथः	कुरुथ	कुरुषे	कुर्वाथे	कुरुध्वे
करोमि	कुर्वः	कुर्मः	कुर्वे	कुर्वहे	कुर्महे
लिट्—चकार	चक्रतुः	चक्रुः	लिट्—चक्रे	चक्राते	चक्रिरे
लुट्—कर्ता	कर्तारौ	कर्तारः	लुट्—कर्ता	कर्तारौ	कर्तारः
लृट्—करिष्यति	करिष्यतः	करिष्यन्ति	लृट्—करिष्यते	करिष्येते	करिष्यन्ते

---

१. सार्वधातुकार्धधातुकयोः (अष्टा.७.३.८४) उरण्रपरः (अष्टा.१.१.५१) ।

२. अत उत् सार्वधातुके (अष्टा.६.४.११०) ।

३. नित्यं करोतेः (अष्टा.६.४.१०८) ।

परस्मैपद				आत्मनेपद		
लोट्—करोतु (कुरुतात्)	कुरुताम्	कुर्वन्तु		लोट्—कुरुताम्	कुर्वाताम्	कुर्वताम्
कुरु (कुरुतात्)	कुरुतम्	कुरुत		कुरुष्व	कुर्वाथाम्	कुरुध्वम्
करवाणि	करवाव	करवाम		करवै	करवावहै	करवामहै
लङ्—अकरोत्	अकुरुताम्	अकुर्वन्		लङ्—अकुरुत	अकुर्वाताम्	अकुर्वत
अकरोः	अकुरुतम्	अकुरुत		अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
अकरवम्	अकुर्व	अकुर्म		अकुर्वि	अकुर्वहि	अकुर्महि
वि. लिङ्—कुर्यात्	कुर्याताम्	कुर्युः		वि. लिङ्—कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
कुर्याः	कुर्यातम्	कुर्यात		कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
कुर्याम्	कुर्याव	कुर्याम		कुर्वीय	कुर्वीवहि	कुर्वीमहि
लुङ्—अकार्षीत्	अकार्ष्टाम्	अकार्षुः		लुङ्—अकृत	अकृषाताम्	अकृषत
अकार्षीः	अकार्ष्टम्	अकार्ष्ट		अकृथाः	अकृषाथाम्	अकृड्ढ्वम्
अकार्षम्	अकार्ष्व	अकार्ष्म		अकृषि	अकृष्वहि	अकृष्महि
लृङ्—अकरिष्यत्	अकरिष्यताम्	अकरिष्यन्		लृङ्—अकरिष्यत	अकरिष्येताम्	अकरिष्यन्त

अभ्यास

१. वे रातदिन कन्या गुरुकुल का कार्य करते हैं।
ते अहर्निशं कन्यागुरुकुलस्य कार्यं कुर्वन्ति (कुर्वते)।

२. सतयुग में सबने धर्म के कार्य किये = कृतयुगे सर्वे धर्मस्य कार्याणि चक्रुः (चक्रिरे)

३. मैं तुम्हारे ये सब कार्य कल कर दूंगा।
अहं तव इमानि सर्वाणि कार्याणि श्वः कर्तास्मि (कर्ताहे)।

४. क्या आज वह मेरी चटाई बना देगा ?
किम् अद्य सः मदीयं कटं करिष्यति (करिष्यते) ?

५. मैं आपका कार्य करूँ या गुरुकुल का ?
अहं भवतः कार्यं करवाणि (करवै; कुर्याम्, कुर्वीय) अथवा गुरुकुलस्य ?

६. आप सबको पहले समाज का काम करना चाहिये फिर अन्य कार्य।
भवन्तः पूर्वं समाजस्य कार्यं कुर्युः (कुर्वीरन्) तदनन्तरम् अन्यत् कार्यम्।

७. मैंने कल उसके साथ आकाशगङ्गा के तारों के विषय में बहुत विवाद किया।
अहं ह्यः तेन सह आकाशगङ्गायाः ताराणां विषये भृशं विवादम् अकरवम् (अकुर्वि)

८. आज तुमने किसके साथ झगड़ा किया ?
अद्य त्वं केन सह कलहम् अकार्षीः (अकृथाः)।

९. पाप में रति मत कर=पापे रतिं मा कृथाः (मा कार्षीः; मा स्म करोः, मा स्म कुरुथाः)

१०. जितना कार्य तूने उन अमीरों का किया यदि उतना गरीबों का करता तो सीधा स्वर्ग को जाता।

यावत् कार्यं त्वं तेषां धनाढ्यानाम् अकरोः (अकुरुथाः; अकार्षीः, अकृथाः) तावत् यदि त्वं निर्धनानाम् अकरिष्यः (अकरिष्यथाः) तर्हि निर्बाधं स्वर्गं प्राप्स्यः।

क्र्यादिगण

क्र्यादिगणीय धातुओं से लट्, लोट्, लङ्, वि० लिङ् इन चार लकारों में श्ना विकरण लगेगा[1]। श् की इत्सञ्ज्ञा तथा लोप होने पर 'ना' रहेगा। 'ना' विकरण शित् होने से सार्वधातुक[2] और अपित् होने से ङित्त्व धर्म से युक्त माना जाता है[3]। फलतः ना परे रहने पर धातु को गुणवृद्धि आदि कार्य नहीं होंगे[4]। तस्, थस् आदि तथा त, वहि, महि आदि हलादि ङित् प्रत्यय परे रहने पर 'ना' के आकार के स्थान पर ईकार आदेश होता है[5]। अन्ति (=झि), आताम्, आथाम् आदि अजादि ङित् प्रत्यय परे होने पर उस 'ना' विकरण के आकार का लोप हो जाता है[6]।

(१) डुक्रीञ् (क्री) द्रव्यविनिमये=खरीदना [उभयपदी]

परस्मैपद

लट्—	क्रीणाति	क्रीणीतः	क्रीणन्ति
	क्रीणासि	क्रीणीथः	क्रीणीथ
	क्रीणामि	क्रीणीवः	क्रीणीमः
लिट्—	चिक्राय	चिक्रियतुः	चिक्रियुः
लुट्—	क्रेता	क्रेतारौ	क्रेतारः
लृट्—	क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति
लोट्—	क्रीणातु (क्रीणीतात्)	क्रीणीताम्	क्रीणन्तु
	क्रीणीहि (क्रीणीतात्)	क्रीणीतम्	क्रीणीत

आत्मनेपद

लट्—	क्रीणीते	क्रीणाते	क्रीणते
	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
	क्रीणे	क्रीणीवहे	क्रीणीमहे
लिट्—	चिक्रिये	चिक्रियाते	चिक्रियिरे
लुट्—	क्रेता	क्रेतारौ	क्रेतारः
लृट्—	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
लोट्—	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
	क्रीणै	क्रीणावहै	क्रीणामहै

---

१. क्र्यादिभ्यः श्ना (अष्टा. ३.१.८१)
२. तिङ्शित् सार्वधातुकम् (अष्टा. ३.४.११३)
३. सार्वधातुकमपित् (अष्टा. १.२.४)
४. क्ङिति च (अष्टा. १.१.५)
५. ई हल्यघोः (अष्टा. ६.४.११३)
६. श्नाभ्यस्तयोरातः (अष्टा. ६.४.११२)

क्रीणानि क्रीणाव क्रीणाम

लङ्—अक्रीणात् अक्रीणीताम् अक्रीणन्
अक्रीणाः अक्रीणीतम् अक्रीणीत
अक्रीणाम् अक्रीणीव अक्रीणीम

वि. लिङ्—क्रीणीयात् क्रीणीयाताम् क्रीणीयुः
क्रीणीयाः क्रीणीयातम् क्रीणीयात
क्रीणीयाम् क्रीणीयाव क्रीणीयाम

लुङ्—अक्रैषीत् अक्रैष्टाम् अक्रैषुः
अक्रैषीः अक्रैष्टम् अक्रैष्ट
अक्रैषम् अक्रैष्व अक्रैष्म

लृङ्—अक्रेष्यत् अक्रेष्यताम् अक्रेष्यन्

लङ्—अक्रीणीत अक्रीणाताम् अक्रीणत
अक्रीणीथाः अक्रीणाथाम् अक्रीणीध्वम्
अक्रीणि अक्रीणीवहि अक्रीणीमहि

वि. लिङ्—क्रीणीत क्रीणीयाताम् क्रीणीरन्
क्रीणीथाः क्रीणीयाथाम् क्रीणीध्वम्
क्रीणीय क्रीणीवहि क्रीणीमहि

लुङ्—अक्रेष्ट अक्रेषाताम् अक्रेषत
अक्रेष्ठाः अक्रेषाथाम् अक्रेड्ढ्वम्
अक्रेषि अक्रेष्वहि अक्रेष्महि

लृङ्—अक्रेष्यत अक्रेष्येताम् अक्रेष्यन्त

अभ्यास

१. वे वैदिक ग्रन्थ खरीदते हैं=ते वैदिकग्रन्थान् क्रीणन्ति (क्रीणते)।

२. महाराणा प्रताप ने भामाशाह के द्वारा दिये हुए धन से, बहुत से घोड़े खरीदे। महाराणा प्रतापः भामाशाहप्रदत्तेन धनेन बहून् अश्वान् चिक्राय (चिक्रिये)।

३. महाराजा रणजीतसिंह ने लैला घोड़ी खरीदी नहीं बल्कि युद्ध में जीती थी। महाराजः रणजित्सिंहः लैलाख्यां वडवां न अक्रीणात् (अक्रीणीत, अक्रैषीत्, अक्रेष्ट) अपितु तां युद्धे विजिग्ये।

४. जैसे कपड़े तुम लोग आज खरीदोगे, उससे बढ़िया हम कल खरीदेंगे। यादृशानि वस्त्राणि यूयम् अद्य क्रेष्यथ (क्रेष्यध्वे) ततः श्रेयांसि वयं श्वः क्रेतास्मः (क्रेतास्महे)।

५. तू वैदिक यन्त्रालय से चारों वेदों की मूलसंहिताएँ खरीद ले। त्वं वैदिकयन्त्रालयात् चतुर्णां वेदानां मूलसंहिताः क्रीणीहि (क्रीणीष्व)।

६. हमें पुस्तकालय के लिये यात्रासाहित्य और जीवनीसाहित्य अवश्य खरीदना चाहिये।=वयं पुस्तकालयार्थं यात्रासाहित्यं जीवनचरितसाहित्यं च अवश्यं क्रीणीयाम (क्रीणीमहि)।

७. कल वे शास्त्री के लिये रेशमी कपड़े खरीद लाये और तूने आज मेरे लिये कुछ नहीं खरीदा।=ह्यः ते शास्त्रिणे क्षौमानि वासांसि अक्रीणन् (अक्रीणत) त्वं च अद्य मह्यं किमपि न अक्रैषीः (अक्रेष्ठाः)?

८. ये आम खट्टे हैं इन्हें मत खरीदिये।=अम्लानि इमानि आम्राणि सन्ति, भवान् इमानि मा क्रैषीत् (मा क्रेष्ट; मा स्म क्रीणात्, मा स्म क्रीणीत)।

९. यदि सर्वमित्र ये अंग्रेजी दवाइयां न खरीदता तो उतने रुपयों में हम स्वर्ण भस्म खरीद लेते।=यदि सर्वमित्रः इमानि आंग्लानि औषधानि न अक्रेष्यत् (अक्रेष्यत) तर्हि तावद्भिः रूप्यकैः वयं स्वर्णभस्म अक्रेष्याम (अक्रेष्यामहि)।

१०. जैसे जूते हम अपने लिये खरीदते हैं वैसे ही सुरेन्द्र के लिये खरीदें क्या?
यादृश्यौ उपानहौ वयम् अस्मभ्यं क्रीणीमः (क्रीणीमहे) तादृश्यौ एव किं सुरेन्द्राय क्रीणाम (क्रीणामहै)?

(२) ग्रह उपादाने=लेना [उभयपदी]

लट्, लोट्, लङ्, वि० लिङ् में, ना (=श्ना) विकरण के ङित् होने से ग्रह के रेफ को सम्प्रसारण (=ऋ) हो जाएगा[1] और अकार को पूर्वरूप एकादेश होगा[2] आर्धधातुक प्रत्ययों में होने वाले[3] इट् को, ग्रह धातु के लुट्, लृट्, लुङ् और लृङ् में दीर्घ होता है।[4]

परस्मैपद

लट्—	गृह्णाति	गृह्णीतः	गृह्णन्ति
	गृह्णासि	गृह्णीथः	गृह्णीथ
	गृह्णामि	गृह्णीवः	गृह्णीमः
लिट्—	जग्राह	जगृहतुः	जगृहुः
लुट्—	ग्रहीता	ग्रहीतारौ	ग्रहीतारः
लृट्—	ग्रहीष्यति	ग्रहीष्यतः	ग्रहीष्यन्ति
लोट्—	गृह्णातु / गृह्णीतात्	गृह्णीताम्	गृह्णन्तु
	गृहाण / गृह्णीतात्	गृह्णीतम्	गृह्णीत
	गृह्णानि	गृह्णाव	गृह्णाम
लङ्—	अगृह्णात्	अगृह्णीताम्	अगृह्णन्
	अगृह्णाः	अगृह्णीतम्	अगृह्णीत
	अगृह्णाम्	अगृह्णीव	अगृह्णीम

आत्मनेपद

लट्—	गृह्णीते	गृह्णाते	गृह्णते
	गृह्णीषे	गृह्णाथे	गृह्णीध्वे
	गृह्णे	गृह्णीवहे	गृह्णीमहे
लिट्—	जगृहे	जगृहाते	जगृहिरे
लुट्—	ग्रहीता	ग्रहीतारौ	ग्रहीतारः
लृट्—	ग्रहीष्यते	ग्रहीष्येते	ग्रहीष्यन्ते
लोट्—	गृह्णीताम्	गृह्णाताम्	गृह्णताम्
	गृह्णीष्व	गृह्णाथाम्	गृह्णीध्वम्
	गृह्णै	गृह्णावहै	गृह्णामहै
लङ्—	अगृह्णीत	अगृह्णाताम्	अगृह्णत
	अगृह्णीथाः	अगृह्णाथाम्	अगृह्णीध्वम्
	अगृह्णि	अगृह्णीवहि	अगृह्णीमहि

---

१. ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च (अष्टा० ६.१.१३)
२. सम्प्रसारणाच्च (अष्टा० ६.१.१०८)
३. आर्धधातुकस्येड् वलादेः (अष्टा० ७.२.३५)
४. ग्रहोऽलिटि दीर्घः (अष्टा० ७.२.३७)

वि. लिङ्—गृह्णीयात् गृह्णीयाताम् गृह्णीयुः
गृह्णीयाः गृह्णीयातम् गृह्णीयात
गृह्णीयाम् गृह्णीयाव गृह्णीयाम
लुङ्[1]—अग्रहीत् अग्रहीष्टाम् अग्रहीषुः
अग्रहीः अग्रहीष्टम् अग्रहीष्ट
अग्रहीषम् अग्रहीष्व अग्रहीष्म
लृङ्—अग्रहीष्यत् अग्रहीष्यताम् अग्रहीष्यन्

वि. लिङ्—गृह्णीत गृह्णीयाताम् गृह्णीरन्
गृह्णीथाः गृह्णीयाथाम् गृह्णीध्वम्
गृह्णीय गृह्णीवहि गृह्णीमहि
लुङ्—अग्रहीष्ट अग्रहीषाताम् अग्रहीषत
अग्रहीष्ठाः अग्रहीषाथाम् अग्रहीड्ढ्वम्
अग्रहीषि अग्रहीष्वहि अग्रहीष्महि
लृङ्—अग्रहीष्यत अग्रहीष्येताम् अग्रहीष्यन्त

अभ्यास

१. सज्जन लोग घर में आये अतिथियों को स्नेह से ग्रहण करते हैं।
सज्जनाः गृहम् आगतान् अतिथीन् सस्नेहं गृह्णन्ति (गृह्णते)।

२. पहिले ऋषि लोग शिष्यों से कोई फीस नहीं लेते थे।
पुरा ऋषयः शिष्येभ्यः किमपि शुल्कं न जगृहुः (जगृहिरे)।

३. मैं ये पुस्तकें तुमसे कल ले लूंगा।
अहम इमानि पुस्तकानि त्वत्तः श्वः ग्रहीतास्मि (ग्रहीताहे)।

४. अभी तू भोजन में दही लेगा या दूध ?
अधुना त्वं भोजने दधि ग्रहीष्यसि (ग्रहीष्यसे) दुग्धं वा।

५. मैं इससे क्या लूं और इसे क्या दूं, समझ में नहीं आता।
अहम् अस्मात् किं गृह्णानि (गृह्णै; गृह्णीयाम्, गृह्णीय) किं च अस्मै यच्छानि (यच्छेयम्) इति ज्ञातुं न पारयामि।

६. तूने कल उससे कितने रुपए लिए थे ?
त्वं ह्यः तस्मात् कियन्ति रूप्यकाणि अगृह्णाः (अगृह्णीथाः)।

७ मैया ! क्या हम दोनों आज भी उतने ही लड्डू लें जितने रोज लेते हैं ?
मातः ! किम् आवाम् अद्यापि तावन्ति एव मोदकानि गृह्णाव (गृह्णावहै) यावन्ति प्रत्यहं गृह्णीवः (गृह्णीवहे)।

८. अन्धे व्यक्तियों से तुम्हें यात्रा किराया नहीं लेना चाहिए।
अन्धव्यक्तिभ्यः त्वं यात्राशुल्कं न गृह्णीयाः (गृह्णीथाः)।

९. आज मैंने न दूध लिया न पानी।
अद्य अहं न दुग्धम् अग्रहीषम् (अग्रहीषि) न च जलम्।

१०. इससे पैसे मत लेना, मैं दूंगा।

---

१. ग्रह के लुङ् में ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् (अष्टा० ७.२.७) से वृद्धि का निषेध।

अस्मात् पणान् मा ग्रहीः (मा ग्रहीष्ठाः, मा स्म गृह्णाः, मा स्म गृह्णीथाः) अहं दास्यामि ।

११, यदि तू इतना ब्याज न लेता तो अब दुःख न पाता ।
यदि त्वम् एतावत् कुसीदं न अग्रहीष्यः (अग्रहीष्यथाः) तर्हि सम्प्रति दुःखं न अवाप्स्यः ।

(३) लूञ् (=लू) छेदने [काटना] उभयपदी

लट्, लोट्, लङ्, वि० लिङ्, में लू के ऊकार के स्थान पर ह्रस्व उकार हो जाएगा ।[1]

लट्—लुनाति लुनीतः लुनन्ति
लुनासि लुनीथः लुनीथ
लुनामि लुनीवः लुनीमः

लिट्—लुलाव लुलुवतुः लुलुवुः

लुट्—लविता लवितारौ लवितारः

लृट्—लविष्यति लविष्यतः लविष्यन्ति

लोट्—{लुनातु / लुनीतात्} लुनीताम् लुनन्तु
{लुनीहि / लुनीतात्} लुनीतम् लुनीत
लुनानि लुनाव लुनाम

लङ्—अलुनात् अलुनीताम् अलुनन्
अलुनाः अलुनीतम् अलुनीत
अलुनाम् अलुनीव अलुनीम

वि. लिङ्—लुनीयात् लुनीयाताम् लुनीयुः
लुनीयाः लुनीयातम् लुनीयात
लुनीयाम् लुनीयाव लुनीयाम

लुङ्—अलावीत् अलाविष्टाम् अलाविषुः
अलावीः अलाविष्टम् अलाविष्ट
अलाविषम् अलाविष्व अलाविष्म

लृङ्—अलविष्यत् अलविष्यताम् अलविष्यन्

लट्—लुनीते लुनाते लुनते
लुनीषे लुनाथे लुनीध्वे
लुने लुनीवहे लुनीमहे

लिट्—लुलुवे लुलुवाते लुलुविरे

लुट्—लविता लवितारौ लवितारः

लृट्—लविष्यते लविष्येते लविष्यन्ते

लोट्—लुनीताम् लुनाताम् लुनताम्
लुनीष्व लुनाथाम् लुनीध्वम्
लुनै लुनावहै लुनामहै

लङ्—अलुनीत अलुनाताम् अलुनत
अलुनीथाः अलुनाथाम् अलुनीध्वम्
अलुनि अलुनीवहि अलुनीमहि

वि. लिङ्—लुनीत लुनीयाताम् लुनीरन्
लुनीथाः लुनीयाथाम् लुनीध्वम्
लुनीय लुनीवहि लुनीमहि

लुङ्—अलविष्ट अलविषाताम् अलविषत
अलविष्ठाः अलविषाथाम् अलविढ्वम्
अलविषि अलविष्वहि अलविष्महि

लृङ्—अलविष्यत अलविष्येताम् अलविष्यन्त

अभ्यास

१. हम जब गेहूं काटते हैं, तब वे लोग जौ काटते हैं ।
वयं यदा गोधूमान् लुनीमः (लुनीमहे), तदा ते यवान् लुनन्ति (लुनते) ।

---

१. प्वादीनां ह्रस्वः (अष्टा० ७.२.८०)

२. राम ने एक ही बाण से सात ताड़ के वृक्षों को काट दिया ।
राम: एकेनैव शरेण सप्त तालतरून् लुलाव (लुलुवे) ।
३. इस चने की फसल को कल काटेंगे ।
इदं चणकसस्यं श्व: लवितास्म: (लवितास्महे) ।
४. आज हम इस खेत का जीरा काटेंगे ।
अद्य वयम् अस्य केदारस्य जीरकं लविष्याम: (लविष्यामहे) ।
५. कल क्या इस पेड़ की डाली तूने काटी थी ?
अपि त्वं ह्य: एतस्य पादपस्य शाखाम् अलुना: (अलुनीथा:) ?
६. आज मजदूरों ने इस खेत को क्यों नहीं काटा ?
अद्य श्रमिका: एतत् क्षेत्रं कथं न अलाविषु: (अलविषत) ?
७. अरहर के कच्चे पौधों को मत काट ।
आढक्या: अपक्वान् क्षुपान् मा लावी: (मा लविष्ठा:; मा स्म लुना:, मा स्म लुनीथा:) ।
८. पहिले तुम लोगों को ये पके हुए खेत काटने चाहियें ।
पूर्वं यूयम् एतानि पक्वानि क्षेत्राणि लुनीयात (लुनीध्वम्) ।
९. क्या मैं पहिले पके धान के इस खेत को काटूं ?
किम् अहं पूर्वं परिणतधान्यम् इमं क्षेत्रं लुनानि (लुनै) ।
१०. यदि तू इन गन्ने की क्यारियों को काट देता तो मैं तुझे दस रुपये देता ।
यदि त्वम् इमा: इक्षुकेदारिका: अलविष्य: (अलविष्यथा:) तर्हि अहं तुभ्यं दश रूप्यकाणि अदास्यम् (अदास्ये) ।

(४) ज्ञा अवबोधने=जानना [परस्मै०, (आत्मने०)]

यह ज्ञा धातु (उपसर्ग रहित अवस्था में) आत्मनेपद में भी प्रयुक्त होती है[1] यदि क्रियाफल कर्ता को प्राप्त होता हो तो । लट्, लोट्, लङ्, विधिलिङ् में 'ज्ञा' के स्थान पर 'जा' आदेश होता है ।[2]

लट्—जानाति	जानीत:	जानन्ति	लट्—जानीते	जानाते	जानते
जानासि	जानीथ:	जानीथ	जानीषे	जानाथे	जानीध्वे
जानामि	जानीव:	जानीम:	जाने	जानीवहे	जानीमहे
लिट्—जज्ञौ	जज्ञतु:	जज्ञु:	लिट्—जज्ञे	जज्ञाते	जज्ञिरे
लुट्—ज्ञाता	ज्ञातारौ	ज्ञातार:	लुट्—ज्ञाता	ज्ञातारौ	ज्ञातार:
लृट्—ज्ञास्यति	ज्ञास्यत:	ज्ञास्यन्ति	लृट्—ज्ञास्यते	ज्ञास्येते	ज्ञास्यन्ते

१. अनुपसर्गाज्ज्ञ: (अष्टा. १.३.७६) ।
२. ज्ञाजनोर्जा (अष्टा. ७.३.७९) ।

लोट्—{जानातु / जानीतात्} जानीताम् जानन्तु
{जानीहि / जानीतात्} जानीतम् जानीत
जानानि जानाव जानाम

लङ्—अजानात् अजानीताम् अजानन्
अजानाः अजानीतम् अजानीत
अजानाम् अजानीव अजानीम

वि. लिङ्—जानीयात् जानीयाताम् जानीयुः
जानीयाः जानीयातम् जानीयात
जानीयाम् जानीयाव जानीयाम

लुङ्—अज्ञासीत् अज्ञासिष्टाम् अज्ञासिषुः
अज्ञासीः अज्ञासिष्टम् अज्ञासिष्ट
अज्ञासिषम् अज्ञासिष्व अज्ञासिष्म

लृङ्—अज्ञास्यत् अज्ञास्यताम् अज्ञास्यन्

लोट्—जानीताम् जानाताम् जानताम्
जानीष्व जानाथाम् जानीध्वम्
जानै जानावहै जानामहै

लङ्—अजानीत अजानाताम् आजानत
अजानीथाः अजानाथाम् अजानीध्वम्
अजानि अजानीवहि अजानीमहि

वि. लिङ्—जानीत जानीयाताम् जानीरन्
जानीथाः जानीयाथाम् जानीध्वम्
जानीय जानीवहि जानीमहि

लुङ्—अज्ञास्त अज्ञासाताम् अज्ञासत
अज्ञास्थाः अज्ञासाथाम् अज्ञाध्वम्
अज्ञासि अज्ञास्वहि अज्ञास्महि

लृङ्—अज्ञास्यत अज्ञास्येताम् अज्ञास्यन्त

अभ्यास

१. दुर्योधन बोला—मैं धर्म को जानता हूं किन्तु उसमें मेरी प्रवृत्ति नहीं है और मैं अधर्म को भी पहिचानता हूं पर उससे हटता नहीं हूं।
दुर्योधन उवाद—'जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।

२. जब राम लक्ष्मण ने शूर्पणखा की धूर्तता जान ली तब लक्ष्मण ने उसका नाक काट दिया।
यदा रामलक्ष्मणौ शूर्पणखायाः भौजङ्गीं वृत्तिं जज्ञतुः (जज्ञाते) तदा लक्ष्मणः तस्याः नासिकां चिच्छेद (चिच्छिदे; अच्छिनत्, अच्छिन्त)।

३. कुछ दिनों में, मैं उसके सब रहस्यों को जान लूंगा।
कतिपयैः अहोभिः अहं तस्य सर्वाणि रहस्यानि ज्ञातास्मि (ज्ञाताहे; ज्ञास्यामि, ज्ञास्ये)।

४. न जाने वह इस ऊंट को बेचेगा या नहीं।
नाहं जाने (जानामि) सः इमं क्रमेलकं विक्रेष्यते न वा।

५. 'तू हम दोनों को दशरथ के पुत्र जान' ऐसा लक्ष्मण ने हनुमान् से कहा।
त्वम् आवां दशरथसुतौ जानीहि (जानीष्व) इति लक्ष्मणः हनूमन्तं प्रोवाच (प्रोचे, अब्रवीत्, अवोचत्)।

६. 'तू विश्वसनीय है' यह तो हम जानते हैं किन्तु यह नया है इसको हम कैसे जानें?

'त्वं विश्वसनीयः असि' इति तु वय जानीमः (जानीमहे) किन्तु अयं नवीनः अस्ति इमं वयं कीदृशं जानाम (जानामहै) ?

७. सबको वेदशास्त्र पढ़कर कर्त्तव्याकर्त्तव्य जान लेना चाहिए ?
सर्वे वेदशास्त्राण्यधीत्य कर्त्तव्याकर्त्तव्ये जानीयुः (जानीरन्) ?

८. आज हम दोनों ने उसकी दर्शनों की विद्वत्ता को जान लिया।
अद्य आवां तस्य दर्शनेषु वैदुष्यम् अज्ञासिष्व (अज्ञास्वहि)।

९. गुरुजी ने उसकी चालाकी परसों ही जान ली थी।
गुरुचरणाः तस्य धौर्त्यं परह्यः एव अजानन् (अजानत)

१०. तू उसकी सब बातों को सत्य मत समझ लेना।
त्वं तस्य सर्वाः वार्ताः सत्याः मा ज्ञासीः (मा ज्ञास्थाः; मा स्म जानाः, मा स्म जानीथाः)।

११. यदि दयानन्द पाचक की दुष्टता को पहिले जान लेते तो विषपान से बच जाते
यदि दयानन्दमहाभागाः पाचकस्य दुरभिसन्धि पूर्वम् अज्ञास्यन् (अज्ञास्यन्त) तर्हि गरलपानात् आत्मानम् अत्रास्यन्त।

(५) मन्थ (मन्थ्) विलोडने=बिलाना, मथना [परस्मैपदी]

लट्, लोट्, लङ्, वि० लिङ् में ना (श्ना) विकरण रहता है और वह ङित्त्वधर्म से युक्त है, अतः इन लकारों में मन्थ् के 'न्' का लोप होगा।[1]

लट्—मथ्नाति मथ्नीतः मथ्नन्ति
मथ्नासि मथ्नीथः मथ्नीथ
मथ्नामि मथ्नीवः मथ्नीमः

लिट्—ममन्थ ममन्थतुः ममन्थुः

लुट्—मन्थिता मन्थितारौ मन्थितारः

लृट्—मन्थिष्यति मन्थिष्यतः मन्थिष्यन्ति

लोट्—{मथ्नातु / मथ्नीतात्} मथ्नीताम् मथ्नन्तु
{[2]मथान / मथ्नीतात्} मथ्नीतम् मथ्नीत
मथ्नानि मथ्नाव मथ्नाम

लङ्—अमथ्नात् अमथ्नीताम् अमथ्नन्
अमथ्नाः अमथ्नीतम् अमथ्नीत
अमथ्नाम् अमथ्नीव अमथ्नीम

वि. लिङ्—मथ्नीयात् मथ्नीयाताम् मथ्नीयुः
मथ्नीयाः मथ्नीयातम् मथ्नीयात
मथ्नीयाम् मथ्नीयाव मथ्नीयाम

लुङ्—अमन्थीत् अमन्थिष्टाम् अमन्थिषुः
अमन्थीः अमन्थिष्टम् अमन्थिष्ट
अमन्थिषम् अमन्थिष्व अमन्थिष्म

लृङ्—अमन्थिष्यत् अमन्थिष्यताम् अमन्थिष्यन्

---

१. अनिदितां हल उपधायाः क्ङिति (अष्टा० ६.४.२४)

२. हलः श्नः शानज्झौ (अष्टा० ३.१.८३) से श्ना के स्थान पर शानच् (=आन) और तब 'अतो हेः' (अष्टा० ६.४.१०५) से हि का लुक्।

यह धातु द्विकर्मक है, अतः द्विकर्मक धातुओं के प्रकरण में इसका अभ्यास करवायेंगे ।

(६) अश (अश्) भोजने = भोजन करना [परस्मैपदी]

लट्—अश्नाति अश्नीतः अश्नन्ति
अश्नासि अश्नीथः अश्नीथ
अश्नामि अश्नीवः अश्नीमः

लिट्—आश आशतुः आशुः

लुट्—अशिता अशितारौ अशितारः

लृट्—अशिष्यति अशिष्यतः अशिष्यन्ति

लोट्—{अश्नातु / अश्नीतात्} अश्नीताम् अश्नन्तु
{अशान / अश्नीतात्} अश्नीतम् अश्नीत
अश्नानि अश्नाव अश्नाम

लङ्—आश्नात् आश्नीताम् आश्नन्
आश्नाः आश्नीतम् आश्नीत
आश्नाम् आश्नीव आश्नीम

वि. लिङ्—अश्नीयात अश्नीयाताम् अश्नीयुः
अश्नीयाः अश्नीयातम् अश्नीयात
अश्नीयाम् अश्नीयाव अश्नीयाम

लुङ्—आशीत् आशिष्टाम् आशिषुः
आशीः आशिष्टम् आशिष्ट
आशिषम् आशिष्व आशिष्म

लृङ्—आशिष्यत् आशिष्यताम् आशिष्यन्

अभ्यास

१. ब्रह्मचारी प्रेम से लड्डू खाते हैं = ब्रह्मचारिणः प्रेम्णा मोदकानि अश्नन्ति ।

२. इस आश्रम में मुनियों ने बिल्व खाये थे ।
एतस्मिन् आश्रमे मुनयः बिल्वफलानि आशुः (आशिषुः, आश्नन्) ।

३. हम आज तो खीर मालपुए खायेंगे और कल दही भात खायेंगे ।
वयम् अद्य तु पायसापूपान् अशिष्यामः श्वश्च दध्योदनं अशितास्मः ।

४. तू जल्दी कलेवा कर ले = त्वं शीघ्रं प्रातराशम् अशान ।

५. हम रोज तो खूब मिठाई खाते हैं आज क्या केले भी न खावें ?
वयं प्रत्यहं तु पुष्कलं मिष्टान्नम् अश्नीमः अद्य किं कदलीफलानि अपि न अश्नाम ?

६. क्या मैं पहिले खीर खाऊँ ? स्नान न करूं ?
किम् अहं पूर्वं पायसम् अश्नानि ? न स्नानि ?

७. तुमको यह औषध सुबह ही खा लेनी चाहिए ।
त्वम् इदम् औषध प्रातरेव अश्नीयाः ।

८. सबेरे से ही तुम लोगों ने कुछ नहीं खाया ।
प्रातःकालतः एव यूयं किमपि न आशिष्ट ।

९. कल पूनम थी, हमने उड़द के बड़े खाये ।
ह्यः पौर्णमासी आसीत्, वयं माषवटकान् आश्नीम ।

१०. इतनी पकौड़ियाँ मत खा, पेट फूलेगा ।
एतावतीः वडाः मा अशीः (मा स्म अश्नाः), उदरं स्फायिष्यते ।

११. यदि आज तू मेरे घर खाता, तो मुझे बड़ा आनन्द आता ।
यदि अद्य त्वं मम गृहे आशिष्यः, तर्हि अहं भृशम् आनन्दम् आप्स्यम् ।

(७) मुष (मुष्) स्तेये=चोरी करना [परस्मैपदी]

लट्—	मुष्णाति	मुष्णीतः	मुष्णन्ति
	मुष्णासि	मुष्णीथः	मुष्णीथ
	मुष्णामि	मुष्णीवः	मुष्णीमः
लिट्—	मुमोष	मुमुषतुः	मुमुषुः
लुट्—	मोषिता	मोषितारौ	मोषितारः
लृट्—	मोषिष्यति	मोषिष्यतः	मोषिष्यन्ति
लोट्—	मुष्णातु / मुष्णीतात्	मुष्णीताम्	मुष्णन्तु
	मुषाण / मृष्णीतात्	मुष्णीतम्	मुष्णीत
	मुष्णानि	मृष्णाव	मुष्णाम

लङ्—	अमुष्णात्	अमुष्णीताम्	अमुष्णन्
	अमुष्णाः	अमुष्णीतम्	अमुष्णीत
	अमुष्णाम्	अमुष्णीव	अमुष्णीम
वि. लिङ्—	मुष्णीयात्	मुष्णीयाताम्	मुष्णीयुः
	मुष्णीयाः	मुष्णीयातम्	मुष्णीयात
	मुष्णीयाम्	मुष्णीयाव	मुष्णीयाम
लुङ्—	अमोषीत्	अमोषिष्टाम्	अमोषिषुः
	अमोषीः	अमोषिष्टम्	अमोषिष्ट
	अमोषिषम्	अमोषिष्व	अमोषिष्म
लृङ्—	अमोषिष्यत्	अमोषिष्यताम्	अमोषिष्यन्

अभ्यास

१. यह धूर्त्त सदा दूसरों का धन चुराता है ।
एषः धूर्त्तः सदा अन्येषां द्रविणं मुष्णाति ।

२. चन्द्रगुप्त के राज्य में कोई किसी की वस्तुएं नहीं चुराता था ।
चन्द्रगुप्तस्य राज्ये कश्चित् कस्यचिद् वस्तूनि न मुमोष ।

३. ये बालक किसी की पुस्तकें नहीं चुरायेंगे ।
इमे बालकाः कस्यचिद् अपि पुस्तकानि नैव मोषितारः (मोषिष्यन्ति) ।

४. हे पुत्र ! किसी का पदार्थ मत चुरा ।
भोः पुत्र ! कस्यचिद् अपि पदार्थं मा मोषीः (मा स्म मुष्णाः) ।

५. हमें किसी की एक बाली (छिमी) भी नहीं चुरानी चाहिये ।
वयं कस्यचिद् एकां शिम्बाम् अपि न मुष्णीयाम (मुष्णाम) ।

६. ये बच्चे अब अच्छे बन गये हैं, इन्होंने कल कुछ भी नहीं चुराया ।
एते बालकाः सम्प्रति साधवः समवर्तिषत (समवृतन्), एते ह्यः किमपि न अमुष्णन् ।

७. जब आज चोरों ने रत्न चुराये, उसी समय पहरेदारों ने उन्हें पकड़ लिया।

यदा अद्य चोराः रत्नानि अमोषिषुः, तदानीम् एव प्रहरिणः तान् न्यग्रहीषुः।

८. यदि ये भूख से पीड़ित होते तो अन्न चुराते।

यदि एते क्षुत्पीडिताः अभविष्यन्, तर्हि अन्नम् अमोषिष्यन्।

(८) पुष (पुष्) पुष्टौ[1] = पुष्ट करना [परस्मैपदी]

लट्—पुष्णाति पुष्णीतः पुष्णन्ति
पुष्णासि पुष्णीथः पुष्णीथ
पुष्णामि पुष्णीवः पुष्णीमः

लिट्—पुपोष पुपुषतुः पुपुषुः

लुट्—पोषिता पोषितारौ पोषितारः

लृट्—पोषिष्यति पोषिष्यतः पोषिष्यन्ति

लोट्—{पुष्णातु, पुष्णीतात्} पुष्णीताम् पुष्णन्तु
{पुषाण, पुष्णीतात्} पुष्णीतम् पुष्णीत
पुष्णानि पुष्णाव पुष्णाम

लङ्—अपुष्णात् अपुष्णीताम् अपुष्णन्
अपुष्णाः अपुष्णीतम् अपुष्णीत
अपुष्णाम् अपुष्णीव अपुष्णीम

वि. लिङ्-पुष्णीयात् पुष्णीयाताम् पुष्णीयुः
पुष्णीयाः पुष्णीयातम् पुष्णीयात
पुष्णीयाम् पुष्णीयाव पुष्णीयाम

लुङ्—अपोषीत् अपोषिष्टाम् अपोषिषुः
अपोषीः अपोषिष्टम् अपोषिष्ट
अपोषिषम् अपोषिष्व अपोषिष्म

लृङ्—अपोषिष्यत् अपोषिष्यताम् अपोषिष्यन्

अभ्यास

१. यह चिकनी चुपड़ी बातों से अपना पक्ष पुष्ट करता है।

अयम् उपात्तरम्यैः वचोभिः स्वपक्षं पुष्णाति।

२. गाय के दूध, घी आदि पदार्थ मनुष्यों के शरीर और बुद्धि दोनों को पुष्ट करते हैं।

गोः दुग्धघृतादयः पदार्थाः मनुष्यस्य शरीरं शेमुषीं चोभे अपि पुष्णन्ति।

---

१. पुष धातु धातुपाठ में चार गणों में पढ़ी गई है। चुरादिगण में 'पुष धारणे' है जहाँ यह स्पष्ट सकर्मक है। किन्तु भ्वादि०, दिवादि० तथा क्र्यादि० में यह धातु 'पुष पुष्टौ' के रूप में पढ़ी हुई है। वहाँ यह स्पष्ट नहीं है कि पुष 'पुष्ट होने' के अर्थ में है अथवा 'पुष्ट करने' के अर्थ में? तथापि प्रयोग-बाहुल्य से क्र्यादिगणस्थ पुष धातु 'पुष्ट करने' के अर्थ में और शेष 'पुष्ट होने' के अर्थ में जाननी चाहियें।

३. अगस्त्याश्रम के फलों ने अनेक मुनियों को पुष्ट किया।
अगस्त्याश्रमस्य फलानि नैकान् मुनीन् पुपुषुः (अपुष्णन्, अपोषिषुः)।

४. दही और केले तेरे शरीर को पुष्ट करेंगे।
दधिकदलीफले तव तनूं पोषितारौ (पोषिष्यतः)।

५. तू अपने भाई को वैद्य रामशास्त्री की औषधियों से पुष्ट कर।
त्वं स्वं सहोदरं वैद्यरामशास्त्रिणः भेषजैः पुषाण (पुष्णीथाः)।

६. ये हत्यारे हैं, इनके पक्ष को पुष्ट मत कर।
एते घातुकाः सन्ति एतेषां पक्षं मा पोषीः (मा स्म पुष्णाः)।

७. देख, मेरी भस्म ने तेरा अङ्ग प्रत्यङ्ग पुष्ट कर दिया।
पश्य, मदीयं भस्म तव अङ्गप्रत्यङ्गम् अपोषीत् (अपुष्णात्)।

८. यदि मेरा कथन तेरा पक्ष पुष्ट करता, तो मैं अवश्य कहता।
यदि मम वचनं तव पक्षम् अपोषिष्यत्, तर्हि अहम् अवश्यम् अवक्ष्यम्।

चुरादिगण

चुरादिगण की धातुओं से स्वार्थ में णिच् प्रत्यय होता है।[1] ण् की इत्सञ्ज्ञा तथा च् की इत्सञ्ज्ञा[2] होकर उनका लोप होने पर 'इ' शेष रहता है। धातु के अन्त में इक् (इ, उ, ऋ आदि) हो तो उनको वृद्धि होती है[4] और ऐ के स्थान पर आय्, औ के स्थान पर आव् आदेश हो जाते हैं[5]। उपधा में अकार हो तो उसको भी वृद्धि होती है।[6] यदि उपधा में ह्रस्व इ, उ, ऋ हो तो उनको गुण (=ए, ओ, अर्) होता है।[7] जैसे क्रमशः—ली+णिच्→लै+इ→लाय् इ=लायि। यु+णिच्→यु+इ→यौ+इ=याव्+इ=यावि। वृञ्+णिच्→वृ+इ→वार्+इ, वारि। नट्+णिच्→नट्+इ→नाट्+इ=नाटि। चित्+णिच्→चित्+इ→चेत् इ=चेति। तुल्+णिच्→तुल्+इ=तोल्+इ=तोलि। शृध्+णिच् शृध्+इ→शर्ध्+इ=शर्धि। इस प्रकार चुरादिगणीय धातुओं से णिच् प्रत्यय लगता है, किन्तु उसके अर्थ में कोई परिवर्तन नहीं होता। णिच् लगने पर जो चोरि, लायि, यावि, वारि, नाटि, चेति, तोलि, शर्धि आदि स्वरूप बनता है उसकी पुनः धातु संज्ञा होती है।[8]

---

१. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (अष्टा. ३.१.२५)
२. चुटू (अष्टा. १.३.६)
३. हलन्त्यम् (अष्टा. १.३.३)
४. अचो ञ्णिति (अष्टा. ७.२.११५)
५. एचोऽयवायावः (अष्टा. ६.१.७८)
६. अत उपधायाः (अष्टा. ७.२.११६)
७. पुगन्तलघूपधस्य च (अष्टा. ७.३.८६)
८. सनाद्यन्ता धातवः (अष्टा. ३.१.३२)

तदनन्तर लट् आदि लकार लगते हैं। चुरादिगणीय धातुओं से लट्, लोट्, लङ् तथा विधिलिङ् में शप् (=अ) विकरण लगता है।[1] लुङ् में च्लि के स्थान पर चङ् आदेश होता है।[2] चङ् में से अ शेष रहता है। यहां धातु को द्वित्व होगा।[3]

(१) चुर (चुर्) स्तेये—चोरी करना [परस्मैपदी]

लट्—चोरयति चोरयतः चोरयन्ति
चोरयसि चोरयथः चोरयथ
चोरयामि चोरयावः चोरयामः

लिट्[4]

(१) चोरयाञ्चकार चोरयाञ्चक्रतुः चोरयाञ्चक्रुः
(२) चोरयाम्बभूव चोरयाम्बभूवतुः चोरयाम्बभूवुः
(३) चोरयामास चोरयामासतुः चोरयामासुः

लुट्

चोरयिता चोरयितारौ चोरयितारः
चोरयितासि चोरयितास्थः चोरयितास्थ
चोरयितास्मि चोरयितास्वः चोरयितास्मः

लृट्

चोरयिष्यति चोरयिष्यतः चोरयिष्यन्ति
चोरयिष्यसि चोरयिष्यथः चोरयिष्यथ
चोरयिष्यामि चोरयिष्यावः चोरयिष्यामः

लोट्

चोरयतु (चोरयतात्) चोरयताम् चोरयन्तु
चोरय (चोरयतात्) चोरयतम् चोरयत
चोरयाणि चोरयाव चोरयाम

लङ्

अचोरयत् अचोरयताम् अचोरयन्
अचोरयः अचोरयतम् अचोरयत
अचोरयम् अचोरयाव अचोरयाम

विधिलिङ्

चोरयेत् चोरयेताम् चोरयेयुः
चोरयेः चोरयेतम् चोरयेत
चोरयेयम् चोरयेव चोरयेम

लुङ्— अचूचुरत् अचूचुरताम् अचूचुरन्
अचूचुरः अचूचुरतम् अचूचुरत
अचूचुरम् अचूचुराव अचूचुराम

लृङ्—अचोरयिष्यत् अचोरयिष्यताम् अचोरयिष्यन्
अचोरयिष्यः अचोरयिष्यतम् अचोरयिष्यत
अचोरयिष्यम् अचोरयिष्याव अचोरयिष्याम

---

१. कर्तरि शप् (अष्टा.३.१.६८)

२ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् (अष्टा.३.१.४८)

३. चङि (अष्टा.६.१.११)

४. कास्प्रत्ययादाममन्त्रे लिटि (३.१.३५) से आम् प्रत्यय।

अभ्यास

१. दुर्जन लोग दूसरों का धन चुराते हैं।
दुर्जनाः परान् धनं चोरयन्ति।

२. पहिले कोई किसी का धन नहीं चुराता था।
पुरा न कोऽपि कमपि द्रविणं चोरयामास (चोरयाञ्चकार, चोरयाम्बभूव; अचोरयत्; अचूचुरत्)।

३. किवाड़ बन्द कर दो, ये दुष्ट हमारी पुस्तकें चुरा लेंगे।
द्वारं पिधेहि, एते दुष्टाः अस्मान् पुस्तकानि चोरयितारः (चोरयिष्यन्ति)।

४. हम किसी की चीजें क्यों चुरायें=वयं कमपि वस्तूनि कथं चोरयाम (चोरयेम)?

५. मेरी गौएं मत चुरा लेना=मां गाः मा चूचुरः (मा स्म चोरयः)।

६. यदि तुम वस्त्र चुरा लेते तो तुम्हारा अपयश होता।
यदि यूयं वासांसि अचोरयिष्यत तर्हि युष्माकम् अपयशः अभविष्यत्।

(२) चिति स्मृत्याम्=(चिन्तन करना) [परस्मैपदी]

लट्—चिन्तयति चिन्तयतः चिन्तयन्ति

लिट् (१) चिन्तयाञ्चकार चिन्तयाञ्चक्रतुः चिन्तयाञ्चक्रुः

(२) चिन्तयाम्बभूव चिन्तयाम्बभूवतुः चिन्तयाम्बभूवुः

(३) चिन्तयामास चिन्तयामासतुः चिन्तयामासुः

लुट्—चिन्तयिता चिन्तयितारौ चिन्तयितारः

लृट्—चिन्तयिष्यति चिन्तयिष्यतः चिन्तयिष्यन्ति

लोट्—चिन्तयतु चिन्तयताम् चिन्तयन्तु चिन्तयतात्

लङ्—अचिन्तयत् अचिन्तयताम् अचिन्तयन्

वि. लिङ्-चिन्तयेत् चिन्तयेताम् चिन्तयेयुः

लुङ्—अचिचिन्तत् अचिचिन्तताम् अचिचिन्तन्
अचिचिन्तः अचिचिन्ततम् अचिचिन्तत
अचिचिन्तम् अचिचिन्ताव अचिचिन्ताम

लृङ्—अचिन्तयिष्यत् अचिन्तयिष्ताम् अचिन्तयिष्यन्

अभ्यास

१. सज्जन लोग रात दिन धर्म का ही चिन्तन करते हैं।
सज्जनाः अहर्निशं धर्मम् एव चिन्तयन्ति।

२. ऋषियों ने कभी धन की चिन्ता नहीं की, सदा स्वाध्याय में लगे रहे।
ऋषयः कदापि धनं न चिन्तयाञ्चक्रुः (चिन्तयाम्बभूवुः, चिन्तयामासुः, अचिन्तयन्, अचिचिन्तन्) सदा स्वाध्यायं शीलयाञ्चक्रुः (शीलयाम्बभूवुः, शीलयामासुः, अशीलयन्, अशिशीलन्)।

३. मैं धन की चिन्ता कभी नहीं करूंगा क्योंकि मेरे बुढ़ापे की चिन्ता देवेन्द्र कपूर जी को है, इसलिए मैं क्यों चिन्ता करूं?

अहं धनं कदापि न चिन्तयिष्यामि (चिन्तयितास्मि) यतः श्री देवेन्द्रकपूरमहोदयः मे वृद्धत्वं चिन्तयति, अतः अहं कथं चिन्तयानि (चिन्तयेयम्) ?

४. भविष्य की चिन्ता मत कर=भविष्यन्तम् कालं मा चिचिन्तः (मा स्म चिन्तयः)

५. वर्त्तमान की चिन्ता कर=वर्त्तमानं कालं चिन्तय ।

६. यदि मैं शुरु से ही ईश्वर का चिन्तन करता तो सुख पाता ।
यदि अहं प्रारम्भतः एव परमेश्वरम् अचिन्तयिष्यं तर्हि सुखम् आप्स्यम् ।

(३) भक्ष अदने=खाना [परस्मैपदी]

लट्—भक्षयति भक्षयतः भक्षयन्ति
लिट् (१) भक्षयाञ्चकार भक्षयाञ्चक्रतुः भक्षयाञ्चक्रुः
(२) भक्षयाम्बभूव भक्षयाम्बभूवतुः भक्षयाम्बभूवुः
(३) भक्षयामास भक्षयामासतुः भक्षयामासुः
लुट्—भक्षयिता भक्षयितारौ भक्षयितारः
लृट्—भक्षयिष्यति भक्षयिष्यतः भक्षयिष्यन्ति

लोट्—भक्षयतु (भक्षयतात्) भक्षयताम् भक्षयन्तु
लङ्—अभक्षयत् अभक्षयताम् अभक्षयन्
वि. लिङ्—भक्षयेत् भक्षयेताम् भक्षयेयुः
लुङ्—अबभक्षत् अबभक्षताम् अबभक्षन्
अबभक्षः अबभक्षतम् अबभक्षत
अबभक्षम् अबभक्षाव अबभक्षाम
लृङ्—अभक्षयिष्यत् अभक्षयिष्यताम् अभक्षयिष्यन्

अभ्यास

१. मैं सायङ्काल भोजन नहीं खाता हूं, केवल फल ही खाता हूं ।
अहं सायं भोजनं न भक्षयामि, केवलानि फलानि एव भक्षयामि ।

२. ऋषि लोग वन में फल ही खाते थे ।
ऋषयः विपिने फलानि एव भक्षयाञ्चक्रुः (भक्षयाम्बभूवुः, भक्षयामासुः, अभक्षयन्; अबभक्षन्) ।

३. आज हम खाना भीमसेन के घर खायेंगे ।
अद्य वयं भोजनं भीमसेनस्य गृहे भक्षयिष्यामः ।

४. कल गुरुकुल के भोजनालय में शाकपुड़ी खायेंगे ।
श्वः गुरुकुलभोजनालये शाकशष्कुलि भक्षयिष्यामः ।

५. जो रोज घेवर खाता है, वह रोटियाँ क्यों खावे ?
यः प्रतिदिन घृतवरं भक्षयति, सः रोटिकाः किमर्थं भक्षयेत् (भक्षयतु) ।

६. ये बासी कचौड़ियाँ मत खा ।
इमाः पर्युषिताः घृतचौरीः मा बभक्षः (मा स्म भक्षयः) ।

७. यदि तू सर्दियों में बादाम खाता तो पुष्ट हो जाता ।
यदि त्वं शीततौ वातादान् अभक्षयिष्यः तर्हि पुष्टः अभविष्यः ।

(४) तड आघाते=पीटना [परस्मैपदी]

लट्—ताडयति	ताडयतः	ताडयन्ति
लिट् (१)—ताडयाञ्चकार	ताडयाञ्चक्रतुः	ताडयाञ्चक्रुः
(२)—ताडयाम्बभूव	ताडयाम्बभूवतुः	ताडयाम्बभूवुः
(३)—ताडयामास	ताडयामासतुः	ताडयामासुः
लुट्—ताडयिता	ताडयितारौ	ताडयितारः
लृट्—ताडयिष्यति	ताडयिष्यतः	ताडयिष्यन्ति
लोट्—ताडयतु (ताडयतात्)	ताडयताम्	ताडयन्तु
लङ्—अताडयत्	अताडयताम्	अताडयन्
वि. लिङ्—ताडयेत्	ताडयेताम्	ताडयेयुः
लुङ्—अतीतडत्	अतीतडताम्	अतीतडन्
अतीतडः	अतीतडतम्	अतीतडत
अतीतडम्	अतीतडाव	अतीतडाम
लृङ्—अताडयिष्यत्	अताडयिष्यताम्	अताडयिष्यन्

अभ्यास

१. कुछ मूर्ख अध्यापक पढ़ाना तो जानते नहीं और छात्रों को बिना अपराध पीटते हैं।=केचन मूढाः अध्यापकाः पाठनशैलीम् अविदित्वा एव अपराधम् अन्तरेण छात्रान् ताडयन्ति।

२. द्रोणाचार्य कभी भी अपने विद्यार्थियों को नहीं पीटता था।
द्रोणाचार्यः जातुचित् निजान् अन्तेवासिनः न ताडयाञ्चकार (ताडयाम्बभूव, ताडयामास; अताडयत्; अतीतडत्)।

३. गुरुजन शिष्यों की अमृतभरे हाथों से ताडना करते हैं, जहरीले हाथों से नहीं।
गुरवः शिष्यान् सामृतैः पाणिभिः ताडयन्ति न तु विषोक्षितैः।

४. यदि पाठ याद नहीं करोगे तो गुरुजी पीटेंगे।
यदि पाठं न स्मरिष्यथ (स्मर्तास्थ) तर्हि गुरवः ताडयिष्यन्ति (ताडयितारः)।

५. मैं बिना दोष के बच्चों को क्यों पीटूं ?
अहम् अन्तरेण स्खलितं बालकं किमर्थं ताडयानि (ताडयेयम्) ?

६. उस बेचारे को मत पीटना=तं वराकं मा तीतडः (मा स्म ताडयः)।

७. यदि ये उद्दण्डता करते, तो मैं इन्हें पीटता।
यदि इमे औद्धत्यम् आचरिष्यन्, तर्हि अहम् इमान् अताडयिष्यम्।

(५) छर्द वमने=वमन करना [परस्मैपदी]

लट्—छर्दयति छर्दयतः छर्दयन्ति

लिट् (१) छर्दयाञ्चकार छर्दयाञ्चक्रतुः छर्दयाञ्चक्रुः

(२) छर्दयाम्बभूव छर्दयाम्बभूवतुः छर्दयाम्बभूवुः

(३) छर्दयामास छर्दयामासतुः छर्दयामासुः

लुट्—छर्दयिता छर्दयितारौ छर्दयितारः

लृट्—छर्दयिष्यति छर्दयिष्यतः छर्दयिष्यन्ति

लोट्—छर्दयतु छर्दयताम् छर्दयन्तु
छर्दयतात्

लङ्—अच्छर्दयत् अच्छर्दयताम् अच्छर्दयन्

वि. लिङ्—छर्दयेत् छर्दयेताम् छर्दयेयुः

लुङ्—अचच्छर्दत् अचच्छर्दताम् अचच्छर्दन्
अचच्छर्दः अचच्छर्दतम् अचच्छर्दत
अचच्छर्दम् अचच्छर्दाव अचच्छर्दाम

लृङ्—अच्छर्दयिष्यत् अच्छर्दयिष्यताम् अच्छर्दयिष्यन्

अभ्यास

१. यह बालक खाये पिये को वमन कर देता है।

अयम् अर्भकः अशितपीतं छर्दयति।

२. याज्ञवल्क्य ने उन सूक्तों का वमन कर दिया।

याज्ञवल्क्यः तानि सूक्तानि छर्दयाञ्चकार (छर्दयाम्बभूव, छर्दयामास)

३. चिन्ता मत करो, इस औषध से अब यह वमन नहीं करेगा।

मा चिचिन्तः (मा स्म चिन्तयः), अनेन औषधेन इदानीम् अयं न छर्दयिष्यति (छर्दयिता)।

४. मुझे पता नहीं था कि यह तेरा भाग है, मैंने खा लिया, अब क्या उसे वमन करूँ?

मम ज्ञानं न अभूत् यद् अयं तव अंशः, अहम् अबभक्षम्, अधुना किं तं छर्दयानि (छर्दयेयम्)?

५. इस रोगी की हालत में सुधार है, कल इसने पांच बार उलटी की थी किन्तु आज तीन बार।=अस्य रोगिणः रोगः अपचीयते, ह्यः अयं पञ्चकृत्वः अच्छर्दयत् किन्तु अद्य त्रिः अचच्छर्दत्।

६. इच्छाशक्ति को प्रबल बना, इस दवाई को मत उगल देना।

इच्छाशक्तिं प्रबलां कुरु, इदम् औषधं मा चच्छर्दः (मा स्म छर्दयः)।

७. यह स्त्री यदि इस आसव का वमन नहीं करती, तो अब तक यह स्वस्थ हो जाती।

इयं योषित् यदि इमम् आसवं न अच्छर्दयिष्यत् तर्हि अधुनावधि इयं नीरोगा अभविष्यत्।

(६) क्षल शौचकर्मणि=पवित्र करना, धोना [परस्मैपदी]

लट्—क्षालयति क्षालयतः क्षालयन्ति
लिट् (१) क्षालयाञ्चकार क्षालयाञ्चक्रतुः क्षालयाञ्चक्रुः
(२) क्षालयाम्बभूव क्षालयाम्बभूवतुः क्षालयाम्बभूवुः
(३) क्षालयामास क्षालयामासतुः क्षालयामासुः
लुट्—क्षालयिता क्षालयितारौ क्षालयितारः
लृट्—क्षालयिष्यति क्षालयिष्यतः क्षालयिष्यन्ति

लोट्—क्षालयतु क्षालयताम् क्षालयन्तु
क्षालयतात्
लङ्—अक्षालयत् अक्षालयताम् अक्षालयन्
वि. लिङ्—क्षालयेत् क्षालयेताम् क्षालयेयुः
लुङ्—अचिक्षलत् अचिक्षलताम् अचिक्षलन्
अचिक्षलः अचिक्षलतम् अचिक्षलत
अचिक्षलम् अचिक्षलाव अचिक्षलाम
लृङ्—अक्षालयिष्यत् अक्षालयिष्यताम् अक्षालयिष्यन्

अभ्यास

१. जो भोजन से पूर्व हाथ पांव धोते हैं, वे दीर्घायु होते हैं।
ये भोजनात् पूर्वं पाणिपादं क्षालयन्ति ते दीर्घायुषो भवन्ति।

२. श्रीकृष्ण ने आंसुओं से सुदामा के पांव धोये।
श्रीकृष्णः अश्रुभिः सुदाम्नः चरणौ क्षालयाञ्चकार (क्षालयाम्बभूव, क्षालयामास)

३. इन कमरों को क्या तुम लोग कल धोओगे ?
इमान् प्रकोष्ठान् किं यूयं श्वः क्षालयितास्थ ?

४. भोजन तैयार है, पर पहले मैं कपड़े धोऊँगा, फिर खाना खाऊँगा।
भोजनं सम्पन्नम् अस्ति, परं पूर्वम् अहं पटान् क्षालयिष्यामि, तदनन्तरं भोजनं भक्षयिष्यामि।

५. आज छुट्टी है, सारे मैले कपड़े हमें आज ही धो लेने चाहियें।
अद्य अवकाशः अस्ति, सर्वाणि मलिनानि वसनानि वयम् अद्यैव क्षालयेम।

६. हे पुत्र ! इन महात्माजी के दोनों वस्त्र जल्दी धो दे।
भोः पुत्र ! अस्य महात्मनः उभे अम्बरे झटिति क्षालय।

७. हे सेविका ! तूने कल बरतन अच्छी तरह नहीं धोये।
हे सेविके ! त्वं ह्यः पात्राणि सम्यक् न अक्षालयः।

८. हमने आज ही इस आंगन के फर्श को धोया है।
वयम् अद्यैव अस्य अङ्गनस्य भूमिम् अचिक्षलाम।

९. बिना गर्म पानी के रोगी के कपड़े मत धो।
उष्णोदकम् अन्तरेण रुग्णस्य वासांसि मा चिक्षलः (मा स्म क्षालयः)।

१०. यदि तू कपड़े नदी पर धोता तो समय कम लगता।
यदि त्वं वस्त्राणि नद्याम् अक्षालयिष्यः तर्हि अल्पः कालः व्ययः अभविष्यत्।

(७) तुल उन्माने=मापना, तोलना [परस्मैपदी]

लट्—तोलयति तोलयतः तोलयन्ति
लिट् (१) तोलयाञ्चकार तोलयाञ्चक्रतुः तोलयाञ्चक्रुः
(२) तोलयाम्बभूव तोलयाम्बभूवतुः तोलयाम्बभूवुः
(३) तोलयामास तोलयामासतुः तोलयामासुः
लुट्—तोलयिता तोलयितारौ तोलयितारः
लृट्—तोलयिष्यति तोलयिष्यतः तोलयिष्यन्ति

लोट्—तोलयतु / तोलयतात् तोलयताम् तोलयन्तु
लङ्—अतोलयत् अतोलयताम् अतोलयन्
वि. लिङ्—तोलयेत् तोलयेताम् तोलयेयुः
लुङ्—अतूतुलत् अतूतुलताम् अतूतुलन्
अतूतुलः अतूतुलतम् अतूतुलत
अतूतुलम् अतूतुलाव अतूतुलाम
लृङ्—अतोलयिष्यत् अतोलयिष्यताम् अतोलयिष्यन्

अभ्यास

१. दुष्ट बनिये सदा कम तोलते हैं=दुष्टाः वणिजः सदा ऊनं तोलयन्ति ।

२. राजा शिवि ने कबूतर के बराबर अपने शरीर का मांस तोला ।
नृपः शिविः कपोतेन समं (=कपोत-विनिमये) निजदेहमांसं तोलयाञ्चकार (तोलयाम्बभूव, तोलयामास) ।

३. सतयुग में सब पूरा तोलते थे=कृतयुगे सर्वे पूर्णं तोलयाञ्चक्रुः (तोलयाम्बभूवुः, तोलयामासुः, अतोलयन्, अतूतुलन्) ।

४. तू मेरा अनाज कब तोलेगा ?=त्वं मम धान्यं कदा तोलयितासि (तोलयिष्यसि) ?

५. सदा पूरा तोलो, सत्य बोलो, कम मत तोलो ।
सर्वदा पूर्णं तोलयत (तोलयेत), सत्यं ब्रूत (ब्रूयात), न्यूनं मा तूतुलत (मा स्म तोलयत) ।

६. यदि तू कम तोलता तो मैं तेरी पिटाई करता ।
यदि त्वं न्यूनम् अतोलयिष्यः तर्हि अहं त्वाम् अताडयिष्यम् ।

(८) पाल रक्षणे=पालन करना, रक्षा करना [परस्मैपदी]

लट्—पालयति पालयतः पालयन्ति
लिट् (१) पालयाञ्चकार पालयाञ्चक्रतुः पालयाञ्चक्रुः
(२) पालयाम्बभूव पालयाम्बभूवतुः पालयाम्बभूवुः
(३) पालयामास पालयामासतुः पालयामासुः
लुट्—पालयिता पालयितारौ पालयितारः
लृट्—पालयिष्यति पालयिष्यतः पालयिष्यन्ति

लोट्—पालयतु / पालयतात् पालयताम् पालयन्तु
लङ्—अपालयत् अपालयताम् अपालयन्
वि. लिङ्—पालयेत् पालयेताम् पालयेयुः
लुङ्—अपीपलत् अपीपलताम् अपीपलन्
अपीपलः अपीपलतम् अपीपलत
अपीपलम् अपीपलाव अपीपलाम
लृङ्—अपालयिष्यत् अपालयिष्यताम् अपालयिष्यन्

अभ्यास

१. जितने स्नेह से माता पुत्रों को पालती है उतने स्नेह से पिता नहीं।
यथा माता पुत्रान् सस्नेहं पालयति न तथा पिता।

२. पहिले लोग चारों आश्रमों का धर्म पालते थे।
पुरा जनाः चतुर्णाम् आश्रमाणां धर्मं पालयाञ्चक्रुः (पालयाम्बभूवुः, पालयामासुः, अपालयन्, अपीपलन्)।

३. महर्षि कण्व ने शकुन्तला को बड़े स्नेह से पाला।
महर्षिः कण्वः शकुन्तलां महता स्नेहेन अपीपलत्।

४. पापियों को मत पाल = मा पीपलः पापिनः (मा स्म पालयः पापिनः)।

५. इन तीनों लड़कियों को मैं पालूंगा = इमाः तिस्रः कन्याः अहं पालयिष्यामि (पालयितास्मि)।

६. मैं इन मुष्टण्डों को क्यों पालूं ?
अहम् एतान् परपिण्डपुष्टान् कथं पालयानि (पालयेयम्) ?

७. यदि तू कुत्ता पालता, तो तेरे यहाँ चोरी न होती।
यदि त्वं सारमेयम् अपालयिष्यः तर्हि त्वद्गृहे चौर्यं न अभविष्यत्।

(६) पूज पूजायाम् = पूजा करना [परस्मैपदी]

लट्—पूजयति पूजयतः पूजयन्ति
लिट् (१) पूजयाञ्चकार पूजयाञ्चक्रतुः पूजयाञ्चक्रुः
(२) पूजयाम्बभूव पूजयाम्बभूवतुः पूजयाम्बभूवुः
(३) पूजयामास पूजयामासतुः पूजयामासुः
लुट्—पूजयिता पूजयितारौ पूजयितारः
लृट्—पूजयिष्यति पूजयिष्यतः पूजयिष्यन्ति
लोट्—{पूजयतु पूजयताम् पूजयन्तु
{पूजयतात्

लङ्—अपूजयत् अपूजयताम् अपूजयन्
वि. लिङ्—पूजयेत् पूजयेताम् पूजयेयुः
लुङ्—अपूपुजत् अपूपुजताम् अपूपुजन्
अपूपुजः अपूपुजतम् अपूपुजत
अपूपुजम् अपूपुजाव अपूपुजाम
लृङ्—अपूजयिष्यत् अपूजयिष्यताम् अपूजयिष्यन्

अभ्यास

१. आर्यसमाज के होने पर भी लोग आज भी पत्थर पूजते हैं।
आर्यसमाजे सत्यपि जनाः अद्यापि पाषाणान् पूजयन्ति।

२. राम ने सीता और लक्ष्मण के साथ अगस्त्य और लोपामुद्रा की पूजा की।
रामः सीतालक्ष्मणाभ्यां सह अगस्त्यलोपामुद्रे पूजयाञ्चकार (पूजयाम्बभूव, पूजयामास; अपूजयत्; अपूपुजत्)।

३. मैं कल पण्डित ईश्वरचन्द्र जी की बम्बई में धन और वस्त्रों से पूजा करूँगा।
अहं श्वः मुम्बापुर्यां पण्डितम् ईश्वरचन्द्रमहाभागं वसुभिः वासोभिः च पूजयितास्मि।

४. तू आज किन विद्वानों की पूजा करेगा।=त्वम् अद्य कान् विदुषः पूजयिष्यसि ?

५. मैं इन मूर्खों की पूजा क्यों करूँ=अहम् एतान् मूर्खान् कथं पूजयानि (पूजयेयम्)?

६. तुमने कल उस ढोंगी संन्यासी की पूजा की, हमने तो आज उसकी जरा भी पूजा नहीं की।=यूयं ह्यः तं पाखण्डिनं संन्यासिनम् अपूजयत, वयं तु अद्य तं मनाक् अपि न अपूपुजाम।

७. घमण्डियों की पूजा मत करो=अभिमानिनः मा पूपुजत (मा स्म पूजयत)।

८. यदि तू मातपिता की पूजा करता तो उनका आशीर्वाद पाता।
यदि त्वं पितरौ अपूजयिष्यः तर्हि तयोः आशीर्वादम् अलप्स्यथाः।

(१०) मन्त्रि गुप्तपरिभाषणे—सलाह करना [आत्मनेपदी]

लट्—मन्त्रयते मन्त्रयेते मन्त्रयन्ते
मन्त्रयसे मन्त्रयेथे मन्त्रयध्वे
मन्त्रये मन्त्रयावहे मन्त्रयामहे

लिट् (१) मन्त्रयाञ्चक्रे मन्त्रयाञ्चक्राते मन्त्रयाञ्चक्रिरे
(२) मन्त्रयाम्बभूव मन्त्रयाम्बभूवतुः मन्त्रयाम्बभूवुः
(३) मन्त्रयामास मन्त्रयामासतुः मन्त्रयामासुः

लुट्—मन्त्रयिता मन्त्रयितारौ मन्त्रयितारः
मन्त्रयितासे मन्त्रयितासाथे मन्त्रयिताध्वे
मन्त्रयिताहे मन्त्रयितास्वहे मन्त्रयितास्महे

लृट्—मन्त्रयिष्यते मन्त्रयिष्येते मन्त्रयिष्यन्ते
मन्त्रयिष्यसे मन्त्रयिष्येथे मन्त्रयिष्यध्वे
मन्त्रयिष्ये मन्त्रयिष्यावहे मन्त्रयिष्यामहे

लोट्—मन्त्रयताम् मन्त्रयेताम् मन्त्रयन्ताम्
मन्त्रयस्व मन्त्रयेथाम् मन्त्रयध्वम्
मन्त्रयै मन्त्रयावहै मन्त्रयामहै

लङ्—अमन्त्रयत अमन्त्रयेताम् अमन्त्रयन्त
अमन्त्रयथाः अमन्त्रयेथाम् अमन्त्रयध्वम्
अमन्त्रये अमन्त्रयावहि अमन्त्रयामहि

वि. लिङ्—
मन्त्रयेत मन्त्रयेयाताम् मन्त्रयेरन्
मन्त्रयेथाः मन्त्रयेयाथाम् मन्त्रयेध्वम्
मन्त्रयेय मन्त्रयेवहि मन्त्रयेमहि

लुङ्—अममन्त्रत अममन्त्रेताम् अममन्त्रन्त
अममन्त्रथाः अममन्त्रेथाम् अममन्त्रध्वम्
अममन्त्रे अममन्त्रावहि अममन्त्रामहि

लृङ्—
अमन्त्रयिष्यत अमन्त्रयिष्येताम् अमन्त्रयिष्यन्त
अमन्त्रयिष्यथाः अमन्त्रयिष्येथाम् अमन्त्रयिष्यध्वम्
अमन्त्रयिष्ये अमन्त्रयिष्यावहि अमन्त्रयिष्यामहि

अभ्यास

१. तुम दोनों नदी के किनारे जाने की सलाह करते हो।
युवां नदीतटगमनाय मन्त्रयेथे।

२. राम ने लङ्का पर चढ़ाई करने से पहले सब मित्रों से सलाह की।
रामः लङ्काक्रमणात् प्राक् सर्वैः मित्रैः सह मन्त्रयाञ्चक्रे (मन्त्रयाम्बभूव, मन्त्रयामास; अमन्त्रयत; अममन्त्रत)।

३. तू उस धोखेबाज मित्र के साथ सलाह मत कर।
त्वं तेन वञ्चकेन मित्रेण सह मा ममन्त्रथाः (मा स्म मन्त्रयथाः)।

४. इस कठिन समय में, मैं किससे मन्त्रणा करूँ?
अस्मिन् कठिने काले अहं केन सह मन्त्रयै (मन्त्रयेय)?

५. तू आज जिससे सलाह करेगा, उसी से मैं कल सलाह लूंगा।
त्वम् अद्य येन सह मन्त्रयिष्यसे तेनैव सह अहं श्वः मन्त्रयिताहे।

६. यदि तू बैरिस्टर शास्त्री से सलाह करता तो मुकदमा जीत जाता।
यदि त्वं प्राड्विवाकेन शास्त्रिणा सह अमन्त्रयिष्यथाः तर्हि वादम् व्यजेष्यथाः।

७. 'द्वौ संनिषद्य यन् मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः'[1]।
दो जने मिलकर एकान्त में बैठकर भी जो कुछ सलाह करते हैं, उसे वह वरुण परमेश्वर तीसरा होकर सदा जानता रहता है।

(११) ष्वद (स्वद्) आस्वादने = स्वाद लेना

'आस्वदः सकर्मकात्' इस धातु-सूत्र के द्वारा 'ग्रस' धातु से लेकर 'ष्वद (स्वद्)' धातु तक की धातुओं से सकर्मकावस्था में ही णिच् प्रत्यय होता है, अकर्मकावस्था में णिच् नहीं होता। उस अवस्था में इन धातुओं के रूप भ्वादिगणीय धातुओं के रूपों के समान चलेंगे। स्वद् धातु का प्रयोग आङ् उपसर्ग पूर्वक ही अधिक होता है।

लट्—आस्वादयति	आस्वादयतः	आस्वादयन्ति
लिट्—(१) आस्वादयाञ्चकार	आस्वादयाञ्चक्रतुः	आस्वादयाञ्चक्रुः
(२) आस्वादयाम्बभूव	आस्वादयाम्बभूवतुः	आस्वादयाम्बभूवुः
(३) आस्वादयामास	आस्वादयामासतुः	आस्वादयामासुः
लुट्—आस्वादयिता	आस्वादयितारौ	आस्वादयितारः
लृट्—आस्वादयिष्यति	आस्वादयिष्यतः	आस्वादयिष्यन्ति
लोट्—आस्वादयतु (आस्वादयतात्)	आस्वादयताम्	आस्वादयन्तु
लङ्—आस्वादयत्	आस्वादयताम्	आस्वादयन्
वि. लिङ्—आस्वादयेत्	आस्वादयेताम्	आस्वादयेयुः
लुङ्—आसिष्वदत्	आसिष्वदताम्	आसिष्वदन्
आसिष्वदः	आसिष्वदतम्	आसिष्वदत
आसिष्वदम्	आसिष्वदाव	आसिष्वदाम
लृङ्—आस्वादयिष्यत्	आस्वादयिष्यताम्	आस्वादयिष्यन्

१. अथर्ववेद ४.१६.२

अभ्यास

१. जैसे बढ़िया दूध का हम स्वाद लेते हैं, वैसा तो कोई भाग्यशाली ही चखता होगा।
यादृशम् उत्तमं पयः वयम् आस्वादयामः, तादृशं तु कश्चित् सौभाग्यवान् एव आस्वादयति (मन्ये, तादृशं तु कश्चित् सौभाग्यवान् एव आस्वादयेत्)।

२. ऋषि लोग समाधि में जिस ब्रह्मानन्द का स्वाद लेते थे, वह हमारे लिये दुर्लभ है।
ऋषयः समाधौ यं ब्रह्मानन्दम् आस्वादयाञ्चक्रुः (आस्वादयाम्बभूवुः, आस्वादयामासुः), सः अस्माकं कृते दुर्लभः एव।

३. कल मैं पके कटहल का स्वाद लूंगा = श्वः अहं पक्वं पनसम् आस्वादयितास्मि।

४. आज वे सब हमारे बाग में डाल पके आमों का स्वाद लेंगे।
अद्य ते अस्मदीये उद्याने शाखापक्वानि आम्रफलानि आस्वादयिष्यन्ति।

५. कल दर्शकों ने नाटकघर में भवभूति के करुण रस का आस्वादन किया।
ह्यः दर्शकाः (सामाजिकाः) नाट्यशालायां भवभूतेः करुणरसम् आस्वादयन्।

६. इस बेरों के जङ्गल में तुम खूब पके बेरों का स्वाद ले लो।
अस्मिन् बदरीवने यूयं भृशं पक्वानि बदरीफलानि आस्वादयत।

७. तूने आज तक बातों का ही स्वाद लिया है, काम नहीं किया।
त्वम् अद्यपर्यन्तं वार्ताः एव आसिष्वदः न कार्याणि अकार्षीः।

८. पराये अन्न का अधिक स्वाद मत ले।
अधिकं परान्नं मा आसिष्वदः (मा स्म आस्वादयः)।

९. हमें सायंकाल वीररस प्रधान काव्यों का स्वाद लेना चाहिये।
वयं सायंकाले वीररसप्रधानानि काव्यानि आस्वादयेम।

१०. यदि तू स्वाध्याय रस का स्वाद ले लेता, तो उसे कभी नहीं छोड़ता।
यदि त्वं स्वाध्यायरसम् आस्वादयिष्यः तर्हि तं कदापि न अत्यक्ष्यः।

(१२) मार्ग अन्वेषणे=ढूंढना [परस्मैपदी]

'युज, पृच संयमने' से लेकर 'धृष प्रसहने' इस धातुसूत्र तक जो (४७) धातुएँ हैं, उनसे विकल्प से णिच् प्रत्यय होता है[1]। सो एक पक्ष में 'योजयति' आदि रूप बनेंगे और दूसरे पक्ष में भ्वादिगणीय धातुवत् 'योजति' आदि रूप बनेंगे। इन धातुओं को आधृषीय धातु कहते हैं। 'मार्ग' धातु भी इन्हीं में पठित है।

णिच्सहित पक्ष में			णिच्रहित पक्ष में		
लट्—मार्गयति	मार्गयतः	मार्गयन्ति	लट्—मार्गति	मार्गतः	मार्गन्ति
लिट् (१) मार्गयाञ्चकार	मार्गयाञ्चक्रतुः	मार्गयाञ्चक्रुः	लिट्—ममार्ग	ममार्गतुः	ममार्गुः

१. आधृषाद्वा [धातुसूत्र] (धातुपाठ, चुरादि.)

(२) मार्गयाम्बभूव मार्गयाम्बभूवतुः मार्गयाम्बभूवुः
(३) मार्गयामास मार्गयामासतुः मार्गयामासुः
लुट्—मार्गयिता मार्गयितारौ मार्गयितारः
लृट्—मार्गयिष्यति मार्गयिष्यतः मार्गयिष्यन्ति
लोट्—{मार्गयतु / मार्गयतात्} मार्गयताम् मार्गयन्तु
लङ्—अमार्गयत् अमार्गयताम् अमार्गयन्
वि. लिङ्—मार्गयेत् मार्गयेताम् मार्गयेयुः
लुङ्—अममार्गत् अममार्गताम् अममार्गन्
लृङ्—अमार्गयिष्यत् अमार्गयिष्यताम् अमार्गयिष्यन्

लुट्—मार्गिता मार्गितारौ मार्गितारः
लृट्—मार्गिष्यति मार्गिष्यतः मार्गिष्यन्ति
लोट्—{मार्गतु / मार्गतात्} मार्गताम् मार्गन्तु
लङ्—अमार्गत् अमार्गताम् अमार्गन्
वि. लिङ्—मार्गेत् मार्गेताम् मार्गेयुः
लुङ्—अमार्गीत् अमार्गिष्टाम् अमार्गिषुः
लृङ्—अमार्गिष्यत् अमार्गिष्यताम् अमार्गिष्यन्

अभ्यास

१. वह अपने मित्र को नदी के किनारे ढूंढता है।
स: निजमित्रं निम्नगातीरे मार्गयति (मार्गति)।

२. योगियों ने निरन्तर समाधि में ईश्वर को ढूंढा।
योगिनः अनवरतं समाधौ परमेश्वरं मार्गयाञ्चक्रुः (मार्गयाम्बभूवुः, मार्गयामासुः, ममार्गुः)।

३. उस खोये हुए घोड़े को आज ये अलवर नगर में ढूंढेंगे और कल बाहर ढूंढेंगे।
तं विलुप्तम् अश्वम् अद्य एते अलवरनगरे मार्गयिष्यन्ति (मार्गिष्यन्ति) श्वः च बहिः मार्गयितारः (मार्गितारः)।

४. अरे उसे नदी के किनारे मत ढूंढ, यहीं मिल जायेगा।
अयि, तं तटिनीतटे मा ममार्गः (मा मार्गीः; मा स्म मार्गयः, मा स्म मार्गः), अत्रैव मेलिष्यति।

५. मैं अब उन महमानों को कहाँ ढूंढूं ?
अहं तान् प्राघुणकान् अधुना क्व मार्गयाणि (मार्गाणि) ?

६. उस दिन कुसुमलता ने दलिये की थाली खूब ढूंढी पर नहीं मिली।
तस्मिन् अहनि कुसुमलता यवागूस्थालीं भृशम् अमार्गयत् (अमार्गत्) परं नैव अलप्स्यत।

७. आज हमने अजमेर में असली केसर ढूंढी।
अद्य वयम् अजमेरनगरे वास्तविकं केसरम् अममार्गाम (अमार्गिष्म)

८. देश की उन्नति के लिये हमें कोई मार्ग ढूंढ़ना चाहिए।
राष्ट्रस्य उन्नतये वयं कमपि मार्गं मार्गयेम (मार्गेम)।

९. यदि दयानन्द विरजानन्द सरीखे गुरु को न ढूंढ़ते तो आर्षज्ञान का पुनरुद्धार न होता।

यदि दयानन्दः विरजानन्दसदृशं गुरुं न अमार्गयिष्यत् (अमार्गिष्यत्) तर्हि आर्षज्ञानस्य पुनरुद्धारः न अभविष्यत् ।

(१३) कथ वाक्यप्रबन्धे=कहना [परस्मपदी]

'कथ वाक्यप्रबन्धे' से लेकर चुरादिगण के अन्त-पर्यन्त जो धातुएँ हैं वे अकारान्त (=अदन्त) मानी जाती हैं[1] । अर्थात् पूर्व की 'चुर' 'क्षल' आदि धातुओं में जो अन्त में अकार आदि पठित है, वह तो अनुबन्ध मात्र है, धातु का अङ्ग नहीं है । वह अनुनासिक माना जाता है और उसकी इत्सञ्ज्ञा[2] होकर लोप होता है । किन्तु इन 'कथ' 'वर' आदि धातुओं के अन्त में जो अकार पठित है वह अनुबन्ध नहीं है, अपितु धातु का अङ्ग है । वह अनुनासिक नहीं है । अतः उसकी इत्सञ्ज्ञा नहीं होती । णिच् (इ=) प्रत्यय परे रहने पर उसका विशेष प्रयत्न से[3] लोप होता है । इस प्रकार अकार का लोप करने से 'कथ (=कथ्)' आदि के 'क' आदि में स्थित अकार को वृद्धि नहीं होती, क्योंकि अकार-लोप के स्थानिवद्भाव[4] होने से उपधा में 'थ्' आदि पड़ते हैं अकार नहीं । फलतः 'कथयति' आदि रूप ही बनते हैं । इसी प्रकार 'गृह ग्रहणे', 'मृग अन्वेषणे', 'कुह विस्मापने' आदि धातुओं में भी पूर्ववत् अकारलोप के स्थानिवद्भाव के कारण लघूपध गुण[5] नहीं होता और 'गृहयते', 'मृगयते', 'कुहयते' आदि रूप बनते हैं । इन धातुओं के लुङ् में भी विशेषता है । अलोप (=अकारलोप) अग्लोप के ही अन्तर्गत है । अतः लुङ् में चङ्-परक णि के परे रहने पर 'अभ्यास'[6] को जो सन्वत् कार्य (=इत्व आदि) होते हैं, वे इन धातुओं में नहीं होंगे । क्योंकि 'अनग्लोपे' कथन से सन्वत् कार्य का निषेध हो गया[7] । इसलिये 'अचकथत्' आदि रूप बनेंगे । अभ्यास के लघु स्वर को जो दीर्घत्व (=अचूचुरत्) होता है[8] वह भी यहाँ नही होता क्योंकि दीर्घत्व-विधायक सूत्र में भी 'अनग्लोपे' की अनुवृत्ति है । एक विशेषता और है—जैसे 'पाल रक्षणे' के लुङ् में चङ्परक णिच् परे रहने पर उपधा को ह्रस्व हो जाता है[9] और 'अपीपलत्' आदि

---

१. अथागणान्ता अदन्ताः (धा० सू०—धातुपाठ, चुरादि०) ।
२. उपदेशेऽजनुनासिक इत् (अष्टा० १.३.२)
३. अतो लोपः (अष्टा० ६.४.४८)
४. अचः परस्मिन् पूर्वविधौ (अष्टा० १.१.५७)
५. पुगन्तलघूपधस्य च (अष्टा० ७.३.८६)
६. पूर्वोऽभ्यासः (अष्टा० ६.१.४)
७. सन्वल्लघुनि चङ्परे ऽनग्लोपे (अष्टा० ७.४.९३)
८. दीर्घो लघोः (अष्टा० ७.४.९४)
९. णौ चङ्युपधाया ह्रस्वः (अष्टा० ७.४.१)

रूप बनते हैं वैसे इन धातुओं में नहीं होता[1]। इसलिये 'भाम क्रोधे', 'साम सान्त्व-प्रयोगे' आदि धातुओं के लुङ् में उपधा (=अग्लोप होने पर जो उपधा बचती है) को ह्रस्व नहीं होगा और 'अबभामत्', 'अससामत्', आदि रूप बनेंगे।

लट्—कथयति कथयतः कथयन्ति
लिट्—(१) कथयाञ्चकार कथयाञ्चक्रतुः कथयाञ्चक्रुः
(२) कथयाम्बभूव कथयाम्बभूवतुः कथयाम्बभूवुः
(३) कथयामास कथयामासतुः कथयामासुः
लुट्—कथयिता कथयितारौ कथयितारः
लृट्—कथयिष्यति कथयिष्यतः कथयिष्यन्ति

लोट्—{कथयतु / कथयतात्} कथयताम् कथयन्तु
लङ्—अकथयत् अकथयताम् अकथयन्
वि. लिङ्—कथयेत् कथयेताम् कथयेयुः
लुङ्—अचकथत् अचकथताम् अचकथन्
अचकथः अचकथतम् अचकथत
अचकथम् अचकथाव अचकथाम
लृङ्—अकथयिष्यत् अकथयिष्यताम् अकथयिष्यन्

अभ्यास

१. गुणी लोग जो कुछ कहते हैं उसमें सार होता है।
गुणिजनाः यत् किमपि कथयन्ति तत् सारवत् भवति।

२. राक्षसों ने रावण को कहा—'हनुमान् ने सारा बाग उजाड़ दिया'।
राक्षसाः रावणं कथयाञ्चक्रुः (कथयाम्बभूवुः, कथयामासुः; अकथयन्; अचकथन्) —'हनूमान् निखिलम् उपवनम् अनीनशत् (अनाशयत्)'

३. मैंने पेड़ों में पानी तो डाला नहीं, अब गुरुजी क्या कहेंगे।
अहम् पादपेषु पयः तु न अपीपतम् (अपातयम्), अधुना गुरुचरणाः किं कथयिष्यन्ति (कथयितारः)।

४. मुझ को देखते ही उन्होंने क्षमा मांग ली, अब उनसे क्या कहूं?
मां दृष्ट्वा एव ते क्षमाम् अयाचन् (अयाचिषत), अधुना तान् किं कथयानि?

५. हमें कभी किसी को भी अपशब्द नहीं कहने चाहियें।
वयं कदापि कञ्चित् अपि अपशब्दान् न कथयेम।

६. उषा ने जानकर घड़ा नहीं फोड़ा, उसे कुछ मत कहना?
उषा ज्ञात्वा घटं न अभैत्सीत् (अभित्त, अभिदत्; अभिनत्, अभिन्त) तां किमपि मा चकथः (मा स्म कथयः)?

७. यदि मेरा मित्र मुझे नदी के किनारे घूमने के लिये कहता तो मैं जाता, पर उसने सुरेन्द्र से कहा मुझे नहीं।
यदि मम सखा मां स्रोतस्विनीतीरे भ्रमणाय अकथयिष्यत् तर्हि अहम् अगमिष्यम् परन्तु सः तु सुरेन्द्रम् अचकथत् न च माम्।

---

१. नाग्लोपिशास्वृदिताम् (अष्टा० ७.४.२)

(१४) गण संख्याने = गिनना [परस्मैपदी]

गण् धातु के लुङ् में अभ्यास के आकार को एक पक्ष में ईकार आदेश होगा[1], इसलिये दो प्रकार के रूप बनेंगे।

लट्—	गणयति	गणयतः	गणयन्ति
लिट्—	(१) गणयाञ्चकार	गणयाञ्चक्रतुः	गणयाञ्चक्रुः
	(२) गणयाम्बभूव	गणयाम्बभूवतुः	गणयाम्बभूवुः
	(३) गणयामास	गणयामासतुः	गणयामासुः

लुट्—गणयिता गणयितारौ गणयितारः
लृट्—गणयिष्यति गणयिष्यतः गणयिष्यन्ति
लोट्— {गणयतु / गणयतात्} गणयताम् गणयन्तु
लङ्—अगणयत् अगणयताम् अगणयन्
वि. लिङ्—गणयेत् गणयेताम् गणयेयुः
लुङ्—(१) अजीगणत् अजीगणताम् अजीगणन्
अजीगणः अजीगणतम् अजीगणत
अजीगणम् अजीगणाव अजीगणाम
(२) अजगणत् अजगणताम् अजगणन्
अजगणः अजगणतम् अजगणत
अजगणम् अजगणाव अजगणाम
लृङ्—
अगणयिष्यत् अगणयिष्यताम् अगणयिष्यन्

अभ्यास

१. बनिये सोने से पहिले रुपए गिनते हैं।
वणिजः शयनात् प्राक् रूप्यकाणि गणयन्ति।

२. कौत्स ने राजा रघु से गुरुदक्षिणा के लिये रुपये लिये और उन्हें गिना।
कौत्सः रघोः महाराजात् गुरुदक्षिणार्थं रूप्यकाणि जग्राह तानि च गणयाञ्चकार (गणयाम्बभूव, गणयामास)।

३. तू इन कटोरियों को गिन लेना।
त्वम् इमाः कंसिकाः गणयिष्यसि (गणयितासि)।

४. वे इस ढेरी के रुपये गिनें और तुम इस थैले की अठनियाँ गिनो।
ते अस्य राशेः रूप्यकाणि गणयन्तु यूयं च अस्य प्रसेवस्य अर्धरूप्यकाणि गणयत।

५. खिड़की छोड़ने से पहिले सबको अपने रुपये और टिकट गिन लेने चाहियें।
वातायनत्यागात् पूर्वं सर्वे स्वीयानि रूप्यकाणि शुल्कपत्राणि च गणयेयुः।

६. तुमने कल धोबी से लेते समय कपड़े गिने क्यों नहीं?
त्वं ह्यः रजकात् ग्रहणकाले वस्त्राणि कथं न अगणयः?

७. मैंने अभी अभी अपनी कक्षा के छात्रों को गिन लिया है।
अहं साम्प्रतमेव स्वकक्षायाः छात्रान् अजीगणम् (अजगणम्)।

---

१. ई च गणः (अष्टा० ७.४.९७)

८. खाते समय रोटियां मत गिन।
भक्षणवेलायां रोटिकाः मा जीगणः (मा जगणः); मा स्म गणयः)।

९. यदि देने से पहिले तू गहनों को गिन लेता तो अब नहीं पछताता।
यदि प्रदानात् पूर्वं त्वम् आभूषणानि अगणयिष्यः तर्हि पश्चात् न अतप्स्यः।

(१५) रच प्रतियत्ने=बनाना [परस्मैपदी]

लट्—रचयति रचयतः रचयन्ति
लिट्—
(१) रचयाञ्चकार रचयाञ्चक्रतुः रचयाञ्चक्रुः
(२) रचयाम्बभूव रचयाम्बभूवतुः रचयाम्बभूवुः
(३) रचयामास रचयामासतुः रचयामासुः
लुट्—रचयिता रचयितारौ रचयितारः
लृट्—रचयिष्यति रचयिष्यतः रचयिष्यन्ति

लोट्—{रचयतु / रचयतात्} रचयताम् रचयन्तु
लङ्—अरचयत् अरचयताम् अरचयन्
वि. लिङ्—रचयेत् रचयेताम् रचयेयुः
लुङ्—अररचत् अररचताम् अररचन्
अररचः अररचतम् अररचत
अररचम् अररचाव अररचाम
लृङ्—अरचयिष्यत् अरचयिष्यताम् अरचयिष्यन्

अभ्यास

१. तुम अपने काव्य कौन सी रीति में रचते हो?
त्वं स्वकाव्यानि कतमया रीत्या रचयसि?

२. वाल्मीकि ने आदिकाव्य रामायण की रचना की।
वाल्मीकिः आदिकाव्यं रामायणं रचयाञ्चकार (रचयामास, रचयाम्बभूव)।

३. चित्रकार कल इस दीवार पर चित्र बनायेगा।
चित्रकारः श्वः अस्यां भित्तौ चित्राणि रचयिता।

४. हम सब आज विवाहमण्डप बनायेंगे।
वयम् अद्य विवाहमण्डपं रचयिष्यामः।

५. दशमी के छात्रों ने कल अनुष्टुप् छन्द में पच्चीस श्लोक बनाये थे।
दशम्याः छात्राः ह्यः अनुष्टुप्नामके वृत्ते पञ्चविंशतिं श्लोकान् अरचयन्।

६. तुम दोनों आज सुन्दर गद्यसन्दर्भ बनाओ।
युवाम् अद्य मनोहरान् गद्यखण्डान् रचयतम्।

७. मनीषा ने आज उमा के हाथों पर मेंहदी से पत्तियां बनाई थीं।
मनीषा अद्य उमायाः हस्तयोः महारजनेन पत्रभङ्गान् अररचत्।

८. इस ठठेरे को तांबे के यज्ञपात्र, पीतल की थालियां और जस्ते के गुलदस्ते बनाने चाहियें।

अयं धातुकारः ताम्रस्य यज्ञपात्राणि, पित्तलस्य स्थालीः पिच्चटस्य च पुष्पाधानीः रचयेत् ।

९. यदि यह सुनार सोने चाँदी के सुन्दर आभूषण बनाता तो इसे सब पूछते ।
यदि अयं स्वर्णकारः सौवर्णानि रौप्याणि च मनोरमाणि आभूषणानि अरचयिष्यत् तर्हि सर्वे एनम् अप्रक्ष्यन् (अमार्गयिष्यन्) ।

(१६) अर्थ उपयाच्ञायाम् (=चाहना, प्रार्थना करना) [आत्मनेपदी]

लट्—अर्थयते अर्थयेते अर्थयन्ते
लिट् (१) अर्थयाञ्चक्रे अर्थयाञ्चक्राते अर्थयाञ्चक्रिरे
(२) अर्थयाम्बभूव अर्थयाम्बभूवतुः अर्थयाम्बभूवुः
(३) अर्थयामास अर्थयामासतुः अर्थयामासुः
लुट्—अर्थयिता अर्थयितारौ अर्थयितारः
लृट्—अर्थयिष्यते अर्थयिष्येते अर्थयिष्यन्ते
लोट्—अर्थयताम् अर्थयेताम् अर्थयन्ताम्
अर्थयस्व अर्थयेथाम् अर्थयध्वम्
अर्थयै अर्थयावहै अर्थयामहै

लङ्—आर्थयत आर्थयेताम् आर्थयन्त
आर्थयथाः आर्थयेथाम् आर्थयध्वम्
आर्थये आर्थयावहि आर्थयामहि
वि. लिङ्—अर्थयेत अर्थयेयाताम् अर्थयेरन्
अर्थयेथाः अर्थयेयाथाम् अर्थयेध्वम्
अर्थयेय अर्थयेवहि अर्थयेमहि
लुङ्—आर्तिथत आर्तिथेताम् आर्तिथन्त
आर्तिथथाः आर्तिथेथाम् आर्तिथध्वम्
आर्तिथे आर्तिथावहि आर्तिथामहि
लृङ्—आर्थयिष्यत आर्थयिष्येताम् आर्थयिष्यन्त

अभ्यास

१. उपासक लोग परमेश्वर से उत्तम बुद्धि मांगते हैं ।
उपासकाः परमेश्वरम् उत्तमां धियम् अर्थयन्ते ।

२. विश्वामित्र ने यज्ञ की रक्षा के लिये दशरथ से राम और लक्ष्मण को मांगा ।
विश्वामित्रः यज्ञरक्षणाय दशरथं रामलक्ष्मणौ अर्थयाञ्चक्रे (अर्थयाम्बभूव, अर्थयामास) ।

३. मेरे पास सब कुछ है, मैं किससे क्या मांगूं ?
अहं सम्पन्नोऽस्मि कं किम् अर्थयै (अर्थयेय) अहम् ?

४. हे शिष्यो ! तुम लोग सदा भगवान् से धारणावती बुद्धि मांगो ।
भोः शिष्याः ! यूयं नित्यं परमात्मानं मेधाम् अर्थयध्वम् (अर्थयेध्वम्) ।

५. मैंने वैद्य ओम्प्रकाश से आज जितने रुपये मांगे, उतने ही उसने खुशी से मुझे दे दिये ।
अहं भिषजम् ओम्प्रकाशम् अद्य यावन्ति रूप्यकाणि आर्तिथे तावन्ति सः सहर्षं मह्यम् अदित ।

६. उसने कल तो सत्यार्थप्रकाश ही मांगा था आज तो संस्कारविधि भी मांग ली।
सः ह्यः तु सत्यार्थप्रकाशम् एव आर्थयत, अद्य तु संस्कारविधिम् अपि आर्तिथत।

७. नीचवृत्ति वाले मनुष्य से काणी कौड़ी भी मत मांग।
अधमवृत्तिकं जनं काणवराटिकाम् अपि मा अर्तिथथाः (मा स्म अर्थयथाः)।

८. यदि वे मुझसे अधिक मांगते तो मैं उन्हें अधिक दे देता।
यदि ते माम् अधिकम् आर्थयिष्यन्त तर्हि अहं तेभ्यः अधिकम् अदास्ये।

(१७) स्पृह ईप्सायाम्=चाहना [परस्मैपदी]

लट्—स्पृहयति स्पृहयतः स्पृहयन्ति
लिट् (१) स्पृहयाञ्चकार स्पृहयाञ्चक्रतुः स्पृहयाञ्चक्रुः
(२) स्पृहयाम्बभूव स्पृहयाम्बभूवतुः स्पृहयाम्बभूवुः
(३) स्पृहयामास स्पृहयामासतुः स्पृहयामासुः
लुट्—स्पृहयिता स्पृहयितारौ स्पृहयितारः

लृट्—स्पृहयिष्यति स्पृहयिष्यतः स्पृहयिष्यन्ति
लोट्—{स्पृहयतु स्पृहयताम् स्पृहयन्तु / स्पृहयतात्
लङ्—अस्पृहयत् अस्पृहयताम् अस्पृहयन्
वि. लिङ्—स्पृहयेत् स्पृहयेताम् स्पृहयेयुः
लुङ्—अपस्पृहत् अपस्पृहताम् अपस्पृहन्
लृङ्—अस्पृहयिष्यत् अस्पृहयिष्यताम् अस्पृहयिष्यन्

अभ्यास

१. आजकल लोग केवल धन का ही लालच करते हैं।
इदानीन्तनाः जनाः केवलं धनाय[1] स्पृहयन्ति।

२. पहिले विद्यार्थियों को पढ़ने का लालच था, अब पढ़ने की बजाय फैशन का लालच है।
पुरा विद्यार्थिनः पठनाय स्पृहयाञ्चक्रुः (स्पृहयाम्बभूवुः, स्पृहयामासुः; अस्पृहयन्, अपस्पृहन्)।

३. मैंने कभी धन का लालच नहीं किया।
अहं कदापि धनाय न अस्पृहयम् (अपस्पृहम्)।

४. यदि तुम विद्यार्थी अवस्था में सुखभोग का लालच करोगे तो विद्या प्राप्त नहीं कर सकोगे।

---

१. स्पृहा (=चाहना) अर्थवाली धातुओं के प्रयोग में जिसकी चाहना की जाती है उसकी सम्प्रदान संज्ञा 'स्पृहेरीप्सितः (अष्टा.१.४.३६)' से होती है। और 'चतुर्थी सम्प्रदाने' (अष्टा.२.३ १३) से सम्प्रदान कारक में चतुर्थी विभक्ति होती है।

यदि यूयं विद्यार्थिनः सन्तः सुखभोगाय स्पृहयिष्यथ (स्पृहयितास्थ) तर्हि विद्याः अधिगन्तुं न शक्ष्यथ (शक्तास्थ)।

५. पाणिनि की अष्टाध्यायी शब्दशास्त्र की चाबी है, उसके सूत्रों को याद करने का लालच क्यों न करूँ ?।

पाणिनेः अष्टाध्यायी शब्दशास्त्रस्य कुञ्चिका वर्त्तते, तस्याः सूत्राणां स्मरणाय कथं न स्पृहयानि (स्पृहयेयम्)

६. छात्रों को पढ़ने का ही लालच करना चाहिये।

छात्राः पठनाय एव स्पृहयेयुः।

७. यदि कर्मचारी लोग धन का लालच करते, तो देश की अवनति होती।

यदि कर्मचारिणः जनाः धनाय अस्पृहयिष्यन् तर्हि देशस्य अवनतिः अभविष्यत्।

८. किसी दूसरे के धन का लालच मत करो, अपने कमाये धन पर सन्तोष करो।

कस्यचिद् अन्यस्य धनाय मा पस्पृहः (मा स्म स्पृहयः), स्वोपार्जितेन वित्तेन सन्तुष्यत।

सुबन्त-प्रकरण

शब्द-रूप

यद्यपि आरम्भ में हमने सुबन्त शब्द-रूपों का विषय समझाया था और कुछ शब्दरूप भी स्मरण करवाये थे, तथापि जब तक तिङन्त शब्दरूपों (क्रियावाचक धातुरूपों) का अभ्यास न हो, तब तक वाक्य बनाने में महती कठिनाई होती है; इसलिये हमने सभी गणों की प्रसिद्ध और अधिक उपयोग में आने वाली धातुओं के रूप दे दिये हैं और उनका वाक्यों में भी अभ्यास करवाया है। अब सुबन्त शब्दरूप स्मरण करवाते हैं और वाक्यों में उनका अभ्यास भी यथासम्भव करवाते जाते हैं।

पुंल्लिङ्ग शब्द

(१) अकारान्त पुंल्लिङ्ग राम शब्द

	एकवचन	द्विवचन	बहुवचन
प्रथमा	रामः	रामौ	रामाः
द्वितीया	रामम्	रामौ	रामान्
तृतीया	रामेण	रामाभ्याम्	रामैः
चतुर्थी	रामाय	रामाभ्याम्	रामेभ्यः
पञ्चमी	रामात्	रामाभ्याम्	रामेभ्यः
षष्ठी	रामस्य	रामयोः	रामाणाम्
सप्तमी	रामे	रामयोः	रामेषु
सम्बो. प्र	हे[1] राम	हे रामौ	हे रामाः

इसी प्रकार – यज्ञ, देव, कृष्ण, ग्राम, पट, घट, देश, अङ्क, भाग, कर, आदि शब्दों के रूप चलेंगे।

---

१. सम्बोधन के साथ 'हे' शब्द के अतिरिक्त, भोः, भगोः, अयि आदि शब्द भी लगाये जा सकते हैं और इनमें से कोई भी अव्यय न लगायें तो भी सम्बोधन का प्रयोग होता है।

(२) इकारान्त पुँल्लिङ्ग हरि शब्द

प्र०—	हरिः	हरी	हरयः
द्वि०—	हरिम्	हरी	हरीन्
तृ०—	हरिणा	हरिभ्याम्	हरिभिः
च०—	हरये	हरिभ्याम्	हरिभ्यः
प०—	हरेः	हरिभ्याम्	हरिभ्यः
ष०—	हरेः	हर्योः	हरीणाम्
स०—	हरौ	हर्योः	हरिषु
सं० प्र०—	हे हरे	हे हरी	हे हरयः

इसी प्रकार — भूपति, प्रजापति, अञ्जलि, राशि, रवि, ध्वनि, यति, कवि, अतिसखि आदि०। जितने भी कि-प्रत्ययान्त[2] शब्द हैं उनके भी रूप हरि शब्द के समान होंगे; यथा—आधि, व्याधि, विधि, निधि, सन्धि, जलधि, प्रधि आदि०।

(३) इन् प्रत्ययान्त पुँल्लिङ्ग करिन् शब्द

प्र०—	करी	करिणौ	करिणः
द्वि०—	करिणम्	करिणौ	करिणः
तृ०—	करिणा	करिभ्याम्	करिभिः
च०—	करिणे	करिभ्याम्	करिभ्यः
प०—	करिणः	करिभ्याम्	करिभ्यः
ष०—	करिणः	करिणोः	करिणाम्
स०—	करिणि	करिणोः	करिषु
सं० प्र०—	हे करिन्	हे करिणौ	हे करिणः

इसी प्रकार—शास्त्रिन्, हस्तिन्, दण्डिन्, ब्रह्मचारिन्, शृङ्गिन्, मन्त्रिन्, योगिन्, धनिन् आदि०।

(४) तकारान्त पुँल्लिङ्ग भूभृत् शब्द

प्र०—	भूभृत्	भूभृतौ	भूभृतः
द्वि०—	भूभृतम्	भूभृतौ	भूभृतः
तृ०—	भूभृता	भूभृद्भ्याम्	भूभृद्भिः
च०—	भूभृते	भूभृद्भ्याम्	भूभृद्भ्यः
प०—	भूभृतः	भूभृद्भ्याम्	भूभृद्भ्यः
ष०—	भूभृतः	भूभृतोः	भूभृताम्
स०—	भूभृति	भूभृतोः	भूभृत्सु
सं. प्र.-	हे भूभृत्	हे भूभृतौ	हे भूभृतः

इसी प्रकार—सुकृत्, मरुत्, श्रीयुत् आदि०।

(५) उकारान्त पुँल्लिङ्ग भानु शब्द

प्र०—	भानुः	भानू	भानवः
द्वि०—	भानुम्	भानू	भानून्
तृ०—	भानुना	भानुभ्याम्	भानुभिः
च०—	भानवे	भानुभ्याम्	भानुभ्यः
प०—	भानोः	भानुभ्याम्	भानुभ्यः
ष०—	भानोः	भान्वोः	भानूनाम्
स०—	भानौ	भान्वोः	भानुषु
सं० प्र०-	हे भानो	हे भानू	हे भानवः

इसी प्रकार—वायु, साधु, गुरु, सेतु, सूनु, सेतु, कारु आदि०।

(६) ऋकारान्त पुँल्लिङ्ग कर्तृ शब्द

प्र०—	कर्ता	कर्तारौ	कर्तारः
द्वि०—	कर्तारम्	कर्तारौ	कर्तॄन्
तृ०—	कर्त्रा	कर्तृभ्याम्	कर्तृभिः
च०—	कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः
प०—	कर्तुः	कर्तृभ्याम्	कर्तृभ्यः
ष०—	कर्तुः	कर्त्रोः	कर्तॄणाम्
स०—	कर्तरि	कर्त्रोः	कर्तृषु
सं० प्र०-	हे कर्तः	हे कर्तारौ	हे कर्तारः

इसी प्रकार—हर्तृ, धातृ, नेतृ, नप्तृ, शास्तृ, होतृ, सवितृ, भोक्तृ आदि०।

---

२. उपसर्गे घोः किः (अष्टा.३.३.९२)

(७) सकारान्त पुंल्लिङ्ग चन्द्रमस् शब्द

प्र०	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
द्वि०	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
तृ०	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
च०	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
प०	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
ष०	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
स०	चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु
सं० प्र०	हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः

इसी प्रकार—वेधस्, सुमनस्, दुर्मनस् आदि० ।

(८) वस् (क्वसु) प्रत्ययान्त पुंल्लिङ्ग तस्थिवस् शब्द

प्र०	तस्थिवान्	तस्थिवांसौ	तस्थिवांसः
द्वि०	तस्थिवांसम्	तस्थिवांसौ	तस्थुषः
तृ०	तस्थुषा	तस्थिवद्भ्याम्	तस्थिवद्भिः
च०	तस्थुषे	तस्थिवद्भ्याम्	तस्थिवद्भ्यः
प०	तस्थुषः	तस्थिवद्भ्याम्	तस्थिवद्भ्यः
ष०	तस्थुषः	तस्थुषोः	तस्थुषाम्
स०	तस्थुषि	तस्थुषोः	तस्थिवत्सु
सं० प्र०	हे तस्थिवन्	हे तस्थिवांसौ	हे तस्थिवांसः

इसी प्रकार—उपसेदिवस्, अनूषिवस्, उपशुश्रुवस् आदि० ।

(९) वत् (मतुप्) प्रत्ययान्त पुंल्लिङ्ग भगवत् शब्द

प्र०	भगवान्	भगवन्तौ	भगवन्तः
द्वि०	भगवन्तम्	भगवन्तौ	भगवतः
तृ०	भगवता	भगवद्भ्याम्	भगवद्भिः
च०	भगवते	भगवद्भ्याम्	भगवद्भ्यः
प०	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
ष०	भगवतः	भगवतोः	भगवताम्
स०	भगवति	भगवतोः	भगवत्सु
सं० प्र०	हे भगवन्	हे भगवन्तौ	हे भगवन्तः

इसी प्रकार—पुंल्लिङ्ग बलवत्, धनवत्, प्रज्ञावत्, विद्युत्वत् आदि० ।

(१०) नकारान्त पुंल्लिङ्ग आत्मन् शब्द

प्र०	आत्मा	आत्मानौ	आत्मानः
द्वि०	आत्मानम्	आत्मानौ	आत्मनः
तृ०	आत्मना	आत्मभ्याम्	आत्मभिः
च०	आत्मने	आत्मभ्याम्	आत्मभ्यः
प०	आत्मनः	आत्मभ्याम्	आत्मभ्यः
ष०	आत्मनः	आत्मनोः	आत्मनाम्
स०	आत्मनि	आत्मनोः	आत्मसु
सं० प्र०	हे आत्मन्	हे आत्मानौ	हे आत्मानः

इसी प्रकार—वर्मन् (पु०), यज्वन्, सुशर्मन्, कृष्णवर्त्मन् आदि० ।

(११) इकारान्त पुंल्लिङ्ग पति शब्द

प्र०	पतिः	पती	पतयः
द्वि०	पतिम्	पती	पतीन्
तृ०	पत्या	पतिभ्याम्	पतिभिः
च०	पत्ये	पतिभ्याम्	पतिभ्यः
प०	पत्युः	पतिभ्याम्	पतिभ्यः
ष०	पत्युः	पत्योः	पतीनाम्
स०	पत्यौ	पत्योः	पतिषु
सं० प्र०	हे पते	हे पती	हे पतयः

जब पति शब्द किसी समास का अन्त्य भाग होगा तब उस समस्त शब्द के रूप हरि के समान चलेंगे। यथा भूपति, प्रजापति, पृथ्वीपति आदि।

(१२) इकारान्त पुंल्लिङ्ग सखि शब्द

प्र०	सखा	सखायौ	सखायः
द्वि०	सखायम्	सखायौ	सखीन्
तृ०	सख्या	सखिभ्याम्	सखिभिः
च०	सख्ये	सखिभ्याम्	सखिभ्यः

प०—सख्युः	सखिभ्याम्	सखिभ्यः
ष०—सख्युः	सख्योः	सखीनाम्
स०—सख्यौ	सख्योः	सखिषु
सं० प्र०—हे सखे	हे सखायौ	हे सखायः

सखि शब्द जब तत्पुरुष समास का अन्त्य भाग होगा तो उसके 'इकार' को अकार (=टच्) हो जायेगा[1] और तब देवसखः, मत्सखः आदि अकारान्त शब्द हो जायेगा तथा उसके 'राम' शब्द के समान रूप बनेंगे।

(१३) नकारान्त पुंलिङ्ग राजन् शब्द

प्र०—राजा	राजानौ	राजानः
द्वि०—राजानम्	राजानौ	राज्ञः
तृ०—राज्ञा	राजभ्याम्	राजभिः
च०—राज्ञे	राजभ्याम्	राजभ्यः
प०—राज्ञः	राजभ्याम्	राजभ्यः
ष०—राज्ञः	राज्ञोः	राज्ञाम्
स०—राज्ञि(राजनि)	राज्ञोः	राजसु
सं० प्र०—हे राजन्	हे राजानौ	हे राजानः

इसी प्रकार—सुनामन्, महिमन्, गरिमन्, लघिमन् आदि०। जब राजन् शब्द किसी तत्पुरुष समास वाले शब्द का अन्तिम भाग होगा तो उससे भी अ(टच्) प्रत्यय होगा[1]। शब्द के 'अन्' भाग का लोप हो जायेगा[2] और अकारान्त—'महाराजः, देवराजः, मद्रराजः आदि शब्द बनेंगे और उनके रूप, 'राम' के समान चलेंगे।

(१४) ऋकारान्त पुंलिङ्ग पितृ शब्द

प्र०—पिता	पितरौ	पितरः
द्वि०—पितरम्	पितरौ	पितॄन्
तृ०—पित्रा	पितृभ्याम्	पितृभिः
च०—पित्रे	पितृभ्याम्	पितृभ्यः
प०—पितुः	पितृभ्याम्	पितृभ्यः
ष०—पितुः	पित्रोः	पितॄणाम्
स०—पितरि	पित्रोः	पितृषु
सं० प्र०—हे पितः	हे पितरौ	हे पितरः

इसी प्रकार—भ्रातृ, जामातृ, देवृ, शंस्तृ, नृ आदि०।

(१५) ईकारान्त (धात्वन्त) पुंलिङ्ग प्रधी शब्द

प्र०—प्रधीः	प्रध्यौ	प्रध्यः
द्वि०—प्रध्यम्	प्रध्यौ	प्रध्यः
तृ०—प्रध्या	प्रधीभ्याम्	प्रधीभिः
च०—प्रध्ये	प्रधीभ्याम्	प्रधीभ्यः
प०—प्रध्यः	प्रधीभ्याम्	प्रधीभ्यः
ष०—प्रध्यः	प्रध्योः	प्रध्याम्
स०—प्रध्यि	प्रध्योः	प्रधीषु
सं०प्र०-हे प्रधीः	हे प्रध्यौ	हे प्रध्यः

इसी प्रकार 'वेवीः', 'जलपीः' आदि०। सेनानीः, ग्रामणीः शब्दों में इतना विशेष है कि सप्तमी के एकवचन में 'सेनान्याम्' और 'ग्रामण्याम्' बनेगा[3] शेष प्रधीः के समान।

(१६) ऊकारान्त (धात्वन्त) पुंलिङ्ग सुलू शब्द

प्र०—सुलूः	सुल्वौ	सुल्वः
द्वि०—सुल्वम्	सुल्वौ	सुल्वः
तृ०—सुल्वा	सुलूभ्याम्	सुलूभिः
च०—सुल्वे	सुलूभ्याम्	सुलूभ्यः
प०—सुल्वः	सुलूभ्याम्	सुलूभ्यः
ष०—सुल्वः	सुल्वोः	सुल्वाम्

१. राजाहसखिभ्यष्टच् (अष्टा. ५.४.९१)
२. नस्तद्धिते (अष्टा० ६.४.१४४)
३. ङेराम्नद्याम्नीभ्यः (अष्टा. ७.३.११६)

स०—सुल्वि	सुल्वोः	सुलूषु
सं०प्र०—हे सुलूः	हे सुल्वौ	हे सुल्वः

इसी प्रकार—खलपू, दृन्भू, करभू आदि०।

(१७) ईप्रत्ययान्त पुंल्लिङ्ग पपी शब्द

प्र०—पपीः	पप्यौ	पप्यः
द्वि०—पपीम्	पप्यौ	पपीन्
तृ०—पप्या	पपीभ्याम्	पपीभिः
च०—पप्ये	पपीभ्याम्	पपीभ्यः
प०—पप्यः	पपीभ्याम्	पपीभ्यः
ष०—पप्यः	पप्योः	पप्याम्
स०—पप्यि	पप्योः	पपीषु
सं० प्र०—हे पपीः	हे पप्यौ	हे पप्यः

इसी प्रकार—यमी, वातप्रमी आदि०।

(१८) हकारान्त पुंल्लिङ्ग अनडुह् शब्द

प्र०—अनड्वान्	अनड्वाहौ	अनड्वाहः
द्वि०—अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ०—अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
च०—अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः
प०—अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः
ष०—अनडुहः	अनडुहोः	अनडुहाम्
स०—अनडुहि	अनडुहोः	अनडुत्सु
सं० प्र०—हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

(१९) सकारान्त पुंल्लिङ्ग ज्यायस् शब्द

प्र०—ज्यायान्	ज्यायांसौ	ज्यायांसः
द्वि०—ज्यायांसम्	ज्यायांसौ	ज्यायसः
तृ०—ज्यायसा	ज्यायोभ्याम्	ज्यायोभिः
च०—ज्यायसे	ज्यायोभ्याम्	ज्यायोभ्यः
प०—ज्यायसः	ज्यायोभ्याम्	ज्यायोभ्यः
ष०—ज्यायसः	ज्यायसोः	ज्यायसाम्
स०—ज्यायसि	ज्यायसोः	ज्यायस्सु
सं० प्र०—हे ज्यायः	हे ज्यायांसौ	हे ज्यायांसः

इसी प्रकार—पुंल्लिङ्ग श्रेयस्, भूयस्, साधीयस्, वरीयस्, प्रेयस् आदि०।

(२०) तकारान्त पुंल्लिङ्ग महत् शब्द

प्र०—महान्	महान्तौ	महान्तः
द्वि०—महान्तम्	महान्तौ	महतः
तृ०—महता	महद्भ्याम्	महद्भिः
च०—महते	महद्भ्याम्	महद्भ्यः
प०—महतः	महद्भ्याम्	महद्भ्यः
ष०—महतः	महतोः	महताम्
स०—महति	महतोः	महत्सु
सं० प्र०—हे महान्	हे महान्तौ	हे महान्तः

(२१) इन् (प्रत्ययान्त) पुंल्लिङ्ग पथिन् शब्द

प्र०—पन्थाः	पन्थानौ	पन्थानः
द्वि०—पन्थानम्	पन्थानौ	पथः
तृ०—पथा	पथिभ्याम्	पथिभिः
च०—पथे	पथिभ्याम्	पथिभ्यः
प०—पथः	पथिभ्याम्	पथिभ्यः
ष०—पथः	पथोः	पथाम्
स०—पथि	पथोः	पथिषु

पथिन् शब्द जब किसी समास का अन्तिम अवयव होगा तो वह अकारान्त हो जायेगा—जैसे घण्टापथ, राजपथ आदि और उसके रूप 'राम' के समान चलेंगे।

अभ्यास

१. हरि के भाई के लड़के ने रास्ते में एक बैल देखा।

हरेः भ्रातुः पुत्रः पथि एकम् अनड्वाहम् अपश्यत्।

२. सीता के पति का नाम रामचन्द्र था।
सीतायाः पत्युः नाम रामचन्द्रः आसीत् (समासे→) सीतापतेः नाम रामचन्द्रः आसीत्।

३. देवेन्द्र के मित्र पर मेरा विश्वास है।
देवेन्द्रस्य सख्यौ मम विश्वासः अस्ति। (समासे) देवेन्द्रसखे मम विश्वासः अस्ति।

४. अयोध्या के राजा के चार लड़के थे।
अयोध्यायाः राज्ञः चत्वारः सूनवः बभूवुः। (समासे→) अयोध्याराजस्य चत्वारः सूनवः बभूवुः।

५. मथुरा के रास्ते में चोर रहते हैं।
मथुरायाः पथि (=मथुरापथे) चौराः वसन्ति।

६. आत्मा और परमात्मा में भेद यही है कि आत्मा अल्पज्ञ है और परमात्मा सर्वज्ञ है।
आत्मनि परमात्मनि च (आत्मपरमात्मनोः) अयमेव भेदः यद् आत्मा अल्पज्ञः अस्ति परमात्मा च सर्वज्ञः।

७. गुरु की सेवा करने वाले के मन में यदि भक्ति भी हो तो विद्या जल्दी आती है।
गुरोः सेवायाः कर्तुः मनसि यदि भक्तेः उदयः स्यात् तदा झटिति सः विद्यां लभते।

८. सृष्टि के बनाने वाले भगवान् की लीला को देखकर किसको आश्चर्य नहीं होता।
संसारस्य कर्त्तुः भगवतः लीलां दृष्ट्वा कस्य आश्चर्यं न जायते ?

९. कल मैं अपने पिता के साथ पढ़ने के लिए गुरु के पास जाऊँगा।
श्वः अहं स्वपित्रा सह पठनाय गुरोः समीपं गन्तास्मि।

१०. लोग द्वितीया के दिन चन्द्रमा चाव से देखते हैं।
जनाः द्वितीयायां (द्वितीयस्यां) तिथौ चन्द्रमसं सोत्कण्ठम् अवलोकयन्ति।

११. उस मन्त्री के भवन में शास्त्री के साथ तीन ब्रह्मचारी भी रहते हैं।
तस्य मन्त्रिणः भवने शास्त्रिणा सह त्रयः ब्रह्मचारिणः अपि निवसन्ति।

१२. ये राजा लोग विद्वानों का आदर करते हैं।
एते भूभृतः विदुषः आद्रियन्ते।

स्त्रीलिङ्ग शब्द

(१) आबन्त स्त्रीलिङ्ग रमा शब्द

प्र०—रमा	रमे	रमाः	
द्वि०—रमाम्	रमे	रमाः	
तृ०—रमया	रमाभ्याम्	रमाभिः	
च०—रमायै	रमाभ्याम्	रमाभ्यः	
प०—रमायाः	रमाभ्याम्	रमाभ्यः	

ष०—रमायाः	रमयोः	रमाणाम्
स०—रमायाम्	रमयोः	रमासु
सं० प्र०—हे रमे	हे रमे	हे रमाः

इसी प्रकार—भार्या, गङ्गा, लज्जा, विद्या, कृपा, त्रपा, कक्षा, लता आदि आबन्त स्त्रीलिङ्ग शब्दों के रूप चलेंगे।

(२) ईकारान्त नदी-सञ्ज्ञक[1] स्त्रीलिङ्ग

गौरी शब्द

प्र०—गौरी	गौर्यौ	गौर्यः
द्वि०—गौरीम्	गौर्यौ	गौरीः
तृ०—गौर्या	गौरीभ्याम्	गौरीभिः
च०—गौर्यै	गौरीभ्याम्	गौरीभ्यः
प०—गौर्याः	गौरीभ्याम्	गौरीभ्यः
ष०—गौर्याः	गौर्योः	गौरीणाम्
स०—गौर्याम्	गौर्योः	गौरीषु
सं० प्र०—हे गौरि	हे गौर्यौ	हे गौर्यः

इसी प्रकार—पृथ्वी, नदी, कुमारी, पञ्चमी, दशमी, सरस्वती आदि। अवी, तन्त्री, तरी, लक्ष्मी, इन शब्दों की प्रथमा के एकवचन में विसर्ग रहते हैं, यथा—अवीः, तन्त्रीः, लक्ष्मीः, तरीः आदि। शेष सब वचनों और विभक्तियों 'गौरी' के समान०।

(३) ईकारान्त नदीसञ्ज्ञक स्त्रीलिङ्ग

स्त्री शब्द

प्र०—स्त्री	स्त्रियौ	स्त्रियः
द्वि०—स्त्रीम् / स्त्रियम्	स्त्रियौ	स्त्रीः / स्त्रियः
तृ०—स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च०—स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः
प०—स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः
ष०—स्त्रियाः	स्त्रियोः	स्त्रीणाम्
स०—स्त्रियाम्	स्त्रियोः	स्त्रीषु
सं० प्र०—हे स्त्रि	हे स्त्रियौ	हे स्त्रियः

(४) ऊकारान्त नदीसञ्ज्ञक स्त्रीलिङ्ग

चमू शब्द

प्र०—चमूः	चम्वौ	चम्वः
द्वि०—चमूम्	चम्वौ	चमूः
तृ०—चम्वा	चमूभ्याम्	चमूभिः
च०—चम्वै	चमूभ्याम्	चमूभ्यः
प०—चम्वाः	चमूभ्याम्	चमूभ्यः
ष०—चम्वाः	चम्वोः	चमूनाम्
स० चम्वाम्	चम्वोः	चमूषु
सं० प्र०—हे चमु	हे चम्वौ	हे चम्वः

इसी प्रकार—वधू, श्वश्रू, कर्कन्धू, तनू आदि०।

---

१. यूस्त्र्याख्यौ नदी (अष्टा० १.४.३) इससे ईकारान्त और ऊकारान्त स्त्रीलिङ्ग शब्दों की 'नदी' संज्ञा होती है। यहां नदी=तटिनी से कोई अभिप्राय नहीं है। नदीवाची शब्द भी यदि ईकारान्त अथवा ऊकारान्त नहीं होगा तो उसकी 'नदी' सञ्ज्ञा नहीं होगी। इस लिये किसी ने कहा है—

प्रभुः स्वातन्त्र्ययुक्तो हि यदिच्छति करोति तत्।
नदीत्वं पाणिनेः स्थल्यां गङ्गायमुनयोस्तु न॥

स्वतन्त्रतायुक्त स्वामी जो चाहता सो कर लेता है, 'देखो' पाणिनि ने 'स्थली' शब्द (जहां सूखापन है) की 'नदी' सञ्ज्ञा की और गङ्गा, यमुना की नहीं की।

(५) इकारान्त स्त्रीलिङ्ग रुचि[1] शब्द

प्र०—	रुचिः	रुची	रुचयः
द्वि०—	रुचिम्	रुची	रुचीः
तृ०	रुच्या	रुचिभ्याम्	रुचिभिः
च०—	रुच्यै (रुचये)	रुचिभ्याम्	रुचिभ्यः
प०—	रुच्याः (रुचेः)	रुचिभ्याम्	रुचिभ्यः
ष०—	रुच्याः (रुचेः)	रुच्योः	रुचीणाम्
स०—	रुच्याम् (रुचौ)	रुच्योः	रुचिषु
सं० प्र०—	हे रुचे	हे रुची	हे रुचयः

एवम्-वेदि, कृषि, ओषधि, अङ्गुलि। ति (=क्तिन्)[2] प्रत्ययान्त सभी शब्दों के रूप इसी प्रकार चलेंगे। यथा-शक्ति, भक्ति, राति, रीति, नीति, गति आदि।

(६) उकारान्त स्त्रीलिङ्ग धेनु शब्द

प्र०—	धेनुः	धेनू	धेनवः
द्वि०—	धेनुम्	धेनू	धेनूः
तृ०—	धेन्वा	धेनुभ्याम्	धेनुभिः
च०—	धेन्वै (धेनवे)	धेनुभ्याम्	धेनुभ्यः
प०—	धेन्वाः (धेनोः)	धेनुभ्याम्	धेनुभ्यः
ष०—	धेन्वाः (धेनोः)	धेन्वोः	धेनूनाम्
स०—	धेन्वाम् (धेनौ)	धेन्वोः	धेनुषु
सं० प्र०—	हे धेनो	हे धेनू	हे धेनवः

इसी प्रकार—तनु (शरीर), रेणु, आदि।

(७) ईकारान्त स्त्रीलिङ्ग धी शब्द

प्र०—	धीः	धियौ	धियः
द्वि०—	धियम्	धियौ	धियः
तृ०—	धिया	धीभ्याम्	धीभिः
च०—	धियै (धिये)	धीभ्याम्	धीभ्यः
प०—	धियाः (धियः)	धीभ्याम्	धीभ्यः
ष०—	धियाः (धियः)	धियोः	धीनाम् / धियाम्
स०—	धियाम् (धियि)	धियोः	धीषु
सं० प्र०—	हे धीः	हे धियौ	हे धियः

इसी प्रकार श्री, ह्री, भी आदि०।

(८) ऊकारान्त स्त्रीलिङ्ग भू शब्द

प्र०—	भूः	भुवौ	भुवः
द्वि०—	भुवम्	भुवौ	भुवः
तृ०—	भुवा	भूभ्याम्	भूभिः
च०—	भुवै (भुवे)	भूभ्याम्	भूभ्यः
प०—	भुवाः (भुवः)	भूभ्याम्	भूभ्यः
ष०—	भुवाः (भुवः)	भुवोः	भूनाम् / भुवाम्
स०—	भुवाम् (भुवि)	भुवोः	भूषु
सं० प्र०—	हे भूः	हे भुवौ	हे भुवः

एवम्—सू, जू, भ्रू, सुभ्रू आदि०।

(९) ऋकारान्त स्त्रीलिङ्ग स्वसृ शब्द

प्र०—	स्वसा	स्वसारौ	स्वसारः
द्वि०—	स्वसारम्	स्वसारौ	स्वसृः
तृ०—	स्वस्रा	स्वसृभ्याम्	स्वसृभिः
च०—	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः
प०—	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः
ष०—	स्वसुः	स्वस्रोः	स्वसृणाम्
स०—	स्वसरि	स्वस्रोः	स्वसृषु
सं० प्र०—	हे स्वसः	हे स्वसारौ	हे स्वसारः

---

१. ह्रस्व इकारान्त तथा ह्रस्व उकारान्त और इयङ् उवङ् स्थान वाले स्त्रीलिङ्ग शब्दों की विकल्प से नदीसञ्ज्ञा (ङिति ह्रस्वश्च, अष्टा० १.४.६) होती है, पक्ष में घि सञ्ज्ञा होगी (शेषो घ्यसखि, अष्टा० १.४.७)। फलतः चतुर्थी, पञ्चमी, षष्ठी और सप्तमी के एकवचनों में दो दो रूप बनेंगे।

२. स्त्रियां क्तिन् (अष्टा० ३.३.९४)

(१०) ऋकारान्त स्त्रीलिङ्ग मातृ शब्द

प्र०—माता	मातरौ	मातरः
द्वि०—मातरम्	मातरौ	मातॄः
तृ०—मात्रा	मातृभ्याम्	मातृभिः
च०—मात्रे	मातृभ्याम्	मातृभ्यः
प०—मातुः	मातृभ्याम्	मातृभ्यः
ष०—मातुः	मात्रोः	मातॄणाम्
स०—मातरि	मात्रोः	मातृषु
सं० प्र०—हे मातः	हे मातरौ	हे मातरः

इसी प्रकार—दुहितृ, ननान्दृ, यातृ (=जेठानी या देवरानी) आदि०।

(११) तकारान्त स्त्रीलिङ्ग सरित् शब्द

प्र०—सरित् (द्)	सरितौ	सरितः
द्वि०—सरितम्	सरितौ	सरितः
तृ०—सरिता	सरिद्भ्याम्	सरिद्भिः
च०—सरिते	सरिद्भ्याम्	सरिद्भ्यः
प०—सरितः	सरिद्भ्याम्	सरिद्भ्यः
ष०—सरितः	सरितोः	सरिताम्
स०—सरिति	सरितोः	सरित्सु

इसी प्रकार स्त्रीलिङ्ग हरित्, तडित्, विद्युत् आदि०।

(१२) दकारान्त स्त्रीलिङ्ग शरद् शब्द

प्र०—शरद्	शरदौ	शरदः
द्वि०—शरदम्	शरदौ	शरदः
तृ०—शरदा	शरद्भ्याम्	शरद्भिः
च०—शरदे	शरद्भ्याम्	शरद्भ्यः
प०—शरदः	शरद्भ्याम्	शरद्भ्यः
ष०—शरदः	शरदोः	शरदाम्
स०—शरदि	शरदोः	शरत्सु

इसी प्रकार—दृषद्, दरद् आदि०।

(१३) धकारान्त स्त्रीलिङ्ग क्षुध् शब्द

प्र०—क्षुत्	क्षुधौ	क्षुधः
द्वि०—क्षुधम्	क्षुधौ	क्षुधः
तृ०—क्षुधा	क्षुद्भ्याम्	क्षुद्भिः
च०—क्षुधे	क्षुद्भ्याम्	क्षुद्भ्यः
प०—क्षुधः	क्षुद्भ्याम्	क्षुद्भ्यः
ष०—क्षुधः	क्षुधोः	क्षुधाम्
स०—क्षुधि	क्षुधोः	क्षुत्सु

इसी प्रकार—समिध्, युध् आदि०।

(१४) चकारान्त स्त्रीलिङ्ग वाच् शब्द

प्र०—वाक्	वाचौ	वाचः
द्वि०—वाचम्	वाचौ	वाचः
तृ०—वाचा	वाग्भ्याम्	वाग्भिः
च०—वाचे	वाग्भ्याम्	वाग्भ्यः
प०—वाचः	वाग्भ्याम्	वाग्भ्यः
ष०—वाचः	वाचोः	वाचाम्
स०—वाचि	वाचोः	वाक्षु

इसी प्रकार—शुच्, स्फिच् आदि०।

(१५) जकारान्त स्त्रीलिङ्ग स्रज् शब्द

प्र०—स्रक्	स्रजौ	स्रजः
द्वि०—स्रजम्	स्रजौ	स्रजः
तृ०—स्रजा	स्रग्भ्याम्	स्रग्भिः
च०—स्रजे	स्रग्भ्याम्	स्रग्भ्यः
प०—स्रजः	स्रग्भ्याम्	स्रग्भ्यः
ष०—स्रजः	स्रजोः	स्रजाम्
स०—स्रजि	स्रजोः	स्रक्षु

इसी प्रकार—ऋत्विज्, सुयुज्, ऊर्ज् आदि०।

(१६) शकारान्त स्त्रीलिङ्ग दिश् शब्द

प्र०—दिक्	दिशौ	दिशः
द्वि०—दिशम्	दिशौ	दिशः
तृ०—दिशा	दिग्भ्याम्	दिग्भिः
च०—दिशे	दिग्भ्याम्	दिग्भ्यः
प०—दिशः	दिग्भ्याम्	दिग्भ्यः

ष०—दिशः	दिशोः	दिशाम्
स०—दिशि	दिशोः	दिक्षु

इसी प्रकार—दृश् (स्त्री०) तथा घृतस्पृश्, तादृश्, यादृश्, ईदृश्, एतादृश्, मादृश्, त्वादृश्, भवादृश् आदि पु० स्त्री०।

(१७) षकारान्त स्त्रीलिङ्ग प्रावृष् शब्द

प्र०—प्रावृट्	प्रावृषौ	प्रावृषः
द्वि०—प्रावृषम्	प्रावृषौ	प्रावृषः
तृ०—प्रावृषा	प्रावृड्भ्याम्	प्रावृड्भिः
च०—प्रावृषे	प्रावृड्भ्याम्	प्रावृड्भ्यः
प०—प्रावृषः	प्रावृड्भ्याम्	प्रावृड्भ्यः
ष०—प्रावृषः	प्रावृषोः	प्रावृषाम्
स०—प्रावृषि	प्रावृषोः	प्रावृट्सु

इसी प्रकार—त्विष् (स्त्री०), द्विष् (पु०, स्त्री०), रत्नमुष् (पु०, स्त्री०), शेमुषीजुष् (पु०, स्त्री०) आदि०।

(१८) औकारान्त स्त्रीलिङ्ग नौ शब्द

प्र०—नौः	नावौ	नावः
द्वि०—नावम्	नावौ	नावः
तृ०—नावा	नौभ्याम्	नौभिः
च०—नावे	नौभ्याम्	नौभ्यः
प०—नावः	नौभ्याम्	नौभ्यः
ष०—नावः	नावोः	नावाम्
स०—नावि	नावोः	नौषु

(१९) हकारान्त स्त्रीलिङ्ग उपानह् शब्द

प्र०—उपानत्	उपानहौ	उपानहः
द्वि—उपानहम्	उपानहौ	उपानहः
तृ०—उपानहा	उपानद्भ्याम्	उपानद्भिः
च०—उपानहे	उपानद्भ्याम्	उपानद्भ्यः
प०—उपानहः	उपानद्भ्याम्	उपानद्भ्यः
ष०—उपानहः	उपानहोः	उपानहाम्
स०—उपानहि	उपानहोः	उपानत्सु

(२०) रेफान्त स्त्रीलिङ्ग गिर् शब्द

प्र०—गीः	गिरौ	गिरः
द्वि०—गिरम्	गिरौ	गिरः
तृ०—गिरा	गीर्भ्याम्	गीर्भिः
च०—गिरे	गीर्भ्याम्	गीर्भ्यः
प०—गिरः	गीर्भ्याम्	गीर्भ्यः
ष०—गिरः	गिरोः	गिराम्
स०—गिरि	गिरोः	गीर्षु

(२१) रेफान्त स्त्रीलिङ्ग पुर् शब्द

प्र०—पूः	पुरौ	पुरः
द्वि०—पुरम्	पुरौ	पुरः
तृ०—पुरा	पूर्भ्याम्	पूर्भिः
च०—पुरे	पूर्भ्याम्	पूर्भ्यः
प०—पुरः	पूर्भ्याम्	पूर्भ्यः
ष०—पुरः	पुरोः	पुराम्
स०—पुरि	पुरोः	पूर्षु

इसी प्रकार—धुर् (धूः), मुर् (मूः) आदि०।

अभ्यास

१. उस गौ का क्या किया जाय, जो न बच्चे देती है और न दूध।
'किं तया क्रियते धेन्वा या न सूते न दुग्धदा'।

२. भारत की स्त्रियाँ, यूरोप की स्त्रियों से, अधिक लज्जाशील हैं।
भारतीयाः स्त्रियः हरिवर्षीयाभ्यः नारीभ्यः अधिकं लज्जन्ते।

३. हे ऋत्विजो! आप दोनों माला धारण करो और मन्त्र बोलो।

हे ऋत्विजौ ! युवां स्रजौ धारयतम् मन्त्रान् च उच्चारयतम् ।

४. इन दोनों सेनाओं में राजपूत सेना बलवती है ।
एतयोः चम्वोः राजपुत्रचमूः बलीयसी (बलवत्तरा) खलु ।

५. सत्य का पक्ष लेना बुद्धियों का स्वभाव है ।
सत्यपक्षपातो हि धियां स्वभावः ।

६. बुद्धिमानों के लिए कुछ भी असाध्य नहीं है ।
न किमपि असाध्यं कृतधियाम् ।

७. सुबह रक्षाबन्धन है, सब बहिनें भाइयों के हाथों पर राखी बाँधेंगी ।
प्रातः (=कल्ये) रक्षाबन्धनपर्व वर्त्तिता, सर्वाः स्वसारः भ्रातृणां हस्तेषु रक्षासूत्राणि बद्धारः ।

८. भानजे भी मामों से रुपये मांगेंगे ।
स्वस्रीयाः (भागिनेयाः) अपि मातुलान् रूप्यकाणि याचितारः (याचिष्यन्ते, याचिष्यन्ति) ।

९. जो मनुष्य का जन्म पाकर भी अच्छे कार्य नहीं करते वे पृथ्वी पर भार हैं ।
ये मानुषं जन्म प्राप्यापि शुभानि कार्याणि न अनुतिष्ठन्ति ते भुवि भारभूताः सन्ति ।

१०. इस पवित्र भारत भूमि पर धूर्त्तों का क्या काम ?
अस्यां पूतायां भारतभुवि किं प्रयोजनं धूर्त्तैः ?

११. इस तेरी मीठी वाणी से मैं बहुत प्रसन्न हूं ।
अनया ते मधुरया वाचा (गिरा) अतिप्रीतः अस्मि (नितरां प्रसीदामि) ।

१२. आज तो भूखा मर रहा हूं = अद्य तु क्षुधा म्रिये ।

१३. शरद् ऋतु में मुझे खीर बहुत अच्छी लगती है ।
शरदि मह्यं पायसान्नं बहु रोचते ।

१४. शरद् पूर्णिमा पर खीर खाने से बहुत रोग नष्ट होते हैं ।
शारद्यां पौर्णमास्यां पायसान्नभक्षणेन बहवः रोगाः विनिवर्त्तन्ते ।

१५. इस दिशा में जाने से तेरी कार्यसिद्धि होगी ।
अस्यां दिशि गमनेन ते कार्यसिद्धिः भविष्यति (भविता) ।

१६. कभी नाव गाड़ी पर और कभी गाड़ी नाव पर ।
कदाचित् शकटः नावं वहति, कदाचित् च नौः शकटं वहति ।

१७. यह वर्षा ऋतु धन्य है, जिसमें गरम-गरम पक्वान्न सबको अच्छे लगते हैं ।
धन्या इयं प्रावृट् यस्यां प्रावृषि उष्णोष्णानि पक्वान्नानि सर्वेभ्यः रोचन्ते ।

१८. इस नगरी में जूतों की पच्चीस दूकानें हैं ।
अस्यां पुरि उपानहां पञ्चविंशतिः आपणाः सन्ति ।

१९. ब्रह्मचारियों को नगर से दूर रहना चाहिये और जूते नहीं पहनने चाहियें।
ब्रह्मचारिणः पुरः दूरं वसेयुः उपानहौ च न धारयेयुः।

२०. मेरी रुचि के लिये माता का भोजन मत बिगाड़।
मम रुच्याः (रुचेः) कृते मातुः भोजनं मा विकार्षीः (मा स्म विकरोः)।

२१. इस नदी में उस परिवार की लड़कियां, बहुएँ, ननदें, और जेठानियां तथा देरानियाँ सब नहायेंगी।
अस्यां सरिति तस्य परिवारस्य दुहितरः, वध्वः, ननान्दरः, यातरः च स्नास्यन्ति (स्नातारः)।

नपुंसकलिङ्ग शब्द

(१) अकारान्त नपुंसकलिङ्ग ज्ञान शब्द

प्र०—ज्ञानम्	ज्ञाने	ज्ञानानि
द्वि०—ज्ञानम्	ज्ञाने	ज्ञानानि

शेष सब विभक्तियों में 'राम' शब्द के समान।

सम्बो० प्र०—हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

इसी प्रकार—मित्र (सखा), फल, घृत, नगर, जल, दुग्ध आदि०!

(२) इकारान्त नपुंसकलिङ्ग वारि शब्द

प्र०—वारि	वारिणी	वारीणि
द्वि०—वारि	वारिणी	वारीणि
तृ०—वारिणा	वारिभ्याम्	वारिभिः
च०—वारिणे	वारिभ्याम्	वारिभ्यः
प०—वारिणः	वारिभ्याम्	वारिभ्यः
ष०—वारिणः	वारिणोः	वारीणाम्
स०—वारिणि	वारिणोः	वारिषु
सं. प्र.—हे वारे, वारि	हे वारिणी	हे वारीणि

(३) इकारान्त नपुंसकलिङ्ग दधि शब्द

प्र०—दधि	दधिनी	दधीनि
द्वि—दधि	दधिनी	दधीनि
तृ०—दध्ना	दधिभ्याम्	दधिभिः
च०—दध्ने	दधिभ्याम्	दधिभ्यः
प०—दध्नः	दधिभ्याम्	दधिभ्यः
ष०—दध्नः	दध्नोः	दध्नाम्
स०—दध्नि	दध्नोः	दधिषु
सं. प्र.—हे दधे (दधि)	हे दधिनी	हे दधीनि

इसी प्रकार—अस्थि, सक्थि, अक्षि।

(४) उकारान्त नपुंसकलिङ्ग मधु शब्द

प्र०—मधु	मधुनी	मधूनि
द्वि०—मधु	मधुनी	मधूनि
तृ०—मधुना	मधुभ्याम्	मधुभिः
च०—मधुने	मधुभ्याम्	मधुभ्यः
प०—मधुनः	मधुभ्याम्	मधुभ्यः
ष०—मधुनः	मधुनोः	मधूनाम्
स०—मधुनि	मधुनोः	मधुषु
सं प्र.—हे मधो (मधु)	हे मधुनी	हे मधूनि

इसी प्रकार—जतु, वस्तु, जानु, अश्रु।

(५) तकारान्त नपुंसकलिङ्ग जगत् शब्द

प्र०—जगत्	जगती	जगन्ति
द्वि०—जगत्	जगती	जगन्ति
तृ०—जगता	जगद्भ्याम्	जगद्भिः
च०—जगते	जगद्भ्याम्	जगद्भ्यः
प०—जगतः	जगद्भ्याम्	जगद्भ्यः
ष०—जगतः	जगतोः	जगताम्

स०—जगति	जगतोः	जगत्सु
सं. प्र.—हे जगत्	हे जगती	हे जगन्ति

(६) नकारान्त नपुंसकलिङ्ग वर्मन्[1] शब्द

प्र०—वर्म	वर्मणी	वर्माणि
द्वि०—वर्म	वर्मणी	वर्माणि
तृ०—वर्मणा	वर्मभ्याम्	वर्मभिः
च०—वर्मणे	वर्मभ्याम्	वर्मभ्यः
प०—वर्मणः	वर्मभ्याम्	वर्मभ्यः
ष०—वर्मणः	वर्मणोः	वर्मणाम्
स०—वर्मणि	वर्मणोः	वर्मसु
सं० प्र०—हे वर्मन्[2] / हे वर्म	हे वर्मणी	हे वर्माणि

इसी प्रकार—कर्मन्, चर्मन्, जन्मन् आदि०।

(७) नकारान्त नपुंसकलिङ्ग नामन् शब्द

प्र०—नाम	नामनी (नाम्नी)	नामानि
द्वि०—नाम	नामनी (नाम्नी)	नामानि
तृ०—नाम्ना	नामभ्याम्	नामभिः
च०—नाम्ने	नामभ्याम्	नामभ्यः
प०—नाम्नः	नामभ्याम्	नामभ्यः
ष०—नाम्नः	नाम्नोः	नाम्नाम्
स०—नामनि (नाम्नि)	नाम्नोः	नामसु
सं. प्र.—हे नामन् / हे नाम	हे नामनी / हे नाम्नी	हे नामानि

इसी प्रकार—लोमन्, व्योमन्, प्रेमन् आदि०।

नामन्, कर्मन्, वर्मन्, आदि नकारान्त नपुंसकलिङ्ग शब्द जब किसी पुँल्लिङ्ग बहुव्रीहि के अन्त्य अवयव होते हैं तो उस शब्द के रूप 'आत्मन्' के समान चलते हैं, जैसे—दृढवर्मा (=दृढं वर्म यस्य सः), कुकर्मा (=कुत्सितानि कर्माणि यस्य सः), द्विकर्मा (=द्वे कर्मणी यस्य धातोः, सः), अग्रजन्मा (अग्रे जन्म यस्य सः), देवेन्द्रनामा (देवेन्द्रः नाम यस्य सः)

(८) इन् (प्रत्यय–) अन्त नपुंसकलिङ्ग मनोहारिन् शब्द

प्र०—मनोहारि	मनोहारिणी	मनोहारीणि
द्वि०—मनोहारि	मनोहारिणी	मनोहारीणि

तृतीयादि विभक्तियों में सब रूप 'करिन् के समान चलेंगे।

(९) सकारान्त नपुंसकलिङ्ग पयस् शब्द

प्र०—पयः	पयसी	पयांसि
द्वि०—पयः	पयसी	पयांसि

तृतीयादि विभक्तियों में 'पयसा पयोभ्याम् पयोभिः' आदि रूप चन्द्रमस् शब्द के समान होंगे।

इसी प्रकार—यशस्, वचस्, मनस्, वयस्, तेजस् आदि०।

पयस्, तेजस् आदि सान्त नपुंसक० शब्द जब किसी पुँल्लिङ्ग बहुव्रीहि के अन्त्य अवयव होंगे तब उस शब्द के रूप सब विभक्तियों में 'चन्द्रमस्' के समान

---

१. कवचवाची 'वर्मन्' शब्द नपुंसक० है। क्षत्रियवाची 'वर्मन्' शब्द पुंल्लिङ्ग है उसके रूप 'आत्मन्' के समान चलेंगे।

२. यद्यपि 'न ङिसम्बुद्धयोः' (अष्टा. ८.२.८) से सम्बोधन की प्रथमा के एकवचन में न् के लोप का प्रतिषेध है तथापि 'वा नपुंसकानामिति वक्तव्यम्' वार्तिक से न् लोप में विकल्प हो जाता है।

चलेंगे। यथा—महत् मनः यस्य सः 'महामनाः', उदाराणि चेतांसि येषां ते 'उदारचेतसः', महत् तमः यस्मिन् सः 'महातमाः' पन्थाः, निर्गतं तेजः यस्मात् सः 'निस्तेजाः' आदि।

(१०) सकारान्त नपुंसकलिङ्ग धनुस् शब्द

प्र०—धनुः	धनुषी	धनूंषि
द्वि०—धनुः	धनुषी	धनूंषि
तृ०—धनुषा	धनुर्भ्याम्	धनुर्भिः
च०—धनुषे	धनुर्भ्याम्	धनुर्भ्यः
प०—धनुषः	धनुर्भ्याम्	धनुर्भ्यः
ष०—धनुषः	धनुषोः	धनुषाम्
स०—धनुषि	धनुषोः	धनुष्षु
सं० प्र०—हे धनुः	हे धनुषी	हे धनूंषि

इसी प्रकार—आयुस्, चक्षुस्, हविस्, अर्चिस् आदि०।

ओकारान्त उभयलिङ्ग (पुं०, स्त्री०)

गौ शब्द

प्र०—गौः	गावौ	गावः
द्वि०—गाम्	गावौ	गाः
तृ०—गवा	गोभ्याम्	गोभिः
च०—गवे	गोभ्याम्	गोभ्यः
प०—गोः	गोभ्याम्	गोभ्यः
ष०—गोः	गवोः	गवाम्
स०—गवि	गवोः	गोषु
सं० प्र०—हे गौः	हे गावौ	हे गावः

इसी प्रकार—ओकारान्त स्त्रीलिङ्ग द्यो शब्द के रूप बनेंगे।

तीनों लिङ्गों में समान युष्मद् शब्द

प्र०—त्वम्	युवाम्	यूयम्
द्वि०—त्वाम्(त्वा)	युवाम्(वाम्)	युष्मान्(वः)
तृ०—त्वया	युवाभ्याम्	युष्माभिः
च०—तुभ्यम्(ते)	युवाभ्याम्(वाम्)	युष्मभ्यम् (वः)
प०—त्वत्	युवाभ्याम्	युष्मत्
ष०—तव(ते)	युवयोः (वाम्)	युष्माकम्(वः)
स०—त्वयि	युवयोः	युष्मासु

तीनों लिङ्गों में समान अस्मद् शब्द

प्र०—अहम्	आवाम्	वयम्
द्वि०—माम्(मा)	आवाम्(नौ)	अस्मान्(नः)
तृ०—मया	आवाभ्याम्	अस्माभिः
च०—मह्यम्(मे)	आवाभ्याम् (नौ)	अस्मभ्यम् (नः)
प०—मत्	आवाभ्याम्	अस्मत्
ष०—मम(मे)	आवयोः(नौ)	अस्माकम्(नः)
स०—मयि	आवयोः	अस्मासु

तीनों लिङ्गों में समान कति शब्द

कति शब्द केवल बहुवचनान्त ही प्रयुक्त होता है, यथा—कति पुरुषाः, कति कन्याः, कति फलानि।

	पुंल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	कति	कति	कति
द्वि०	कति	कति	कति
तृ०	कतिभिः	कतिभिः	कतिभिः
च०	कतिभ्यः	कतिभ्यः	कतिभ्यः
प०	कतिभ्यः	कतिभ्यः	कतिभ्यः
ष०	कतीनाम्	कतीनाम्	कतीनाम्
स०	कतिषु	कतिषु	कतिषु
प्र० सं०	हे कति	हे कति	हे कति

नित्यबहुवचनान्त स्त्रीलिङ्ग अप् शब्द

प्र०—	आपः
द्वि०—	अपः

तृ०—	अद्भिः
च०—	अद्भ्यः
प०—	अद्भ्यः
ष०—	अपाम्
स०—	अप्सु

संख्यावाची एकवचनान्त सर्वनाम एक शब्द

	पुंल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	एकः	एका	एकम्
द्वि०	एकम्	एकाम्	एकम्
तृ०	एकेन	एकया	एकेन
च०	एकस्मै	एकस्यै	एकस्मै
प०	एकस्मात्	एकस्याः	एकस्मात्
ष०	एकस्य	एकस्याः	एकस्य
स०	एकस्मिन्	एकस्याम्	एकस्मिन्

'एक' शब्द का प्रयोग जहाँ बहुवचनान्त दृष्टिगोचर होता है वहाँ इसका अर्थ 'कुछ' (=कतिपय) होता है—यथा 'एकेषां वैयाकरणानाम् इदं मतम्'—कुछ वैयाकरणों का यह मत है।

	पुंल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	एके	एकाः	एकानि
द्वि०	एकान्	एकाः	एकानि
तृ०	एकैः	एकाभिः	एकैः
च०	एकेभ्यः	एकाभ्यः	एकेभ्यः
प०	एकेभ्यः	एकाभ्यः	एकेभ्यः
ष०	एकेषाम्	एकासाम्	एकेषाम्
स०	एकेषु	एकासु	एकेषु

जब 'एक' से पहिले अन् (नञ्+नुट्) लगाते हैं और उसका बहुवचनान्त प्रयोग होता है। तब 'अनेके' का अर्थ 'बहुत से' होता है—यथा→'अनेके नैरुक्ताः एवं वदन्ति'—बहुत से निरुक्तकार ऐसा कहते हैं। 'अनेकेषाम् इदं मतम्'—बहुतों का यह मत है। 'अनेकैः धनिकैः अनेकेभ्यः निर्धनेभ्यः अनेकाः शाटिकाः अनेकानि पात्राणि च ददिरे'—बहुत से धनवानों ने बहुत से गरीबों को बहुत सी धोतियाँ और बहुत से बरतन दिये।

असहायवाची 'एक' शब्द के तीनों वचनों में रूप चलेंगे।

इकारान्त नित्यद्विवचनान्त सर्वनाम द्वि शब्द

	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	द्वौ	द्वे	द्वे
द्वि०	द्वौ	द्वे	द्वे
तृ०	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
च०	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
प०	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
ष०	द्वयोः	द्वयोः	द्वयोः
स०	द्वयोः	द्वयोः	द्वयोः

इकारान्त नित्यबहुवचनान्त त्रि शब्द

	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	त्रयः	तिस्रः	त्रीणि
द्वि०	त्रीन्	तिस्रः	त्रीणि
तृ०	त्रिभिः	तिसृभिः	त्रिभिः
च०	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
प०	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
ष०	त्रयाणाम्	तिसृणाम्	त्रयाणाम्
स०	त्रिषु	तिसृषु	त्रिषु

रेफान्त नित्यबहुवचनान्त चतुर् शब्द

	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्र०	चत्वारः	चतस्रः	चत्वारि
द्वि०	चतुरः	चतस्रः	चत्वारि
तृ०	चतुर्भिः	चतसृभिः	चतुर्भिः

	पुंल्लिङ्ग	स्त्रीलिङ्ग	नपुं०		पुंल्लिङ्ग	स्त्रीलिङ्ग	नपुं०
च०	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	ष०	चतुर्णाम्	चतसृणाम्	चतुर्णाम्
प०	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	स०	चतुर्षु	चतसृषु	चतुर्षु

पञ्चन्, षष्, सप्तन्, अष्टन्, नवन्, दशन् तथा एकादशन् से लेकर नवदशन् तक के संख्यावाची शब्दों के रूप नित्य बहुबचनान्त ही होते हैं और तीनों लिङ्गों में एक से ही रहते हैं।

	पञ्चन्	षष्	सप्तन्	अष्टन्	नवन्	दशन्	एकादशन्
प्र०	पञ्च	षट्	सप्त	अष्टौ (अष्ट)	नव	दश	एकादश
द्वि०	पञ्च	षट्	सप्त	अष्टौ (")	नव	दश	एकादश
तृ०	पञ्चभिः	षड्भिः	सप्तभिः	अष्टाभिः / अष्टभिः	नवभिः	दशभिः	एकादशभिः
च०	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः / अष्टभ्यः	नवभ्यः	दशभ्यः	एकादशभ्यः
प०	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः / अष्टभ्यः	नवभ्यः	दशभ्यः	एकादशभ्यः
ष०	पञ्चानाम्	षण्णाम्	सप्तानाम्	अष्टानाम्	नवानाम्	दशानाम्	एकादशानाम्
स०	पञ्चसु	षट्सु	सप्तसु	अष्टासु (अष्टसु)	नवसु	दशसु	एकादशसु

इसी प्रकार—द्वादशन् आदि के रूप चलेंगे। एकोनविंशति, विंशति आदि संख्यावाची शब्दों का विषय आगे समझायेंगे।

अभ्यास

१. आज दही के साथ चावल खाने की इच्छा है।
अद्य दध्ना सह ओदनान् भोक्तुम् इच्छामि।

२. भोजन के बाद पानी पीना जहर के समान है=भोजनान्ते विषं वारि।

३. मनुष्य जठराग्नि को बढ़ाने के लिए बार-बार थोड़ी मात्रा में पानी पीवे।
'तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि।'

४. तेरे लिये मैं बढ़िया शहद लाया हूं।
तुभ्यम् अहम् उत्तमं मधु आनैषम् (आनैषि)।

५. इन वस्तुओं को जोड़ने के लिए लाख के टुकड़े ला।
एतेषां वस्तूनां योजनाय जतुनः शकलानि आहर।

६. दिलीप धनुष से गाय की रक्षा न कर सका।
दिलीपः धनुषा गां रक्षितुं न शशाक।

७. बड़े-बड़े काम करने वालों के नाम जगत् में प्रसिद्ध हो जाते हैं।
महतां कर्मणां कर्तृणां नामानि जगति प्रथितानि (विख्यातानि) भवन्ति।

८. क्षत्रिय लोग युद्ध में कवच धारण करते हैं।
वर्माणः युधि वर्माणि प्रतिमुञ्चन्ति ।

९. गाय के दूध में पीलापन होता है=गोः पयसि पीतिमा भवति ।

१०. उषा के लिये पांच फल, चार साड़ियां, तीन लड्डू और दो कपड़े ले आ।
उषायै पञ्च फलानि, चतस्रः शाटिकाः, त्रीन् मोदकान्, द्वौ पटौ च आनय ।

११. हमसे बिछुड़ कर आप कहाँ गये थे ?=अस्मद् वियुज्य भवान् क्व अयासीत् ?

प्रत्यय-प्रकरण

धातुओं से होने वाले प्रत्यय

अब हम प्रत्ययों के विषय में थोड़ा सा समझाते हैं। प्रत्यय मुख्य रूप से दो प्रकार के हैं। १-धातु से लगने वाले तथा २—शब्द (=प्रातिपदिक, ङ्यन्त और आबन्त) से लगने वाले। धातु से होने वाले प्रत्ययों में से कुछ प्रत्यय ऐसे होते हैं, जिनके लगने पर तदन्त की पुनः धातुसञ्ज्ञा होती है, जैसे—सन्, यङ्, णिच्, णिङ्, यक्, ईयङ् आदि। कुछ इस प्रकार के प्रत्यय हैं, जो धातु से अन्य प्रत्ययों के लगने पर, उन प्रत्ययों से पूर्व लगते हैं, जैसे—शप्, श्यन्, श्नु, श, श्नम्, उ, श्ना, अङ्, स्य, तास्, सिप्, आम्, च्लि, चिण् आदि; इन प्रत्ययों को विकरण कहते हैं। धातु से होने वाले लकार प्रत्ययों (=लट्, लिट् आदि) के स्थान पर जो तिप्, तस्, झि आदि प्रत्यय होते हैं, उन्हें तिङ् प्रत्यय कहते हैं। इन तीनों प्रकार के प्रत्ययों के अतिरिक्त जो प्रत्यय धातु से होते हैं, उन्हें 'कृत्-प्रत्यय' कहा जाता है। कृदतिङ् (अष्टा० ३.१.९३)। उन कृत्-प्रत्ययों में से कुछ मुख्य-मुख्य प्रत्ययों का बोध कराते हैं।

कृत्-प्रत्यय

क्विन्, कञ्, क्स

त्यदादि (=त्यद्, तद्, यद्, एतद्, इदम्, युष्मद्, अस्मद्, भवतु, किम्) और समान तथा अन्य इन शब्दों के उपपद में रहने पर अर्थात् पूर्व में साथ लगे रहने पर दृश् (=दृशिर्) धातु से क्विन्, कञ्, तथा क्स ये तीन प्रत्यय, तुल्य अर्थ में होते हैं।[1] क्विन् के क् की इत्सञ्ज्ञा[2] इ की इत्सञ्ज्ञा[3] और न् की इत्सञ्ज्ञा[4] तथा लोप होने पर केवल व् बचा रहता है। उस व् का भी लोप[5] हो जाने पर अर्थात् सर्वापहार लोप हो जाने पर प्रत्यय का कोई अंश शेष नहीं रहता तब अन्त में दृश् रहता है; श् को क् होगा[6]। प्रत्यय के लोप हो जाने पर भी उसके कित्त्व, नित्त्व आदि धर्म पूर्व धातु को प्रभावित करते हैं और गुणवृद्धिनिषेध[7] तथा आद्युदात्तत्व[8] आदि

---

१. त्यदादिषु दृशोऽनालोचने कञ् च (अष्टा.३.२.६०)। 'समानान्ययोश्चेति वक्तव्यम्' (वार्तिक)। 'दृशेः क्सश्च वक्तव्यः' (वार्तिक)। २. लशक्वतद्धिते (अष्टा.१.३.८)
३. उपदेशेऽजनुनासिक इत् (अष्टा.१.३.२) ४. हलन्त्यम् (अष्टा.१.३.३)
५. वेरपृक्तस्य (अष्टा.६.१.६७) ६. क्विन्प्रत्ययस्य कुः (अष्टा.८.२.६२)
७. क्ङिति च (अष्टा.१.१.५) ८. ञ्नित्यादिर्नित्यम् (अष्टा. ६.१.१९७)

कार्यों में कारण बनते हैं। कञ् प्रत्यय के क् की और ञ् की इत्सञ्ज्ञा तथा लोप हो जाने पर 'अ' शेष रहता है, जो कि दृश् के श् से मिल जाता है और 'दृश' ऐसा रूप रहता है। 'क्स' प्रत्यय के क् की इत्सञ्ज्ञा और लोप होने पर 'स' शेष रहता है। तब 'दृश्' के श् को क्रमशः[1] क् हो जाता है और प्रत्यय के स को ष[2]; फलतः दृक्ष='दृक्ष' स्वरूप बचता है। उपर्युक्त तीनों प्रत्ययों सहित दृश् (दृश्, दृश, दृक्ष) परे रहने पर पूर्व के त्यद् आदि (इदम् और किम् को छोड़कर) शब्दों के अन्त्य व्यञ्जन द्, त् के स्थान पर 'आ' आदेश होता है।[3] इदम् पूरे के स्थान पर ई और किम् पूरे के स्थान पर की आदेश हो जाता है।[4] 'समान' पूरे के स्थान पर 'स' आदेश होता है।[5] एकत्व में युष्मद् के युष्म के स्थान पर त्व तथा अस्मद् के अस्म के स्थान पर म आदेश होता है।[6]

उपपद+धातु	+क्विन्	+कञ्	+क्स	हिन्दी में अर्थ
त्यद्+दृश्	त्यादृक्	त्यादृशः	त्यादृक्षः	वैसा
तद्+दृश्	तादृक्	तादृशः	तादृक्षः	वैसा
यद्+दृश्	यादृक्	यादृशः	यादृक्षः	जैसा
एतद्+दृश्	एतादृक्	एतादृशः	एतादृक्षः	ऐसा
इदम्+दृश्	ईदृक्	ईदृशः	ईदृक्षः	ऐसा
युष्मद्+दृश्	त्वादृक् युष्मादृक्	त्वादृशः युष्मादृशः	त्वादृक्षः युष्मादृक्षः	तेरे जैसा तुम्हारे जैसा
अस्मद्+दृश्	मादृक् अस्मादृक्	मादृशः अस्मादृशः	मादृक्षः अस्मादृक्षः	मेरे जैसा हमारे जैसा
भवत्+दृश्	भवादृक्	भवादृशः	भवादृक्षः	आप जैसा
किम्+दृश्	कीदृक्	कीदृशः	कीदृक्षः	कैसा
समान+दृश्	सदृक्	सदृशः	सदृक्षः	समान (तुल्य)
अन्य+दृश्	अन्यादृक्	अन्यादृशः	अन्यादृक्षः	दूसरे जैसा

---

१. 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः' (अष्टा.८.२.३६) से श् को ष् तथा 'षढोः कः सि' (अष्टा.८.२.४१) से ष् को क्।

२. आदेशप्रत्यययोः (अष्टा.८.३.५९)

३. आ सर्वनाम्नः (अष्टा.६.३.९१)। 'दृक्षे चेति वक्तव्यम्' (वार्त्तिक)।

४. इदंकिमोरीश्की (अष्टा.६.३.९०)

५. दृग्दृशवतुषु (अष्टा.६.३.८९)। 'दृक्षे चेति वक्तव्यम्' (वार्त्तिक)।

६. प्रत्ययोत्तरपदयोश्च (अष्टा.७.२.९८).

ये विशेषण शब्द हैं और तीनों लिङ्गों में इनके रूप चलते हैं। ऊपर के ये सब रूप पुंल्लिङ्ग के हैं। इनमें से त्यादृक्, तादृक् आदि के भूभृत् के समान और त्यादृशः, तादृशः तथा त्यादृक्षः, तादृक्षः आदि के राम के समान, अन्य विभक्तियों तथा वचनों में भी रूप चलेंगे। नपुंसकलिङ्ग में त्यादृक् आदि के 'त्यादृक् त्यादृशी त्यादृंशि' आदि शब्दरूप 'जगत्' शब्द के समान और त्यादृश, त्यादृक्ष आदि के 'त्यादृशं त्यादृशे त्यादृशानि', 'त्यादृक्षं त्यादृक्षे त्यादृक्षाणि' आदि 'ज्ञान' शब्द के समान चलेंगे। स्त्रीलिङ्ग में त्यादृक् आदि के 'शरद्' के समान और त्यादृश (=त्यादृशी) आदि के 'त्यादृशी त्यादृश्यौ त्यादृश्यः' आदि रूप 'गौरी' शब्द के समान तथा त्यादृक्ष (=त्यादृक्षा) आदि के 'त्यादृक्षा त्यादृक्षे त्यादृक्षाः' आदि 'रमा' शब्द के समान चलेंगे। नपुंसकलिङ्ग और स्त्रीलिङ्ग में भी इनके अर्थ पूर्ववत् होंगे; जैसे स्त्रीलिङ्ग में त्यादृशी=वैसी, कीदृशी=कैसी; यादृक्षा=जैसी, ईदृक्षा=ऐसी आदि।

अभ्यास

१. आप जैसे पण्डित तो कहीं कहीं मिलते हैं।
भवादृशः (भवादृशाः, भवादृक्षाः) पण्डितास्तु क्वचिद् एव लभ्यन्ते।

२. जैसी सत्यवान् की स्त्री सावित्री थी, वैसी स्त्री मिलना कठिन है।
यादृक् (यादृशी, यादृक्षा) सत्यवतः स्त्री सावित्री बभूव, तादृक् (तादृशी, तादृक्षा) स्त्री दुर्लभा खलु।

३. जैसे कार्य तू कर सकता है, वैसे कोई दूसरा नहीं कर सकता।
यादृंशि (यादृशानि, यादृक्षाणि) कर्माणि त्वं कर्त्तुं शक्नोषि, न तादृंशि (तादृशानि, तादृक्षाणि) कश्चिद् अन्यः कर्त्तुं शक्नोति।

४. जैसी तेरी पण्डिताई है, वैसी मेरे गुरु जी की दसगुनी है।
यादृक् (यादृशं, यादृक्षं) तव पाण्डित्यम् अस्ति, तादृक् (तादृशं, तादृक्षं) मम गुरोः दशगुणं खलु।

५. इतना क्यों रो रहा है? और कैसे आम लाऊँ तेरे लिये?
कथम् इत्थं रोदिषि? अन्यानि कीदृंशि (कीदृशानि, कीदृक्षाणि) आम्रफलानि आनयानि (आनयेयम्) तुभ्यम्।

६. इन दो लड़कियों में उषा पढ़ने में कैसी है?
एतयोः बालयोः उषा कीदृक् (कीदृशी, कीदृक्षा) पठने?

७. मेरे जैसों के लिये कोई रहस्य छिपा नहीं है।
मादृशां (मादृशानां, मादृक्षाणां) कृते नास्ति तिरोहितं किमपि रहस्यम्।

८. ऐसे सज्जन पुरुष किसी को नहीं ठगते।
एतादृशः (एतादृशाः, एतादृक्षाः) साधिष्ठाः जनाः न कमपि वञ्चयन्ति।

९. मेरे पास ऐसे आवश्यक कार्य बहुत हैं।
ईदृंशि (ईदृशानि, ईदृक्षाणि) भूयांसि अनतिक्रमणीयानि कार्याणि मां प्रत्यासीदन्ति ।

१०. वैसे मार्ग से जाइये, जिसमें किसी प्रकार का भय न हो।
त्यादृशा (त्यादृशेन, त्यादृक्षेण; तादृशा, तादृशेन, तादृक्षेण) पथा गच्छत यादृशि (यादृशे, यादृक्षे) कीदृक् (कीदृशं, कीदृक्षं) अपि भयं न स्यात् ।

११. जैसी शीतला देवी वैसी ही गधा सवारी (जैसे मुंह वैसे थप्पड़) ।
'यादृशी शीतला देवी तादृशो वाहनः खरः' ।

१२. तेरा जैसा भतीजा और मेरा जैसा चाचा दूसरा नहीं है।
त्वादृक् (त्वादृशः, त्वादृक्षः) भ्रातृजः मादृक् (मादृशः, मादृक्षः) च पितृव्यः अन्यः नास्ति ।

१३. हमारे जैसे छात्रों के लिये सस्ती पुस्तकें छापी जानी चाहियें।
अस्मादृशां (अस्मादृशानां, अस्मादृक्षाणां) छात्राणां कृते अल्पमूल्यानि पुस्तकानि मुद्राप्यन्ताम् ।

१४. आप जैसे विद्वान् ही भारत की शोभा हैं।
भवादृशः (भवादृशाः, भवादृक्षाः) विपश्चितः एव भारतस्य शोभाः सन्ति ।

१५. तुम जैसे लोगों ने ही सोने के गहनों में जड़ने योग्य मणियों को कतीर में फिट किया है।
युष्मादृशः (युष्मादृशाः, युष्मादृक्षाः) जनाः एव कनकभूषणसङ्ग्रहणोचितान् मणीन् त्रपुषि प्रत्यबध्नन् ।

१६. गावस्कर जैसे बल्लेबाज संसार में बहुत कम हैं।
गावस्करस्य (गावस्करेण) सदृशः (सदृशाः, सदृक्षाः) दण्डपट्टक्रीडकाः भुवि विरलाः सन्ति ।

१७. धोने पर तो ये कपड़े दूसरे से ही हो गये।
प्रक्षालितानि तु एतानि वस्त्राणि अन्यादृंशि (अन्यादृशानि, अन्यादृक्षाणि) एव समवर्त्तिषत ।

क्त्वा प्रत्यय

एक ही कर्त्ता के द्वारा अनवरत की जा रही दो क्रियाओं में से पूर्वकाल की क्रियावाली धातु से क्त्वा प्रत्यय होता है।[1] यथा—'देवेन्द्र नहा कर खाता है'

---

१. समानकर्त्तृकयोः पूर्वकाले (अष्टा० ३.४.२१)

यहाँ देवेन्द्र-कर्त्ता द्वारा दो क्रियाएँ—'नहाना और खाना' की जा रही हैं। इनमें से 'नहाना' पूर्वकाल की और 'खाना' उत्तरकाल की क्रिया है। पूर्वकाल की नहाना (=स्नान) क्रिया की स्ना धातु से क्त्वा प्रत्यय होगा—देवेन्द्रः स्नात्वा भक्षयति। यह क्त्वा प्रत्यय धातुमात्र से होता है। क्त्वा में से क् की इत्संज्ञा-लोप होने पर त्वा शेष रहता है। सेट् धातुओं से जब क्त्वा होता है तो त्वा (=क्त्वा) से पहिले इ (=इट्) हो जाता है[1] जैसे 'पठित्वा'। अनिट् धातुओं से त्वा (=क्त्वा) होने पर त्वा वैसा ही रहेगा जैसे 'स्नात्वा'।

निषेधवाची 'अलम्' और 'खलु' अव्यय यदि उपपद में होते हैं तो धातुमात्र से सामान्य रूप से (अर्थात् बिना पूर्वकाल या उत्तरकाल का विचार किये) क्त्वा (=त्वा) प्रत्यय होता है।[2] यथा—'अलं स्नात्वा=मत स्नान कर, 'अलं पठित्वा= मत पढ़', 'खलु पीत्वा=मत पी', 'खलु भुक्त्वा=मत खा' आदि। अथवा—'पीत्वा खलु, स्नात्वा अलम्' आदि के रूप में प्रयोग होगा तब भी वही निषेध अर्थ होगा। यदि सुशोभित करने के अर्थ में 'अलम्' अव्यय होगा, तब तो पूर्ववत् पूर्वकालवर्ती क्रिया के वाचक धातु से ही क्त्वा (=त्वा) प्रत्यय होगा और 'अलम्' की 'गति' सञ्ज्ञा होगी[3]। फलस्वरूप गतिसमास (तत्पुरुष का भेद) होगा।[4] समास होने के कारण त्वा (=क्त्वा) के स्थान पर ल्यप् (=य) हो जायेगा[5]। ल्यप् (=य) से पूर्व वाली धातु यदि ह्रस्व होगी तो उसके अन्त में त् (=तुक्) लग जायेगा[6]। 'अलङ्कृत्य मे गेहम् अनुगृह्णातु भवान् माम्'=मेरे घर को सुशोभित करके आप मुझे अनुगृहीत करें। उपसर्ग-पूर्वक धातु से क्त्वा होने पर भी पूर्ववत् समास होने पर क्त्वा के स्थान पर ल्यप् होगा[5]। धातु सेट् हो या अनिट्, त्वा के स्थान पर ल्यप् (=य) हो जाने पर इट् आगम नहीं होगा क्योंकि वल् प्रत्याहार में 'य' नहीं आता। पठित्वा, सम्पठ्य। स्नात्वा, प्रस्नाय। जित्वा, विजित्य। नञ् अव्यय यदि क्त्वा-प्रत्ययान्त शब्द के पूर्व में आयेगा तो त्वा के स्थान पर ल्यप् नहीं होगा[5]। पठित्वा=पढ़कर, अपठित्वा =बिना पढ़े। 'इदम् औषधं माम् अनुक्त्वा खलु भुक्त्वा'=यह दवाई मुझे बिना बताये मत खाना। क्त्वा-प्रत्ययान्त शब्द अव्यय हो जाते हैं[7]। अतः उनके रूप नहीं चलते। अब हम कुछ धातुओं के साथ क्त्वा प्रत्यय लगाकर उनका स्वरूप बताते हैं।

---

१. आर्धधातुकस्येड् वलादेः (अष्टा० ७.२.३५)
२. अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (अष्टा. ३.४.१८)
३ भूषणेऽलम् (अष्टा. १.४.६४)
४. कुगतिप्रादयः (अष्टा. २.२.१८)
५. समासे ऽनञ्पूर्वे क्त्वो ल्यप् (अष्टा. ७.१.३७)
६. ह्रस्वस्य पिति कृति तुक् (अष्टा. ६.१.७१)
७. क्त्वातोसुन्कसुनः (अष्टा. १.४.४०)

गम् + क्त्वा	= गत्वा	जाकर
नम् ,,	= नत्वा	प्रणाम करके
भृ ,,	= भृत्वा	भरकर (धारण पोषण करके)
भू ,,	= भूत्वा	होकर
यज् ,,	= इष्ट्वा	यज्ञ करके
पच् ,,	= पक्त्वा	पकाकर
पिष् ,,	= पिष्ट्वा	पीसकर
दृश् ,,	दृष्ट्वा	देखकर
घृष् ,,	घृष्ट्वा	घिसकर
दा ,,	दत्त्वा	देकर
हा ,,	हित्वा	छोड़कर
ज्ञा ,,	ज्ञात्वा	जानकर
स्ना ,,	स्नात्वा	नहाकर
स्था ,,	स्थित्वा	ठहरकर
श्रु ,,	श्रुत्वा	सुनकर
कृ ,,	कृत्वा	करके
बध् ,,	बद्ध्वा	बांधकर
बुध् ,,	बुद्ध्वा	जानकर
मुच् ,,	मुक्त्वा	छोड़कर
छिद् ,,	छित्त्वा	काटकर
भिद् ,,	भित्त्वा	फोड़कर
रुध् ,,	रुद्ध्वा	रोककर
स्वप् ,,	सुप्त्वा	सोकर
दह् + ,,	दग्ध्वा	जलाकर
लिह् ,,	लीढ्वा	चाटकर
वह् ,,	ऊढ्वा	ढोकर
वप् ,,	उप्त्वा	बोकर / काटकर
वच् ,,	उक्त्वा	कहकर
प्रच्छ् ,,	पृष्ट्वा	पूछकर
युध् ,,	युद्ध्वा	युद्ध करके
वस् ,,	उषित्वा	रहकर
खाद् ,,	खादित्वा	खाकर
लिख् ,,	लिखित्वा[1] / लेखित्वा	लिखकर
चल् ,,	चलित्वा	चलकर
भ्रम् ,,	भ्रमित्वा / भ्रान्त्वा	घूमकर
अट् ,,	अटित्वा	घूमकर
विद् ,,	विदित्वा	जानकर
रुद् ,,	रुदित्वा	रोकर
शी ,,	शयित्वा	सोकर
याच् ,,	याचित्वा	मांगकर
ग्रह् ,,	गृहीत्वा	लेकर
पठ् ,,	पठित्वा	पढ़कर
हस् ,,	हसित्वा	हसकर
चुर् ,,	चोरयित्वा	चुराकर
भक्ष् ,,	भक्षयित्वा	खाकर

अभ्यास

१. कार्य करके जल्दी आ = कार्य कृत्वा सत्वरम् आगच्छ ।

२. बिना कार्य किये कैसे आ गया = कथम् अकृत्वा कार्यम् आगमः (आगच्छः) ?

३. गुरुओं को प्रणाम करके पढ़ = गुरून् नत्वा पठ ।

४. गुरु को बिना प्रणाम किये क्यों पढ़ता है ? = कथम् अनत्वा गुरुं पठसि ?

---

१. रलो व्युपधाद्धलादेः संश्च (अष्टा. १.२.२६) से क्त्वा को विकल्प से किद्वद्भाव ।

५. आगे होकर पीछे हटना विजय का चिह्न नहीं है।
अग्रे भूत्वा पृष्ठतः गमनं न विजयलक्षणम्।

६. बिना पढ़े कोई विद्वान् नहीं बनता—अपठित्वा न कश्चिद् विपश्चित् जायते।

७. बदबू भरे स्थान पर मत जा—अलं गत्वा (खलु गत्वा) दुर्गन्धि-स्थलम्)।

८. देवेन्द्र कपूर बिना यज्ञ किये नहीं खाता।
देवेन्द्रकपूर-महोदयः अनिष्ट्वा न भुङ्क्ते।

९. हम बिना लड़े नहीं जीतेंगे।—न वयम् अयुद्ध्वा विजेष्यामहे।

१०. अधिक रोटी मत बना—अलं बहुरोटिकाः पक्त्वा।

११. पाठ सुनकर और उसका अर्थ जानकर फिर आगे बढ़ो।
पाठं श्रुत्वा तस्य अर्थं च विदित्वा पुनः अग्रे वर्धध्वम्।

१२. नारियल को फोड़कर, गिरी को काटकर इस पाक में डाल।
नारिकेलं भित्त्वा तद्गर्भं छित्त्वा अस्मिन् पाके पातय।

१३. यह भिक्षुक राहगीर को रोककर और उससे कुछ मांगकर ही संतुष्ट होता है।
अयं भिक्षुकः पथिकं रुद्ध्वा तं च किञ्चिद् याचित्वा एव सन्तुष्यति।

१४. महेन्द्र महीना भर मेरे घर में रहकर गया
महेन्द्रः मासं मे गेहे उषित्वा अगमत् (अगच्छत्)।

१५. सन्ध्या समय में मत सो—अलं सन्ध्यावेलायां सुप्त्वा।

१६. जागकर रात मत बिता—असुप्त्वा यामिनीं मा यीयपः (मा स्म यापयः)।

१७. वैराग्नि बिना कुलों को जलाये शांत नहीं होती।
वैराग्निः अदग्ध्वा कुलानि न शाम्यति।

१८. मुझसे बिना पूछे इस पेड़ को मत जलाना।
अपृष्ट्वा माम् अलम् इमम् अनोकहं दग्ध्वा।

१९. इस चटनी को बिना चाटे और बिना सूंघे इसके गुण कैसे बताऊँ?
अलीढ्वा अनाघ्राय च इमम् अवलेहं कथम् अस्य गुणान् वर्णयानि?

२०. भार वहन करके तू थक गया है, इन दुष्टों का भार मत उठा।
भारम् ऊढ्वा त्वं श्रान्तः असि, अलम् ऊढ्वा एषां खलानां भारम्।

२१. बिना बीज बोये फल कौन खाता है—अनुप्त्वा बीजानि कः फलम् अश्नाति।

२२. अधिष्ठाता जी से पूछकर बाहिर जाना, बिना पूछे जाने वाला दण्ड पाता है।
अधिष्ठातृमहोदयं पृष्ट्वा बहिर् गच्छ, अपृष्ट्वा गन्ता दण्डभाक् भवति।

२३. गन्दे सिनेमे देखकर मत बिगड़, इनको बिना देखे मर नहीं जायेगा।
दूषितानि चलचित्राणि दृष्ट्वा विकृतो मा भूः (मा स्म भवः), अदृष्ट्वा एतानि न मरिष्यसि (न मर्तासि)।

२४. मसाला पीसकर उसे घी में भूनकर शाक छौंक।
उपस्करं पिष्ट्वा तं सर्पिषि भृष्ट्वा शाकं भावय।

२५. नहाकर, चन्दन घिसकर, माथे पर लगा।
स्नात्वा, मलयजं घृष्ट्वा अलिके कलय तत्।

२६. कुछ लोग दान दिये बिना नहीं खाते।
केचन अदत्त्वा दानं न अश्नन्ति।

२७. नशेबाजों को दान मत दे=मादकिभ्यः अलं (खलु) दानं दत्त्वा।

२८ इस बालक को बहनोई के घर शीघ्र छोड़कर आ।
इमं बालकम् आवुत्तस्य गेहे हित्वा सत्वरम् आयाहि।

२९. काले घोड़ों को घुड़साल में बांधकर, दूब का गट्ठर ला ?
कृष्णान् तुरगान् मन्दुरायां बद्ध्वा, हरिताभारम् आनय ?

३०. चन्द्रिका अपने जूड़े में लाल फूल बिना बाँधे कैसे जायेगी ?
चन्द्रिका स्वचूडापाशे कुरवकम् अबद्ध्वा कथं यास्यति ?

३१. बोलने वाले के अभिप्राय को समझकर उत्तर दो ?
वक्तुः अभिप्रायं बुद्ध्वा उत्तरं देहि।

३२. बिना जाने जल में प्रवेश मत कर=खलु प्रविश्य जलम् अज्ञात्वा (मा प्रविक्षः)

३३. हम पांच दिन जयपुर ठहरकर भी बिना आमेर देखे लौट आये।
वयं पञ्च दिवसान् यावत् जयपुरे स्थित्वा अपि अदृष्ट्वैव आमेरं प्रत्यावर्त्तिष्महि।

३४. तरबूजे खाकर पानी पीने से हैजा हो जाता है।
सेटुफलानि भुक्त्वा जलपानेन विषूचिका जायते।

३५. तीन पत्र लिखकर, बकरी को छोड़कर बाजार जाऊँगा ?
त्रीणि पत्राणि लिखित्वा (लेखित्वा) अजां मुक्त्वा विपणिं यास्यामि।

३६. बिना चले, कोई एक स्थान से दूसरे स्थान पर नहीं जा सकता।
अचलित्वा कश्चिदपि स्थानात् स्थानान्तरं गन्तुं न शक्नोति।

३७. भोजन के बाद भ्रमण करके धातुपाठ याद कर।
भोजनानन्तरं भ्रमित्वा (भ्रान्त्वा) धातुपाठं स्मर।

३८. पृथ्वी का भ्रमण करके ही मनुष्य ज्ञान प्राप्त करता है।
अवनीम् अटित्वा एव मानवः ज्ञानम् आप्नोति।

३९. यदि हरे वृक्ष काटकर कोई स्वर्ग जाता है तो नरक कौन जायेगा।
यदि सरसान् पादपान् छित्त्वा कश्चित् स्वर्गं यास्यति तर्हि नरकं कः यास्यति ?

४०. बिना रोये मां से भी कोई दूध नहीं पाता।
अरुदित्वा कश्चित् मातुः सकाशात् अपि क्षीरं न विन्दते।

४१. गुरुकुल के लिये धन मांगकर कब तक काम चलाओगे ?
गुरुकुलाय धनं याचित्वा कियत्कालावधि कार्यं साधयिष्यथ ?

४१. पराया धन मत ले—अलं (खलु) परवित्तं गृहीत्वा ।

४३. मन को रोककर संयम का अभ्यास कर—मनः रुद्ध्वा संयमं शीलय ।

४४. पंखे के नीचे सोकर देख, मच्छर बिल्कुल नहीं खायेंगे ?
विद्युद्व्यजनस्य नीचैः शयित्वा अनुभव, मशकाः न दङ्क्ष्यन्ति ।

४५. फोक को छोड़कर सार भाग को ग्रहण करना चाहिये ?
'सारं ततो ग्राह्यम् अपास्य फल्गु' ?

४६. इन बरतनों को मांजकर जल से भर ।
इमानि पात्राणि मृष्ट्वा वारिणा पूरय ।

४७. वह चोर सब गहने चुराकर भाग गया ।
सः स्तेनः सर्वाणि आभूषणानि चोरयित्वा पलायत (पलायिष्ट)

४८. इतने सारे ग्रन्थ रचकर के भी वह लेखक भूखों मरा ?
एतावतः भूयसः ग्रन्थान् रचयित्वा अपि सः लेखकः क्षुधा अपीडचत ?

४९. गुरु की आज्ञा का उल्लङ्घन मत कर—अलम् लङ्घयित्वा गुरोः आदेशम् ।

५०. तू युद्ध में प्राण त्याग करके स्वर्ग को प्राप्त होगा या जीतकर पृथ्वी को भोगेगा ।
त्वं युद्धे प्राणान् त्यक्त्वा स्वर्गम् आप्स्यसि जित्वा वा भोक्ष्यसे महीम् ।

५१ बिना खाये मेरे घर से मत जाना—खलु गत्वा मम गृहाद् अभुक्त्वा ।

ल्युट् प्रत्यय

ल्युट् प्रत्यय मुख्य रूप से भाव में होता है[1] । कहीं कहीं करण, अधिकरण आदि कारकों में भी होता है[2] । धातुमात्र से यह प्रत्यय होता है । 'ल्युट्' में से ल् और ट् की इत्सञ्ज्ञा[3] और लोप हो जाने पर 'यु' शेष रहता है । उस 'यु' के स्थान पर 'अन' आदेश हो जाता है[4] । यदि धातु के अन्त में इ, उ, ऋ आदि हों, तो उनके स्थान पर गुण[5] (ए, ओ, अर्) होकर उन गुणों के स्थान पर (=ए के स्थान पर) अय् और

---

१. ल्युट् च (अष्टा. ३. ३. ११५)
२. करणाधिकरणयोश्च (अष्टा. ३. ३. ११७)
कृत्यल्युटो बहुलम् (अष्टा. ३. ३. ११३)
३. लशक्वतद्धिते (अष्टा. १. ३. ८); हलन्त्यम् (१. ३. ३)
४. युवोरनाकौ (अष्टा. ७. १. १)
५. सार्वधातुकार्धधातुकयोः (अष्टा. ७. ३. ८४)

(=ओ के स्थान पर) अव् आदेश हो जाता है[1]। यदि धातु की उपधा में ह्रस्व इ, उ, ऋ होगा तो केवल गुण[2] (=ए, ओ, अर्) होगा। भाव में ल्युट्-प्रत्ययान्त शब्द नपुंसक लिङ्ग वाला होगा[3] और उसके रूप ज्ञान के समान चलेंगे। अब कुछ धातुओं का ल्युट् (=अन) प्रत्ययान्त स्वरूप बताते हैं

गम्+ल्युट्	(अन)=	गमनम्	जाना	स्तु+ल्युट्	(अन)=	स्तवनम्	स्तुति करना
पठ्+ल्युट्	(अन)=	पठनम्	पढ़ना	श्रु	,,	श्रवणम्	सुनना
हस्	,,	हसनम्	हँसना	लू	,,	लवनम्	काटना
याच्	,,	याचनम्	मांगना	स्मृ	,,	स्मरणम्	याद करना
चि	,,	चयनम्	चुनना	कृ	,,	करणम्	करना
नी	,,	नयनम्	लेजाना	हृ	,,	हरणम्	हरण करना
आङ्+नी	,,	आनयनम्	लाना	नि+गॄ	,,	निगरणम्	निगलना
शी	,,	शयनम्	सोना	लिख्	,,	लेखनम्	लिखना
स्था	,,	स्थानम्	ठहरना	छिद्	,,	छेदनम्	काटना
दा	,,	दानम्	देना	भिद्	,,	भेदनम्	फोड़ना
गा	,,	गानम्	गाना	दृश्	,,	दर्शनम्	देखना

इसी प्रकार अन्य धातुओं से भी ल्युट् प्रत्यय होगा।

प्र०—गमनम्	गमने	गमनानि	प०—गमनात्	गमनाभ्याम्	गमनेभ्यः
द्वि०—गमनम्	गमने	गमनानि	ष०—गमनस्य	गमनयोः	गमनानाम्
तृ०—गमनेन	गमनाभ्याम्	गमनैः	स०—गमने	गमनयोः	गमनेषु
च०—गमनाय	गमनाभ्याम्	गमनेभ्यः	सं० प्र०—हे गमन	हे गमने	हे गमनानि

ल्युट्-प्रत्ययान्त शब्दों के कर्ता और कर्म में षष्ठी विभक्ति होती है[4]। यथा—मम गृहस्य गमनं गुरवे न रोचते=मेरा घर जाना गुरु जी को अच्छा नहीं लगता।

अभ्यास

१. उसके आने में कितनी देर है?=तस्य आगमने कियान् विलम्बः?

२. गुरु के आने से पहिले पाठ याद करो=गुरोः आगमनात् प्राक् पाठं स्मरत।

३. संस्कृत पढ़ने से यही बड़ा लाभ है कि अपनी संस्कृति का ज्ञान हो जाता है, क्योंकि हमारे सब शास्त्र संस्कृत में हैं।

---

१. एचोऽयवायावः (अष्टा. ६. १. ७८)

२. पुगन्तलघूपधस्य च (अष्टा. ७. ३. ८६)

३. भावे ल्युडन्तः (लिङ्गानुशासन, नपुं० २.)

४. कर्तृकर्मणोः कृति (अष्टा. २. ३. ६५)

संस्कृतस्य पठनेन अयम् एव महान् लाभः, यत् स्वसंस्कृतेः ज्ञानं भवति, यतः अस्माकं सर्वाणि शास्त्राणि संस्कृतभाषायां रचितानि सन्ति॥

४. वह मेरे याद करते ही आ गया—सः मम स्मरणमात्रेण एव आगमत्।

५. वन में रोने से कोई लाभ नहीं—अलम् अरण्यरोदनेन[1]।

६. भैंस के आगे बीन बजाना फिजूल है—कृतं[2] महिष्याः अग्रे वीणावादनेन।

७. अन्धे के आगे रोने से आंखों के बिगाड़ के सिवाय कुछ नहीं मिलता।
अन्धस्याग्रे रोदनेन ऋते नयनहानेः न किञ्चिद् उपलभ्यते।

८. बाल की खाल मत निकाल—अलं केशत्वमुत्पाटनैः।

९. मेरा सिनेमा जाना मातापिता को अच्छा नहीं लगता।
मम चलचित्रगृहस्य गमनं पितृभ्यां न रोचते।

१०. आपका संस्कृत बोलना सबको अच्छा लगता है।
भवतः संस्कृतस्य सम्भाषणं सर्वेभ्यः रोचते।

११. पिसे हुए को पीसने से भी रस मिलता है, क्यों मुझे रोकता है?
पिष्टपेषणेन अपि रसनिष्पत्तिः भवति, कथं मां वारयसि?

१२. वेद का पढ़ना, पढ़ाना और सुनना, सुनाना सबका परम धर्म है।
वेदस्य पठनं, पाठनं, श्रवणं श्रावणं च सर्वेषां परमधर्मः अस्ति।

१३. ईश्वर की स्तुति करने से और अच्छे आचरण से मुक्ति होती है।
ईश्वरस्य स्तवनेन सदाचरणेन च मुक्तिः जायते।

१४. लेना अप्रीति का और देना प्रीति का कारण है।
'आदानम् अप्रियकरं दानं च प्रियकारकम्'[3]।

१५. पराये माल का हरण करना और मांगना दोनों ही अपमानजनक हैं।
परवित्तस्य हरणं याचनं च उभे अपि अवमानकरे स्तः।

१६. इसके सोना, उठना, बैठना, खाना, पीना और घूमना आदि सब काम अनियमित हैं।
अस्य शयनं जागरणम् उपवेशनम् अशनं पानं भ्रमणादीनि च सर्वाणि कर्माणि अनियमितानि सन्ति।

१७. काटने, तपाने और गलाने आदि से सोने की चमक बढ़ती ही है।
छेदनेन प्रतापनेन गालनेन च हेम्नः कान्तिः वर्धते एव।

---

१. ल्युट् प्रत्ययान्त शब्द के साथ 'अलम्' अव्यय हो तो वहाँ निषेध अर्थ लक्षित होता है।
२. यहाँ जो 'कृतम्' शब्द है वह अव्यय है, क्त-प्रत्ययान्त नहीं।
३. मनुस्मृति ७. २०४.

शतृ और शानच् प्रत्यय

वर्तमान काल में धातु से जो लट् प्रत्यय होता है, उसके स्थान पर शतृ और शानच् ये दो प्रत्यय आदेश रूप में होते हैं[1]। शतृ और शानच् इन दोनों को 'सत्' सञ्ज्ञा से भी पुकारते हैं[2]। भविष्यत् काल में धातु से होने वाले लृट् प्रत्यय के स्थान पर भी शतृ और शानच् विकल्प से होते हैं[3]। 'शतृ' प्रत्यय की परस्मैपद सञ्ज्ञा है[4] और 'शानच्' प्रत्यय की आत्मनेपद सञ्ज्ञा है[5]। जिन धातुओं से अन्य (तिप् तस झि आदि) परस्मैपद प्रत्यय होते हैं उन्हीं से 'शतृ' प्रत्यय होता है[6] तथा जिनसे अन्य (त आताम् झ आदि) आत्मनेपद प्रत्यय होते हैं उन्हीं धातुओं से 'शानच्' प्रत्यय होता[7] है। सीधी भाषा में यों कहना चाहिए कि परस्मैपदी धातुओं से शतृ प्रत्यय और आत्मनेपदी धातुओं से शानच् प्रत्यय होता है। तथा उभयपदी धातुओं से शतृ और शानच् दोनों होते हैं। जैसे तिप्, तस् आदि अथवा त, आताम् आदि प्रत्यय परे रहने पर धातु से विभिन्न विकरण (शप् आदि) होते हैं वैसे ही लट्-स्थानीय शतृ तथा शानच् परे हों तब भी धातुओं से उसी प्रकार विकरण लगते हैं। तिप्, तस् आदि में जिस गण की धातु से जो विकरण लगता है वही विकरण शतृ तथा शानच् प्रत्यय परे रहने पर भी लगेगा। जैसे भ्वादिगणीय धातु से शप्, दिवादि० से श्यन्, स्वादि० से श्नु आदि०। लट् आदि के स्थान पर जब तिप् आदि प्रत्यय होते हैं तो तदन्त (=भवति, भवतः, भवन्ति आदि) शब्द क्रियाशब्द (=आख्यात) कहलाते हैं किन्तु जब लट् या लृट् के स्थान पर शतृ और शानच् प्रत्यय होते हैं तो शतृप्रत्ययान्त और शानच्-प्रत्ययान्त शब्द, विशेषण शब्द कहलाते हैं। इनके विशेष्य के अनुसार लिङ्ग आदि होते हैं तथा इनसे सुप् (सु औ जस् आदि) प्रत्यय होते हैं, अतः सातों विभक्तियों में उनके रूप चलते हैं।

शतृ के श् तथा ऋ की इत्सञ्ज्ञा और लोप[8] होने पर 'अत्' भाग शेष रहता है। 'शानच्' के श् और च्[9] की इत्सञ्ज्ञा-लोप होने पर 'आन' शेष रहता है।

---

१. लटः शतृशानचावप्रथमासमानाधिकरणे (अष्टा० ३.२.१२४); सम्बोधने च (अष्टा० ३.२.१२५)
२. तौ सत् (अष्टा० ३.२.१२७)
३. लृटः सद्वा (अष्टा० ३.३.१४)
४. ल परस्मैपदम् (अष्टा० १.४.९९)
५. तङानावात्मनेपदम् (अष्टा. १.४.१००)
६. शेषात् कर्त्तरि परस्मैपदम् (अष्टा. १.३.७८)
७. अनुदात्तङित आत्मनेपदम् (अष्टा. १.३.१२)
८. लशक्वतद्धिते (अष्टा. १.३.८); उपदेशेऽजनुनासिक इत् (अष्टा. १.३.२); तस्य लोपः (अष्टा. १.३.९)
९. हलन्त्यम् (अष्टा. १.३.३)

शतृप्रत्ययान्त शब्द के रूप पुँल्लिङ्ग में प्रायः 'भवत्' (=आप-वाचक) के समान चलते हैं किन्तु प्रथमा-एकवचन में दीर्घ नहीं होता। स्त्रीलिङ्ग में नदी के तुल्य[1] तथा नपुंसकलिङ्ग में 'जगत्' के तुल्य रूप बनते हैं। किन्तु जगत् की प्रथमा-द्वितीया के द्विवचनों में नुम् (=न्) नहीं होता, जबकि शतृप्रत्ययान्त शब्दों में कुछ में नुम् होता है और कुछ में नहीं। शतृ में स्त्रीलिङ्ग एवं नपुंसकलिङ्ग में नुम् करने वाले दो सूत्र हैं—'शप्श्यनोर्नित्यम्', 'आच्छीनद्योर्नुम्' (अष्टा. ७.१.८१; ८०)। शप् विकरण, भ्वादि तथा चुरादि गण की धातुओं से और ण्यन्त, सन्नन्त आदि धातुओं से होता है। श्यन् विकरण दिवादिगणीय धातुओं से होता है। अतः भ्वादि., दिवादि., चुरादि., ण्यन्त और सन्नन्त आदि धातुओं से जो शतृ प्रत्यय होता है, तदन्त शब्दों को (अर्थात् तब शतृ=अत् को) स्त्रीलिङ्ग में सर्वत्र और नपुंसकलिङ्ग में प्रथमा-द्वितीया के द्विवचन में नुम् (=न्) अवश्य होगा[2] तथा नपुंसकलिङ्ग में प्रथमा-द्वितीया के बहुवचन में भी नुम् होगा[3]। और अदादिगणीय आकारान्त धातुओं और तुदादिगणीय धातुओं के प्रसङ्ग में शतृ को विकल्प से नुम् होगा[4]। पुल्लिङ्ग में जुहोत्यादिगणीय धातुओं को और अदादिगण की जक्ष इत्यादि सात धातुओं को छोड़कर शेष सब धातुओं के शतृ को प्रथमा के तीनों वचनों में और द्वितीया के एकवचन-द्विवचन में नित्य नुम् होगा[5]। अभ्यस्त-सञ्ज्ञक (जुहोत्यादिगणीय तथा जक्ष इत्यादि सात) धातुओं के शतृ को पुँल्लिङ्ग तथा स्त्रीलिङ्ग में कहीं नुम् नहीं होगा[6] किन्तु नपुंसकलिङ्ग में प्रथमा द्वितीया के बहुवचन में विकल्प से नुम् आगम होगा[7]।

किसी धातु से शतृप्रत्ययान्त शब्द बनाने का सीधा सा उपाय यह है कि जिस धातु का, लट् लकार के प्रथम० के एकवचन में जो रूप बनता है उसका 'ति' भाग हटाकर उसके स्थान पर 'त्' लगा दो और नुम् की ऊपर लिखे अनुसार योजना कर दो। यथा—भू धातु का लट् (प्र. ए.) में—'भवति' बनता है, तो भू का शतृप्रत्यान्त शब्द 'भवत्' बना यह नपुंसकलिङ्ग में बना, पुँल्लिङ्ग में 'भवन्'[8] तथा स्त्रीलिङ्ग में 'भवन्ती'[9] बनेगा।

---

१. शतृप्रत्ययान्त शब्द उगित् होता है अतः 'उगितश्च' (अष्टा. ४.१.६) से स्त्रीलिङ्ग में ङीप् (=ई) प्रत्यय होता है और तब वह ईकारान्त शब्द बन जाता है।

२. शप्श्यनोर्नित्यम् (अष्टा. ७.१.८१) ३ नपुंसकस्य झलचः (अष्टा. ७.१.७२)

४. आच्छीनद्योर्नुम् (अष्टा. ७.१.८०) ५. उगिदचां सर्वनामस्थानेऽधातोः (७.१.७०)

६. नाभ्यस्ताच्छतुः (अष्टा. ७.१.७८) ७. वा नपुंसकस्य (अष्टा. ७.१.७९)

८. यहां 'भवन्' का अर्थ 'होता हुआ' यह है। आपवाचक 'भवत्' शब्द का 'भवान्' बनेगा वहां 'अत्वसन्तस्य चाधातोः' (अष्टा. ६.४.१४) से दीर्घ होगा।

९. 'भवन्ती' का अर्थ 'होती हुई' है। आपवाचक भवत् के स्त्रीलिङ्ग में 'भवती' बनेगा।

शतृप्रत्ययान्त और शानच् प्रत्ययान्त (वर्तमानकालिक) शब्दों का अर्थ होता है– जाता हुआ, खाता हुआ, सोता हुआ आदि।

भविष्यत्कालिक शतृ-शानच्-प्रत्ययान्त का अर्थ—जानेवाला, खानेवाला, सोनेवाला आदि होता है।

अब हम कुछ धातुओं के शतृप्रत्ययान्त स्वरूप तीनों लिङ्गों में दर्शाते हैं—

			पुंल्लिङ्ग		स्त्रीलिङ्ग		नपुंसकलिङ्ग	
धातु	+	शतृ	लट्स्थानीय,	लृट्स्थानीय	लट्स्थानीय,	लृट्स्थानीय	लट्स्थानीय,	लृट्स्थानीय
क्रीड्	+	शतृ	क्रीडन्,	क्रीडिष्यन्	क्रीडन्ती,	क्रीडिष्यन्ती क्रीडिष्यती	क्रीडत्,	क्रीडिष्यत्
पत्		"	पतन्	पतिष्यन्	पतन्ती,	पतिष्यन्ती पतिष्यती	पतत्,	पतिष्यत्
पठ्		"	पठन्,	पठिष्यन्	पठन्ती,	पठिष्यन्ती पठिष्यती	पठत्,	पठिष्यत्
गम्		"	गच्छन्,	गमिष्यन्	गच्छन्ती,	गमिष्यन्ती गमिष्यती	गच्छत्,	गमिष्यत्
हस्		"	हसन्,	हसिष्यन्	हसन्ती,	हसिष्यन्ती हसिष्यती	हसत्,	हसिष्यत्
		"	भवन्,	भविष्यन्	भवन्ती,	भविष्यन्ती भविष्यती	भवत्,	भविष्यत्
दा (दाण्)		"	यच्छन्,	दास्यन्	यच्छन्ती,	दास्यन्ती दास्यती	यच्छत्,	दास्यत्
खाद्		"	खादन्	खादिष्यन्	खादन्ती,	खादिष्यन्ती खादिष्यती	खादत्,	खादिष्यत्
जीव्		"	जीवन्,	जीविष्यन्	जीवन्ती,	जीविष्यन्ती जीविष्यती	जीवत्,	जीविष्यत्

धातु	शतृ	पुँल्लिङ्ग लट्स्थानीय	पुँल्लिङ्ग लृट्स्थानीय	स्त्रीलिङ्ग लट्स्थानीय	स्त्रीलिङ्ग लृट्स्थानीय	नपुंसकलिङ्ग लट्स्थानीय	नपुंसकलिङ्ग लृट्स्थानीय
खेल्	,,	खेलन्,	खेलिष्यन्	खेलन्ती,	खेलिष्यन्ती खेलिष्यती	खेलत्,	खेलिष्यत्
दृश्	,,	पश्यन्,	द्रक्ष्यन्	पश्यन्ती,	द्रक्ष्यन्ती द्रक्ष्यती	पश्यत्,	द्रक्ष्यत्
इष् (इच्छायाम्)	,,	इच्छन्,	एषिष्यन्	इच्छन्ती इच्छती	एषिष्यन्ती एषिष्यती	इच्छत्,	एषिष्यत्
वि + कस्	,,	विकसन्	विकसिष्यन्	विकसन्ती,	विकसिष्यन्ती विकसिष्यती	विकसत्,	विकसिष्यत्
भ्रम (चलने)	,,	भ्रमन्, भ्रम्यन्,	भ्रमिष्यन्	भ्रमन्ती भ्रम्यन्ती	भ्रमिष्यन्ती भ्रमिष्यती	भ्रमत् भ्रम्यत्	भ्रमिष्यत्
भ्रम् (अनवस्थाने)	,,	भ्रमन्, भ्राम्यन्,	भ्रमिष्यन्	भ्रमन्ती भ्राम्यन्ती	भ्रमिष्यन्ती भ्रमिष्यती	भ्रमत् भ्राम्यत्	भ्रमिष्यत्
अट्	,,	अटन्,	अटिष्यन्	अटन्ती,	अटिष्यन्ती अटिष्यती	अटत्,	अटिष्यत्
प्र + फुल्ल्	,,	प्रफुल्लन्,	प्रफुल्लिष्यन्	प्रफुल्लन्ती,	प्रफुल्लिष्यन्ती प्रफुल्लिष्यती	प्रफुल्लत्,	प्रफुल्लिष्यत्
श्रु	,,	शृण्वन्,	श्रोष्यन्	शृण्वती,	श्रोष्यन्ती श्रोष्यती	शृण्वत्,	श्रोष्यत्
रुद्	,,	रुदन्,	रोदिष्यन्	रुदती,	रोदिष्यन्ती रोदिष्यती	रुदत्,	रोदिष्यत्
जागृ	,,	जाग्रत्,	जागरिष्यन्	जाग्रती,	जागरिष्यन्ती जागरिष्यती	जाग्रत्,	जागरिष्यत्

धातु	शतृ	पुंल्लिङ्ग लट्स्थानीय	पुंल्लिङ्ग लृट्स्थानीय	स्त्रीलिङ्ग लट्स्थानीय	स्त्रीलिङ्ग लृट्स्थानीय	नपुंसकलिङ्ग लट्स्थानीय	नपुंसकलिङ्ग लृट्स्थानीय
या	"	यान्,	यास्यन्	यान्ती / याती	यास्यन्ती / यास्यती	यात्,	यास्यत्
पा (रक्षणे)	"	पान्,	पास्यन्	पान्ती / पाती	पास्यन्ती / पास्यती	पात्,	पास्यत्
पा (पाने)	"	पिबन्,	पास्यन्	पिबन्ती,	पास्यन्ती / पास्यती	पिबत्,	पास्यत्
जि	"	जयन्;	जेष्यन्	जयन्ती,	जेष्यन्ती / जेष्यती	जयत्,	जेष्यत्
भी	"	बिभ्यत्,	भेष्यन्	बिभ्यती,	भेष्यन्ती / भेष्यती	बिभ्यत्,	भेष्यत्
भक्षि (भक्ष् णिच्)	"	भक्षयन्,	भक्षयिष्यन्	भक्षयन्ती,	भक्षयिष्यन्ती / भक्षयिष्यती	भक्षयत्,	भक्षयिष्यत्
तर्जि (तर्ज् णिच्)	"	तर्जयन्,	तर्जयिष्यन्	तर्जयन्ती,	तर्जयिष्यन्ती / तर्जयिष्यती	तर्जयत्,	तर्जयिष्यत्
उत्थापि (उत्+स्थाणिच्)		उत्थापयन्,	उत्थापयिष्यन्	उत्थापयन्ती,	उत्थापयिष्यन्ती / उत्थापयिष्यती	उत्थापयत्,	उत्थापयिष्यत्
पिपठिष +	शतृ	पिपठिषन्,	पिपठिषिष्यन्	पिपठिषन्ती,	पिपठिषिष्यन्ती / पिपठियिष्यती	पिपठिषत्,	पिपठिषिष्यत्
पुत्रीय	"	पुत्रीयन्,	पुत्रीयिष्यन्	पुत्रीयन्ती,	पुत्रीयिष्यन्ती, / पुत्रीयिष्यती	पुत्रीयत्,	पुत्रीयिष्यत्
पुत्रकाम्य	"	पुत्रकाम्यन्,	पुत्रकामिष्यन्	पुत्रकाम्यन्ती,	पुत्रकामिष्यन्ती / पुत्रकामिष्यती	पुत्रकाम्यत्,	पुत्रकामिष्यत्

अब हम शतृप्रत्ययान्त शब्द के रूप तीनों लिङ्गों में सब विभक्तियों में उदाहरणार्थ देते हैं—

शतृप्रत्ययान्त भवत् शब्द (पुंल्लिङ्ग)		
प्र०—भवन्	भवन्तौ	भवन्तः
द्वि०—भवन्तम्	भवन्तौ	भवतः
तृ०—भवता	भवद्भ्याम्	भवद्भिः
च०—भवते	भवद्भ्याम्	भवद्भ्यः
प०—भवतः	भवद्भ्याम्	भवद्भ्यः
ष०—भवतः	भवतोः	भवताम्
स०—भवति	भवतोः	भवत्सु
सं०प्र०—हे भवन्	हे भवन्तौ	हे भवन्तः

शतृप्र० (ङीबन्त) भवन्ती शब्द स्त्रीलिङ्ग		
प्र०—भवन्ती	भवन्त्यौ	भवन्त्यः
द्वि०—भवन्तीम्	भवन्त्यौ	भवन्तीः
तृ०—भवन्त्या	भवन्तीभ्याम्	भवन्तीभिः
च०—भवन्त्यै	भवन्तीभ्याम्	भवन्तीभ्यः
प०—भवन्त्याः	भवन्तीभ्याम्	भवन्तीभ्यः
ष०—भवन्त्याः	भवन्त्योः	भवन्तीनाम्
स०—भवन्त्याम्	भवन्त्योः	भवन्तीषु
सं०प्र०—हे भवन्ति	हे भवन्त्यौ	हे भवन्त्यः

शतृप्रत्ययान्त भवत् शब्द (नपुंसकलिङ्ग)

प्रथमा—भवत्	भवन्ती	भवन्ति
द्वितीया—भवत्	भवन्ती	भवन्ति

शेष रूप पुल्लिङ्ग भवत् के समान चलेंगे।

जब शतृप्रत्यय, लृट् के स्थान पर होगा तब शप् आदि विकरण नहीं होंगे किन्तु 'स्य' विकरण, सब धातुओं से आयेगा और सब प्रकार की धातुओं के प्रसङ्ग में पूर्वोक्त 'भवत्' के समान ही नुम् आगम होगा। स्त्रीलिङ्ग में विकल्प करके नुम् (=न्) आगम होगा, अतः स्त्रीलिंग में दो प्रकार के रूप बनेंगे[1]। लृट्स्थानीय शतृ-प्रत्ययान्त शब्द के तीनों लिङ्गों में रूप इस प्रकार हैं—

पुंल्लिङ्ग गमिष्यत शब्द		
प्र०—गमिष्यन्	गतिष्यन्तौ	गमिष्यन्तः
द्वि०—गमिष्यन्तम्	गमिष्यन्तौ	गमिष्यतः
तृ०—गमिष्यता	गमिष्यद्भ्याम्	गमिष्यद्भिः
च०—गमिष्यते	गमिष्यद्भ्याम्	गमिष्यद्भ्यः
प०—गमिष्यतः	गमिष्यद्भ्याम्	गमिष्यद्भ्यः
ष०—गमिष्यतः	गमिष्यतोः	गमिष्यताम्
स०—गमिष्यति	गमिष्यतोः	गमिष्यत्सु
सं०प्र० हे गमिष्यन्	हे गमिष्यन्तौ	हे गमिष्यन्तः

स्त्रीलिङ्ग गमिष्यत् (१) (गमिष्यन्ती) शब्द		
प्र०—गमिष्यन्ती	गमिष्यन्त्यौ	गमिष्यन्त्यः
द्वि०—गमिष्यन्तीम्	गमिष्यन्त्यौ	गमिष्यन्तीः
तृ०—गमिष्यन्त्या	गमिष्यन्तीभ्याम्	गमिष्यन्तीभिः
च०—गमिष्यन्त्यै	गमिष्यन्तीभ्याम्	गमिष्यन्तीभ्यः
प०—गमिष्यन्त्याः	गमिष्यन्तीभ्याम्	गमिष्यन्तीभ्यः
ष० गमिष्यन्त्याः	गमिष्यन्त्योः	गमिष्यन्तीनाम्

---

१. आच्छीनद्योर्नुम् (अष्टा. ७.१.८०)

स०—गमिष्यन्त्याम् गमिष्यन्त्योः गमिष्यन्तीषु | सं०प्र०—हे गमिष्यन्ति हे गमिष्यन्त्यौ हे गमिष्यन्त्यः

स्त्रीलिङ्ग गमिष्यत् (२) [गमिष्यती] शब्द

प्र०—गमिष्यती गमिष्यत्यौ गमिष्यत्यः
द्वि०—गमिष्यतीम् गमिष्यत्यौ गमिष्यतीः
तृ०—गमिष्यत्या गमिष्यतीभ्याम् गमिष्यतीभिः
च०—गमिष्यत्यै गमिष्यतीभ्याम् गमिष्यतीभ्यः
प०—गमिष्यत्याः गमिष्यतीभ्याम् गमिष्यतीभ्यः
ष०—गमिष्यत्याः गमिष्यत्योः गमिष्यतीनाम्
स०—गमिष्यत्याम् गमिष्यत्योः गमिष्यतीषु
सं०प्र०—हे गमिष्यति हे गमिष्यत्यौ हे गमिष्यत्यः

नपुंसकलिङ्ग गमिष्यत् शब्द

प्रथमा—गमिष्यत्	गमिष्यन्ती	गमिष्यन्ति
द्वितीया—गमिष्यत्	गमिष्यन्ती	गमिष्यन्ति

शेष विभक्तियों में पुंल्लिङ्ग गमिष्यत् शब्द के समान रूप चलेंगे।

अन्य धातुओं से भी, लट्स्थानीय और लृट्स्थानीय शतृ प्रत्यय होने पर तदन्त शब्द के रूप उपर्युक्त प्रकारेण बना लेने चाहियें।

अभ्यास

१. घर जाते हुए मेरे दोनों मित्रों ने खेलती हुई विमला से कहा, यह पुस्तक, पढ़ते हुए मोहन को देना।

इस वाक्य में→घर कर्म, जाते हुए—विशेषण, मित्र (न. लि.)—कर्त्ता (विशेष्य), खेलती हुई—विशेषण, विमला—कर्म (विशेष्य), यह—सर्वनाम, पुस्तक—कर्म, पढ़ते हुए—विशेषण, मोहन सम्प्रदान (विशेष्य), दे देना—क्रिया

संस्कृत—गृहं गच्छन्ती मम मित्रे क्रीडन्तीं विमलाम् अवादिष्टाम् (अवदताम्) एतत् पुस्तकं पठते मोहनाय देहि (दद्याः)।

२. वृक्ष से गिरते हुए दो फलों को उठाती हुई विमला ने खेलते हुए मोहन से कहा—एक फल तुझे दूंगी और एक फल मैं खाऊँगी। (यहाँ→वृक्ष से—अपादान, गिरते हुए—विशेषण, दो—संख्या विशेषण, फल—कर्म (विशेष्य), उठाती हुई—विशेषण, विमला—कर्त्ता (विशेष्य), खेलते हुए—विशेषण, मोहन—कर्म (विशेष्य), कहा—क्रिया, एक—सं० विशेषण, फल कर्म (विशेष्य) तुझे—सम्प्रदान, दूंगी—क्रिया, और—अव्यय, एक—सं० विशेषण, फल—कर्म (विशेष्य), मैं—सर्वनाम कर्त्ता, खाऊँगी—क्रिया।

संस्कृत—वृक्षात् पतन्ती फले उत्थापयन्ती विमला क्रीडन्तं मोहनम् अचकथत् (अकथयत्) एकं फलं तुभ्यं दास्यामि, एकं च अहं भोक्ष्ये।

३. जाती हुई बुढ़िया के पात्र से गिरता हुआ दही खाते हुए कौए को देखकर, हंसते हुए लड़कों ने, खेलते हुए मेरे मित्रों से कहा।

संस्कृत—गच्छन्त्याः वृद्धायाः पात्रात् पतत् दधि भक्षयन्तं काकं दृष्ट्वा हसन्तः बालकाः क्रीडन्ति मम मित्राणि अवोचन् (अब्रुवन्)।

४. सड़क पर जाते हुए राहगीरों से हाथ फैला कर मांगते हुए और खाते हुए मनुष्यों के हाथों से गिरते हुए पत्तों को चाटने के लिये कुत्तों के साथ दौड़ते हुए बालकों को देखकर भी गवर्नमेंट के हृदय में दुःख नहीं होता।

संस्कृत—राजपथे गच्छतः पथिकान् हस्तौ प्रसार्य याचतः (याचमानान्), भक्षयतां मनुष्याणां करेभ्यः पतन्ति पत्राणि लेढुं श्वभिः सह धावतः च बालकान् दृष्ट्वा अपि शासकानां हृदयेषु दुःखं न उत्पद्यते।

५. जब आप होते हैं, तब यह काम होता है।
भवति भवति भवति इदं कार्यम्।[1]

६. किसका व्याख्यान होगा आज, होने वाले अधिवेशन में ?
अद्य कस्य व्याख्यानं भविष्यति, भविष्यति (७.१) अधिवेशने ?

७. कलकत्ते से आने वाले तेरे मित्रों के साथ मेरा लड़का भी आने वाला है, दोनों स्टेशन पर चलेंगे ?
कलिकातानगरात् आगमिष्यद्भिः तव सखिभिः सह मम सुतः अपि आगमिष्यन्, आवां वाष्पयानागारं गमिष्यावः।

८. जब तू इसके रुपये दे देगा, तब वह तेरे आभूषण दे देगा ?
त्वयि रूप्यकाणि दास्यति, दास्यति स तव आभूषणानि[2] ?

९. जब तेरा पिता आयेगा, तब मैं जाऊँगा।
आगमिष्यति तव पितरि गमिष्यामि अहम्।

१०. जब तू खायेगा तब वह खायेगा = त्वयि खादिष्यति (७.१) खादिष्यति सः ?

११. जब मोहन खाता है तब सत्यपाल खाता है ?
मोहने खादति (७.१) खादति सत्यपालः ?

१२. मैं आपके जीने पर जीता हूं और आपके मरने पर मर जाऊँगा।
भवति जीवति जीवामि मरिष्यति च भवति मरिष्यामि।

---

१. इस वाक्य में पहिला 'भवति' पद आपवाचक 'भवत्' की सप्तमी का एकवचन है, दूसरा 'भवति' पद शतृप्रत्ययान्त 'भवत्' की सप्तमी का एकवचन है और तीसरा 'भवति' पद क्रिया पद है और भू धातु के लट् का प्रथम० एकवचन है।

२. पहिला 'दास्यति' पद लृट्स्थानीय 'दास्यत्' का (७.१) है और द्वितीय 'दास्यति' शब्द क्रियापद है।

१३. खेलते हुए बुद्धिमान् लड़कों के साथ तू भी खेलाकर।
खेलद्भिः धीमद्भिः बालकैः सह त्वम् अपि क्रीड (क्रीडेः)।

१४. सबके देखते देखते इस धूर्त्त सुनार ने सोना चुरा लिया।
सर्वेषां पश्यताम् अयं धूर्त्तः पश्यतोहरः कनकम् अचूचुरत् (अचोरयत्)

१५. दौड़ते लड़के के पीछे मत दौड़ = अलं धावन्तं बालकम् अनुधाव्य।

१६. न चाहते हुए भी मुझे दूध पीना पड़ा = अनिच्छन् अपि अहम् अपाम् पयः।

१७. दान देते हुए मनुष्य को देखकर, कंजूस के मन में बड़ा दुःख हुआ?
दानं यच्छन्तं (ददतं) मनुष्यं दृष्ट्वा कृपणस्य मनसि महद् दुःखम् अभवत्।

१८. घर जाती हुई लड़कियों से प्रतिभा ने कहा—वृक्ष से गिरते हुए पके आमों को लाओ?
गृहाणि गच्छन्तीः बालिकाः प्रतिभा अचकथत्—वृक्षात् पतन्ति पक्वानि सहकार-फलानि आनयत?

१९. क्या तूने उसके सिर से बहता हुआ खून देखा?
किं त्वं तस्य शिरसः वहत् शोणितम् अद्राक्षीः?

२०. खिलते हुए फूलों को देखकर घूमते हुए मेरे मित्रों ने बाग में टहलते हुए लोगों से कहा – क्या तुम खिलते हुए फूलों को देखते हो?
विकसन्ति पुष्पाणि दृष्ट्वा भ्रमन्ति मम मित्राणि उद्यानम् (उद्याने) अटतः पुरुषान् अवोचन्—किं यूयं प्रफुल्लन्ति प्रसूनानि पश्यथ?

२१. पुत्र को भोजन देती हुई माता ने कहा कि खाते हुए बोलते नहीं?
पुत्राय भोजनं ददती जननी अगदत्—भक्षयन् मा वादीः (मा स्म वदः)।

२२. पड़ोसन के साथ बात करती हुई बुढ़िया से मैंने कहा—माई! आज रोटी नहीं पकेगी क्या?
प्रतिवेशिन्या सह वार्तां कुर्वतीं वृद्धाम् अहम् अवोचं—वृद्धे! किमद्य भोजनं न पक्ष्यसि?

२३. मेरी बातें सुनते हुए मेरे दोनों मित्रों ने मुझसे कहा—आपके पास तो बातों का खजाना है।
मम वार्ताः शृण्वती मम मित्रे माम् अवादिष्टाम्—भवतां पार्श्वे तु वार्तानां कोषः अस्ति।

२४. सुशीला ने धमकाते हुए, कौशल्या से कहा—मूर्ख! तूने मुझे वृक्ष से फल तोड़ते कब देखा है?
सुशीला तर्जयन्ती (भर्त्सयमाना) कौशल्याम् अवोचत्—मूर्खे! त्वं मां वृक्षं फलानि अवचिन्वतीं कदा अद्राक्षीः?

२५. नदी के किनारे रोते हुए बालक के पास जाकर किसी वृद्धा ने कहा—बेटा! बहते हुए जल में मत घुस जाना।
उपनदीतटं रुदन्तं बालकम् उपसृत्य काचित् वृद्धा अचकथत्—वत्स! वहत् जलं मा प्रविक्षः (अलं वहत् जलं प्रविश्य)।

२६. वन में जाने से डरते हुए सर्वमित्र ने कहा—मैं नहीं जाऊंगा, मेरे सिर में दर्द है बनगमनात् बिभ्यत् सर्वमित्रः अकथयत्—अहं नैव यास्यामि, मम शिरोवेदना अस्ति ?

२७. काम करती हुई माता ने बेटी से पूछा—बेटी ! तेरे सिरदर्द में कुछ आराम है ? कार्यं कुर्वती माता पुत्रीम् अप्राक्षीत् (अपृच्छत्)—अपि सह्या शिरोवेदना ?

२८. जागती हुई भी पुत्री ने सोने का बहाना करके कोई उत्तर नहीं दिया ? जाग्रती अपि पुत्री शयनव्याजम् आकलय्य न किमपि प्रत्यवोचत् ?

२९. शाम के समय डरते हुए पांच वर्ष के सर्वमित्र ने पास में बैठे हुए रामशास्त्री से कहा—मैं तेरे पास खड़ा हूं, कभी तू डर जाये।

सन्ध्यावेलायां बिभ्यत् पञ्चवर्षदेशीयः सर्वमित्रः पार्श्वे स्थितं रामशास्त्रिणम् अवादीत्—अहं तव अन्तिके तिष्ठामि मा भैषीः।

३०. घर से स्कूल जाती हुई शशिकला को देखकर उमा ने कहा—ठहर मैं भी तेरे साथ चलती हूं।
गृहात् विद्यालयं यातीं (यान्तीं) शशिकलां दृष्ट्वा उमा अब्रवीत्—तिष्ठ अहम् अपि त्वया सह यामि।

शानच्

पूर्व में बता आये हैं कि लट्स्थानीय अथवा लृट्स्थानीय शानच् प्रत्यय आत्मनेपदी धातुओं से होता है। जो धातु उभयपदी हैं उनसे विकल्प से शतृ और शानच् दोनों होंगे। 'शानच्' के श् और च् की इत्सञ्ज्ञा तथा लोप हो जाने पर 'आन' शेष रहता है। भ्वादि०, दिवादि०, तुदादि०, चुरादि० आदि तथा ण्यन्त—सन्नन्त धातुओं से जब 'आन' (=शानच्) परे होगा तो 'आन' से पहिले म् (=मुक्) आगम होगा[1]। यथा—मोदमानः, पचमानः, बुध्यमानः, लज्जमानः, प्रार्थयमानः, कारयमाणः, जिज्ञासमानः आदि। अदादि०, जुहोत्यादि० आदि धातुओं से सीधा आन लगा देत हैं—यथा सन्दिहानः, व्याचक्षाणः, सञ्जिहानः, व्याददानः आदि। लृट्स्थानीय शानच् का 'आन' परे होगा तब तो प्रत्येक प्रकार की धातु के अन्त में म् (मुक्) आगम होगा। आस् धातु से परे 'आन' के आ को ई होगा[2]—आसीनः। शानच् (=आन) प्रत्ययान्त के रूप पुंल्लिङ्ग में 'यतमानः यतमानौ यतमानाः' आदि 'राम' शब्द के समान, स्त्रीलिङ्ग में 'यतमाना यतमाने यतमानाः' आदि 'रमा' के समान और नपुंसकलिङ्ग में 'यतमानम् यतमाने यतमानानि' आदि ज्ञान शब्द के समान चलेंगे। लृट्स्थानीय शानच् प्रत्ययान्त के रूपों में भी यही बात है—

पु०—यतिष्यमाणः, स्त्री०—यतिष्यमाणा, नपुं०—यतिष्यमाणम्।

अब कुछ धातुओं के शानच् प्रत्ययान्त स्वरूप तीनों लिङ्गों में बताते हैं। उभयपदी धातुओं के शानच्-प्रत्ययान्त के साथ शतृ-प्रत्ययान्त स्वरूप भी देंगे—

---

१. आने मुक् (अष्टा.७.२.८२)   २. ईदासः (अष्टा. ७.२.८३)

धातु + प्रत्यय	पुंलिङ्ग लट्स्थानीय,	पुंलिङ्ग लृट्स्थानीय	स्त्रीलिङ्ग लट्स्थानीय,	स्त्रीलिङ्ग लृट्स्थानीय	नपुंसकलिङ्ग लट्स्थानीय,	नपुंसकलिङ्ग लृट्स्थानीय
यत् + शानच्	यतमानः	यतिष्यमाणः	यतमाना,	यतिष्यमाणा	यतमानम्	यतिष्यमाणम्
मुद् + ,,	मोदमानः,	मोदिष्यमाणः	मोदमाना,	मोदिष्यमाणा	मोदमानम्,	मोदिष्यमाणम्
सेव् ,,	सेवमानः	सेविष्यमाणः	सेवमाना,	सेविष्यमाणा	सेवमानम्,	सेविष्यमाणम्
लभ् ,,	लभमानः,	लप्स्यमान	लभमाना,	लप्स्यमाना	लभमानम्,	लप्स्यमानम्
रम् ,,	रममाणः,	रंस्यमानः	रममाणा,	रंस्यमाना	रममाणम्,	रंस्यमानम्
शी ,,	शयानः,	शयिष्यमाणः	शयाना,	शयिष्यमाणा	शयानम्,	शयिष्यमाणम्
[1]ली ,,	लीयमानः,	लास्यमानः लेष्यमाणः	लीयमाना,	लास्यमाना लेष्यमाणा	लीयमानम्,	लास्यमानम् लेष्यमाणम्
अश् (व्याप्तौ) ,,	अश्नुवानः,	अक्ष्यमाणः अशिष्यमाणः	अश्नुवाना,	अक्ष्यमाणा अशिष्यमाणा	अश्नुवानम्,	अक्ष्यमाणम् अशिष्यमाणम्
[2]मृ ,,	म्रियमाणः,	मरिष्यन्	म्रियमाणा,	मरिष्यन्ती मरिष्यती	म्रियमाणम्,	मरिष्यत्
मन् (अवबोधने) ,,	मन्वानः,	मनिष्यमाणः	मन्वाना,	मनिष्यमाणा	मन्वानम्,	मनिष्यमाणम्
वृङ् (सम्भक्तौ) ,,	वृणानः,	वरिष्यमाणः वरीष्यमाणः	वृणाना,	वरिष्यमाणा वरीष्यमाणा	वृणानम्	वरिष्यमाणम् वरीष्यमाणम्
मन् (ज्ञाने) ,,	मन्यमानः,	मंस्यमानः	मन्यमाना,	मंस्यमाना	मन्यमानम्,	मंस्यमानम्
यज् + शानच्	यजमानः,	यक्ष्यमाणः	यजमाना,	यक्ष्यमाणा	यजमानम्,	यक्ष्यमाणम्
,, + शतृ	(यजन्,	यक्ष्यन्	यजन्ती,	यक्ष्यन्ती यक्ष्यती	यजत्,	यक्ष्यत्)
भज् + शानच्	भजमानः,	भक्ष्यमाणः	भजमाना,	भक्ष्यमाणा	भजमानम्,	भक्ष्यमाणम्

१. विभाषा लीयतेः (अष्टा. ६. १. ५०) से अशित् प्रत्ययों में विकल्प से धातु को एत्व ।

२. मृ (मृङ्) धातु यद्यपि आत्मनेपदी है तथापि 'म्रियतेर्लुङ्लिङोश्च' (अष्टा. १. ३. ६१) के नियम के कारण शित् लकारों में और लुङ्, आशीर्लिङ् में ही आत्मनेपद होगा । लिट्, लुट्, लृट् और लृङ् में परस्मैपद होगा । अतः यहां लृट् में शतृ ही होगा शानच् नहीं ।

धातु		प्रत्यय	पुंल्लिङ्ग लट्स्थानीय	पुंल्लिङ्ग लृट्स्थानीय	स्त्रीलिङ्ग लट्स्थानीय	स्त्रीलिङ्ग लृट्स्थानीय	नपुंसकलिङ्ग लट्स्थानीय	नपुंसकलिङ्ग लृट्स्थानीय
भज्	+	शतृ	(भजन्,	भक्ष्यन्	भजन्ती,	भक्ष्यन्ती / भक्ष्यती	भजत्,	भक्ष्यत्)
याच्	+	शानच्	याचमानः,	याचिष्यमाणः	याचमाना,	याचिष्यमाणा	याचमानम्,	याचिष्यमाणम्
”	+	शतृ	(याचन्,	याचिष्यन्	याचन्ती,	याचिष्यन्ती / याचिष्यती	याचत्,	याचिष्यत्)
पच्	+	शानच्	पचमानः,	पक्ष्यमाणः	पचमाना,	पक्ष्यमाणा	पचमानम्,	पक्ष्यमाणम्
”	+	शतृ	(पचन्,	पक्ष्यन्	पचन्ती,	पक्ष्यन्ती / पक्ष्यती	पचत्,	पक्ष्यत्)
ब्रू	+	शानच्	ब्रुवाणः,	वक्ष्यमाणः	ब्रुवाणा,	वक्ष्यमाणा	ब्रुवाणम्,	वक्ष्यमाणम्
”	+	शतृ	(ब्रुवन्,	वक्ष्यन्	ब्रुवती,	वक्ष्यन्ती / वक्ष्यती	ब्रुवत्,	वक्ष्यत्)
चि	+	शानच्	चिन्वानः,	चेष्यमाणः	चिन्वाना,	चेष्यमाणा	चिन्वानम्,	चेष्यमाणम्
”	+	शतृ	(चिन्वन्,	चेष्यन्	चिन्वती,	चेष्यन्ती / चेष्यती	चिन्वत्,	चेष्यत्)
धा	+	शानच्	दधानः,	धास्यमानः	दधाना,	धास्यमाना	दधानम्	धास्यमानम्
”	+	शतृ	(दधत्,	धास्यन्	दधती,	धास्यन्ती / धास्यती	दधत्,	धास्यत्)
दा	+	शानच्	ददानः,	दास्यमानः	ददाना,	दास्यमाना	ददानम्,	दास्यमानम्
”	+	शतृ	(ददत्,	दास्यन्	ददती,	दास्यन्ती / दास्यती	ददत्,	दास्यत्)
भृ	+	शानच्	बिभ्राणः,	भरिष्यमाणः	बिभ्राणा,	भरिष्यमाणा	बिभ्राणम्,	भरिष्यमाणम्
”	+	शतृ	(बिभ्रत्	भरिष्यन्	बिभ्रती,	भरिष्यन्ती / भरिष्यती	बिभ्रत्,	भरिष्यत्

धातु	+	प्रत्यय	पुंल्लिङ्ग लट्स्थानीय	पुंल्लिङ्ग लृट्स्थानीय	स्त्रीलिङ्ग लट्स्थानीय,	स्त्रीलिङ्ग लृट्स्थानीय	नपुंसकलिङ्ग (लट्स्थानीय)	नपुंसकलिङ्ग (लृट्स्थानीय)
वृ (वरणे)	+	शानच्	वृण्वानः,	वरिष्यमाणः वरीष्यमाणः	वृण्वाना,	वरिष्यमाणा वरीष्यमाणा	वृण्वानम्,	वरिष्यमाणम् वरीष्यमाणम्
,,	+	शतृ	वृण्वन्,	वरिष्यन् वरीष्यन्	वृण्वती,	वरिष्यती-न्ती वरीष्यती-न्ती	वृण्वत्,	वरिष्यत् वरीष्यत्
कृ	+	शानच्	कुर्वाणः,	करिष्यमाणः	कुर्वाणा,	करिष्यमाणा	कुर्वाणम्,	करिष्यमाणम्
,,	+	शतृ	(कुर्वन्,	करिष्यन्	कुर्वती,	करिष्यन्ती करिष्यती	कुर्वत्,	करिष्यत्
अधि-इङ्	—	शानच्	अधीयानः,	अध्येष्यमाणः	अधीयाना,	अध्येष्यमाणा	अधीयानम्,	अध्येष्यमाणम्
भिद्	—	शानच्	भिन्दानः,	भेत्स्यमानः	भिन्दाना,	भेत्स्यमाना	भिन्दानम्,	भेत्स्यमानम्
,,	—	शतृ	भिन्दन्,	भेत्स्यन्	भिन्दती,	भेत्स्यन्ती भेत्स्यती	भिन्दत्	भेत्स्यत्
क्री	—	शानच्	क्रीणानः,	क्रेष्यमाणः	क्रीणाना,	क्रेष्यमाणा	क्रीणानम्,	क्रेष्यमाणम्
,,	—	शतृ	क्रीणन्,	क्रेष्यन्	क्रीणती,	क्रेष्यन्ती क्रेष्यती	क्रीणत्,	क्रेष्यत्
पू	—	शानच्	पुनानः	पविष्यमाणः	पुनाना,	पविष्यमाणा	पुनानम्,	पविष्यमाणम्
,,	—	शतृ	पुनन्,	पविष्यन्	पुनती,	पविष्यन्ती पविष्यती	पुनत्,	पविष्यत्
प्रार्थि = प्र + अर्थ + णिच्	+	,,	प्रार्थयमानः,	प्रार्थयिष्यमाणः	प्रार्थयमाना,	प्रार्थयिष्यमाणा	प्रार्थयमानम्,	प्रार्थयिष्यमाणम्
जिज्ञास (= ज्ञा + सन्)	+	,,	जिज्ञासमानः,	जिज्ञासिष्यमाणः	जिज्ञासमाना,	जिज्ञासिष्यमाणा	जिज्ञासमानम्,	जिज्ञासिष्यमाणम्
पापठ्य (पठ् + यङ्)	+	,,	पापठ्यमानः,	पापठिष्यमाणः	पापठ्यमाना,	पापठिष्यमाणा	पापठ्यमानम्,	पापठिष्यमाणम्
श्येनाय (श्येन + क्यङ्)	+	,,	श्येनायमानः,	श्येनायिष्यमाणः	श्येनायमाना,	श्येनायिष्यमाणा	श्येनायमानम्,	श्येनायिष्यमाणम्

अभ्यास

१. यत्न करते हुओं का भी यदि कार्य सिद्ध नहीं होता, तो भाग्य का दोष समझना चाहिये ।
   यतमानानाम् अपि यदि कार्यं न सिध्यति, तदा विधिः बलवान् इति मन्तव्यम् ।

२. खीर खाते हुए और खुश होते हुए ब्रह्मचारियों को देखकर मुझे बड़ी खुशी होती है ।
   पायसान्नं भुञ्जानान् मोदमानान् च ब्रह्मचारिणः वीक्ष्य नितरां मोदे ।

३. यज्ञ करते हुए ब्रह्मचारियों को देखकर एक माता ने मन में सोचा कि मैं भी अपने पुत्र को गुरुकुल में प्रविष्ट कराऊंगी ।
   यजमानान् (यजतः) ब्रह्मचारिणः अवलोक्य एका माता मनसि व्यचीचरत्—अहमपि मत्सुतं गुरुकुले प्रवेशयिष्यामि ।

४. ईश्वर का भजन करते हुए तपस्वियों के आश्रम में भोजन रख आ ।
   ईश्वरं भजमानानां (भजतां) तपस्विनाम् आश्रमे भोजनं स्थापय ।

५. मांगते हुए पुरुषों का कोई आदर नहीं करता ।
   याचमानान् (याचतः) पुरुषान् न कश्चित् आद्रियते ।

६. कल उसके मित्र उससे कुछ रुपये मांगने वाले हैं, इसलिए वह पहिले ही घर छोड़कर कुछ दिन के लिए और जगह चला गया है ।
   श्वः तस्य मित्राणि तं कानिचिद् रूप्यकाणि याचिष्यमाणानि (याचिष्यन्ति) सन्ति, अतः सः पूर्वमेव गृहं त्यक्त्वा कतिपयेभ्यः दिनेभ्यः अन्यत्र अव्राजीत् ।

७. जब तू उससे अपने रुपये मांगेगा तब मैं भी मांगूंगा ।
   त्वयि तं रूप्यकाणि याचिष्यमाणे (याचिष्यति) अहम् अपि याचिष्यामि (याचिष्ये; याचितास्मि, याचिताहे) ।

८. जब तुम भोजन पका लोगे तब खायेंगे ।
   त्वयि भोजनं पक्ष्यमाणे (पक्ष्यति) भक्षयिष्यामः ।

अथवा

   यदा त्वं भोजनं पक्ष्यसि (पक्ष्यसे) तदा वयं भक्षयिष्यामः ।

९. बिना पूछ बोलते हुए मनुष्य बुद्धिमानों के तिरस्कार के पात्र होते हैं ।
   अपृष्टाः ब्रुवाणाः (ब्रुवन्तः) पुरुषाः न्यक्कारभाजनानि भवन्ति प्रेक्षावताम् ।

१०. वृक्षों से फल तोड़ती हुई लड़की को मैंने कहा—बेटी ! पके पके फल तोड़ ले, कच्चे मत तोड़ना ।
   वृक्षान् फलानि अवचिन्वानां (अवचिन्वतीम्) बालाम् अवादिषम्-पुत्रिके ! पक्वानि फलानि अवचिनु, मा अवचैषीः (मा अवचेष्ठाः) अपक्वानि ।

११. सफेद कपड़े धारण करते हुए पुरुष को देखकर मेरे मन में भी सफेद कपड़े पहनने की इच्छा हुई।
श्वेतानि वासांसि दधानं (दधतं) पुरुषम् अवलोक्य मम अपि मनसि श्वेतानि वसनानि धातुं कामना अभूत्।

१२. दान देने आने वाले पुरुषों के सत्कार के लिये अधिष्ठाता ने अपनी यात्रा स्थगित कर दी।
दानं दास्यमानानां (दास्यतां) आगमिष्यतां पुरुषाणां सत्काराय अधिष्ठाता स्वयात्राम् अस्थगयत् (अतस्थगत्)।

१३. अनाथों का पोषण करते हुए मनुष्य सबके आदर के पात्र होते हैं।
दीनान् बिभ्राणाः (बिभ्रतः) पुरुषाः सर्वेषां मानभाजनानि भवन्ति।

१४. अनाथ कन्याओं को पालते हुए चौधरी देशराज जी ने अपने घर के आवश्यक कार्य भी छोड़ दिये।
पितृभ्यां हीनाः कन्याः बिभ्राणः (बिभ्रत्) चौधरी देशराजमहोदयः अनतिक्रमणीयानि गृहकृत्यानि अपि अत्याक्षीत्।

१५. जब आप प्रधानमन्त्री इन्दिराजी से बात करेंगे तब मैं भी आपके साथ जाऊँगा।
प्रधानमन्त्रिभिः भगवतीभिः इन्दिराभिः सह वार्तालापं करिष्यमाणैः (करिष्यद्भिः) भवद्भिः सह अहम् अपि यास्यामि।

अथवा

यदा भवन्तः 'प्रधानमन्त्रि' पदम् अलङ्कुर्वतीभिः भगवतीभिः इन्दिराभिः सह वार्तालापं करिष्यन्ति तदा अहम् अपि भवद्भिः सह यास्यामि।

१६. मैं व्याख्यान तो दूंगा पर समझने वाले छात्रों को ही बुलाओ।
अहं व्याख्यानं तु करिष्यामि किन्तु मनिष्यमाणान् एव छात्रान् आमन्त्रय।

१७. इस घोल में, कण-कण में व्याप्त होने वाली एसिड डालो।
अस्मिन् द्रवे प्रतिकणं अशिष्यमाणं (अक्ष्यमाणं) अम्लं पातय।

१८. विश्वामित्र राम लक्ष्मण को, महाबलवान् का वरण करने वाली सीता के पिता के घर ले गये।
विश्वामित्रः रामलक्ष्मणौ महाबलिष्ठं वरिष्यमाणायाः (वरीष्यमाणायाः, वरिष्यन्त्याः, वरीष्यन्त्याः, वरिष्यत्याः, वरीष्यत्याः) सीतायाः पितुः प्रासादं निन्ये (निनाय)।

१९. ये प्रार्थना कर रहे बालक उन प्रार्थना करने वालों से पहिले आये हैं, अतः इन्हीं को दो।

एते प्रार्थयमानाः बालकाः तेभ्यः प्रार्थयिष्यमाणेभ्यः पूर्वम् आगमन्, अतः एभ्यः देहि ।

२०. इन गणित जानना चाहती हुई कन्याओं को कुसुमलताजी के पास भेज दो ।
एताः गणितं जिज्ञासमानाः कन्याः कुसुमलतामहाभागायाः सकाशं प्रेषय ।

२१. बार-बार सत्यार्थप्रकाश पढ़ते हुए मनुष्यों को सत्य का बोध हो जाता है ।
सत्यार्थप्रकाशं पापठ्यमानानां जनानां सत्यस्य बोधः जायते ।

क्त, क्तवतु प्रत्यय

क्त और क्तवतु प्रत्ययों का नाम 'निष्ठा' है ।[1] भूतकाल में धातुमात्र से क्त और क्तवतु प्रत्यय होते हैं ।[2] इनमें से पहिले क्तवतु प्रत्यय के विषय में बताते हैं—

क्तवतु

क्तवतु प्रत्यय भूतकाल में धातुमात्र से होता है । क्तवतु प्रत्यय कर्ता अर्थ में होता है ।[3] क्तवतु में से क् और उ की इत्सञ्ज्ञा[4] और लोप होने पर 'तवत्' शेष रहता है । तवत् (=क्तवतु) के कित् होने के कारण, धातु में प्राप्त होने वाले गुण-वृद्धि आदि का निषेध हो जायेगा ।[5] वच्, स्वप्, यजादि तथा ग्रह, ज्या आदि धातुओं में सम्प्रसारण होगा ।[6] क्त्वा, शतृ आदि के समान तवत् (=क्तवतु) भी 'कृत्' सञ्ज्ञक प्रत्यय है[7], अतः क्तवतु (=तवत्) प्रत्ययान्त शब्द की प्रातिपदिक संज्ञा होगी[8] और फलस्वरूप उससे सुप् (सातों विभक्तियाँ) प्रत्यय लगेंगे ।[9] अर्थात् क्तवतु प्रत्ययान्त शब्द सुबन्त विशेषण बनेंगे । इनका प्रयोग क्रिया के रूप में भी होता है । सेट् धातुओं से परे 'तवत्' से पहिले इट् (=इ) आगम होगा[10] पुंल्लिङ्ग में मुट्

---

१. क्तक्तवतू निष्ठा (अष्टा.१.१.२६)
२. निष्ठा (अष्टा.३.२.१०२)
३. कर्त्तरि कृत् (अष्टा.३.४.६७)
४. 'लशक्वतद्धिते', 'उपदेशेऽजनुनासिक इत्' (अष्टा.१.३.८;२)
५. क्ङिति च (अष्टा.१.१.५)
६. 'वचिस्वपियजादीनां किति', 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (अष्टा.६.१.१५;१६)
७. कृदतिङ् (अष्टा.३.१.९३)
८. कृत्तद्धितसमासाश्च (अष्टा.१.२.४६)
९. स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसांङ्योस्सुप् (अष्टा.४.१.२)
१०. आर्धधातुकस्येड् वलादेः (अष्टा.७.२.३५)

(=प्रथमा के तीनों वचन तथा द्वितीया के एकवचन—द्विवचन) में नुम् आगम (=न्) होगा।[1] प्रथमा के एकवचन में 'न्' की उपधा को दीर्घ होगा।[2] इस प्रकार पुँल्लिङ्ग में 'भवत्' शब्द के समान रूप चलेंगे। नपुंसकलिङ्ग में केवल, प्रथमा-द्वितीया के बहुवचन में नुम् आगम (=न्) होगा[3] और 'जगत्' के समान रूप चलेंगे। स्त्रीलिङ्ग में ई (=ङीप्) लगेगा[4] और 'नदी' के समान रूप चलेंगे। अब हम कुछ धातुओं के तवत् (=क्तवतु) प्रत्ययान्त स्वरूप तीनों लिङ्गों में दर्शाते हैं।

धातु+क्तवतु	पुँल्लिङ्ग	(हिन्दी अर्थ)	स्त्रीलिङ्ग	नपुंसकलिङ्ग
श्रु+क्तवतु	श्रुतवान्	(सुन चुका)	श्रुतवती	श्रुतवत्
कृ+ ,,	कृतवान्	(कर चुका)	कृतवती	कृतवत्
हृ ,,	हृतवान्	(हर चुका)	हृतवती	हृतवत्
मृ ,,	मृतवान्	(मर चुका)	मृतवती	मृतवत्
ज्ञा ,,	ज्ञातवान्	(जान चुका)	ज्ञातवती	ज्ञातवत्
भी ,,	भीतवान्	(डर चुका)	भीतवती	भीतवत्
पा (पाने) ,,	पीतवान्	(पी चुका)	पीतवती	पीतवत्
पा (रक्षणे) ,,	पातवान्	(रक्षा कर चुका)	पातवती	पातवत्
दृश् ,,	दृष्टवान्	(देख चुका)	दृष्टवती	दृष्टवत्
प्रछ् ,,	पृष्टवान्	(पूछ चुका)	पृष्टवती	पृष्टवत्
वच् ,,	उक्तवान्	(कह चुका)	उक्तवती	उक्तवत्
वह् ,,	ऊढवान्	(ढो चुका)	ऊढवती	ऊढवत्
वप् ,,	उप्तवान्	(बो चुका, काट चुका)	उप्तवती	उप्तवत्
यज् ,,	इष्टवान्	(यज्ञ कर चुका)	इष्टवती	इष्टवत्
भिद् ,,	[5]भिन्नवान्	(फोड़ चुका)	भिन्नवती	भिन्नवत्
छिद् ,,	[5]छिन्नवान्	(काट चुका)	छिन्नवती	छिन्नवत्
नि+गॄ(निगरणे) ,,	[5]निगीर्णवान्	(निगल चुका)	निगीर्णवती	निगीर्णवत्
लू ,,	[6]लूनवान्	(काट चुका)	लूनवती	लूनवत्
हा (त्यागे) ,,	[7]हीनवान्	(छोड़ चुका)	हीनवती	हीनवत्
पच् ,,	[8]पक्ववान्	(पका चुका)	पक्ववती	पक्ववत्

१. उगिदचां सर्वनामस्थानेऽधातोः (अष्टा.७.१.७०)

२. अत्वसन्तस्य चाधातोः (अष्टा.६.४.१४)

३. नपुंसकस्य झलचः (अष्टा.७.१.७२)

४. उगितश्च (अष्टा.४.१.६)

५. 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (अष्टा. ८.२.४२) से, रेफ और दकार से परे वर्त्तमान निष्ठा के तकार को नकार।

६. 'ल्वादिभ्यः' (अष्टा. ८.२.४४) से निष्ठा के त को न।

७. 'ओदितश्च' (अष्टा. ८.२.४५) से ,, ,, ,, ,, ,,।

८. 'पचो वः' (अष्टा. ८.२.५२) से निष्ठा के त को व।

धातु+क्तवतु	पुंल्लिङ्ग	(हिन्दी अर्थ)	स्त्रीलिङ्ग	नपुंसकलिङ्ग
शुष् ,,	[1]शुष्कवान्	(सूख चुका)	शुष्कवती	शुष्कवत्
दह् ,,	दग्धवान्	(जला चुका)	दग्धवती	दग्धवत्
पिष् ,,	पिष्टवान्	(पीस चुका)	पिष्टवती	पिष्टवत्
गम् ,,	गतवान्	(जा चुका)	गतवती	गतवत्
रुध् ,,	रुद्धवान्	(रोक चुका)	रुद्धवती	रुद्धवत्
क्रुध् ,,	क्रुद्धवान्	(क्रोध कर चुका)	क्रुद्धवती	क्रुद्धवत्
घृष् ,,	घृष्टवान्	(घिस चुका)	घृष्टवती	घृष्टवत्
स्मृ ,,	स्मृतवान्	(याद कर चुका)	स्मृतवती	स्मृतवत्
बध् ,,	बद्धवान्	(बांध चुका)	बद्धवती	बद्धवत्
यत् ,,	[2]यत्तवान्	(प्रयत्न कर चुका)	यत्तवती	यत्तवत्
धा ,,	[3]हितवान्	(धारण कर चुका)	हितवती	हितवत्
हन् ,,	हतवान्	(मार चुका)	हतवती	हतवत्
अद् ,,	[4]जग्धवान्	(खा चुका)	जग्धवती	जग्धवत्
आप् ,,	आप्तवान्	(पा चुका)	आप्तवती	आप्तवत्
दा ,,	दत्तवान्	(दे चुका)	दत्तवती	दत्तवत्
स्था ,,	[5]स्थितवान्	(ठहर चुका)	स्थितवती	स्थितवत्
विश् ,,	विष्टवान्	(घुस चुका)	विष्टवती	विष्टवत्
हृष् ,,	हृष्टवान्	(प्रसन्न हो चुका)	हृष्टवती	हृष्टवत्
वृत् ,,	वृत्तवान्	(बरत चुका)	वृत्तवती	वृत्तवत्
युज् ,,	युक्तवान्	(मिला चुका)	युक्तवती	युक्तवत्
तुष् ,,	तुष्टवान्	(सन्तुष्ट हो चुका)	तुष्टवती	तुष्टवत्
नश् ,,	नष्टवान्	(नष्ट हो चुका)	नष्टवती	नष्टवत्
वस् (निवासे) ,,	उषितवान्	(रह चुका)	उषितवती	उषितवत
वद् ,,	उदितवान्	(कह चुका)	उदितवती	उदितवत्
ग्रह् ,,	गृहीतवान्	(ले चुका)	गृहीतवती	गृहीतवत्
रुद् ,,	रुदितवान्	(रो चुका)	रुदितवती	रुदितवत्
विद् ,,	विदितवान्	(जान चुका)	विदितवती	विदितवत्
क्रीड ,,	क्रीडितवान्	(खेल चुका)	क्रीडितवती	क्रीडितवत्
चोरि(चुर्+णिच्) ,,	चोरितवान्	(चुरा चुका)	चोरितवती	चोरितवत्
भक्षि(भक्ष्+णिच्) ,,	भक्षितवान्	(खा चुका)	भक्षितवती	भक्षितवत्
क्षालि(क्षल्+णिच्) ,,	क्षालितवान्	(धो चुका)	क्षालितवती	क्षालितवत्
कारि (कृ+णिच्) ,,	कारितवान्	(करवा चुका)	कारितवती	कारितवत्
जिज्ञास (ज्ञा+सन्) ,,	जिज्ञासितवान्	(जानना चाह चुका)	जिज्ञासितवती	जिज्ञासितवत्
पापठ्य (पठ्+यङ्) ,,	पापठितवान्	(बार बार पढ चुका)	पापठितवती	पापठितवत्

१. 'शुषः कः' (अष्टा. ८.२.५१) से निष्ठा के त को क।
२. 'श्वीदितो निष्ठायाम्' (अष्टा. ७.२.१४) से इ (=इट्) का निषेध।
३. 'दधातेर्हिः' (अष्टा. ७.४.४२) से 'धा' के स्थान पर 'हि' आदेश।
४. अदो जग्धिर्ल्यप्ति किति (अष्टा. २.४.३६) से अद् के स्थान पर जग्ध् आदेश।
५. द्यतिस्यतिमास्थामित्ति किति (अष्टा. ७.४.४०) से स्था के आ को इकार आदेश।

अब क्तवतु-प्रत्ययान्त 'कृतवत्' शब्द के तीनों लिङ्गों में सम्पूर्ण रूप उदाहरणार्थ दर्शाते हैं।

पुँल्लिङ्ग कृतवत् शब्द (कृ+क्तवतु)

प्र०—	कृतवान्	कृतवन्तौ	कृतवन्तः
द्वि०—	कृतवन्तम्	कृतवन्तौ	कृतवतः
तृ०—	कृतवता	कृतवद्भ्याम्	कृतवद्भिः
च०—	कृतवते	कृतवद्भ्याम्	कृतवद्भ्यः
प०—	कृतवतः	कृतवद्भ्याम्	कृतवद्भ्यः
ष०—	कृतवतः	कृतवतोः	कृतवताम्
स०—	कृतवति	कृतवतोः	कृतवत्सु
सं०प्र०—	हे कृतवन्	हे कृतवन्तौ	हे कृतवन्तः

स्त्रीलिङ्ग कृतवती शब्द (कृतवत्+ङीप्)

प्र०—	कृतवती	कृतवत्यौ	कृतवत्यः
द्वि०—	कृतवतीम्	कृतवत्यौ	कृतवतीः
तृ०—	कृतवत्या	कृतवतीभ्याम्	कृतवतीभिः
च०—	कृतवत्यै	कृतवतीभ्याम्	कृतवतीभ्यः
प०—	कृतवत्याः	कृतवतीभ्याम्	कृतवतीभ्यः
ष०—	कृतवत्याः	कृतवत्योः	कृतवतीनाम्
स०—	कृतवत्याम्	कृतवत्योः	कृतवतीषु
सं०प्र०—	हे कृतवति	हे कृतवत्यौ	हे कृतवत्यः

नपुंसकलिङ्ग कृतवत् शब्द (कृ+क्तवतु)

प्र०—	कृतवत्	कृतवती	कृतवन्ति
द्वि०—	कृतवत्	कृतवती	कृतवन्ति

शेष विभक्तियों में पुँल्लिङ्ग 'कृतवत्' शब्द के समान रूप चलेंगे।

अभ्यास

१. हम सब चित्तौड़ का किला देख चुके, सब लड़कियाँ भी देख चुकीं किन्तु मेरे मित्रों ने अभी नहीं देखा।
वयं चित्तौड़दुर्गं दृष्टवन्तः, सर्वाः बालिकाः अपि दृष्टवत्यः किन्तु मम मित्राणि अधुनावधि न दृष्टवन्ति।

२. तुम्हारी माता ने तुमसे क्या पूछा था=यौष्माकी माता युष्मान् किं पृष्टवती?

३. जब वे अपनी सब बातें कह चुके, तब मैंने उनसे कहा?
यदा ते स्वीयाः सर्वाः वार्ताः उक्तवन्तः तदा अहं तान् उक्तवान्।

अथवा

स्वीयाः सर्वाः वार्ताः उक्तवतः तान् अहम् उक्तवान्।

४. मेरे दोनों मित्र मेरे घर में एक महीना रहे।
मम मित्रे मम गेहे मासं यावत् उषितवती।

५. जो मनुष्य भार ढो चुके उनको भोजन दे दो, जो ढो रहे हैं उनको जल्दी ढोने के लिये कहो।
ये मनुष्याः भारम् ऊढवन्तः तेभ्यः भोजनं दत्त, ये वहन्तः सन्ति, तान् शीघ्रं वोढुं कथयत। अथवा
भारम् ऊढवद्भ्यः भोजनं दत्त, भारं वहतः शीघ्रं वोढुं कथयत।

६. जो तुम्हें कुछ कह चुके उनका बुरा मत मानो, जो कुछ कह रहे हैं उनकी सुनो।
ये युष्मान् किञ्चित् उदितवन्तः तेभ्यः मा क्रुधत, ये किमपि वदन्तः सन्ति तान् शृणुत। अथवा
युष्मान् उदितवद्भ्यः मा क्रुधत, वदतः शृणुत।

अथवा

अलं युष्मान् किञ्चिद् उदितवद्भ्यः क्रुद्ध्वा, वदतः शृणुत।

७. किसान बीज बो चुके—कृषकाः बीजानि उप्तवन्तः।

८. जब वे बीज बो चुके तब मैंने गेहूं बोये।
बीजानि उप्तवत्सु तेषु अहं गोधूमान् उप्तवान्।

९. ये दोनों नाई सबके बाल काट चुके।
एतौ नापितौ सर्वेषां केशान् उप्तवन्तौ।

१०. जो ब्रह्मचारी यज्ञ कर चुके उनको भोजन दो, जो यज्ञ करेंगे उनको पीछे देना।
इष्टवद्भ्यः ब्रह्मचारिभ्यः भोजनं यच्छ, यक्ष्यमाणेभ्यः (यक्ष्यद्भ्यः) पश्चात् यच्छेः

११. दाल पका चुकी विमला ने, रोटी पकाती हुई अपनी बहन के हाथ से आटा छीनकर कहा—हट तुझे रोटी पकानी नहीं आती, मैं पकाऊँगी।
सूपं पक्ववती विमला, रोटिकाः पचमानायाः (पचन्त्याः) स्वभगिन्याः हस्तात् पिष्टपिण्डम् आच्छिद्य अवादीत्—अपसर, अनभिज्ञा असि रोटिकापाकस्य, अहं पक्ष्ये (पक्ष्यामि)।

१२. जब विमला सब रोटियां पका चुकी तब कमला ने कहा—तूने अच्छी रोटी बनाई है! सारी जला दी।
सर्वाः रोटिकाः पक्ववतीं विमलां कमला अवादीत्—अहो, अतिशोभनाः रोटिकाः पक्ववती असि, सर्वाः दग्धवती।

१३. जब सब ब्रह्मचारी प्रातराश ले चुके तब मैं पहुंचा।
प्रातराशं गृहीतवत्सु सर्वेषु ब्रह्मचारिषु अहम् आगमम्।

१४. सब लड़कियां अपना अपना आटा पीस चुकीं।
सर्वाः बालिकाः निजं निजं चूर्णं पिष्टवत्यः।

१५. जो लोग वृक्षों को काट चुके उनकी चिंता छोड़ो, जो काट रहे हैं उनको सजा दो।
वृक्षान् छिन्नवतां चिन्ताम् अपहाय छिन्दतः पुरुषान् दण्डयत।

१६. इस चोर ने तो घड़े ही फोड़े हैं उन्होंने तो दीवार फोड़ दी।
अयं चोरः तु घटान् एव भिन्नवान् ते तु भित्तिं भिन्नवन्तः।

१७. जब जेलर सब चोरों को बन्द कर चुका तब मैं दो चोरों को लेकर गया।

सर्वान् चोरान् कारां रुद्धवति काराध्यक्षे अहं द्वौ चोरौ गृहीत्वा तदन्तिकम् अगमम् ।

१८. रो चुके बालक के पास जाकर माता ने कहा—तू विद्यालय जाने से पहिले प्रतिदिन रोता है ।
रुदितवन्तं बालकम् उपसृत्य माता अवादीत्—त्वं विद्यालयगमनात् प्राक् नित्यं रोदिषि ।

१९. जब पुत्रों पर पिता क्रोध कर चुका, तब मैंने उनको खाने के लिये कहा ।
पुत्रेभ्यः क्रुद्धवन्तं पितरम् अहं भोक्तुम् अवादिषम् ।

२०. जब योगेन्द्र सारा दूध पी चुका, तब माता ने उसके पास जाकर कहा—देवेन्द्र के लिये कुछ नहीं छोड़ा ! सब पी गया ।
सकलं पयः पीतवन्तं योगेन्द्रम् उपसृत्य माता अब्रवीत्—देवेन्द्राय किञ्चिद् अपि न समतिष्ठिपः (समस्थापयः) ? सर्वं पीतवान् असि ।

२१. चन्दन घिस चुके साधुओं के पास जाकर मैंने कहा—थोड़ा चन्दन मुझे भी दो ।
मलयजं घृष्टवतां साधूनां समीपं गत्वा अहम् अचकथम्—मह्यम् अपि किञ्चित् चन्दनं यच्छत । अथवा
मलयजं घृष्टवतः साधून् उपगम्य अवादिषम्—किञ्चित् चन्दनं यच्छत ।

२२. जब तू यहाँ से चला गया तब मैंने तुझे रात-दिन याद किया ।
इतः गतवन्तं त्वाम् अहं नक्तन्दिवं स्मृतवान् ।

२३. मरे हुओं की चिन्ता छोड़कर जीते हुओं की रक्षा कर ।
मृतवतां चिन्ताम् अपहाय जीवतः रक्ष (बिभृहि, बिभृष्व, त्रायस्व) ।

२४. जब रावण सीता को हर ले गया तब राम लक्ष्मण कुटिया पर पहुंचे ।
सीतां हृतवति रावणे रामलक्ष्मणौ कुटीरम् आपतुः ।

२५. मेरे मित्रों ने मेरे शत्रुओं को बाँध लिया ।
मम मित्राणि मम शत्रून् बद्धवन्ति ।

२६. जब धन के लिये सब यत्न कर चुके तब मैंने उनको व्यापार के लिये प्रेरणा की ।
धनाय सर्वथा यत्तवतः तान् अहं वाणिज्याय प्राचूचुदम् (प्रैरिरम्) ।

२७. नेत्रहीनों के लिये आप लोगों ने क्या प्रबन्ध किया है ?
नेत्रहीनेभ्यः भवन्तः कं प्रबन्धं कृतवन्तः ?

२८. जब हारीत के शिष्यों ने काम क्रोधादि सब शत्रुओं को मार दिया तब दिल में शांति आई ।
सर्वान् कामक्रोधादीन् शत्रून् हतवतां हारीतशिष्याणां हृदि सौख्यम् अजायत ।

२९. भोजन खा चुके मनुष्यों के आगे से पात्र ले आओ ।
भोजन जग्धवतां पुरुषाणाम् अग्रतः पात्राणि आहरत ?

३०. मेरे मित्रों ने बादामपाक खाकर दूध पिया।
मम मित्राणि वातादपाकं भुक्त्वा क्षीरं पीतवन्ति।

३१. शराब पिये हुए इन सिपाहियों ने एक की भी रक्षा नहीं की।
सुरां पीतवन्तः एते आरक्षिणः एकम् अपि न पातवन्तः।

३२. जब राजा रघु ब्राह्मणों को सारा धन दे चुका तब कौत्स वहाँ पहुंचा।
ब्राह्मणेभ्यः अशेषं द्रविणं दत्तवति राजनि रघौ कौत्सः तम् आपेदे।

३३. जब मैं उनकी सब बातें सुन चुका तब उन्होंने मुझसे पांच प्रश्न पूछे।
तेषां सर्वाः वार्ताः श्रुतवन्तं मां ते पञ्च प्रश्नान् अप्राक्षुः।

३४. सुख से मेरे घर में ठहरे मेरे मित्रों ने मुझसे कहा—अब हमें जाने की अनुमति दीजिये।
मद्गेहं सुखम् अधिष्ठितवन्ति मे मित्राणि माम् अवादिषुः—भगवन्! अस्मान् गन्तुम् अनुजानीहि।

३५. जो साँप बिल में घुस चुके उनकी प्रतीक्षा मत कर, इधर उधर दौड़ते हुओं को मार?
बिले प्रविष्टवतः सर्पान् मा प्रतीक्षिष्ठाः इतस्ततः धावमानान् (धावतः) जहि।

३६. धन पाकर प्रसन्न हुए लोगों से गोशाला के लिये दान ला।
धनं प्राप्य हृष्टवद्भ्यः जनेभ्यः गोशालायै (गोशालाय) दानम् आनय।

३७. जो नहाये थे वे तो खाकर निवृत्त हो चुके?
ये स्नातवन्तः ते तु अशित्वा निवृत्तवन्तः?

३८. चोरों से डरी हुई लड़कियों से मैंने कहा यहाँ चोर का कोई डर नहीं सुख से सो जाओ।
चोरेभ्यः भीतवतीः बालाः अहम् अचकथं नास्ति काचिद् अत्र चौरभीः सुखं स्वपत।

३९. जब अध्यक्ष सब अध्यापकों को नियुक्त कर चुका तब मैंने पूछा—इनकी योग्यता देख ली आपने?
अखिलान् अध्यापकान् नियुक्तवन्तम् अध्यक्षम् अहं पृष्टवान्—किं त्वम् एषां योग्यतां दृष्टवान् असि?

४०. जब वे खूब खीर खाकर अच्छी तरह संतुष्ट हो गये तब मैंने हरेक के लिये पाँच पाँच रुपये दक्षिणा में दिये।
कणेहत्य पायसान्नं सम्भुज्य तुष्टवद्भ्यः तेभ्यः प्रत्येकस्मै पञ्च रूप्यकाणि अहं दक्षिणायां दत्तवान्।

४१. मेरी माता ने मेरी चालाकी जान ली? = मम माता मे सर्वं चातुर्यं विदितवती?

४२. नष्ट हुई वस्तुओं की चिन्ता मत कर = अलं नष्टवतां वस्तूनां चिन्तया।

४३. नष्ट हुए धनों की पण्डित चिन्ता नहीं करते।
नष्टवन्ति धनानि न शोचन्ति पण्डिताः।

४४. कपड़े धो चुके धोबियों को पुए बाँटो।
वस्त्राणि क्षालितवद्भ्यः रजकेभ्यः अपूपान् वितर।

४५. मकानों पर सफेदी करा चुके मकान मालिकों में से प्रत्येक से एक कूची ले आ।
भवनेषु सुधालेपं कारितवतां गृहस्वामिनां प्रत्येकस्मात् एकां कूचीम् आनय।

४६. न्याय के प्रमेयों की जिज्ञासा करने वालों की कक्षा में व्याख्यान दूंगा।
न्यायप्रमेयान् जिज्ञासिष्यमाणानाम् अधिकक्षं व्याख्यास्यामि।

४७. इस घण्टाघर के अङ्कों को बार-बार पढ़ चुके मनुष्यों से उनका स्वरूप पूछो।
अस्य कुद्रङ्गस्य अङ्कान् पापठितवतः मनुष्यान् तत्स्वरूपं पृच्छत।

४८. बहुत पका चुकी गृहिणी को अब मेरे भोजन के लिये मत सताओ।
पापचितवतीं गृहिणीम् अधुना मम भोजनाय मा पीपिडः (मा पिपीडः)

क्त प्रत्यय

भूतकाल में धातुमात्र से क्त प्रत्यय होता है। पूर्व में बता चुके हैं कि क्त और क्तवतु प्रत्ययों का नाम 'निष्ठा' है। 'क्त' में से 'क्' की इत्सञ्ज्ञा और लोप हो जाने पर 'त' शेष रहता है। कित्त्व के कारण गुणवृद्धिनिषेध और सम्प्रसारण आदि कार्य तथा इट् आगम आदि कार्य क्तवतु प्रत्यय के समान ही यहां पर भी होंगे। क्तवतु-प्रत्ययान्त शब्दों के अन्तिम भाग 'वान्' (वत्) को हटा देने पर जो स्वरूप बचता है बस वैसा ही क्त-प्रत्ययान्त का स्वरूप होगा। यथा क्तवतु→श्रुतवान्। क्त—श्रुतः। हृतवान्—हृतः। भुक्तवान्—भुक्तः आदि। 'श्रुत' 'भुक्त' आदि के रूप पुँल्लिङ्ग में 'राम' शब्द के समान, स्त्रीलिङ्ग में 'श्रुता, श्रुते, श्रुताः' आदि 'रमा' शब्द के समान और नपुंसकलिङ्ग में 'श्रुतं श्रुते श्रुतानि' आदि 'ज्ञान' शब्द के समान रूप चलेंगे। क्त प्रत्यय प्रायः करके कर्म अर्थ में अथवा भाव अर्थ में आता है।[1] सकर्मक धातुओं से कर्म में और अकर्मक धातुओं से कर्ता और भाव में। क्तप्रत्ययान्त शब्द सुबन्त होते हैं और विशेषणों के रूप में प्रयुक्त होते हैं। भूतकालिक क्रिया के रूप में भी इनका प्रयोग होता है।

उदाहरणार्थ कुछ धातुओं के क्त-प्रत्ययान्त स्वरूप तीनों लिङ्गों में दर्शाते हैं—

---

१. तयोरेव कृत्यक्तखलर्थाः (अष्टा. ३.४.७०)

धातु + क्त	पुंलिङ्ग	(हिन्दी अर्थ)	स्त्रीलिङ्ग	नपुंसकलिङ्ग
कृ + क्त	कृतः	(किया हुआ)	कृता	कृतम्
ज्ञा ,,	ज्ञातः	(जाना हुआ)	ज्ञाता	ज्ञातम्
पा (पाने) ,,	पीतः	(पिया हुआ)	पीता	पीतम्
पा (रक्षणे) ,,	पातः	(रक्षा किया हुआ)	पाता	पातम्
दृश् ,,	दृष्टः	(देखा हुआ)	दृष्टा	दृष्टम्
वच् ,,	उक्तः	(कहा हुआ)	उक्ता	उक्तम्
भिद् ,,	भिन्नः	(फाड़ा हुआ)	भिन्ना	भिन्नम्
पच् ,,	पक्वः	(पकाया हुआ)	पक्वा	पक्वम्
शुष् ,,	शुष्कः	(सूखा हुआ)	शुष्का	शुष्कम्
हन् ,,	हतः	(मारा हुआ)	हता	हतम्
अद् ,,	जग्धः	(खाया हुआ)	जग्धा	जग्धम्
लिख् ,,	लिखितः	(लिखा हुआ)	लिखिता	लिखितम्
ग्रह् ,,	गृहीतः	(लिया हुआ)	गृहीता	गृहीतम्
चोरि ,,	चोरितः	(चोरा हुआ)	चोरिता	चोरितम्
कारि ,,	कारितः	(कराया हुआ)	कारिता	कारितम्
पापठ्य ,,	पापठितः	(बार-बार पढ़ा हुआ)	पापठिता	पापठितम्
पिपठिष ,,	पिपठिषितः	(पढ़ने को चाहा हुआ)	पिपठिषिता	पिपठिषितम्

अकर्मक धातुओं से भाव और कर्ता दोनों में क्त प्रत्यय होता है।[1] गति अर्थवाली (=ज्ञान, गमन और प्राप्ति अर्थ वाली) धातु से तथा श्लिष्, शीङ्, स्था, आस्, वस्, जन्, रुह्, और जूष् इन धातुओं से कर्ता, कर्म और भाव तीनों में क्त प्रत्यय होगा।[2] श्लिष्, शीङ् आदि धातुएं यद्यपि अकर्मक हैं तथापि उपसर्ग साथ लगने पर ये सकर्मक हो जाती हैं, अतः इनका पृथक् से ग्रहण किया गया है।

कर्तृवाच्य—जब हम यह कहते हैं कि 'कर्ता में प्रत्यय होगा' अथवा 'कर्तृवाच्य' में प्रत्यय होगा' इसका अभिप्राय यह है कि—कर्ता में प्रथमा विभक्ति होगी, कर्म में द्वितीया होगी और क्रिया, कर्त्ता के अनुसार आयेगी।

कर्मवाच्य—जब हम यह कहते हैं कि 'कर्म में प्रत्यय होगा' अथवा 'कर्मवाच्य में प्रत्यय होगा' उसका अभिप्राय यह है कि – कर्त्ता में तृतीया होगी, कर्म में प्रथमा होगी और कर्म के अनुसार क्रिया बदलेगी। इसके लिये यह श्लोक रट लो—

यदा कर्ता प्रथमान्तः कर्मणि द्वितीया तदा।
यदा कर्ता तृतीयान्तः कर्मणि प्रथमा तदा॥

भाववाच्य—भाव क्रिया को कहते हैं। भाववाच्य में कर्ता में तृतीया विभक्ति होती है। कर्म कोई होता ही नहीं है, अतः क्तप्रत्यान्त भाववाचक शब्द एकवचन और

---

१. लः कर्मणि च भावे चाकर्मकेभ्यः (अष्टा. ३.४.६९)

२. गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (अष्टा. ३.४.७२)

नपुंसकलिङ्ग में आयेगा। जब लकारों का वाच्यपरिवर्त्तन सिखायेंगे तब बतायेंगे कि जिस लकार को बदला जाता है उसी लकार के (आत्मनेपद) प्रथमपुरुष के एकवचन की क्रिया भाववाच्य में आयेगी अर्थात् कर्त्ता चाहे एक हो, दो हों अथवा बहुत हों, (=एकवचन हो, द्विवचन हो अथवा बहुवचन हो); क्रिया सदा प्रथमपुरुष के एकवचन में ही प्रयुक्त होगी।

अब गत्यर्थक आदि धातुओं के क्तप्रत्ययान्त स्वरूप दर्शाते हैं—

गत्यर्थक→ गम् + क्त	गतः	गया हुआ स्थान आदि / जा चुका मनुष्य	गता	गतम्
अकर्मक→ जागृ + क्त	जागरितः	(जागा हुआ)	जागरिता	जागरितम् (जागा गया)
श्लिष् + क्त	उपश्लिष्टः	आलिङ्गन किया हुआ / आलिङ्गन कर चुका	उपश्लिष्टा	उपश्लिष्टम्
शीङ् ,,	उपशयितः	समीप सोया गया / समीप सो चुका	उपशयिता	उपशयितम्
स्था ,,	अधिष्ठितः	समीप स्थित हुआ गया / समीप स्थित हो चुका	अधिष्ठिता	अधिष्ठितम्
आस् ,,	उपासितः	उपासना किया गया / उपासना कर चुका	उपासिता	उपासितम्
वस् ,,	उपोषितः	समीप बसा गया / समीप बस चुका	उपोषिता	उपोषितम्
जन् ,,	अनुजातः	जिसके पीछे पैदा हुआ / जो पीछे पैदा हुआ	अनुजाता	अनुजातम्
रुह् ,,	आरूढः	चढ़ा गया वृक्ष / चढ़ चुका मनुष्य	आरूढा	आरूढम्
जृष् ,,	अनुजीर्णः	जिसके पीछे जीर्ण हुआ / जो जीर्ण हो चुका	अनुजीर्णा	अनुजीर्णम्

इन गम् आदि १० धातुओं के उदाहरण दर्शाते हैं—

धातु (+क्तप्रत्यय)	कर्तृवाच्य	कर्मवाच्य	भाववाच्य
गत्यर्थक गम् + क्त→	रामः ग्रामं गतः।	रामेण ग्रामः गतः।	रामेण गतम्
अकर्मक-जागृ + क्त→	रामः जागरितः।	————————	रामेण जागरितम्
श्लिष् ,,→	अहं स्वमित्राणि आश्लिष्टः।	मया स्वमित्राणि आश्लिष्टानि।	मया आश्लिष्टम्
शीङ् ,,→	ते शय्याम् अधिशयिता।	तैः शय्या अधिशयिता।	तैः अधिशयितम्
स्था ,,→	ते मम ग्रामम् अधिष्ठिताः।	तैः मम ग्रामः अधिष्ठितः।	तैः अधिष्ठितम्

आस् + क्त → तौ कटम् अध्यासितौ ।

ताभ्यां कटः अध्यासितः । तैः अध्यासितम्

वस् ,, → मित्राणि देशम् अध्युषितानि ।

मित्रैः देशः अध्युषितः । मित्रैः अध्युषितम्

जन् ,, → ओम्प्रभा सुशीलाम् अनुजाता ।

ओम्प्रभया सुशीला अनुजाता । ओम्प्रभया अनुजातम्

रुह् ,, → विमला वृक्षम् अधिरूढा ।

विमलया वृक्षः अधिरूढः । विमलया अधिरूढम्

जॄष् ,, → कटिवस्त्रं कञ्चुकम् अनुजीर्णम् ।

कटिवस्त्रेण कञ्चुकः अनुजीर्णः कटिवस्त्रेण जीर्णम्

अभ्यास

१. हमने रणथम्भौर का किला देख लिया, इन महिलाओं ने भी देख लिया, पर मेरे मित्रों ने नहीं देखा ।

अस्माभिः रणथम्भौर-दुर्गं दृष्टं, आभिः महिलाभिः अपि दृष्टं, किन्तु मम मित्रैः न दृष्टम् ।

२. मैंने उससे सब बातें पूछी = मया सः सर्वाः वार्ताः पृष्टः ।

३. तुम्हारी माता ने तुम से क्या पूछा था ? = युष्माकं मात्रा यूयं किं पृष्टाः ?

४. मेरे दो मित्र महीने भर मेरे घर रहे ।

मम मित्राभ्यां मासं यावत् मम गृहे उषितम् ।

५. मैंने उसको पुस्तकें दीं = कर्तृवाच्य—अहं तस्मै पुस्तकानि दत्तवान् ।

कर्म०—मया तस्मै पुस्तकानि दत्तानि ।

६. मैंने उसको कम्बल दिया ।

कर्तृ०—अहं तस्मै कम्बलं दत्तवान् । कर्म०—मया तस्मै कम्बलः दत्तः ।

७. मैंने उसको दो रोटियां दी ।

कर्तृ०—अहं तस्मै द्वे रोटिके दत्तवान् । कर्म०—मया तस्मै द्वे रोटिके दत्ते ।

८. मेरे मित्र ने वन में दो शेर देखे ।

कर्तृ०—मम मित्रं वने सिंहौ दृष्टवत् । कर्म०—मम मित्रेण वने सिंहौ दृष्टौ ।

९. मैंने ऋग्वेदादिभाष्य भूमिका पढ़ी ।

कर्तृ०—अहम् ऋग्वेदादिभाष्यभूमिकां पठितवान् ।

कर्म०—मया ऋग्वेदादिभाष्यभूमिका पठिता ।

१०. दयानन्द ने सारे शास्त्र पढ़े ।

कर्तृ०—दयानन्दः सर्वाणि शास्त्राणि पठितवान् ।

कर्म०—दयानन्देन सर्वाणि शास्त्राणि पठितानि ।

११. बनारस में रहते हुए मैंने आयुर्वेद पढ़ा।

कर्तृ०—वाराणस्यां वसन् अहम् आयुर्वेदं पठितवान्।
कर्म०—वाराणस्यां वसता मया आयुर्वेदः पठितः।

१२. कल घर जाते हुए हमने मोहन के बाग में आम खाये।
कर्तृ०—ह्यः गृहं गच्छन्तः वयं मोहनस्य उद्यानम् अधिष्ठाय आम्राणि (२-३) आस्वादितवन्तः। कर्म०—ह्यः गृहं गच्छद्भिः अस्माभिः मोहनस्य उद्यानम् अधिष्ठाय आम्राणि (१-३) आस्वादितानि।

१३. लखनऊ में रहते हुए आप सबने महीने में कितने कार्य किये।

कर्तृ०—लक्ष्मणपुरम् अधिवसन्तः भवन्तः मासेन[1] कियन्ति कार्याणि (२-३) कृतवन्तः? कर्म०—लक्ष्मणपुरम् अधिवसद्भिः भवद्भिः मासेन[1] कियन्ति कार्याणि (१-३) कृतानि?

१४. शङ्कर ने चार वर्ष में चारों वेद पढ़ लिये।

कर्तृ० — शङ्करः चतुर्भिः वर्षैः[1] चतुरः वेदान् अधीतवान्।
कर्म०— शङ्करेण चतुर्भिः वर्षैः[1] चत्वारः वेदाः अधीताः।

१५. कुडामल ने पांच वर्ष संस्कृत पढ़ी (पर आई नहीं)।
कर्तृ० — कुडामलः पञ्चवर्षाणि[2] संस्कृतम् (२.१) अधीतवान्।
कर्म०—कुडामलेन पञ्च वर्षाणि[2] संस्कृतम् (१.१) अधीतम्।

१६. योरोप में घूमते हुए आप कितने देशों में रहे?

कर्तृ०—हरिवर्षे भ्रमन्तः भवन्तः कियतः देशान् अध्युषितवन्तः (अध्युषिताः)
कर्म०—हरिवर्षे भ्रमद्भिः भवद्भिः कियन्तः देशाः अध्युषिताः।

१७. बम्बई से आते हुए आप रास्ते में कितने स्थानों पर ठहरे।

कर्तृ०—मुम्बापुर्याः आगच्छन्तः भवन्तः मार्गे कियन्ति स्थानानि (२-३) अधिष्ठिताः (अधिष्ठितवन्तः)।
कर्म०—मुम्बापुर्याः आगच्छद्भिः भवद्भिः मार्गे कियन्ति स्थानानि (१-३) अधिष्ठितानि।

१८. भोजन पकाती हुई माता ने दो पुत्रों को कहा।

---

१. जहाँ फल-प्राप्ति हो जाने पर (काम में सफलता मिल जाने पर) क्रिया की परिसमाप्ति हो जाती है वहाँ कालवाची शब्द में तृतीया विभक्ति (अपवर्गे तृतीया अष्टा. २.३.६) होती है। २. अन्यथा द्वितीया विभक्ति (कालाध्वनोरत्यन्तसंयोगे, अष्टा. २.३.५) होती है।

कर्तृ०—भोजनं पचन्ती (पचमाना) माता पुत्रौ (२.२) उदितवती।
कर्म०—भोजनं पचन्त्या (पचमानया) मात्रा पुत्रौ (१.२) उदितौ।

१६. विद्यालय जाते हुए मेरे दो मित्रों ने खेलते हुए मोहन को पुस्तकें दी।
कर्तृ०—विद्यालयं गच्छन्ती मम मित्रे क्रीडते मोहनाय द्वे पुस्तके (२-२) दत्तवती।
कर्म०—विद्यालयं गच्छद्भ्यां मम मित्राभ्यां क्रीडते मोहनाय द्वे पुस्तके (१-२) दत्ते।

२०. खेलती हुई लड़कियों ने फल खाती हुई शारदा को मारा।
कर्तृ०—क्रीडन्त्यः बालाः फलानि भक्षयन्तीं शारदां ताडितवत्यः।
कर्म०—क्रीडन्तीभिः बालाभिः फलानि भक्षयन्ती शारदा ताडिता।

२१. अतिथियों को भोजन देते हुए देवेन्द्र ने लड़कों को और भोजन लाने को कहा।
कर्तृ०—अतिथिभ्यः भोजनं ददत् देवेन्द्रः बालकान् अन्यत् भोजनम् आनेतुं कथितवान्।
कर्म०—अतिथिभ्यः भोजनं ददता देवेन्द्रेण बालकाः अन्यत् भोजनम् आनेतुं कथिताः।

२२. वृक्ष से गिरते हुए पके हुए आम देखकर दौड़ते हुए सुरेन्द्र ने खेलती हुई दीपिका से कहा—दौड़ दौड़ आम खा।
कर्तृ०—वृक्षात् पतन्ति पक्वानि आम्राणि दृष्ट्वा धावन् (धावमानः) सुरेन्द्रः क्रीडन्तीं दीपिकाम् उक्तवान्—धाव (धावस्व) आम्राणि खाद।
कर्म०—वृक्षात् पतन्ति पक्वानि आम्राणि दृष्ट्वा धावता (धावमानेन) सुरेन्द्रेण क्रीडन्ती दीपिका उक्ता—धाव (धावस्व) आम्राणि खाद।

२३. वनमार्ग से जाते हुए दो पुरुषों ने वन में घूमते हुए दो शेरों को देखते हुए, लकड़ियों का भार ले जाते हुए कुछ मनुष्यों से कहा—लकड़ियों का भार फेंक दो, वन में दो शेर घूम रहे हैं।
कर्तृ०—वनमार्गेण गच्छन्तौ पुरुषौ अरण्ये अटन्तौ सिंहौ पश्यन्तौ, काष्ठभारान् उद्वहतः जनान् कथितवन्तौ—अरे! भारान् क्षिपत वने सिंहौ भ्रमतः।
कर्म०—वनमार्गेण गच्छद्भ्यां पुरुषाभ्याम् अरण्ये अटन्तौ सिंहौ पश्यद्भ्यां, काष्ठभारान् उद्वहन्तः जनाः कथिताः—अरे! भारान् क्षिपत वने सिंहौ भ्रमतः।

२४. घर का काम करती हुई दो लड़कियों ने पास में खेलते हुए अपने भाई से कहा—मां को बुला ला।

कर्तृ०—गृहकार्याणि कुर्वंत्यौ बाले समीपे क्रीडन्तं स्वभ्रातरम् उदितवत्यौ—मातरम् आकारय।

कर्म०—गृहकार्याणि कुर्वतीभ्यां बालाभ्यां समीपे क्रीडन् स्वभ्राता उदित :—मातरम् आकारय।

२५. अपनी बगिया के बढ़ते हुए वृक्षों को देखकर खुश होते हुए बच्चों ने पास में खाट पर बैठे हुए अपने पिता से कहा—हमारे वृक्ष बढ़ रहे हैं।

कर्तृ०—निजनिष्कुटस्य वर्द्धमानान् वृक्षान् विलोक्य मोदमानाः बालाः निकटे खट्वाम् अध्यासितं पितरम् उक्तवन्तः—अस्माभिः आरोपिताः वृक्षाः वर्धमानाः सन्ति।

कर्म०—निजनिष्कुटस्य वर्द्धमानान् वृक्षान् विलोक्य मोदमानैः बालैः निकटे खट्वाम् अध्यासितः पिता उक्तः—अस्माभिः आरोपिताः वृक्षा, वर्धमानाः सन्ति।

२६. आप सबने क्या लिखा।

कर्तृ०—भवन्तः किं लिखितवन्तः। कर्म०—भवद्भिः किं लिखितम्।

२७. वे कहाँ सोये थे ?

कर्तृ०—ते कुत्र सुप्तवन्तः (सुप्ताः) ?
भाववाच्य—तैः कुत्र सुप्तम् ?

२८. तुम्हारी माताजी हरिद्वार में कहाँ ठहरी थीं ?

कर्तृ०—यौष्माकीना माता हरिद्वारे कुत्र स्थितवती (स्थिता) ?

भाव०—यौष्माकीनया मात्रा हरिद्वारे कुत्र स्थितम् ?

२९. मैंने सुना है, मध्यप्रदेश में बहुत से आदमी हैजे से मर गए।

कर्तृ०—अहं श्रुतवान् मध्यप्रदेशे बहवः जनाः विषूचिकारोगेण मृताः।
भाव०— मया श्रुतं मध्यप्रदेशे बहुभिः जनैः विषूचिकारोगेण मृतम्।

३०. उसका सारा धन नष्ट हो गया।

कर्तृ०—तस्य सर्वं धनं नष्टवत् (नष्टम्)
भाव०—तस्य सर्वेण धनेन नष्टम्।

३१. उसको मेरी बातें अच्छी लगी।

कर्तृ०—तस्मै मम वार्ताः रुचिताः (रुचितवत्यः)।
भाव०—तस्मै मम वार्ताभिः रुचितम्।

३२. राजपाल के सब काम हो गये।

कर्तृ०—राजपालस्य सर्वाणि कार्याणि भूतवन्ति (भूतानि)।
भाव०—राजपालस्य सर्वैः कार्यैः भूतम्।

३३. तालाब पर बहुत सी लड़कियाँ खेलीं थीं।

कर्तृ०—तडागे बह्व्यः बालाः क्रीडितवत्यः (क्रीडिताः)।
भाव०—तडागे बह्वीभिः बालाभिः क्रीडितम्।

३४. आज बिजली चमकी।

कर्तृ०—अद्य चपला दीप्तवती (दीप्ता)।
भाव०—अद्य चपलया दीप्तम्।

णिनि प्रत्यय

जातिवाची शब्द को छोड़कर अन्य कोई कर्म कारक आदि सुबन्त शब्द पहिले लगा हो (=उपपद में हो) तो धातुमात्र से स्वभाव अर्थ में णिनि प्रत्यय होता है।[1] यथा—उष्णभोजी=गर्म भोजन खाने के स्वभाव वाला। उपमानवाची कर्तृ कारक सुबन्त उपपद में रहने पर भी धातु-मात्र से णिनि होता है।[2] यथा—उष्ट्रक्रोशी=ऊंट के समान चिल्लाने वाला। व्रत (=शास्त्रीय नियम) का प्रसङ्ग हो तब भी सुबन्त उपपद में रहने पर धातु मात्र से णिनि प्रत्यय होता है[3], यथा—स्थण्डिलशायी=चबूतरे पर ही सोने वाला। किसी क्रिया को पुनः पुनः करने के विषय में भी णिनि प्रत्यय होता है[4], यथा—क्षीरपायिणः उशीनराः=बार बार दूध पीने वाले उशीनर देशवासी। सुबन्त उपपद में रहने पर मन् धातु से मानने अर्थ में[5] अथवा अपने को मानने अर्थ में[6] भी णिनि प्रत्यय होता है, यथा—दर्शनीयमानी=दर्शनीय मानने वाला अथवा स्वयं को दर्शनीय मानने वाला। णिनि में से 'ण्' की इत्सञ्ज्ञा[7] और अन्तिम इ की इत्सञ्ज्ञा[8] तथा लोप होने पर 'इन्' भाग शेष रहता है। इन् (=णिनि) प्रत्यय के णित् होने से इगन्त (=इ, उ, ऋ जिसके अन्त में हो) धातु के अन्तिम स्वर को वृद्धि[9] होकर ऐ, औ, आर् हो जायेंगे और ऐ के स्थान पर आय् तथा औ के स्थान पर आव् हो जायेगा[10]। यथा—स्थण्डिल शी+इन्=स्थण्डिलशायी, ध्वाङ्क्ष रु+इन्=ध्वाङ्क्षरावी, शुष्कहृ+इन्=शुष्कहारी आदि। धातु की उपधा

---

१. सुप्यजातौ णिनिस्ताच्छील्ये (अष्टा. ३.२.७८)
२. कर्तर्युपमाने (अष्टा. ३.२.७९)
३. व्रते (अष्टा. ३.२.८०)
४. बहुलमाभीक्ष्ण्ये (अष्टा. ३.२.८१)
५. मनः (अष्टा. ३.२.८३)
६. आत्ममाने खश्च (अष्टा. ३.२.८२)
७. चुटू (अष्टा. १.३.७)
८. उपदेशेऽजनुनासिक इत् (अष्टा. १.३.२)
९. अचो ञ्णिति (अष्टा. ७.२.११५)
१०. एचोऽयवायावः (अष्टा. ६.१.७८)

में ह्रस्व अकार होगा तो उसको वृद्धि (=आ) हो जायेगी।[1] यथा—दर्शनीय मन्+इन्=दर्शनीयमानी। धातु की उपधा में इक् (=इ, उ, ऋ) होगा तो उसको गुण (=ए, ओ, अर्) हो जायेगा।[2] यथा—शुद्ध लिख्+इन्—शुद्धलेखी, उष्ण भुज्+इन्=उष्णभोजी,मयूर नृत्+इन्=मयूरनर्ती आदि। यदि धातु के अन्त में आ होगा तो य् (=युक्) का आगम होगा।[3] यथा—क्षीर पा+इन्=क्षीरपा य् इन्=क्षीरपायी आदि।

ये सब णिनि (=इन्) प्रत्ययान्त शब्द विशेषण होते हैं। पुंल्लिङ्ग में 'उष्णभोजी उष्णभोजिनौ उष्णभोजिनः' आदि रूप 'करिन्' शब्द के रूपों के समान चलेंगे। प्रथमा के एकवचन में 'इन्' के इ को दीर्घ होगा।[4] स्त्रीलिङ्ग में ई (ङीप्) अन्त में लगने[5] पर उष्णभोजिनी, स्थण्डिलशायिनी आदि स्वरूप हो जायेगा और 'उष्णभोजिनी उष्णभोजिन्यौ उष्णभोजिन्यः' आदि रूप, 'गौरी' के समान चलेंगे। नपुंसकलिङ्ग में उष्णभोजि उष्णभोजिनी, उष्णभोजीनि' आदि रूप 'वारि' शब्द के समान चलेंगे।

णिनि प्रत्ययान्त शब्दों का विग्रह इस प्रकार होगा—उष्णभोजी→उष्णं भोक्तुं तच्छीलः (=तत्स्वभावः) इति उष्णभोजी अथवा उष्णं भोक्तुं शीलं यस्य सः उष्णभोजी। उष्ट्रक्रोशी→उष्ट्र इव क्रोशति इति उष्ट्रक्रोशी। आदि॥ 'उष्णम्', 'उष्ट्रः' आदि सुबन्तों का 'भोजिन्', 'क्रोशिन्' आदि शब्दों के साथ उपपदतत्पुरुष समास होता है।[6] परिणाम-स्वरूप दोनों शब्द मिलकर एक शब्द (=प्रातिपदिक-सञ्ज्ञक) हो जायेगा[7] और मध्यवर्ती विभक्ति ('अम्', 'सु' आदि) का लोप हो जायेगा[8]।

अब हम णिनि-प्रत्ययान्त कुछ शब्दों के स्वरूपों को तीनों लिङ्गों में दर्शाते हैं—

---

१. अत उपधायाः (अष्टा. ७.२.११६)
२. पुगन्तलघूपधस्य च (अष्टा.७.३.८६)
३. आतो युक् चिण्कृतोः (अष्टा.७.३.३३)
४. सौ च (अष्टा. ६.४.१३)
५. ऋन्नेभ्यो ङीप् (अष्टा. ४.१.५)
६. उपपदमतिङ् (अष्टा. २.२.१९)
७. कृत्तद्धितसमासाश्च (अष्टा. १.२.४६)
८. सुपो धातुप्रातिपदिकयोः (अष्टा. २.४.७१)

उपपद + धातु + णिनि = प्रातिपदिक	पुंल्लिङ्ग शब्द	(हिन्दी अर्थ)	स्त्रीलिङ्ग शब्द	नपुंसकलिङ्ग०
ब्रह्मन् + चर् + इन् = ब्रह्मचारिन्	ब्रह्मचारी	(ब्रह्म में विचरण के स्वभाव वाला)	ब्रह्मचारिणी	ब्रह्मवारि
अकारण + द्विष् + इन् = अकारणद्वेषिन्	अकारणद्वेषी	(अकारण द्वेष करने के स्वभाव वाला)	अकारणद्वेषिणी	अकारणद्वेषि
सुख + दा + इन् = सुखदायिन्	सुखदायी	(सुख देने के स्वभाव वाला)	सुखदायिनी	सुखदायि
क्षिप्र + कृ + इन् = क्षिप्रकारिन्	क्षिप्रकारी	(जल्दी करने के स्वभाव वाला)	क्षिप्रकारिणी	क्षिप्रकारि
सर्व + भक्ष् + इन् = सर्वभक्षिन्	सर्वभक्षी	(सब कुछ खाने के स्वभाव वाला)	सर्वभक्षिणी	सर्वभक्षि
मांस + अश् + इन् = मांसाशिन्	मांसाशी	(बार-बार मांस खाने वाला)	मांसाशिनी	मांसाशि
चिर + स्था + इन् = चिरस्थायिन्	चिरस्थायी	(बहुत समय तक टिकने के स्वभाव वाला)	चिरस्थायिनी	चिरस्थायि
परद्रव्य + अपहृ + इन् = परद्रव्यापहारिन्	परद्रव्यापहारी	(परायी वस्तु बार-बार चुराने वाला)	परद्रव्यापहारिणी	परद्रव्यापहारि
अग्रे + भू + इन् = अग्रेभाविन्[1]	अग्रेभावी	(आगे होने के स्वभाव वाला)	अग्रेभाविनी	अग्रेभावि
अनु + जीव् + इन् = अनुजीविन्	अनुजीवी	(आश्रय से जीने के स्वभाव वाला)	अनुजीविनी	अनुजीवि
चिर + जीव् + इन् = चिरजीविन्	चिरजीवी	(दीर्घकाल तक जीने के स्वभाव वाला)	चिरजीविनी	चिरजीवि
वन + विहृ + इन् = वनविहारिन्	वनविहारी	(वन में बार-बार विचरने वाला)	वनविहारिणी	वनविहारि
परपिण्ड + भुज् + इन् = परपिण्डभोजिन्	परिपिण्डभोजी	(पराया अन्न बार-बार खाने वाला)	परपिण्डभोजिनी	परपिण्डभोजि
अनु + या + इन् = अनुयायिन्	अनुयायी	(पीछे चलने के स्वभाव वाला)	अनुयायिनी	अनुयायि
युद्ध + अभिलष् + इन् = युद्धाभिलाषिन्	युद्धाभिलाषी	(लड़ने की लालसा के स्वभाव वाला)	युद्धाभिलाषी	युद्धाभिलाषि
[2]साधु + कृ + इन् = साधुकारिन्	साधुकारी	(उत्तम प्रकार से करने वाला)	साधुकारिणी	साधुकारि
[3]ब्रह्मन् + वद् + इन् = ब्रह्मवादिन्	ब्रह्मवादी	(वेद या ईश्वर का प्रवचन करने वाला)	ब्रह्मवादिनी	ब्रह्मवादि
पण्डित + मन् + इन् = पण्डितमानिन्	पण्डितमानी	(अपने आपको पण्डित मानने वाला)	पण्डितमानिनी	पण्डितमानि

१. तत्पुरुषे कृति बहुलम् (अष्टा. ६.३.१४) से सप्तमी के लुक् (लोप) का निषेध। २. साधुकारिणि च [वा०] (अष्टा. ३.२.७८)
३. ब्रह्मणि वदः [वा०] (अष्टा. ३.२.७८)

कुछ धातुओं से ताच्छील्य (= तत्स्वभावता), व्रत अथवा पुनः पुनः करना आदि अर्थ न हो तब भी णिनि प्रत्यय केवल सामान्य कर्त्ता अर्थ में होता है।[1]

उपपद + धातु + णिनि, प्रातिपदिक	पुंलिङ्ग शब्द	(हिन्दी अर्थ)	स्त्रीलिङ्ग शब्द	नपुंसकलिङ्ग शब्द
ग्रह् + णिनि + इन् = ग्राहिन्	ग्राही	(ग्रहण करने वाला)	ग्राहिणी	ग्राहि
उत् + सह् + इन् = उत्साहिन्	उत्साही	(उत्साह करने वाला)	उत्साहिनी	उत्साहि
स्था + इन् = स्थायिन्	स्थायी	(टिकाऊ)	स्थायिनी	स्थायि
मत्रि + इन् = मन्त्रिन्	मन्त्री	(सलाह देने वाला)	मन्त्रिणी	मन्त्रि
निवस् + इन् = निवासिन्	निवासी	(रहने वाला)	निवासिनी	निवासि

घिनुण् प्रत्यय

णिनि के समान ही घिनुण् प्रत्यय भी है। कुछ धातुओं से तत्स्वभावता, उस धर्म वाला (=गुण वाला) होना अथवा क्रिया को उत्तम रीति से करना इन अर्थों में घिनुण् प्रत्यय होता है[2]। घिनुण् के घ् की इत्सञ्ज्ञा,[3] उ की इत्सञ्ज्ञा[4] और ण् की इत्सञ्ज्ञा[5] तथा लोप होने पर 'इन्' भाग शेष रहता है। घिनुण् (=इन्) भी णित् है अतः णिनि के समान ही यहाँ पर भी धातु को वृद्धि और युक् आगम आदि कार्य होंगे। उपधा को गुण भी पूर्ववत् होगा। विशेषता यह है कि यह प्रत्यय घित् है, अतः धातु के अन्त में यदि च् या ज् होगा तो उसके स्थान पर क्रमशः क् या ग् हो जायेगा[6]।

---

१. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (अष्टा. ३.१.१३८)

२. 'शमित्यष्टाभ्यो घिनुण्', 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च', 'वौ कषलसकत्थस्रम्भः', 'अपे च लषः', 'प्रे लपसृद्रुमथवदवसः' (अष्टा. ३.२.१४१, १४२, १४३, १४४, १४५)।

३. लशक्वतद्धिते (अष्टा. १.३.८)।

४. उपदेशेऽजनुनासिक इत् (अष्टा. १.३.२)

५. हलन्त्यम् (अष्टा. १.३.३.)।

६. चजोः कु घिण्ण्यतोः (अष्टा. ७.३.५२)।

धातु + घिनुण् = प्रातिपदिक	पुंलिङ्ग शब्द	(हिन्दी अर्थ)	स्त्रीलिङ्ग शब्द	नपुंसकलिङ्ग शब्द
प्र मद् + घिनुण् (इन्) = प्रमादिन्	प्रमादी	(लापरवाही के स्वभाव वाला)	प्रमादिनी	प्रमादि
उत् मद् + इन् = उन्मादिन्	उन्मादी	(पागलपन के गुण से युक्त)	उन्मादिनी	उन्मादि
शम् + इन् = [1]शमिन्	शमी	(शान्ति गुण वाला)	शमिनी	शमि
श्रम् + इन् = [1]श्रमिन्	श्रमी	(श्रम करने के स्वभाव वाला)	श्रमिणी	श्रमि
सम्पृच् + इन् = सम्पर्किन्	सम्पर्की	(सम्पर्क में रहने के स्वभाव वाला)	सम्पर्किणी	सम्पर्कि
सम्सृज् + इन् = संसर्गिन्	संसर्गी	(संगति में रहने के स्वभाव वाला)	संसर्गिणी	संसर्गि
परिदह् + इन् = परिदाहिन्	परिदाही	(दाह करने के गुण से युक्त)	परिदाहिनी	परिदाहि
दुष् + इन् = दोषिन्	दोषी	(विकार गुण वाला)	दोषिणी	दोषि
द्विष् + इन् = द्वेषिन्	द्वेषी	(अप्रीति रखने के स्वभाव वाला)	द्वेषिणी	द्वेषि
द्रुह् + इन् = द्रोहिन्	द्रोही	(अनिष्ट चाहने के स्वभाव वाला)	द्रोहिणी	द्रोहि
युज् + इन् = योगिन्	योगी	(समाधि लगाने के, जोड़ने के स्वभाव वाला)	योगिनी	योगि
विविच् + इन् = विवेकिन्	विवेकी	(निर्णय = विचार करने के स्वभाव वाला)	विवेकिनी	विवेकि
त्यज् + इन् = त्यागिन्	त्यागी	(त्याग करने के स्वभाव वाला)	त्यागिनी	त्यागि
रञ्ज् + इन् = [2]रागिन्	रागी	(आसक्ति धर्म वाला)	रागिणी	रागि
भज् + इन् = भागिन्	भागी	(सेवन करने के स्वभाव वाला)	भागिनी	भागि
विलस् + इन् = विलासिन्	विलासी	(आमोद प्रमोद के गुण वाला)	विलासिनी	विलासि
विलष् + इन् = विलाषिन्	विलाषी	(विशेष रूप से चाहने वाला)	विलाषिणी	विलाषि
प्रलप् + इन् = प्रलापिन्	प्रलापी	(बकवास करने के स्वभाव वाला)	प्रलापिनी	प्रलापि
प्रमथ् + इन् = प्रमाथिन्	प्रमाथी	(मथने के गुण वाला)	प्रमाथिनी	प्रमाथि
प्रवस् + इन् = प्रवासिन्	प्रवासी	(परदेश में रहने वाला)	प्रवासिनी	प्रवासि

१. नोदात्तोपदेशस्य मान्तस्यानाचमेः (अष्टा. ७.३.३४) से वृद्धि का निषेध।

२. घिनुण्-विधायक सूत्र ('सम्पृचानु०······,) में ही 'रज' पढा है, इस निर्देश से 'रञ्ज्' के ञ् का लोप अथवा 'घिनुणि च रञ्जेरुपसङ्ख्यानम्' (अष्टा. ६.४.२४) इस वार्तिक से न् का लोप।

अभ्यास

१. ब्रह्मचारी वेदपाठी होते हैं—ब्रह्मचारिणः वेदपाठिनः भवन्ति ।

२. बिना कारण जो द्वेष करता हो उसे मनुष्य कैसे प्रसन्न करे ।
'अकारणद्वेषि तु यस्य मानसं कथं नरस्तं परितोषयिष्यति' ।

३. अधिक गरम खाने वालों के पेट में अलसर होते हैं, ऐसा चिकित्सकों का कहना है ।
अत्युष्णभोजिनां मानवानाम् उदरे व्रणाः भवन्ति इति चिकित्सकानां राद्धान्तः ।

४. दूध पीने वाले कभी रोगी नहीं होते—न खलु क्षीरपायिणः रोगिणः भवन्ति ।

५. विद्वान् पुत्र सुख देते हैं—विद्वांसः पुत्राः सुखदायिनः भवन्ति ।

६. जल्दी करने वालों के काम सफल नहीं होते ।
क्षिप्रकारिणां कार्याणि न फलवन्ति भवन्ति ।

७. सब कुछ खा जाने वाले ब्राह्मण किसी को अच्छे नहीं लगते ।
सर्वभक्षिणः ब्राह्मणाः न कस्मैचिद् अपि रोचन्ते ।

८. मुसलमान यों कहते हैं कि ये मूंग की दाल पीने वाले हम मांसाहारियों के साथ क्या लड़ेंगे ।
इत्थं किल मुहम्मदमतानुयायिनः व्याहरन्ति—किं कृत्वा मुद्गसूपपायिनः एते मांसाशिभिः अस्माभिः सह योत्स्यन्ते ?

९. झांसी की रानी लक्ष्मी बाई दूर दृष्टि वाली, विचार करके काम करने वाली, सब का हित चाहने वाली और अपने देश को मानने वाली थी ।
झांसीराज्यस्य राज्ञी लक्ष्मीदेवी दूरदर्शिनी, विचारकारिणी, सर्वहिताभिलाषिणी स्वदेशमानिनी चासीत् ।

१०. ये टेरिकॉट के कपड़े सूती वस्त्रों से अधिक टिकाऊ होते हैं ।
एतानि टेरिकॉटाख्यानि वासांसि कार्पासवासोभ्यः सुतरां चिरस्थायीनि भवन्ति ।

११. दूसरों का धन चुराने वालों के मनोरथ यदि सिद्ध हो जायें, तो संसार नष्ट हो जाये ।
परद्रव्यापहारिणां चेत् मनोरथाः सिध्येयुः, सर्वं जगत् विनश्येत् ।

१२. 'सर्पाणां खलानां च परद्रव्यापहारिणाम् ।
अभिप्राया न सिध्यन्ति तेनेदं वर्त्तते जगत्' ॥ [श्लोक]
—सांपों, दुष्टों और पराया धन चुराने वालों के सब मंसूबे पूरे नहीं होते, इसलिये यह संसार टिका हुआ है ।

१३. आगे होने वाली घटना को कौन जानता है।
को जानाति अग्रे भाविनीं घटनाम् ?

१४. जो सेवकों को बिना मिष्टान्न दिये स्वयं अकेले खाते हैं, वे पाप ही खाते हैं ऐसा वेदों ने हमें बताया है।
ये अनुजीविभ्यः मिष्टान्नम् अदत्त्वा एकाकिनः भुञ्जते, ते पापम् एव भुञ्जते इति वेदाः अस्मान् प्रत्यपीपदन्।

१५. वन में विचरण करने वाले तपस्वी तप किया करते थे।
वनविहारिणः तपस्विनः तपः तेपुः।

१६. पराया अन्न खाने वाले आदर का पात्र नहीं होते।
अभाजनानि किल परपिण्डभोजिनः भवन्ति समादरस्य।

१७. लड़ाई चाहने वाले राजा अपने देश को खतरे में डाल देते हैं।
युद्धाभिलाषिणः पार्थिवाः स्वदेशं सन्देहदोलाम् अधिरोपयन्ति।

१८. बदनाम गाँव के रहने वालों का नगर निवासी आदर नहीं करते।
कुग्रामवासिनः जनान् नगरवासिनः न अभिनन्दन्ति।

१९. पर्वतीय लोग बिन्ध्य क्षेत्र में रहने वाली लड़कियों से विवाह नहीं करते हैं।
पर्वतीयाः जनाः विन्ध्यवासिनीः कन्याः न समुद्वहन्ति।

२०. मेरे मित्र सदा मेरे पीछे चलने वाले हैं।
सदा माम् अनुयायीनि सन्ति मे मित्राणि।

२१. प्रिय बोलने वाले लोग सब को वश में कर लेते हैं।
प्रियवादिनः जनाः सर्वान् वशंवदान् विदधति।

२२. कौन ऐसा मनुष्य है जो मधुरभाषिणी स्त्री को पसंद न करे।
को नाम जनः मधुरभाषिणीं वनितां न अभिनन्देत्।

२३. अपने आप को पण्डित मानने वाले ब्राह्मण अपने मत को वेद से सिद्ध न कर सके।
पण्डितमानिनः ते ब्राह्मणाः स्वमतं वेदप्रतिपादितं दर्शयितुं न अशक्नुवन्।

२४. परब्रह्म ने प्रकृति से यह सृष्टि रची है, ऐसा ब्रह्मवादी कहते हैं।
परब्रह्मणा प्रकृत्या इयं सृष्टिः विरचिता इति ब्रह्मवादिनः वदन्ति।

२५. उत्साह सम्पन्न लोग स्थिर सम्पत्ति को प्राप्त करते हैं।
उत्साहिनः जनाः स्थायिनीं सम्पदं प्राप्नुवन्ति।

२६. मन्त्रिमण्डल के तीन मन्त्री राजस्थान के रहने वाले हैं।
मन्त्रिमण्डलस्य त्रयः मन्त्रिणः राजस्थान-निवासिनः सन्ति।

२७. ये लापरवाह लोग कभी विद्या के ग्रहण करने वाले नहीं हो सकते।
एते प्रमादिनः जनाः जातुचिदपि विद्याग्राहिणः न भवितुम् अर्हन्ति।

इसी प्रकार अन्य णिजन्त धातुओं से भी उपरिलिखित नियमानुसार परस्मैपद और आत्मनेपद दोनों प्रकार के प्रत्यय होते हैं, किन्तु अब हम केवल परस्मैपद प्रत्यय (अथवा कहीं आत्मनेपद प्रत्यय) ही लिखेंगे। दोनों के लिखने से विस्तार हो जायेगा।

सभी णिजन्त धातुओं से वे सभी कृत् प्रत्यय भी होते हैं जिनका विधान धातुमात्र से किया गया है। उदाहरणार्थ कुछ प्रत्ययों का योग दर्शाया जा रहा है। यह पहिले ही बताया जा चुका है कि कृदन्त शब्द सुबन्त हो जाते हैं और उनके सातों विभक्तियों में रूप चलते हैं।

पाठि (पठ्+णिच्)

क्त्वा→पाठयित्वा=पढ़ाकर

क्तवतु→(पु.) पाठितवान्=पढ़ाया (पढ़ा चुका)

(स्त्री.) पाठितवती=पढ़ाया (पढ़ा चुकी)

(नपुं.) पाठितवत्=पढ़ाया (पढ़ा चुका)

शतृ→(पु.) पाठयन्=पढ़ाता हुआ

(स्त्री.) पाठयन्ती=पढ़ाती हुई

(नपुं.) पाठयत्=पढ़ाता हुआ मित्र

पाठयन्ती=पढ़ाते हुए दो मित्र

पाठयन्ति=पढ़ाते हुए बहुत मित्र

शानच्→(पु.) पाठयमानः=पढ़ाता हुआ

(स्त्री.) पाठयमाना=पढ़ाती हुई

(नपुं.) पाठयमानम्=पढ़ाता हुआ कुल

लृट्स्थानीय शतृ→

पाठयिष्यन्=भविष्य में पढ़ाने वाला

पाठयिष्यन्ती= ,, पढ़ाने वाली
पाठयिष्यती = ,, ,,

पाठयिष्यत्=,, ,, पढ़ाने वाला कुल

लृट्स्थानीय शानच्→

पाठयिष्यमाणः=भविष्य में पढ़ाने वाला

पाठयिष्यमाणा=,, ,, पढ़ाने वाली

पाठयिष्यमाणम्=,, ,, पढ़ाने वाला मित्र

ल्युट्→पाठनम्=पढ़ाना

ण्वुल्→पाठकः=पढ़ाने वाला

पाठिका=पढ़ाने वाली

पाठकम्=पढ़ाने वाला मित्र

णमुल्→पाठं पाठम्=पढ़ा पढ़ाकर

तृच्-तृन्→पाठयिता=पढ़ाने वाला

पाठयित्री=पढ़ाने वाली

पाठयितृ=पढ़ाने वाला मित्र

णिनि→छात्रपाठी=छात्रों को पढ़ाने वाला

छात्रपाठिनी=,, ,, पढ़ाने वाली

छात्रपाठि=,, ,, पढ़ाने वाला मित्र

क्त→पाठितः=पढाया गया

पाठिता=पढ़ायी गयी

पाठितम्=पढ़ाया हुआ कुल

तव्यत्→पाठयितव्यः=पढ़ाने योग्य पुरुष

पाठयितव्या= ,, ,, योग्य स्त्री

पाठयितव्यम्= ,, ,,, कुल

अनीयर्→पाठनीयः=,, ,, पुरुष

पाठनीया= ,, ,, स्त्री

पाठनीयम्= ,, ,, कुल

यत्→पाठ्या= ,, ,, पुरुष

पाठ्यः= ,, ,, स्त्री

पाठ्यम्= ,, ,, कुल

कर्मवाच्य में पाठि से शानच्→

पाठ्यमानः=पढ़ाया जाता हुआ

पाठ्यमाना=पढ़ाई जाती हुई

पाठ्यमानम्=पढ़ाया जाता हुआ

इसी प्रकार अन्य णिजन्त धातुओं से भी कृत्प्रत्यय होते हैं। उदाहरणार्थ **एक** (पाठि) धातुओं के शब्द लिख दिये हैं। अन्य धातु के स्वयं तुम लोगों को **बना** लेने चाहिएं। अब पाठि धातु के तिङन्त तथा सुबन्त शब्दों का वाक्यों में **अभ्यास** संक्षेप से करवाते हैं।

१. जिस विद्यालय में तुम पढ़ाते हो उसमें पढ़ाने वाले कितने हैं।
यस्मिन् विद्यालये यूयं पाठयथ तत्र कियन्तः पाठयितारः (पाठकाः सन्ति)

२. विरजानन्द ने दयानन्द को आर्ष ग्रन्थ ही पढ़ाये ।
विरजानन्दः दयानन्दम् आर्षग्रन्थान् एव पाठयाञ्चकार (अपाठयत्, अपीपठत्)

३. तू कल दसवीं को केमेस्ट्री पढ़ावेगा मैं तो उसे सदा पढ़ाऊँगा ।]
त्वं श्वः दशमीं रसायनशास्त्रं पाठयितासि अहं तु तां सर्वदा पाठयिष्यामि ।

४. व्याकरण पढ़ाकर ही इनको वेद पढ़ा ।
व्याकरणं पाठयित्वा एव एतान् वेदं पाठय (पाठयेः)

५. यदि मेरे गुरुजन मुझे प्रेमपूर्वक न पढ़ाते तो मैं मूर्ख ही रह जाता ।
यदि मम गुरुजनाः मां प्रेम्णा न अपाठयिष्यन् तर्हि अहं मूर्खः एव अस्थास्यम् ।

६. कुसुमलता ने अपनी कक्षा को पुरुषसूक्त पढ़ाते हुए सृष्टि-उत्पत्ति का विषय भी पढ़ा दिया ।
कुसुमलता स्वां कक्षां पुरुषसूक्तं पाठयन्ती (पाठयमाना) सृष्ट्युत्पत्तिविषयम् अपि अपीपठत् (पाठितवती) ।

७. सुमित्रा लड़कियों को पाठ पढ़ाती हुई व्याकरण भी पढ़ायेगी ।
सुमित्रा बालिकाः पाठान् पाठयिष्यन्ती (पाठयिष्यमाणा) व्याकरणम् अपि पाठयिष्यति ।

८. मेरे चारों मित्र संस्कृत पढ़ाते हुए धीमे स्वर में बोलते हैं ।
मम चत्वारि मित्राणि संस्कृतं पाठयन्ति मन्देन स्वरेण भाषन्ते ।

९. ये मूर्ख लोग पढ़ाने योग्य नहीं हैं ।
एते मूर्खाः छात्राः अपाठनीयाः (अपाठ्याः, अपाठयितव्याः) खलु ।

१०. मेरे पहिले पढ़ाये हुए छात्र इतने बुद्धिमान नहीं थे जितने कि अब पढ़ाये जा रहे छात्र हैं ।

मम पूर्वं पाठिताः छात्राः न आसन् तावन्तः मतिमन्तः यावन्तः सम्प्रति पाठयमानाः छात्राः सन्ति ।

यहां कर्मवाच्य में परिवर्त्तन करते समय स्वेच्छा से प्रयोज्य कर्म को अथवा मुख्य कर्म को बदल सकते हैं । यथा—

१. मैंने उन्हें अष्टाध्यायी पढ़ायी ।
कर्तृ०—अहं तान् अष्टाध्यायीम् अपाठयम् (अपीपठम्)
कर्म०—मया ते अष्टाध्यायीम् अपाठ्यन्त (अपाठिषत, पाठिताः)

मया तान् अष्टाध्यायी अपाठयत (अपाठि, पाठिता)।

(२) स्था (=ष्ठा) = ठहरना स्थापि (स्था+णिच्) ठहराना, रखना, स्थापित करना।

लट्—[1]स्थापयति	स्थापयतः	स्थापयन्ति
लिट्—स्थापयाञ्चकार	स्थापयाञ्चक्रतुः	स्थापयाञ्चक्रुः
लुट्—स्थापयिता	स्थापयितारौ	स्थापयितारः
लृट्—स्थापयिष्यति	स्थापयिष्यतः	स्थापयिष्यन्ति
लोट्—स्थापयतु (स्थापयतात्)	स्थापयताम्	स्थापयन्तु
लङ्—अस्थापयत्	अस्थापयताम्	अस्थापयन्
वि० लिङ्—स्थापयेत्	स्थापयेताम्	स्थापयेयुः
लुङ्—अतिष्ठिपत्	अतिष्ठिपताम्	अतिष्ठिपन्
अतिष्ठिपः	अतिष्ठिपतम्	अतिष्ठिपत
अतिष्ठिपम्	अतिष्ठिपाव	अतिष्ठिपाम
लृङ्—अस्थापयिष्यत्	अस्थापयिष्यताम्	अस्थापयिष्यन्

आत्मनेपद प्रत्ययों में रूप 'पाठि' के समान 'स्थापयते स्थापयेते स्थापयन्ते' आदि बना लें।

अभ्यास

१. व्रतानन्द जी ने अनेक गुरुकुल स्थापित किये थे।
   व्रतानन्दमहाभागः नैकानि गुरुकुलानि अतिष्ठिपत् (स्थापयाञ्चकार)।
२. इस धर्मशाला के कर्मचारी गरीब यात्रियों को यहां नहीं ठहराते हैं।
   अस्याः धर्मशालायाः कार्यकर्त्तारः निर्धनान् यात्रिणः अत्र न स्थापयन्ति।
३. देवव्रत अपने भतीजों को अपने घर में रखेगा।
   देवव्रतः स्वभ्रातृजान् स्वगेहे स्थापयिष्यति (स्थापयिता)।
४. गुरु अपने शिष्यों को नियम में रक्खे।
   गुरुः निजान् अन्तेवासिनः नियमे स्थापयतु (स्थापयेत्)
५. महर्षि दयानन्द ने 'आर्यसमाज' की स्थापना की थी।
   महर्षिः दयानन्दः 'आर्यसमाजम्' समस्थापयत् (समतिष्ठिपत्)।

---

१. आकारान्त धातु होने के कारण 'अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ (अष्टा० ६.३.३६) से पुक् (=प्) आगम हुआ। सभी आकारान्त धातुओं से इसी प्रकार पुक् आगम होगा।

६. यदि मैं इसको अपने पास न ठहराता तो तुम इससे कैसे मिलते ?
यदि अहम् एनं स्वान्तिके न अस्थापयिष्यम् तर्हि यूयं एनं कथं समगमिष्यत ?

(३) दाण्, (४) डुदाञ्=दाने (देना); दापि, दापि=दिलवाना

लट्—दापयति	दापयतः	दापयन्ति
लिट्—दापयाञ्चकार	दापयाञ्चक्रतुः	दापयाञ्चक्रुः
लुट्—दापयिता	दापयितारौ	दापयितारः
लृट्—दापयिष्यति	दापयिष्यतः	दापयिष्यन्ति
लोट्—दापयतु (दापयतात्)	दापयताम्	दापयन्तु
लङ्—अदापयत्	अदापयताम्	अदापयन्
वि० लिङ्—दापयेत्	दापयेताम्	दापयेयुः
लुङ्—अदीदपत्	अदीदपताम्	अदीदपन्
अदीदपः	अदीदपतम्	अदीदपत
अदीदपम्	अदीदपाव	अदीदपाम
लृङ्—अदापयिष्यत्	अदापयिष्यताम्	अदापयिष्यन्

१. स्वामी अग्निवेश मजदूरों को मालिकों से पूरा वेतन दिलवाते हैं।
स्वामी अग्निवेशमहाभागः श्रमिकेभ्यः अधिपतिभिः पूर्णं वेतनं दापयति।
२. वसिष्ठ ने दशरथ से विश्वामित्र को राम और लक्ष्मण दिलवाये।
वसिष्ठः दशरथेन विश्वामित्राय रामलक्ष्मणौ दापयाञ्चकार।
३. जो मुझे सौ बोरी सीमेंट दिलवायेगा उसका धन्यवाद करूंगा।
यः मह्यं शतं गोणीः सीमेंटं दापयिष्यति (दापयिता) तस्मै धन्यवादं वितरिष्यामि (वितरीष्यामि; वितरितास्मि, वितरीतास्मि)।
४. जैसी दक्षिणा तूने उसे दिलवायी वैसी मुझे दिलवा।
यादृशीं दक्षिणां त्वं तस्मै अदापयः (अदीदपः) तादृशीं मह्यम् अपि दापय (दापयेः)।
५. यदि यह गृहस्थ मुझे पुस्तकें नहीं दिलवाता तो मैं कैसे पढ़ता ?
यदि अयं गृहस्थः मह्यं पुस्तकानि न अदापयिष्यत् तर्हि अहं कथम् अपठिष्यम्।

(५) ष्णा (=स्ना) शौचे=नहाना; स्नापि, स्नपि[1]=नहलाना

लट्—स्नापयति	स्नापयतः	स्नापयन्ति
(स्नपयति	स्नपयतः	स्नपयन्ति)

१. स्ना (=ष्णा) धातु की (उपसर्ग से रहित अवस्था में) विकल्प से मित् सञ्ज्ञा होती है ('ग्लास्नावनुवमांच' धातुसूत्र भ्वा० ५४५)। मित्सञ्ज्ञा पक्ष में णिच् परे रहने पर (मितां ह्रस्वः अष्टा० ६.४.९०) उपधा को ह्रस्व हो जायेगा।

लिट्

स्नापयाञ्चकार स्नापयाञ्चक्रतुः स्नापयाञ्चक्रुः
(स्नपयाञ्चकार स्नपयाञ्चक्रतुः स्नपयाञ्चक्रुः)

लुट्

स्नापयिता स्नापयितारौ स्नापयितारः
(स्नपयिता स्नपयितारौ स्नपयितारः)

लृट्

स्नापयिष्यति स्नापयिष्यतः स्नापयिष्यन्ति
(स्नपयिष्यति स्नपयिष्यतः स्नपयिष्यन्ति)

लोट्

स्नापयतु [स्नापयतात्] स्नापयताम् स्नापयन्तु
(स्नपयतु [स्नपयतात्] स्नपयताम् स्नपयन्तु)

लङ्

अस्नापयत् अस्नापयताम् अस्नापयन्
(अस्नपयत् अस्नपयताम् अस्नपयन्)

वि० लिङ्

स्नापयेत् स्नापयेताम् स्नापयेयुः
(स्नपयेत् स्नपयेताम् स्नपयेयुः)

लुङ्

असिष्णपत् असिष्णपताम् असिष्णपन्

लृङ्

अस्नापयिष्यत् अस्नापयिष्यताम् अस्नापयिष्यन्
(अस्नपयिष्यत् अस्नपयिष्यताम् अस्नपयिष्यन्)

१. तू दादा को नहलाकर फिर पिता को नहला।

त्वं पितामहं स्नापयित्वा (स्नपयित्वा) ततः पितरं स्नापय (स्नपय; स्नापयेः, स्नपयेः)।

२. यज्ञ की समाप्ति पर पुरोहितों ने यज्ञिय कलशों के जल से पुष्यमित्र को स्नान कराया।

यज्ञान्ते पुरोधसः यज्ञियकलशानां जलेन पुष्यमित्रं स्नापयाञ्चक्रुः (स्नपयाञ्चक्रुः)

३. वह इन कोढ़ियों को दवाइयों के पानी से नहलायेगा।

सः इमान् कुष्ठिनः औषधमिश्रितेन जलेन स्नापयिष्यति (स्नपयिष्यति; स्नापयिता, स्नपयिता)।

४. ब्रह्मचारियों ने आज अपने आचार्य को सोते के पानी से स्नान कराया।

ब्रह्मचारिणः अद्य निजम् आचार्यं स्रोतसः सलिलेन असिष्णपन्।

५. यह माता कैसी है? इस भरी गर्मी में भी इसने कल बच्चों को नहीं नहलाया।

कीदृशी इयं जननी? अस्मिन् प्रचण्डे निदाघे अपि इयं ह्यः सुतान् न अस्नापयत् (अस्नपयत्)।

६. यदि हम गौओं को प्रतिदिन न नहलाते तो गौएं इतनी प्रसन्न न रहतीं।
यदि वयं प्रतिदिनं गाः न अस्नापयिष्याम (अस्नपयिष्याम) तर्हि गावः एव प्रसन्नाः न अभविष्यन्।

या (६) { प्रापणे = (आना)
यापि (= या + णिच्) = भेजना, समय बिताना }

लट्—यापयति	यापयतः	यापयन्ति
लिट्—यापयाञ्चकार	यापयाञ्चक्रतुः	यापयाञ्चक्रुः
लुट्—यापयिता	यापयितारौ	यापयितारः
लृट्—यापयिष्यति	यापयिष्यतः	यापयिष्यन्ति
लोट्—यापयतु (यापयतात्)	यापयताम्	यापयन्तु
लङ्—अयापयत्	अयापयताम्	अयापयन्
वि० लिङ्—यापयेत्	यापयेताम्	यापयेयुः
लुङ्—अयीयपत्	अयीयपताम्	अयीयपन्
लृङ्—अयापयिष्यत्	अयापयिष्यताम्	अयापयिष्यन्

१. इस रसमय समय को उदासीनता में मत बिता।
इमं रसमयं समयम् औदासीन्ये मा यीयपः (मा स्म यापयः; मा यापय[1], मा यापयेः; अलं यापयित्वा)।

२. बुद्धिमान् लोग अपना समय परोपकार में बिताते हैं।
मतिमन्तः जनाः स्वसमयं परोपकारे यापयन्ति।

---

१. पहले के पृष्ठों में तिङन्त प्रकरण में निषेध के प्रसङ्ग में 'मा' अव्यय का प्रयोग करते हुए 'माङि लुङ्' और 'स्मोत्तरे लङ् च' (अष्टा० ३.३.१७५, १७६) के अनुसार 'मा' के साथ लुङ् अथवा लङ् का प्रयोग किया गया था, किन्तु आज हमने यहाँ 'मा' के साथ लोट् और वि० लिङ् का भी प्रयोग किया है। ऐसा इसलिये किया गया है कि, छात्रों को यह ज्ञान हो जाये कि साहित्य में 'मा' के साथ लोट् और वि० लिङ् का भी प्रयोग होता है। 'मा' अव्यय दो प्रकार का है। एक ङित् मा अर्थात् माङ् और दूसरा अङित् मा। पाणिनि ने लुङ् और लङ् का विधान ङित् 'मा' के योग में किया है। अङित् 'मा' के योग में लोट् या वि० लिङ् का प्रयोग हो सकता है। ङित् 'माङ्' भी व्यवहारावस्था में 'मा' ही रहता है, अतः फलितार्थ यह हुआ कि 'मा' के योग में चाहे लुङ् अथवा लङ् (स्म सहित में) अथवा लोट् अथवा वि० लिङ् किया जा सकता है।

३. पाण्डवों ने बारह वर्ष वन में बिताये।
पाण्डवाः द्वादशवर्षाणि वने यापयाञ्चक्रुः।

४. हम गर्मी की छुट्टियाँ नाना के घर बितायेंगे।
वयं ग्रीष्मावकाशं मातामहगृहे यापयिष्यामः (यापयितास्मः)।

(७) श्रु श्रवणे (=सुनना)—श्रावि=सुनाना, सुनवाना

लट्—श्रावयति	श्रावयतः	श्रावयन्ति
लिट्—श्रावयाञ्चकार	श्रावयाञ्चक्रतुः	श्रावयाञ्चक्रुः
लुट्—श्रावयिता	श्रावयितारौ	श्रावयितारः
लृट्—श्रावयिष्यति	श्रावयिष्यतः	श्रावयिष्यन्ति
लोट्—श्रावयतु (श्रावयतात्)	श्रावयताम्	श्रावयन्तु
लङ्—अश्रावयत्	अश्रावयताम्	अश्रावयन्
वि० लिङ्—श्रावयेत्	श्रावयेताम्	श्रावयेयुः
लुङ्—(१) अशुश्रवत्	अशुश्रवताम्	अशुश्रवन्
अशुश्रवः	अशुश्रवतम्	अशुश्रवत
अशुश्रवम्	अशुश्रवाव	अशुश्रवाम
(२)[1] अशिश्रवत्	अशिश्रवताम्	अशिश्रवन्
अशिश्रवः	अशिश्रवतम्	अशिश्रवत
अशिश्रवम्	अशिश्रवाव	अशिश्रवाम
लृङ्—अश्रावयिष्यत्	अश्रावयिष्यताम्	अश्रावयिष्यन्

१. ये छात्र प्रतिदिन अपना पठित पाठ सुनाते हैं।
एते छात्राः प्रत्यहं स्वपठितपाठं श्रावयन्ति।

२. दूतों ने जनक का संदेश दशरथ को सुनाया।
दूताः जनकसंदेशं दशरथं श्रावयाञ्चक्रुः।

३. तूने जो गीत कल सुनाये थे वही आज भी सुनाये क्या आगे भी वही सुनाओगे?
त्वं यानि गीतानि ह्यः अश्रावयः तानि एव अद्य अशुश्रवः (अशिश्रवः) किम् अग्रे अपि तानि एव श्रावयिष्यसि (श्रावयितासि)?

४. इन कोमल बुद्धि वाले छात्रों को अश्लील किस्से मत सुना?
इमान् मृदुमतीन् छात्रान् अश्लीलाः कथाः मा शुश्रवः (मा शिश्रवः; मा स्म श्रावयः, न श्रावय, न श्रावयेः)?

---

१. स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा (अष्टा. ७.४.८१) से एक पक्ष में अभ्यास के उ के स्थान पर इकारादेश हुआ।

५. यदि दयानन्द जनता को वेदों का संदेश न सुनाता तो जनता वेदों को न जान पाती।
यदि दयानन्दः जनतां वेदानां सन्देशं न अश्रावयिष्यत् तर्हि जनता वेदान् ज्ञातुं न अशक्ष्यत्।

कर्मवाच्य में परिवर्त्तन करते समय णिजन्त श्रु के प्रसङ्ग में 'प्रयोज्यकर्मण्यन्येषाम्' के अनुसार केवल प्रयोज्य कर्म में ही परिवर्त्तन होगा। यथा—

१. ब्रह्मचारियों ने मुझे बहुत से श्लोक सुनाये।
कर्तृ०—ब्रह्मचारिणः मां बहून् श्लोकान् अश्रावयन् (अशुश्रवन्, अशिश्रवन्)।
कर्म०—ब्रह्मचारिभिः अहं बहून् श्लोकान् अश्राव्ये (अश्राविषि)।

(८) भू सत्तायाम् (=होना)=भावि=हुआना। अनुभावि=अनुभव करवाना। अभिभावि=तिरस्कार करवाना। आदि।

लट्—भावयति	भावयतः	भावयन्ति
लिट्—भावयाञ्चकार	भावयाञ्चक्रतुः	भावयाञ्चक्रुः
लुट्—भावयिता	भावयितारौ	भावयितारः
लृट्—भावयिष्यति	भावयिष्यतः	भावयिष्यन्ति
लोट्—भावयतु (भावयतात्)	भावयताम्	भावयन्तु
लङ्—अभावयत्	अभावयताम्	अभावयन्
वि. लिङ्—भावयेत्	भावयेताम्	भावयेयुः
लुङ्[१]—अबीभवत्	अबीभवताम्	अबीभवन्
लृङ्—अभावयिष्यत्	अभावयिष्यताम्	अभावयिष्यन्

णिजन्त भू (=भावि) धातु के प्रयोग उपसर्गपूर्वक के ही अधिक मिलते हैं, अतः वैसे ही वाक्यों का अभ्यास दिया जा रहा है।

१. पाठशाला में पढ़ते हुए मुझे छात्रों ने बहुत दुःख अनुभव कराये।
पाठशालायां पठता मया छात्राः बहूनि दुःखानि अन्वभावयन् (अन्वबीभवन्, अनुभावितवन्तः)।

२. राजा नन्द ने नौकरों से चाणक्य का तिरस्कार करवाया।
नृपः नन्दः भृत्यैः चाणक्यम् अभ्यभावयत् (अभ्यबीभवत्)

३. हमारी सेना ने जैसे याह्याखाँ की सेना को हराया था, वैसे ही टुक की सेना को भी हरायेगी?

---

१. अभ्यास में वर्त्तमान उ को (भु के उ को) 'ओः पुयण्ज्यपरे' (अष्टा. ७.४.८०) से इकारादेश हो गया। यही बात अन्य भी उवर्णान्त धातुओं में यथानियम होगी।

अस्माकं चमूः यथा 'याह्याखाँ' इत्याख्यस्य सेनापतेः सेनां पर्यभावयत् तथा 'जियाउलहक' शासकस्य सेनाम् अपि परिभावयिष्यति (परिभावयिता) ?

४. दोनों के साथ बातचीत करके इनके मिलन को सम्भव बना।
द्वाभ्याम् अपि सह संलप्य अनयोः सम्मिलनं सम्भावय (सम्भावयेः)

५. गुरुकुल में गुरुजन तपस्या के द्वारा तुम्हें कष्टों का अनुभव न कराते तो तुममें सहन शक्ति न आती।
गुरुकुले गुरुजनाः तपसा युष्माभिः कष्टानि न अन्वभावयिष्यन् तर्हि युष्मासु सहिष्णुता न आगमिष्यत्।

(६) पूञ् पवने (पवित्र करना), पावि=पवित्र करवाना

लट्—पावयति	पावयतः	पावयन्ति
लिट्—पावयाञ्चकार	पावयाञ्चक्रतुः	पावयाञ्चक्रुः
लुट्—पावयिता	पावयितारौ	पावयितारः
लृट्—पावयिष्यति	पावयिष्यतः	पावयिष्यन्ति
लोट्—पावयतु (पावयतात्)	पावयताम्	पावयन्तु
लङ्—अपावयत्	अपावयताम्	अपावयन्
वि० लिङ्—पावयेत्	पावयेताम्	पावयेयुः
लुङ्—अपीपवत्	अपीपवताम्	अपीपवन्
अपीपवः	अपीपवतम्	अपीपवत
अपीपवम्	अपीपवाव	अपीपवाम
लृङ्—अपावयिष्यत्	अपावयिष्यताम्	अपावयिष्यन्

१. सफाई इन्स्पेक्टर शहर की सफाई करवाता है।
स्वच्छतानिरीक्षकः पुरं पावयति।

२. विरजानन्द शिष्यों से अपनी कुटिया को स्वच्छ करवाते थे।
विरजानन्दः शिष्यैः निजकुटीरं पावयाञ्चकार।

३. हमने तो अपनी सड़कें साफ करवा दी हैं, तुम आज अपने मार्ग साफ कराओ।
वयं तु निजराजमार्गान् अपावयाम (अपीपवाम) यूयम् अद्य युष्माकं मार्गान् पावयत (पावयेत)।

४. अब तो हम भी स्वच्छ करवायेंगे, यदि तुम सफाई न करवाते तो हम भी नहीं करवाते।
अधुना तु वयम् अपि पावयिष्यामः (पावयितास्मः) यदि यूयं न अपावयिष्यत तर्हि वयम् अपि न अपावयिष्याम।

५. आपने इन विद्वानों से मेरा घर पवित्र करवाया, अतः आपको धन्यवाद ।

भवन्तः एभिः सुधीभिः मदोकः अपावयन् (अपीपवन्) अतः धन्यवादार्हाः भवन्तः खलु ।

(१०) लूञ् छेदने (=काटना), लावि=कटवाना

लट्—लावयति लावयतः लावयन्ति	लङ्—अलावयत् अलावयताम् अलावयन्
लिट्—लावयाञ्चकार लावयाञ्चक्रतुः लावयाञ्चक्रुः	वि. लिङ्—लावयेत् लावयेताम् लावयेयुः
लुट्—लावयिता लावयितारौ लावयितारः	लुङ्—अलीलवत् अलीलवताम् अलीलवन् अलीलवः अलीलवतम् अलीलवत अलीलवम् अलीलवाव अलीलवाम
लृट्-लावयिष्यति लावयिष्यतः लावयिष्यन्ति	
लोट्—लावयतु लावयताम् लावयन्तु / लावयतात्	लृङ्-अलावयिष्यत् अलावयिष्यताम् अलावयिष्यन्

१. मैं अपनी फसल अपने सहयोगियों से कटवाऊँगा ।

अहं निजसस्यं निजसहयोगिभिः लावयिष्यामि (लावयितास्मि) ।

२. परसों मैंने गेहूं कटवाया था और आज जौ कटवाया है ।

परह्यः अहं गोधूमम् अलावयम् अद्य च यवम् अलीलवम् ।

३. तुम अनार के पेड़ की डालियां कब कटवाओगे ?

त्वं दाडिमवृक्षस्य शाखाः कदा लावयिष्यसि (लावयितासि) ?

४. इन पेड़ों को मत कटवा, ये छायादार और फलदार हैं ।

इमान् महीरुहान् मा लीलवः (मा स्म लावयः; मा लावय, मा लावयेः) एते छायावन्तः फलवन्तः च सन्ति ।

५. यदि अधिकारी जङ्गलों को न कटवाते तो खूब वर्षा होती ।

यदि शासकाः अरण्यानि न अलावयिष्यन् तर्हि पुष्कलः वर्षः अभविष्यत् ।

(११) शासु अनुशिष्टौ (=शासन करना), शासि=शासन करवाना

लट्—शासयति शासयतः शासयन्ति	लङ्—अशासयत् अशासयताम् अशासयन्
लिट्-शासयाञ्चकार शासयाञ्चक्रतुः शासयाञ्चक्रुः	वि. लिङ्—शासयेत् शासयेताम् शासयेयुः
लुट् – शासयिता शासयितारौ शासयितारः	लुङ्—अशशासत् अशशासताम् अशशासन् अशशासः अशशासतम् अशशासत अशशासम् अशशासाव अशशासाम
लृट्—शास ष्यति शासयिष्यतः शासयिष्यन्ति	
लोट्-शासयतु शासयताम् शासयन्तु / शासयतात्	लृङ्-अशासयिष्गत् अशासयिष्यताम् अशासयिष्यन्

१. इन्दिरा जी जिनसे शासन करवाती हैं, उनमें बहुत से उन्हें धोखा देते हैं।
इन्दिरा भगवती यैः प्रजां शासयति, तेषु बहवः भगवतीं वञ्चयन्ति।

२. जवाहरलाल ने कर्मचारियों से प्रजा पर अच्छा शासन करवाया।
जवाहरलालः कर्मचारिभिः प्रजां सम्यक् अशशासत् (अशासयत्)।

३. इस उद्दण्ड प्रजा पर दण्डधारी शासक ही शासन करवायेगा।
इमाः उद्दण्डाः प्रजाः दण्डवान् शासकः एव शासयिष्यति (शासयिता)।

४. विद्वानों पर अविद्वानों से शासन मत करवा।
विदुषः मा शशासः (मा स्म शासयः) अविद्वद्भिः।

५. जैसे राम ने अधिकारियों से जनता पर शासन करवाया था वैसे तुम्हें भी करवाना चाहिये।
यथा रामः अधिकारिभिः जनतां शासयाञ्चकार तथा त्वम् अपि शासयेः।

(१२) षिवु तन्तुसन्ताने (=सीना), सेवि=सिलवाना

लट्—सेवयति सेवयतः सेवयन्ति
लिट्—सेवयाञ्चकार सेवयाञ्चक्रतुः सेवयाञ्चक्रुः
लुट्—सेवयिता सेवयितारौ सेवयितारः
लृट्—सेवयिष्यति सेवयिष्यतः सेवयिष्यन्ति
लोट्—{सेवयतु सेवयताम् सेवयन्तु / सेवयतात्}

लङ्—असेवयत् असेवयताम् असेवयन्
वि०लिङ्—सेवयेत् सेवयेताम् सेवयेयुः
लुङ्—असीषिवत् असीषिवताम् असीषिवन्
असीषिवः असीषिवतम् असीषिवत
असीषिवम् असीषिवाव असीषिवाम
लृङ्—असेवयिष्यत् असेवयिष्यताम् असेवयिष्यन्

१. मैंने पहिले अपने सारे कुर्त्ते दिल्ली के कमीज विशेषज्ञ रूपराम से सिलवाये थे।
अहं पुरा स्वानि समानि कञ्चुकानि दिल्लीस्थेन कञ्चुकविशेषज्ञेन रूपरामेण असेवयम् (असीषिवम्)।

२. आजकल बम्बई रहने वाले मदनलाल से कुर्ते सिलवाता हूं।
अद्यत्वे मुम्बापुरीवास्तव्येन मदनलालेन कञ्चुकानि सेवयामि।

३. इस नालायक से कपड़े मत सिलवा।
अनेन अयोग्येन वस्त्राणि मा सीषिवः (मा स्म सेवयः, नैव सेवय, न सेवयेः)।

४. यदि तू अजमेर में कपड़े सिलवाता तो इतना खर्चा न होता।
यदि त्वम् अजमेरनगरे वस्त्राणि असेवयिष्यः तर्हि एतावान् व्ययः न अभविष्यत्।

५. तू रेशमी वस्त्र कब सिलवायेगा?
त्वं क्षौमानि वासांसि कदा सेवयिष्यसि (सेवयितासि)?

(१३) षह मर्षणे (=सहन करना)—साहि=सहन करवाना

लट्—साहयति साहयतः साहयन्ति
लिट्—साहयाञ्चकार साहयाञ्चक्रतुः साहयाञ्चक्रुः
लुट्—साहयिता साहयितारौ साहयितारः
लृट्—साहयिष्यति साहयिष्यतः साहयिष्यन्ति
लोट्—साहयतु साहयताम् साहयन्तु / साहयतात्
लङ्—असाहयत् असाहयताम् असाहयन्
वि० लिङ्—साहयेत् साहयेताम् साहयेयुः
लुङ्—असीषहत् असीषहताम् असीषहन् असीषहः असीषहतम् असीषहत असीषहम् असीषहाव असीषहाम
लृङ्—असाहयिष्यत् असाहयिष्यताम् असाहयिष्यन्

१. बनारस में संस्कृत पढ़ते हुए मुझे धनाभाव ने बहुत कष्ट सहन करवाये।
वाराणसीमधिष्ठाय संस्कृतं पठता मया धनविरहः महान्ति कष्टानि असाहयत् (असीषहत्)।

२. दुर्योधन की दुष्टता ने पाण्डवों को अनेक दुःख सहन करवाये।
दुर्योधनस्य खलत्वं पाण्डवैः पुष्कलानि दुःखानि साहयाञ्चकार।

३. धर्माचरण आरम्भ में सभी से कष्ट सहन करवाता है।
धर्माचरणं प्रारम्भे सर्वैः एव कष्टानि साहयति।

४. भय और गरीबी बन्धुआ मजदूरों से और कितनी पीड़ा सहन करवायेगी ?
त्रासः निर्धनता च प्रतिबद्धैः श्रमिकैः अन्याः कियतीः पीड़ाः साहयिष्यतः (साहयितारौ)

५. हे कुशासको ! भोली प्रजा से अब और कष्ट मत झिलवाओ।
भोः कुशासकाः ! अप्रगल्भया प्रजया अधुना अन्यानि कष्टानि मा सीषहत (मा स्म साहयत; न साहयत (लोट्), नैव साहयेत)।

६. यदि गुरुजन तुमसे द्वन्द्वों का सहन न करवाते तो तुम्हारे शरीर दृढ़ न बनते।
यदि गुरवः युष्माभिः द्वन्द्वानि न असाहयिष्यन् तर्हि युष्मच्छरीराणि दृढानि न अभविष्यन्।

(१४) डुलभष् (=लभ्) प्राप्तौ=प्राप्त करना, लम्भि[1]=प्राप्त करवाना

लट्—लम्भयति लम्भयतः लम्भयन्ति
लिट्—लम्भयाञ्चकार लम्भयाञ्चक्रतुः लम्भयाञ्चक्रुः
लुट्—लम्भयिता लम्भयितारौ लम्भयितारः
लृट्—लम्भयिष्यति लम्भयिष्यतः लम्भयिष्यन्ति
लोट्—लम्भयतु लम्भयताम् लम्भयन्तु / लम्भयतात्

---

१. णिच् (=इ) परे रहने पर 'लभ्' को 'लभेश्च' (अष्टा० ७.१.६४) से नुम् आगम हो गया।

लङ्—अलम्भयत् अलम्भयताम् अलम्भयन्

वि० लिङ्—लम्भयेत् लम्भयेताम् लम्भयेयु:

लुङ्—अललम्भत् अललम्भताम् अललम्भन्

अललम्भ: अललम्भतम् अललम्भत

अललम्भम् अललम्भाव अललम्भाम

लृङ्—अलम्भयिष्यत् अलम्भयिष्यताम् अलम्भयिष्यन्

१. धर्म ने मनुष्यों को सदा सुख प्राप्त करवाया है।
धर्म: मनुष्यान् नित्यं सुखम् अलम्भयत् (अललम्भत्)।

२. राजा प्रजा को अन्न सुलभ करवाता है=नृप: प्रजाम् अन्नं सुलम्भयति।

३. श्रम और विचक्षणता ही सुराज्य प्राप्त करायेगी।
श्रमविचक्षणते ह्येव सुराज्यं लम्भयिष्यत: (लम्भयितारौ)।

४. हे मन्त्रीजी ! इन नवयुवकों को रोजगार प्राप्त कराओ।
हे मन्त्रिन् ! इमान् यून: जीविकां लम्भय (लम्भये:)

५. राम ने सुग्रीव को राज्य और स्त्री प्राप्त करवाई थी।
राम: सुग्रीवं राज्यं भार्यां च लम्भयाञ्चकार।

६. यदि श्रद्धानन्द ये दुर्लभ ग्रन्थ प्राप्त नहीं करवाते तो हमारा पुस्तकालय अधूरा रहता।
यदि श्रद्धानन्द: इमान् दुर्लभग्रन्थान् न अलम्भयिष्यत् तर्हि अस्मत्पुस्तकालय: अपूर्ण: अस्थास्यत्।

(१५) रभ राभस्ये (=प्रारम्भ करना) =आङ्+रम्भि= आरम्भि[1]=प्रारम्भ करवाना

लट्—
आरम्भयति आरम्भयत: आरम्भयन्ति

लिट्—आरम्भयाञ्चकार
आरम्भयाञ्चक्रतु: आरम्भयाञ्चक्रु:

लुट्—आरम्भयिता आरम्भयितारौ आरम्भयितार:

लृट्—आरम्भयिष्यति आरम्भयिष्यत: आरम्भयिष्यन्ति

लोट्—{आरम्भयतु आरम्भयताम्
{आरम्भयतात् आरम्भयन्तु

लङ्—
आरम्भयत् आरम्भयताम् आरम्भयन्

वि० लिङ्—
आरम्भयेत् आरम्भयेताम् आरम्भयेयु:

लुङ्—
आररम्भत् आररम्भताम् आररम्भन्
आररम्भ: आररम्भतम् आररम्भत
आररम्भम् आररम्भाव आररम्भाम

लृङ्—आरम्भयिष्यत् आरम्भयिष्यताम् आरम्भयिष्यन्

१. रभेरशब्लिटो: (अष्टा० ७.१.६३) से नुमागम।

१. भीमसेन जी ने प्रतिदिन प्रातःकाल नौकरों से कार्य प्रारम्भ करवाया।
भीमसेनमहोदयः प्रत्यहं कल्ये भृत्यैः कार्यम् आरम्भयत्[1] (आररम्भत्)।

२. यह अधिकारी खेती का कार्य प्रत्येक ऋतु में अपने घर वालों से आरम्भ करवाता है।
अयम् अधिकारी कृषिकार्यं प्रत्यृतु स्वगृहसदस्यैः आरम्भयति।

३. चिकित्साविभाग नये डॉक्टरों से गांवों में चिकित्सा का आरम्भ करवावे।
चिकित्साविभागः नूतनैः चिकित्सकैः ग्रामेषु चिकित्साम् आरम्भयतु (आरम्भयेत्)

४. जो समय पर खेतों में कार्य आरम्भ करवायेगा वही सफल होगा।
यः यथाकालं क्षेत्रेषु कार्यम् आरम्भयिष्यति सः एव सफलः भविष्यति।

५. मकान का कार्य यदि मैं शीघ्र आरम्भ न करवाता तो वर्षा से पहिले पूरा न होता।
यदि गृहनिर्माणकार्यं शीघ्रं न आरम्भयिष्यं तर्हि वर्षारम्भात् प्राक् पूर्णं न अभविष्यत्।

स्मृ चिन्तायाम् (=स्मरण करना), स्मारि=स्मरण करवाना

लट्—स्मारयति स्मारयतः स्मारयन्ति

लिट्—स्मारयाञ्चकार स्मारयाञ्चक्रतुः स्मारयाञ्चक्रुः

लुट्—स्मारयिता स्मारयितारौ स्मारयितारः

लृट्—स्मारयिष्यति स्मारयिष्यतः स्मारयिष्यन्ति

लोट्—स्मारयतु स्मारयताम् स्मारयन्तु / स्मारयतात्

लङ्—अस्मारयत् अस्मारयताम् अस्मारयन्

वि० लिङ्—स्मारयेत् स्मारयेताम् स्मारयेयुः

लुङ्[2]—
असस्मरत् असस्मरताम् असस्मरन्
असस्मरः असस्मरतम् असस्मरत
असस्मरम् असस्मराव असस्मराम

लृङ्—अस्मारयिष्यत् अस्मारयिष्यताम् अस्मारयिष्यन्

१. अच्छे माता पिता अपने सन्तानों को सुभाषित याद करवाते हैं।
शोभनौ पितरौ निजापत्यैः सुभाषितानि स्मारयन्ति।

---

१. रभेरशब्लिटोः (अष्टा० ७.१.६३) से नुमागम।

२. अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् (अष्टा० (७.४.९५) से अभ्यास के अकार के स्थान पर ह्रस्व अकार आदेश हुआ, जिससे 'सन्यतः (अष्टा ७.४.७९) से प्राप्त इकारादेश का बाध हो गया।

२. मैंने सुरेन्द्र से पाठ याद करवाया।
अहं सुरेन्द्रेण पाठम् अस्मारयम् (असस्मरम्)।

३. सभी कक्षाध्यापक अपने छात्रों से सौ श्लोक याद करवायेंगे।
सर्वे कक्षाध्यापकाः स्वैः छात्रैः शतं श्लोकान् स्मारयिष्यन्ति (स्मारयितारः)

४. जा, गुरुजी को यज्ञ करवाने की बात याद करवादे।
गच्छ, गुरुभिः यज्ञसम्पादनवार्तां स्मारय (स्मारयेः)।

५. कैकेयी ने दशरथ को अपने दो वरदान याद करवाये।
कैकेयी दशरथेन निजौ द्वौ वरौ स्मारयाञ्चकार।

६. यदि तू मुझे उस घटना का स्मरण न कराता तो मैं उस ठग पर विश्वास कर लेता।
यदि त्वं मया तां घटनां न अस्मारयिष्यः तर्हि तस्मिन् वञ्चके विश्रम्भम् अकरिष्यम्

वेष्ट वेष्टने=लपेटना, वेष्टि=लपेटवाना

लट्—वेष्टयति वेष्टयतः वेष्टयन्ति
लिट्—वेष्टयाञ्चकार वेष्टयाञ्चक्रतुः वेष्टयाञ्चक्रुः
लुट्—वेष्टयिता वेष्टयितारौ वेष्टयितारः
लृट्—वेष्टयिष्यति वेष्टयिष्यतः वेष्टयिष्यन्ति
लोट्—वेष्टयतु वेष्टयताम् वेष्टयन्तु, वेष्टयतात्
लङ्—अवेष्टयत् अवेष्टयताम् अवेष्टयन्

वि० लिङ्—वेष्टयेत् वेष्टयेताम् वेष्टयेयुः
लुङ्[1]-१ अववेष्टत् अववेष्टताम् अववेष्टन्
अववेष्टः अववेष्टतम् अववेष्टत
अववेष्टम् अववेष्टाव अववेष्टाम
२ अविवेष्टत् अविवेष्टताम् अविवेष्टन्
अविवेष्टः अविवेष्टतम् अविवेष्टत
अविवेष्टम् अविवेष्टाव अविवेष्टाम
लृङ्—अवेष्टयिष्यत् अवेष्टयिष्यताम् अवेष्टयिष्यन्

१. इन काच के बर्तनों को कागजों से लिपटवाकर रखवा दे।
इमानि काचपात्राणि कर्गलैः वेष्टयित्वा स्थापय।

२. इन अनार के फलों को कपड़े से लिपटवादे, नहीं तो तोते बिगाड़ेंगे।
इमानि दाडिमफलानि वस्त्रैः परिवेष्टय (परिवेष्टयेः) अन्यथा शुकाः दूषयिष्यन्ति।

३. सारी ककड़ियों को गीले कपड़े से लिपटवाऊंगा।
सर्वाः चर्भटीः आर्द्रेण वस्त्रेण वेष्टयिष्यामि (वेष्टयितास्मि)।

४. भृत्य से कड़वी औषध को मैंने मुनक्के में लिपटवाया था।
तिक्तम् औषधम् अहं भृत्येन द्राक्षया अवेष्टयम् (अविवेष्टम्, अववेष्टम्)।

---

१. विभाषा वेष्टिचेष्ट्योः (अष्टा० ७.४.९६) से अभ्यास के इ को विकल्प से अकारादेश हुआ।

ह्वेञ् स्पर्धायां शब्दे च (स्पर्धा करना और बुलाना)
आह्वायि[1] (=आङ्+ह्वेञ्+णिच्)=बुलवाना

लट्—आह्वाययति	आह्वाययतः	आह्वाययन्ति
लिट्—आह्वाययाञ्चकार	आह्वाययाञ्चक्रतुः	आह्वाययाञ्चक्रुः
लुट्—आह्वाययिता	आह्वाययितारौ	आह्वाययितारः
लृट्—आह्वाययिष्यति	आह्वाययिष्यतः	आह्वाययिष्यन्ति
लोट्—आह्वाययतु (आह्वाययतात्)	आह्वाययताम्	आह्वाययन्तु
लङ्—आह्वाययत्	आह्वाययताम्	आह्वाययन्
वि. लि.—आह्वाययेत्	आह्वाययेताम्	आह्वाययेयुः
लुङ्[2]—आजूहवत्	आजूहवताम्	आजूहवन्
आजूहवः	आजूहवतम्	आजूहवत
आजूहवम्	आजूहवाव	आजूहवाम
लृङ्—आह्वाययिष्यत्	आह्वाययिष्यताम्	आह्वाययिष्यन्

१. भीमसेन जी ने सुरेन्द्र से व्रतानन्द जी के लिये डाक्टर बुलवाया।
भीमसेनमहाभागः सुरेन्द्रेण व्रतानन्दमहोदयेभ्यः चिकित्सकम् आह्वाययत् (आजूहवत्)।

२. हम उत्सव में दीक्षानन्द जी से स्वामी सत्यप्रकाश जी को बुलवायेंगे।
वयम् उत्सवे दीक्षानन्दमहाभागेन स्वामिसत्यप्रकाशमहोदयम् आह्वाययिष्यामः (आह्वाययितास्मः)।

३. उस रूसे हुए ससुर को किसी से मत बुलवा, वह खुद आ जायेगा।
तं रुष्टं श्वशुरं केनचिद् अपि मा आजूहवः (मा स्म आह्वाययः) सः स्वयम् ऐष्यति।

४. प्राचीन काल में आचार्य लोग अपने शिष्यों से सम्राट् को अपने पास बुलवाते थे, पर अब कोई नहीं बुलवाता।
पुरा आचार्याः स्वशिष्यैः सम्राजम् निजान्तिके आह्वाययाञ्चक्रुः परं सम्प्रति कश्चिद् अपि न आह्वाययति।

५. यदि हम डाक्टर को न बुलवाते तो, यह दम तोड़ देता।
यदि वयं चिकित्सकं न आह्वाययिष्याम तर्हि अयं प्राणान् अत्यक्ष्यत्।

---

१. शाच्छासाह्वाव्यावेपां युक् (अष्टा. ७.३.३७) से युक् आगम।
२. 'ह्वः सम्प्रसारणम्' (अष्टा. ६.१.३२) से व् को सम्प्रसारण (=उ) हुआ है।

पा पाने (=पीना, पायि[1]=पिलाना

लट्—पाययति पाययतः पाययन्ति	लङ्—अपाययत् अपाययताम् अपाययन्
लिट्—पाययाञ्चकार पाययाञ्चक्रतुः पाययाञ्चक्रुः	वि. लि.—पाययेत् पाययेताम् पाययेयुः
लुट्—पाययिता पाययितारौ पाययितारः	लुङ्[2]—अपीप्यत् अपीप्यताम् अपीप्यन् अपीप्यः अपीप्यतम् अपीप्यत अपीप्यम् अपीप्याव अपीप्याम
लृट्—पाययिष्यति पाययिष्यतः पाययिष्यन्ति	
लोट्—पाययतु, पाययतात् पाययताम् पाययन्तु	लृङ्—अपाययिष्यत् अपाययिष्यताम् अपाययिष्यन्

१. ज्वरनाश के लिये वैद्य रोगी को कड़वा क्वाथ पिलाते हैं।
ज्वरविनाशाय भिषजः रुजाक्रान्तं तिक्तं क्वाथं पाययन्ति।

२. उन्होंने ब्रह्मचारियों को पेट भर के दूध पिलाया।
ते ब्रह्मचारिणः कणेहृत्य पयः अपाययन् (अपीप्यन्, पायितवन्तः)।

३. हम अपने घर तुमको खूब आम रस पिलायेंगे।
वयं निजनिकेतने युष्मान् पुष्कलं रसालरसं पाययिष्यामः (पाययितास्मः)

४. जेठ अषाढ़ में सबको इलायची वाला ठंडा पानी पिलाओ।
ज्येष्ठाषाढयोः सर्वान् एलामिलितं शीतलं सलिलं पाययत (पाययेत)।

५. यदि तू मुझे घी दूध पिला देती तो तेरा घर मैं क्यों छोड़ता?
यदि त्वं मां क्षीरसर्पिषी अपाययिष्यः तर्हि कथम् अहं तव गृहम् अत्यक्ष्यम्?

६. उस वृद्ध योगी ने रामावतार शर्मा 'विकल' को सोमरस पिलाया था।
सः जीर्णः योगिराजः विकलोपनामानं रामावतारशर्माणं सोमरसं पाययाञ्चकार।

पा रक्षण (=रक्षा करना), पालि[3]=रक्षा करवाना, पालन करवाना

लट्—पालयति पालयतः पालयन्ति	लुट्—पालयिता पालयितारौ पालयितारः
लिट्—पालयाञ्चकार पालयाञ्चक्रतुः पालयाञ्चक्रुः	लृट्—पालयिष्यति पालयिष्यतः पालयिष्यन्ति

---

१. शाच्छासाह्वाव्यावेपां युक् (अष्टा. ७.३.३७) से युक् (=य्) आगम।
२. णिच् (=इ) परे रहने पर पा को युक् (=य्) आगम हुआ, तब 'पाय्' की उपधा 'आ' का 'लोपः पिबतेरीच्चाभ्यासस्य (अष्टा. ७.४.४) से लोप, स्थानिवद्भाव से द्वित्व, तब अभ्यास के (='प' के अ) के स्थान पर इसी सूत्र से ईकारादेश हुआ।
२. 'लुगागमस्तु तस्य वक्तव्यः' [वा.] अष्टा. ७.३.३७) से लुक् (=ल्) आगम।

लोट्— पालयतु पालयताम् पालयन्तु
पालयतात्
लङ्—अपालयत् अपालयताम् अपालयन्
वि. लि.—पालयेत् पालयेताम् पालयेयुः
लुङ्—अपीपलत् अपीपलताम् अपीपलन्
अपीपलः अपीपलतम् अपीपलत
अपीपलम् अपीपलाव अपीपलाम
लृङ्—अपालयिष्यत् अपालयिष्यताम्
अपालयिष्यन्

१. मनस्वी लोग शरणागत की स्वयं रक्षा करते हैं और उसकी दूसरों से भी रक्षा करवाते हैं।
मनस्विनः शरणागतं स्वयं पान्ति अपरैः च तं पालयन्ति ।

२. जैसे विक्रमादित्य सैनिकों से अपनी प्रजा की रक्षा करवाता था वैसे ही यह राजा भी शूरवीरों से जनता की रक्षा करवायेगा।
यथा विक्रमादित्यः सैनिकैः निजप्रजां पालयाञ्चकार तथैव अयं नृपः अपि शूरवीरैः स्वजनतां पालयिष्यति (पालयितास्ति)।

३. हमने बाढ़पीड़ितों की स्वयंसेवकों से रक्षा करवाई थी।
वयं वन्यानिपीडितान् स्वयंसेवकैः अपालयाम (अपीपलाम)।

४. राजा का कर्त्तव्य है कि वह अनाथ बच्चों की अधिकारियों के द्वारा रक्षा करवावे।
राज्ञः कर्त्तव्यम् इदं यत् सः अनाथान् बालकान् अधिकारिभिः पालयतु (पालयेत्)

५. यदि पन्ना धायी, सेवक के द्वारा उदयसिंह की रक्षा न करवाती तो मेवाड़ का राजवंश नष्ट हो जाता।
यदि पन्ना नाम्नी धात्री भृत्येन उदयसिंहं न अपालयिष्यत् तर्हि मेदपाटस्य राजवंशः अनङ्क्ष्यत् (अनशिष्यत्)।

रुह बीजजन्मनि प्रादुर्भावे च (=उगना, उत्पन्न होना), रोहि (रोपि[1])= उगाना, उत्पन्न करना

आङ् रुह=चढ़ना, आरोहि (आरोपि[1])=चढ़ाना, आरोप लगाना

लट्—रोहयति रोहयतः रोहयन्ति
(रोपयति रोपयतः रोपयन्ति)
लिट्—रोहयाञ्चकार रोहयाञ्चक्रतुः
रोहयाञ्चक्रुः
(रोपयाञ्चकार रोपयाञ्चक्रतुः
रोपयाञ्चक्रुः)
लुट्—रोहयिता रोहयितारौ रोहयितारः
(रोपयिता रोपयितारौ रोपयितारः)

---

१. 'रुहः पोऽन्यतरस्याम्' (अष्टा० ७.३.४३) से विकल्प से रुह् के हकार के स्थान पर पकार आदेश।

लृट्—रोहयिष्यति रोहयिष्यतः रोहयिष्यन्ति
(रोपयिष्यति रोपयिष्यतः रोपयिष्यन्ति)
लोट्—{रोहयतु रोहयताम् रोहयन्तु
रोहयतात्
{रोपयतु रोपयताम् रोपयन्तु)
रोपयतात्
लङ्—अरोहयत् अरोहयताम् अरोहयन्
(अरोपयत् अरोपयताम् अरोपयन्)
वि. लिङ्—रोहयेत् रोहयेताम् रोहयेयुः
(रोपयेत् रोपयेताम् रोपयेयुः)

लुङ् (१) अरूरुहत् अरूरुहताम् अरूरुहन्
अरूरुहः अरूरुहतम् अरूरुहत
अरूरुहम् अरूरुहाव अरूरुहाम
(२) अरूरुपत् अरूरुपताम् अरूरुपन्
अरूरुपः अरूरुपतम् अरूरुपत
अरूरुपम् अरूरुपाव अरूरुपाम
लृङ्—अरोहयिष्यत् अरोहयिष्यताम् अरोहयिष्यन्
(अरोपयिष्यत् अरोपयिष्यताम् अरोपयिष्यन्)

१. जगदेव सिद्धान्ती जी ने अपने प्रमुख शिष्य रघुवीरसिंह शास्त्री को उन्नति के शिखर पर चढ़ाया।

सिद्धान्तीति नाम्ना प्रसिद्धः जगदेवमहाभागः स्वशिष्यावतंसं शास्त्र्युपाह्वं रघुवीरसिंहं समुन्नतिशिखरं अध्यरोपयत् (अध्यरोहयत्, अध्यरूरुहत्, अध्यरूरुपत्)

२. जैसे विरजानन्द ने अपने शिष्य को सर्वश्रेष्ठ पद पर पहुंचाया वैसे मैं भी अपने शिष्य को सर्वोत्तम स्थान पर चढ़ाऊँगा।

यथा विरजानन्दः स्वशिष्यं सर्वश्रेष्ठपदम् आरोहयाञ्चकार (आरोपयाञ्चकार) तथैव अहम् अपि निजान्तेवासिनं सर्वोत्तमपदम् आरोहयिष्यामि (आरोपयिष्यामि, आरोहयितास्मि, आरोपयितास्मि)।

३. इन बालकों को पेड़ पर चढ़ा और डाल पके फल उतरवा।

इमान् बालकान् पादपम् आरोहय (आरोपय; आरोहयेः, आरोपयेः) शाखापक्वानि फलानि च अवचायय (अवचाययेः)।

४. ये मजदूर प्रतिदिन बहुत सी वस्तुएँ जहाज पर चढ़ाते हैं।

एते श्रमिकाः प्रत्यहं बहूनि वस्तूनि पोतम् आरोहयन्ति (आरोपयन्ति)।

५. यदि महावत मुझे हाथी पर न चढ़ाता तो मैं नहीं चढ़ पाता।

यदि हस्तिपकः मां हस्तिनं न आरोहयिष्यत् (आरोपयिष्यत्) तर्हि अहं स्वयं आरोढुं न प्राभविष्यम्।

इङ् अध्ययने (=पढ़ना), अध्यापि[1] (=अधि+इङ्+णिच्)=पढ़ाना

लट्—अध्यापयति अध्यापयतः अध्यापयन्ति

लिट्—अध्यापयाञ्चकार अध्यापयाञ्चक्रतुः अध्यापयाञ्चक्रुः

लुट्—अध्यापयिता अध्यापयितारौ अध्यापयितारः

लृट्—अध्यापयिष्यति अध्यापयिष्यतः अध्यापयिष्यन्ति

लोट्—{अध्यापयतु अध्यापयताम् / अध्यापयतात् अध्यापयन्तु

लङ्—अध्यापयत् अध्यापयताम् अध्यापयन्

वि. लिङ्—अध्यापयेत् अध्यापयेताम् अध्यापयेयुः

लुङ्

(१) अध्यापिपत् अध्यापिपताम् अध्यापिपन्
अध्यापिपः अध्यापिपतम् अध्यापिपत
अध्यापिपम् अध्यापिपाव अध्यापिपाम

(२)[2] अध्यजीगपत् अध्यजीगपताम् अध्यजीगपन्
अध्यजीगपः अध्यजीगपतम् अध्यजीगपत
अध्यजीगपम् अध्यजीगपाव अध्यजीगपाम

लृङ्—अध्यापयिष्यत् अध्यापयिष्यताम् अध्यापयिष्यन्

१. गुरुकुल वृन्दावन में रहते हुए मैंने कृष्णस्वरूप आदि छात्रों को पढ़ाया था।
गुरुकुल-वृन्दावनमधिवसन् अहं कृष्णस्वरूपादीन् छात्रान् अध्यापयम् (अध्यापिपम्, अध्यजीगपम्)।

२. चित्तौड़गढ़ गुरुकुल में रहकर मैंने भीमसेन आदि को पढ़ाया।
चित्तौड़गढ़-गुरुकुलम् अध्युष्य अहं भीमसेनप्रमुखान् अध्यजीगपम् (अध्यापिपम्, अध्यापयम्)।

३. गुरुकुल कुरुक्षेत्र में रहकर मैंने ब्रह्मदत्त आनन्दप्रकाश आदि छात्रों को पढ़ाया।
गुरुकुल कुरुक्षेत्रम् अधितिष्ठता मया ब्रह्मदत्तानन्दप्रकाशप्रमुखाः छात्राः अध्याप्यन्त (अध्यापयिषत, अध्यापिताः)।

४. जहां अयोग्य अध्यापक पढ़ाते हैं, वहां ज्ञान की वृद्धि असम्भव है।
यत्र अयोग्याः अध्यापकाः अध्यापयन्ति तत्र ज्ञानवृद्धिः असम्भवा खलु।

५. आचार्यों ने चन्द्रापीड और वैशम्पायन को सब विद्याएँ पढ़ाईं।
आचार्याः चन्द्रापीडवैशम्पायनौ सर्वाः विद्याः अध्यापयाञ्चक्रुः।

६. हे शिक्षको! आलसी और अभिमानी छात्रों को मत पढ़ाओ।
हे शिक्षकाः! प्रमादिनः अभिमानिनः च छात्रान् न अध्यापयत (नैव अध्यापयेत, मा अध्यापिपत, मा अधिजीगपत; मा स्म अध्यापयत)।

---

१. 'क्रीङ्जीनां णौ' (अष्टा० ६.१.४८) से इ के स्थान पर आकारादेश होने पर उसको अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ (अष्टा० ७.३.३६) से पुगागम हुआ।

२. णौ च संश्चङोः (अष्टा० २.४.५१) से इङ् के स्थान पर विकल्प से गाङ् आदेश हुआ।

७. यदि शङ्करदेव जी उन्हें व्याकरण न पढ़ाते तो वे मूर्ख ही रहते।
यदि शङ्करदेवमहाभागाः तान् व्याकरणं न अध्यापयिष्यन् तर्हि ते मूर्खाः एव अस्थास्यन्।

दुष वैकृत्ये (=दूषित होना, बिगड़ना), दूषि[1]—दूषित करना, बिगाड़ना

लट्—दूषयति	दूषयतः	दूषयन्ति	लङ्—अदूषयत्	अदूषयताम्	अदूषयन्
लिट्—दूषयाञ्चकार	दूषयाञ्चक्रतुः	दूषयाञ्चक्रुः	वि. लिङ्—दूषयेत्	दूषयेताम्	दूषयेयुः
			लुङ्—अदूदुषत्	अदूदुषताम्	अदूदुषन्
लुट्—दूषयिता	दूषयितारौ	दूषयितारः	अदूदुषः	अदूदुषतम्	अदूदुषत
लृट्—दूषयिष्यति	दूषयिष्यतः	दूषयिष्यन्ति	अदूदुषम्	अदूदुषाव	अदूदुषाम
लोट्—दूषयतु, दूषयतात्	दूषयताम्	दूषयन्तु	लृङ्—अदूषयिष्यत्	अदूषयिष्यताम्	अदूषयिष्यन्

१. कार्य असफल हो जाने पर ये एक दूसरे पर दोष लगाते हैं।
कार्ये असिद्धे सति एते अन्योन्यं दूषयन्ति।

२. धोबी ने रामचन्द्र पर झूठा दोष लगाया था।
रजकः रामचन्द्रं मिथ्यैव दूषयाञ्चकार।

३. बच्चों को गन्दे छात्रावासों में मत रक्खो, बिगड़े हुए लड़के इनको बिगाड़ देंगे।
बालकान् मलिनेषु छात्रावासेषु मा प्रवीविशः (मा स्म प्रवेशयः), दुष्टाः बालकाः एतान् अपि दूषयिष्यन्ति (दूषयितारः)।

४. तुम लोग खेलकर इस कुण्ड के जल को दूषित मत करो।
यूयं क्रीडनेन एतत्कुण्डजलं न दूषयत (नैव दूषयेत, मा दूदुषत, मा स्म दूषयत)।

५. यदि तुम दोनों इस पर दोष न लगाते तो यह कलह न करता।
यदि युवाम् इमं न अदूषयिष्यतम् तर्हि अयं न अकलहयिष्यत्।

हन् हिंसागत्योः (=मारना, जाना), घाति[2]=मरवाना, भेजना

लट्—घातयति	घातयतः	घातयन्ति	लृट्—घातयिष्यति	घातयिष्यतः	घातयिष्यन्ति
लिट्—घातयाञ्चकार	घातयाञ्चक्रतुः	घातयाञ्चक्रुः	लोट्—घातयतु, घातयतात्	घातयताम्	घातयन्तु
लुट्—घातयिता	घातयितारौ	घातयितारः			

१. दोषो णौ (अष्टा० ६.४.९०) से दुष् की उपधा (=उ) को दीर्घ ऊकारादेश हुआ।

२. 'हो हन्तेर्ञ्णिन्नेषु' (अष्टा० ७.३.५४) से ह् को घ् तथा 'हनस्तोऽचिण्णलोः' (अष्टा० ७.३.३२) से न् को त्।

लङ्—अघातयत् अघातयताम् अघातयन्

वि. लिङ्—घातयेत् घातयेताम् घातयेयुः

लुङ्—अजीघतत् अजीघतताम् अजीघतन्

अजीघतः अजीघततम् अजीघतत

अजीघतम् अजीघताव अजीघताम

लृङ्—अघातयिष्यत् अघातयिष्यताम् अघातयिष्यन्

१. चाणक्य ने अपते दूतों से नौ नन्दों को मरवाया।
चाणक्यः निजचरैः नव नन्दान् घातयाञ्चकार (अघातयत्, अजीघतत्)

२. आज डाकुओं ने गांव के दो सेठ मरवा दिये।
अद्य दस्यवः ग्रामस्य द्वौ धनिकौ अजीघतन्।

३. जो निरपराधी की हत्या करवाते हैं, वे पाप के भागी होते हैं।
ये निरपराधान् घातयन्ति ते पापभागिनः भवन्ति।

४. हे ऋत्विजो! तुम यज्ञों में पशुओं को मत मरवावो, यह महापाप है।
हे ऋत्विजः! यूयं यज्ञेषु पशून् नैव घातयत (नैव घातयेत; मा जीघतत; मा स्म घातयत), महापापमिदम्।

५. जो देवालयों में पशुओं को मरवायेगा वह दण्डनीय होगा।
यः देवालयेषु पशून् घातयिष्यति (घातयिता) सः दण्ड्यः भविष्यति (भविता)।

६. यदि नन्हीं भगतन दयानन्द को विषदान से न मरवाती तो भारत का महान् उपकार होता।

यदि 'नन्हीं भगतन' नामिका गणिका दयानन्दं विषदानेन न अघातयिष्यत् तर्हि भारतस्य महान् उपकारः अभविष्यत्।

शीङ् स्वप्ने (=सोना), शायि=सुलाना

लट्—शाययति शाययतः शाययन्ति

लिट्—शाययाञ्चकार शाययाञ्चक्रतुः शाययाञ्चक्रुः

लुट्—शाययिता शाययितारौ शाययितारः

लृट्—शाययिष्यति शाययिष्यतः शाययिष्यन्ति

लोट्—शाययतु / शाययतात् शाययताम् शाययन्तु

लङ्—अशाययत् अशाययताम् अशाययन्

वि. लिङ्—शाययेत् शाययेताम् शाययेयुः

लुङ्—अशीशयत् अशीशयताम् अशीशयन्

अशीशयः अशीशयतम् अशीशयत

अशीशयम् अशीशयाव अशीशयाम

लृङ्—अशाययिष्यत् अशाययिष्यताम् अशाययिष्यन्

१. माता ने पुत्रों को सुलाया।
माता पुत्रान् अशीशयत् (अशाययत्, शायितवती)।

२. मौसी मेरी छोटी बहिन को पलङ्ग पर सुलायेगी।
मातृष्वसा मम अनुजां पर्यङ्के शाययिष्यति (शाययिता)।
३. लक्ष्मण ने राम और सीता को पत्तों के बिछोने पर सुलाया।
लक्ष्मणः सीतारामचन्द्रौ पर्णास्तरणे शाययाञ्चकार।
४. इस बच्चे को गीले में मत सुला।
इमं शिशुम् आर्द्रे स्थले नैव शायय (न शाययेः, मा शीशयः, मा स्म शाययः)।
५. हम अपने अतिथियों को अतिथिगृह में सुलाते हैं।
वयं स्वान् अतिथीन् अतिथिगृहे शाययामः।
६. यदि हम इनको दिन में सुला देते तो ये रात में जग लेते।
यदि वयम् एतान् दिवसे अशाययिष्याम तर्हि एते रात्रौ अजागरिष्यन्।
७. रो रोकर आंसुओं से अपने गालों को भिगोते हुए अपने दूध पीते बच्चे को पीठ सहलाकर सुलाती हुई माता को देखकर चन्द्रशेखर ने भानुप्रकाश से कहा—अहा ! माता को पुत्र के लिये जबर्दस्ती बड़े कष्ट सहने पड़ते हैं।
रोदं रोदम् अश्रुभिः निजकपोलौ स्नपयन्तं निजस्तनन्धयं शिशुं पृष्ठोपमर्दं शाययन्तीं मातरं दर्शं दर्शं चन्द्रशेखरः भानुप्रकाशम् अवादीत्-अहो ! अनिच्छन्ती अपि माता पुत्रस्य कृते महान्ति कष्टानि सहते।

सन्नन्त प्रक्रिया

कर्म की अवयव भूत उस धातु से इच्छा अर्थ में विकल्प से सन् प्रत्यय होता है जिसका कर्त्ता, इच्छा क्रिया का भी कर्त्ता हो।[1] सरल रूप में इसे यों समझ सकते हैं कि धातुमात्र से इच्छा अर्थ में सन् प्रत्यय होता है यदि उस धातु (क्रिया) का कर्त्ता और चाहना (इच्छा) रूप क्रिया का कर्त्ता समान हो तो। एक पक्ष में वाक्य का भी प्रयोग होता है।

सन् में से न् की इत्सञ्ज्ञा और लोप हो जाने पर 'स' बच रहता है। तब धातु के प्रथम एकाच् को द्वित्व होता है[2]। द्वित्व हुए स्वरूप के पूर्वभाग की संज्ञा 'अभ्यास' हो जाती है[3]। अभ्यास का प्रथम हल् (व्यञ्जन) शेष रहता है अन्य हलों का लोप हो जाता है[4]। अभ्यास के दीर्घ अच् (स्वर) को ह्रस्व होता है[5]। यदि वह ह्रस्व हुआ स्वर अकार हो तो उसके स्थान पर ह्रस्व इकारादेश होता है[6]। 'स' को

---

१. धातोः कर्मणः समानकर्तृकादिच्छायां वा (अष्टा. ३.१.७)।
२. सन्यङोः (अष्टा. ६.१.९)।
३. पूर्वोऽभ्यासः (अष्टा. ६.१.४)।
४. हलादिः शेषः (अष्टा. ७.४.६०)।
५. ह्रस्वः (अष्टा. ७.४.५९)।
६. सन्यतः (७.४.७९)।

इट् (इ) का आगम होता है यदि वह सेट् धातुओं से उत्पन्न हुआ हो[१]। इण् और कवर्ग से परे वर्तमान सन् के स को षत्व होगा[२]। पठ+सन्→पठ्+स→पठ्स् पठ्स् अ→प पठ् स् अ→प पठ्स। पि पठ्स। पिपठ् इस। पिपठिष=पढ़ना चाहना। इस सन्नन्त शब्द की धातु सञ्ज्ञा होगी[३]। सन्नन्त धातु से, धातुमात्र से होने वाले प्रायः सभी कृत् प्रत्यय होते हैं—जैसे तव्यत्, अनीयर्, यत्, क्त क्तवतु, क्त्वा, णमुल्, णिनि, तुमुन् आदि। सन्नन्त धातु से दो प्रत्यय विशेष होते हैं। एक तो उ दूसरा अ। सन्नन्त धातु से उ प्रत्यय[४] होने पर वह विशेषण बनता है। जैसे पिपठिष+उ (अलोप होने पर[५]) पिपठिष्+उ→पिपठिषुः=पढ़ना चाहने वाला अर्थात् पढ़ने का इच्छुक। सन्नन्त धातु से भाव अर्थ में (अकार) प्रत्यय होता है स्त्रीलिङ्ग में[६]। टाप् होने पर→पिपठिष+अ→पिपठिष्+अ→पिपठिष्+अ+टाप्→पिपठिष्+अ+आ=पिपठिषा=पढ़ने की इच्छा।

तिङ् प्रत्ययों में से परस्मैपद और आत्मनेपद दोनों प्रकार के प्रत्यय यथायोग्य रूप से होते हैं। अर्थात् धातु की सादी अवस्था में यदि उससे आत्मनेपद होता है तो उसकी सन्नन्त अवस्था से भी आत्मनेपद ही होगा[७]। यदि धातु के सादे स्वरूप में उससे परस्मैपद होता है तो सन् प्रत्यय करने पर भी परस्मैपद होगा। यदि सादी धातु उभयपदी है तो उसका सन्नन्त स्वरूप भी उभयपदी होगा। इसमें थोड़ा सा यह ध्यान रखना है कि ज्ञा धातु (अनु उपसर्ग रहित), श्रु धातु (प्रति, आङ् रहित) स्मृ धातु और दृश् धातु की सन्नन्त अवस्था से सदा आत्मनेपद ही होगा[८]। सन्नन्त धातु से चाहे आत्मनेपद प्रत्यय होवे चाहे परस्मैपद कर्तृवाच्य में बीच में शप् (अ) विकरण (लट्, लोट्, लङ् और वि० लिङ्) चार लकारों में अवश्य आयेगा[९]। पिपठिष+शप्+ति→पिपठिष+अ+ति→पिपठिषति[१०]। शिशयिष+शप्+ते→शिशयिष+अ+ते→शिशयिषते[१०]।

अब हम एक-एक धातु के दोनों प्रकार के सम्पूर्ण रूप दर्शा देते हैं—

---

१. आर्धधातुकस्येड्वलादेः (अष्टा ७.२.३५)।

२. आदेशप्रत्यययोः (अष्टा. ८.३.५९)। ३. सनाद्यन्ता धातवः (अष्टा. ३.१.३२)।

४. सनाशंसभिक्ष उः (अष्टा. ३.२.१६८)। ५. अतो लोपः (अष्टा. ६.४.४८)।

६. अ प्रत्ययात् (अष्टा. ३.३.१०२)। ७. पूर्ववत्सनः (अष्टा. १.३.६२)।

८. ज्ञाश्रुस्मृदृशां सनः; नानोर्ज्ञः; प्रत्याङ्भ्यां श्रुवः (अष्टा. १.३.५७; ५८; ५९)।

९. कर्त्तरि शप् (अष्टा. ३.१.६८)।

१०. अतो गुणे (अष्टा. ६.१.९७) से दो अकारों के स्थान पर पररूप ह्रस्व अकारादेश हो गया।

(१) पठ्=पढ़ना। पिपठिष=पढ़ना चाहना।

लट्

पिपठिषति पिपठिषतः पिपठिषन्ति
पिपठिषसि पिपठिषथः पिपठिषथ
पिपठिषामि पिपठिषावः पिपठिषामः

लिट्

(१) पिपठिषाञ्चकार पिपठिषाञ्चक्रतुः पिपठिषाञ्चक्रुः
(२) पिपठिषाम्बभूव पिपठिषाम्बभूवतुः पिपठिषाम्बभूवुः
(३) पिपठिषामास पिपठिषामासतुः पिपठिषामासुः

लुट्

पिपठिषिता पिपठिषितारौ पिपठिषितारः
पिपठिषितासि पिपठिषितास्थः पिपठिषितास्थ
पिपठिषितास्मि पिपठिषितास्वः पिपठिषितास्मः

लृट्

पिपठिषिष्यति पिपठिषिष्यतः पिपठिषिष्यन्ति
पिपठिषिष्यसि पिपठिषिष्यथः पिपठिषिष्यथ
पिपठिषिष्यामि पिपठिषिष्यावः पिपठिषिष्यामः

लोट्

पिपठिषतु, पिपठिषतात् पिपठिषताम् पिपठिषन्तु
पिपठिष पिपठिषतम् पिपठिषत
पिपठिषाणि पिपठिषाव पिपठिषाम

लङ्

अपिपठिषत् अपिपठिषताम् अपिपठिषन्
अपिपठिषः अपिपठिषतम् अपिपठिषत
अपिपठिषम् अपिपठिषाव अपिपठिषाम

वि० लिङ्

पिपठिषेत पिपठिषेताम् पिपठिषेयुः
पिपठिषेः पिपठिषेतम् पिपठिषेत
पिपठिषेयम् पिपठिषेव पिपठिषेम

लुङ्

अपिपठिषीत् अपिपठिषिष्टाम् अपिपठिषिषुः
अपिपठिषीः अपिपठिषिष्टम् अपिपठिषिष्ट
अपिपठिषिषम् अपिपठिषिष्व अपिपठिषिष्म

लृङ्—अपिपठिषिष्यत् अपिपठिषिष्यताम् अपिपठिषिष्यन्
अपिपठिषिष्यः अपिपठिषिष्यतम् अपिपठिषिष्यत
अपिपठिषिष्यम् अपिपठिषिष्याव अपिपठिषिष्याम

पिपठिष+तव्यत्=पिपठिषितव्यम् (=पढ़ना चाहना चाहिये, पढ़ने चाहने योग्य)
पिपठिष+यत् =पिपठिष्यम् (,, ,, ,,)।
पिपठिष+अनीयर्=पिपठिषणीयम् (,, ,, ,,)।
पिपठिष+क्त =पिपठिषितः (पढ़ने को चाहा गया)।
पिपठिष+क्तवतु=पिपठिषितवान् (=पढ़ना चाहा)।
,, +क्त्वा=पिपठिषित्वा (=पढ़ना चाहकर)।

पिपठिष+णमुल् = पिपठिषं पिपठिषम् (=पढ़ने की इच्छा कर कर के)
,, +तुमुन् = पिपठिषितुम् (=पढ़ना चाहने के लिए)
,, +उ = पिपठिषु (=पढ़ने का इच्छुक)
,, +अ = पिपठिषा (=पढ़ने की इच्छा)
,, +ण्वुल् = पिपठिषकः (=पढ़ने का इच्छुक)
,, +तृच् = पिपठिषिता (=,, ,,)
,, +क्विप् = पिपठीः (=,, ,,)
,, +शतृ = पिपठिषन् (=पढ़ना चाहता हुआ)
पिपठिषन्ती = पढ़ना चाहती हुई
पिपठिषत् = पढ़ना चाहता हुआ कुल

अभ्यास

१. तू क्या पढ़ना चाहता है = त्वं किं पिपठिषसि ?
२. मैं तो चैत्र में मीमांसा शास्त्र पढ़ना चाहूंगा ।
अहं तु चैत्रे मीमांसाशास्त्रं पिपठिषिष्यामि (पिपठिषितास्मि)
३. नारद ने सनत्कुमार से आत्मशास्त्र पढ़ना चाहा था ।
नारदः सनत्कुमारात् आत्मशास्त्रं पिपठिषाञ्चकार ।
४. हमने रेवाशङ्कर जी से सामवेद का गानशास्त्र पढ़ना चाहा था ।
वयं रेवाशङ्करमहाभागात् सामवेदस्य गानशास्त्रम् अपिपठिषाम (अपिपठिषिष्म)
५. तुम लोग ईश्वरचन्द्रजी से दर्शन पढ़ने की इच्छा करो ।
यूयम् ईश्वरचन्द्रमहाभागात् दर्शनानि पिपठिषत (पिपठिषेत)
६. तू यदि मुझसे व्याकरण पढ़ना चाहता तो मैं मना नहीं करता ।
त्वं यदि मत्तः व्याकरणम् अपिपठिषिष्यः तर्हि अहं न न्यसेधिष्यम् ।
७. ये सब छात्र संस्कृत पढ़ने के इच्छुक हैं = एते छात्राः संस्कृतं पिपठिषवः सन्ति ।
८. संस्कृत पढ़ने का इच्छुक मैं आपके पास आया हूँ ।
सुरभारतीं पिपठिषुः (पिपठिषकः, पिपठिषिता, पिपठीः) अहं श्रीमतां पादमूलम् आपम् ।
९. संस्कृत पढ़ने की इच्छा से मैं आपके चरणों में उपस्थित हुआ हूँ ।
लेखभाषायाः पिपठिषया अहं श्रीचरणान् उपास्थिषि ।
१०. मैं इस ग्रन्थ को पढ़ने की इच्छा कर करके भी इसे न पढ़ सका ।
अहम् इमं ग्रन्थं पिपठिषं पिपठिषम् अपि एनं न पठितुं प्राभूवम् ।
११. महर्षि का जीवन चरित पढ़ना चाहने योग्य है ।
महर्षेः जीवनचरित पिपठिष्यम् (पिपठिषितव्यं, पिपठिषणीयम्) अस्ति ।

१२. जर्मन भाषा पढ़ने के इच्छुक छात्र मेरे पास आ जावें।
शार्मण्यदेशभाषां पिपठिषवः (पिपठिषकाः, पिपठिषितारः, पिपठिषः) सर्वे छात्राः मदभ्यर्णम् आगच्छेयुः।

१३. इस नई छपी आख्यायिका को सभी ने पढ़ना चाहा है।
इमां नवमुद्रिताम् आख्यायिकां सर्वे ह्येव पिपठिषितवन्तः।
इयं नवमुद्रिता आख्यायिका सर्वैः एव पिपठिषिता।

१४. तुम पढ़ना चाहकर क्या करोगे, तुम्हारी आंखें कमजोर हैं।
त्वं पिपठिषित्वा किंकरिष्यसि, निर्बले तव नेत्रे स्तः।

(२) शीङ् स्वप्ने (सोना), शिशयिष=सोना चाहना

लट्

शिशयिषते शिशयिषेते शिशयिषन्ते
शिशयिषसे शिशयिषेथे शिशयिषिध्वे
शिशयिषे शिशयिषावहे शिशयिषामहे

लिट्

(१) शिशयिषाञ्चक्रे शिशयिषाञ्चक्राते शिशयिषाञ्चक्रिरे
(२) शिशयिषाम्बभूव शिशयिषाम्बभूवतुः शिशयिषाम्बभूवुः
(३) शिशयिषामास शिशयिषामासतुः शिशयिषामासुः

लुट्

शिशयिषिता शिशयिषितारौ शिशयिषितारः
शिशयिषितासे शिशयिषितासाथे शिशयिषिताध्वे
शिशयिषिताहे शिशयिषितास्वहे शिशयिषितास्महे

लृट्

शिशयिषिष्यते शिशयिषिष्येते शिशयिषिष्यन्ते
शिशयिषिष्यसे शिशयिषिष्येथे शिशयिषिष्यध्वे
शिशयिषिष्ये शिशयिषिष्यावहे शिशयिषिष्यामहे

लोट्

शिशयिषताम् शिशयिषेताम् शिशयिषन्ताम्
शिशयिषस्व शिशयिषेथाम् शिशयिषध्वम्
शिशयिषै शिशयिषावहै शिशयिषामहै

लङ्

अशिशयिषत अशिशयिषेताम् अशिशयिषन्त
अशिशयिषथाः अशिशयिषेथाम् अशिशयिषध्वम्
अशिशयिषे अशिशयिषावहि अशिशयिषामहि

वि. लिङ्

शिशयिषेत शिशयिषेयाताम् शिशयिषेरन्
शिशयिषेथाः शिशयिषेयाथाम् शिशयिषेध्वम्
शिशयिषेय शिशयिषेवहि शिशयिषेमहि

लुङ्

अशिशयिषिष्ट अशिशयिषिषाताम् अशिशयिषिषत
अशिशयिषिष्ठाः अशिशयिषिषाथाम् अशिशयिषिढ्वम्
अशिशयिषिषि अशिशयिषिष्वहि अशिशयिषिष्महि

लृङ्

अशिशयिषिष्यत अशिशयिषिष्येताम् अशिशयिषिष्यन्त
अशिशयिषिष्यथाः अशिशयिषिष्येथाम् अशिशयिषिष्यध्वम्
अशिशयिषिष्ये अशिशयिषिष्यावहि अशिशयिषिष्यामहि

शिशयिष + तव्यत् = शिशयिषितव्यम् = सोना चाहना चाहिए।
,, + यत् = शिशयिष्यम् = ,, ,, ,,
,, + अनीयर् = शिशयिषणीयम् = ,, ,, ,,
,, + क्तवतु = शिशयिषितवान् = सोना चाहा।
,, + क्त्वा = शिशयिषित्वा = सोना चाहकर (सोने की इच्छा करके)।
,, + णमुल् = शिशयिषं शिशयिषम् = सोने की इच्छा कर करके।
,, + तुमुन् = शिशयिषितुम् = सोना चाहने के लिए।
,, + उ = शिशयिषु: = सोने का इच्छुक।
,, + ण्वुल् = शिशयिषक: = ,, ,, ,,
,, + तृच् = शिशयिषिता = ,, ,, ,, ।
,, + क्विप् = शिशयी: = ,, ,, ,, ।
,, + आ = → शिशयिषा = सोने की इच्छा।
,, + शानच् = शिशयिषमाण: = सोना चाहता हुआ।

अभ्यास

१. हम सब खुली हवा में सोना चाहते हैं = वयं निर्बाधे पवने शिशयिषामहे।

२. राम, लक्ष्मण और सीता ने अगस्त्य आश्रम में ही सोना चाहा।
सीतारामलक्ष्मणा: अगस्त्याश्रमे ह्येव शिशयिषाञ्चक्रिरे।

३. तुम सब कहाँ सोना चाहोगे = यूयं क्व शिशयिषिष्यध्वे (शिशयिषिताध्वे)।

४. तू कितना ही बाहर सोना चाह मैं तुझे बाहर नहीं सुलाऊंगा।
त्वम् कियद् अपि बहि: शिशयिषस्व (शिशयिषेथा:) अहं त्वां बहि: न शाययिष्यामि (शाययितास्मि)।

५. उन्होंने जिस कमरे में सोना चाहा था वहीं सांप निकल आया।
ते यस्मिन् प्रकोष्ठे अशिशयिषन्त (अशिशयिषिषत) तत्रैव सर्प: निरगच्छत्।

६. वह यदि हमारे घर सोना चाहता तो मैं सुला लेता।
स: यदि अस्मद्गेहे अशिशयिषिष्यत तर्हि अहं अशाययिष्यम्।

७. ब्रह्मचारी को दिन में सोने की इच्छा नहीं करनी चाहिये।
ब्रह्मचारिणा दिवा न शिशयिषितव्यम् (शिशियिष्यं, शिशयिषणीयम्)।

८. उसने उष:काल में कभी सोने की इच्छा नहीं की।
स: उष:काले कदापि न शिशयिषितवान्।

९. मैंने सोने की इच्छा करके चादर ओढ़ ली = अहं शिशयिषित्वा प्रावारं प्रावृण्वम्।

१०. तुम लोग सोने की इच्छा कर करके भी सो न सके।
यूयं शिशयिषं शिशयिषम् अपि शयितुं न अशक्नुत (अशकत)।

११. यह रोगी सोना चाहने को प्रयत्नशील है।
अयं रुग्णः शिशयिषितुं प्रयतते।

१२. इन सोने के इच्छुक यात्रियों को यज्ञशाला में सुला दो।
इमान् शिशयिषून् (शिशयिषकान्, शिशयिषितॄन्, शिशयिषः) यात्रिणः यज्ञशालायां शायय (शाययेः)।

१३. मैं अब नहीं पढ़ूंगा, मुझे सोने की इच्छा तंग कर रही है।
अहम् अधुना न अध्येष्ये शिशियिषा मां बाधते।

(३) हृञ् हरणे=हरण करना, जिहीर्ष=हरण करना चाहना अभ्यवजिहीर्ष=खाना चाहना, उपजिहीर्ष=भेंट करना चाहना

	परस्मै०	आत्मने०		परस्मै०	आत्मने०
लट्	जिहीर्षति	जिहीर्षते	लङ्	अजिहीर्षत्	अजिहीर्षत
लिट्	जिहीर्षाञ्चकार	जिहीर्षाञ्चक्रे	वि०लिङ्	जिहीर्षेत्	जिहीर्षेत
लुट्	जिहीर्षिता	जिहीर्षिता	लुङ्	अजिहीर्षीत्	अजिहीर्षिष्ट
लृट्	जिहीर्षिष्यति	जिहीर्षिष्यते	लृङ्	अजिहीर्षिष्यत्	अजिहीर्षिष्यत
लोट्	जिहीर्षतु	जिहीर्षताम्			

उ—जिहीर्षुः, अ—जिहीर्षा, तृच्—जिहीर्षिता,

तुमुन्—जिहीर्षितुम्, क्त्वा—जिहीर्षित्वा। शतृ—जिहीर्षन्, शानच्—जिहीर्षमाणः।

१. आपकी किस पदार्थ को खाने की इच्छा है ?
कस्य पदार्थस्य अभ्यवजिहीर्षा श्रीमताम् ?

२. मेरी खीर खाने की इच्छा है।
मामकीनां पायसान्नस्य अभ्यवजिहीर्षां विदाङ्कुर्वन्तु आर्यमिश्राः।

३. अपने गुरुजी को लवंग भेंट करना चाहते हुए स्वामी दयानन्द जी को विरजानन्द जी ने कहा—दयानन्द ! लौंगों की भेंट की आवश्यकता नहीं है। संसार में फैलते हुए अज्ञानान्धकार को दूर करते हुए आप मुझे बहुत बड़ी दक्षिणा देंगे।
निजगुरुचरणेभ्यः लवङ्गानि उपजिहीर्षतः स्वामिदयानन्दमहाभागान् श्री विरजानन्दचरणाः आजिज्ञपन्—दयानन्द ! कृतं लवङ्गोपहारेण ! जगति प्रसरत् अज्ञानतमः व्यपनयता त्वया महती दक्षिणा मह्यं दास्यते (दायिष्यते)।

४. लगातार नदी के किनारे घूमने की इच्छा से अधिष्ठाता जी को कहते हुए छात्रों को, गुरुकुल की व्यवस्था करवाने की इच्छा से अधिष्ठाता जी ने कहा—छात्रो ! प्रतिदिन अध्ययन की परवाह न करके घूमने की इच्छा करते हुए तुमको लज्जा नहीं आती।

साम्रेडं सरित्तीरस्य विजिहीर्षया अधिष्ठातृचरणान् व्याहरतः छात्रान् गुरुकुलस्य व्यवतिष्ठापिषया अधिष्ठातृमहाभागाः व्याहार्षुः—छात्राः। प्रत्यहम् अध्ययनम् अविगणय्य विहरणाय स्पृहयतः युष्मान् कथं न वैलक्ष्यं लक्ष्यीकरोति ?

(४) गम्लृ गतौ (=जाना), जिगमिष=जाना चाहना

लट्—जिगमिषति, लिट्—जिगमिषाञ्चकारः, लुट्—जिगमिषिता,
लृट्—जिगमिषिष्यति, लोट्—जिगमिषतु, लङ्—अजिगमिषत्,
वि० लिङ्—जिगमिषेत्, लुङ्—अजिगमिषीत्, लृङ्—अजिगमिषिष्यत्,
उ—जिगमिषुः, अ—जिगमिषा, तृच्—जिगमिषिता,
तुमुन्—जिगमिषितुम्, क्त्वा—जिगमिषित्वा, शतृ—जिगमिषन्।

१. तुम्हारी घर जाने की इच्छा थी क्यों नहीं गये ?
तव गृहस्य जिगमिषा आसीत् कथं न अगमः ? (कः अन्तरायः अभूत् ?)।

दृशिर् प्रेक्षणे (=देखना), दिदृक्ष=देखना चाहना

लट्—दिदृक्षते[1], लिट्—दिदृक्षाञ्चक्रे, लुट्—दिदृक्षिता, लृट्—दिदृक्षिष्यते, लोट्—दिदृक्षताम्, लङ्—अदिदृक्षत, वि० लिङ्—दिदृक्षेत, लुङ्—अदिदृक्षिष्ट, लृङ्—अदिदृक्षिष्यत। उ—दिदृक्षुः, अ—दिदृक्षा, तुमुन्—दिदृक्षितुम्।

१. मैं तो अपनी पुस्तक समाप्त करके ही अपनी दोनों लड़कियों को देखने की इच्छा से दिल्ली जाना चाहता हूँ।
अहं तु निजपुस्तकं परिसमाप्यैव निजबालयोः दिदृक्षया इन्द्रप्रस्थं प्रतिष्ठासे।

(५) डुदाञ् दाने (=देना), दित्स[2]=देना चाहना, आदित्स=लेना चाहना)

लकार	परस्मै०	आत्मने०	लकार	परस्मै०	आत्मने०
लट्—	दित्सति।	दित्सते	लुट्—	दित्सिता।	दित्सिता
लिट्—	दित्साञ्चकार।	दित्साञ्चक्रे	लृट्—	दित्सिष्यति	दित्सिष्यते

---

१. सन्नन्त दृश् धातु से 'ज्ञाश्रुस्मृदृशां सनः' (अष्टा. १.३.५७) से नित्य आत्मनेपद ही होगा।

२. सनिमीमाघुरभलभशकपतपदामच इस् (अष्टा. ७.४.५४) से दा के अच् (=आ) को इस् आदेश और अभ्यास का लोप। आदेश के स् को तकारादेश 'सः स्यार्धधातुके' (अष्टा. ७.४.४९) से हुआ।

लोट्—	दित्सतु । दित्सतात्	दित्सताम्	लुङ्—अदित्सीत् ।	अदित्सिष्ट
	लङ्—अदित्सत् ।	अदित्सत	लृङ्—अदित्सिष्यत् ।	अदित्सिष्यत
	वि० लिङ्—दित्सेत् ।	दित्सेत		

उ—दित्सुः । अ—दित्सा, तृच्—दित्सिता, तुमुन्—दित्सितुम्,

क्त्वा—दित्सित्वा । शतृ—दित्सन् । शानच्—दित्समानः ।

१. कुछ छात्र तिवारी महोदय से व्याकरण का ज्ञान लेने की इच्छा से वाराणसी में रहकर, तिवारी जी के चरणों में उपस्थित होकर, अपने अध्यापन से उत्पन्न परिश्रम को न गिनते हुए रातदिन छात्रों को ज्ञान देने की इच्छा से पढ़ाते हुए श्री तिवारी गुरुजी की इच्छा को देखकर, परस्पर कहने लगे—अहो ! बुढ़ापे में भी इस प्रकार ज्ञान देना चाहते हुए ऐसे गुरुओं का कौन मन्दमति आदर नहीं करेगा ?

केचित् छात्राः तिवारीचरणेभ्यः व्याकरणज्ञानम् आदित्सवः वाराणसीम् अध्युष्य, तिवारीचरणान् उपस्थाय, निजाध्यापनजनितपरिश्रमम् अविगणय्य अहर्निशं छात्रेभ्यः ज्ञानदित्सया पाठयतः श्रीतिवारीगुरुपादान् अक्षिलक्ष्यीकृत्य, अन्योन्यम् अभ्यधुः—अहो ! वार्धक्येऽपि इत्थं छत्रेभ्यः ज्ञानं दित्सतः एतादृशान् गुरून् कः मन्दमतिः समादरदृष्टिपथं न अवतारयिष्यति ?

(६) डुलभष् (=लभ्) प्राप्तौ (=पाना), लिप्स[1]=पाना चाहना

लिप्सते । लिप्साञ्चक्रे । लिप्सिता । लिप्सिष्यते । लिप्सताम् । अलिप्सत । लिप्सेत । अलिप्सिष्ट । अलिप्सिष्यत ।

उ—लिप्सुः । अ—लिप्सा । तृच्—लिप्सिता । तुमुन्—लिप्सितुम् । क्त्वा—लिप्सित्वा । शानच्—लिप्समानः ।

(७) आप्लृ व्याप्तौ (=प्राप्त करना), ईप्स[2]=प्राप्त करना चाहना

ईप्सति । ईप्साञ्चकार । ईप्सिता । ईप्सिष्यति । ईप्सतु । ऐप्सत् । ईप्सेत् । ऐप्सीत् । ऐप्सिष्यत् ॥ उ—ईप्सुः । अ—ईप्सा । तृच्—ईप्सिता । क्त्वा—ईप्सित्वा । शतृ—ईप्सन् ।

---

१. यहाँ भी 'सनि मी०' से 'लभ्' के अ को इस् आदेश हुआ→लिस्भ् स । 'खरि च' (अष्टा. ८.४.५५) से 'भ् को प्→लिस्प् स । 'स्कोः संयोगाद्योरन्ते च' (अष्टा. ८.२.२९) से संयोग के आरम्भ में वर्तमान स् का लोप→लिप्स ।

२. आप्ज्ञप्यृधामीत् (अष्टा. ७.४.५५) से 'आप्' के आ के स्थान पर दीर्घ ईकारादेश और अभ्यास का लोप । आप्लृ+सन् । आप् स । आ प्स प्स । आपप्स । ईप्स ।

(८) दम्भु दम्भने (=ढोंग करना), धिप्स,[1] धीप्स, दिदम्भिष= ढोंग करना चाहना

धिप्सति । धिप्साञ्चकार । धिप्सिता । धिप्सिष्यति । धिप्सतु । अधिप्सत् । धिप्सेत् । अधिप्सीत् । अधिप्सिष्यत् ।

धीप्सति । धीप्साञ्चकार । धीप्सिता । धीप्सिष्यति । धीप्सतु । अधीप्सत् । धीप्सेत् । अधीप्सीत् । अधीप्सिष्यत् ।

दिदम्भिषति । दिदम्भिषाञ्चकार । दिदम्भिषिता । दिदम्भिषिष्यति । दिदम्भिषतु । अदिदम्भिषत् । दिदम्भिषेत् । अदिदम्भिषीत् । अदिदम्भिषिष्यत् ।

उ—धिप्सुः, धीप्सुः, दिदम्भिषुः । अ—धिप्सा, धीप्सा, दिदम्भिषा । तृच्—धिप्सिता, धीप्सिता, दिदम्भिषिता । क्त्वा—धिप्सित्वा, धीप्सित्वा, दिदम्भिषित्वा । शतृ—धिप्सन्, धीप्सन्, दिदम्भिषन् । इत्यादि ।

१. धन-प्राप्ति की इच्छावाले कुछ ढोंगी मनुष्य बहुत से धन की प्राप्ति की इच्छा से नाना वेश धारण करके भोलेभाले पुरुषों को ठगते हैं ।
केचित् अर्थलिप्सवः धिप्सवः (धीप्सवः, दिदम्भिषवः) जनाः नानावेशान् आकलय्य बहुवित्तस्य ईप्सया मुग्धान् मनुष्यान् विप्रलभन्ते ।

जैसे धातुमात्र से (धातु के सादे स्वरूप से) सन् प्रत्यय होता है वैसे णिच् आदि प्रत्यय करने पर बनी णिजन्त आदि धातुओं से भी इच्छा अर्थ में सन् प्रत्यय होता है । हाँ सन्नन्त से फिर सन् नहीं होता । णिजन्त से सन् का प्रयोग देखो—

(९) अधि+इङ् अध्ययने (=पढ़ना), अध्यापि (अधिइङ्+णिच्)=पढ़ाना अध्यापिपयिष, अधिजिगापयिष[2] (अध्यापि+सन्)=पढ़ाना चाहना

१. एक बार रविवार के दिन उपदेश देते हुए, आर्यसमाजियों से मैंने पूछा—आपमें से कितने अपने लड़के को वेद पढ़ाना चाहते हैं ?
एकदा रविवासरे अधिसभम् उपदिशता मया आर्यसमाजिकाः अपृच्छयन्त भवत्सु कियन्तः निजतनयान् वेदान् अध्यापिपयिषन्ति (अधिजिगापयिषन्ति) ?

---

१. दम्भ् धातु से सन् होने पर, द्वित्व और अभ्यासकार्य द दम्भ् स । 'सनीवन्तर्धभ्रस्जदम्भु०' (अष्टा. ७.२.४९) से इट्-विकल्प 'अनिदितां हल उपधायाः क्ङिति' (अष्टा. ६.४.२४) से म् का लोप—ददभ् स 'दम्भ इच्च' (७.४.१६ दभ् के अ के स्थान पर इकार अथवा ई आदेश । अभ्यास लोप । दिभ् स् । दीभ् स । 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (अष्टा. ८ २.३७) से द् को ध् । धिभ्स । धीभ्स । 'खरि च' (अष्टा. ८.४.५५) से भ् को प्→धिप्स । धीप्स ॥ इट्-पक्ष में दिदम्भिष ॥

२. णौ च संश्चङोः (अष्टा. २.४.५१) से, सन्परक णि परे रहने पर इङ् के स्थान पर विकल्प से गाङ्=(गा) आदेश हुआ ।

२. अशोक किशोरानी जी ने अपने लड़के लड़कियों को संस्कृत पढ़ाने की इच्छा से बालकपन में ही उन्हें गुरुकुलों में भेज दिया।
अशोककिशोरानीमहोदयाः निजबालानां संस्कृतस्य अध्यापिपयिषया (अधिजिगापयिषया) बाल्ये एव तान् गुरुकुलानि प्राहिण्वन्।

३. मैंने भी अपने उषा और सुरेन्द्र नाम के बच्चों को संस्कृत पढ़ाने की इच्छा से उन्हें राजेन्द्रनगरस्थ कन्या गुरुकुल में और चित्तौड़गढ़स्थ आर्य गुरुकुल में प्रविष्ट कराया है।
अहमपि उषासुरेन्द्रनामानौ निजबालौ संस्कृतम् अध्यापिपयिषुः (अधिजिगापयिषुः) तौ राजेन्द्रनगरस्थं कन्यागुरुकुलं चित्तौड़गढ़स्थम् आर्षगुरुकुलं च प्रावीविशम् (प्रावेशयम्)।

(१०) डुदाञ् दाने (=देना), दापि (दा+णिच्)=दिलवाना
दिदापयिष (दापि+सन्)=दिलवाने की इच्छा करना

१. गुरुकुल के मरे रुपये गवर्नमेंट से दिलवाने की इच्छा से श्री वेदायन जी और मनीषी जी सहारनपुर गये।
गुरुकुलस्य अपलपितानां रूप्यकाणां शासनेन दिदापयिषया मनीषिवेदायनमहाभागौ सहारनपुरम् अयासिष्टाम् (अयाताम्)।

(११) डुकृञ् करणे (=करना) कारि (=कृ+णिच्)=करवाना, आकारि (आङ्+कृ+णिच्)=बुलाना, आचिकारयिष (=आकारि+सन्) =बुलाने की इच्छा करना।

१. आचार्य रामशास्त्री जी को बुलाने की इच्छा से गुरुकुल के अधिष्ठाता जी ने बहुत से पत्र भेजे।
आचार्यपदोपबृंहितानां रामशास्त्रिमहोदयानाम् आचिकारयिषया गुरुकुलाधिष्ठातृमहाभागाः बहूनि दलानि प्राहिण्वन्।

यङ्न्त-प्रक्रिया

एक अच् (=स्वर) वाली, हलादि धातु से क्रियासमभिहार में अर्थात् क्रिया कि बार-बार करने अथवा अधिक करने अर्थ में यङ् प्रत्यय होता है[1]। रुच् और शुभ् धातुओं के हलादि और एकाच् होने पर भी उनसे यङ् नहीं होगा[2]। कुछ धातु अनेकाच् अथवा अजादि हैं तो भी उनसे यङ् होता है, यथा—सूचि, सूत्रि, मूत्रि, अट्, ऋ, अश् (भोजने) और ऊर्णु[3]।

---

१. धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (अष्टा० ३.१.२२)
२. 'भृशं शोभते भृशं रोचते' इत्यत्र [यङ्] नेष्यतेऽनभिधानात् (काशिका ३.१.२२)
३. सूचिसूत्रिमूत्र्यट्यत्यर्यशूर्णोतीनां ग्रहणं यङ्विधावनेकाजहलाद्यर्थम् [वा०] (अष्टा० ३.१.२२)

धातु से यङ् प्रत्यय होने पर ङ् की इत्सञ्ज्ञा तथा उसका लोप होता है। तब य शेष रहता है। धातु को द्वित्व[1]। पूर्वभाग की अभ्यास सञ्ज्ञा[2]। अभ्यास का आदि हल् शेष[3]। ह्रस्वत्व[4]। अभ्यास के अकार को दीर्घत्व[5]। यदि अभ्यास में इ, उ, ऋ हो तो उसके स्थान पर ए, ओ, अर् गुण[6]। यथा—पठ्+यङ्। पठ्य। पठ्य् पठ्य् अ। पपठ्य् अ। पपठ्य। पापठ्य। चिञ्+यङ्। चिय। चीय। चीय् चीय् अ। चीचीय। चिचीय। चेचीय। इत्यादि। यङ्न्त की पूर्ववत् धातुसञ्ज्ञा भी होगी।

(१) पठ व्यक्तायां वाचि (=पढ़ना), पापठ्य=बार-बार पढ़ना, अधिक पढ़ना

पापठ्य आदि यङ्न्त धातुओं से भी प्रायः सभी साधारण कृत्प्रत्यय (धातु मात्र से होने वाले कृत्प्रत्यय) होते हैं। भाव अर्थ में 'अ' प्रत्यय भी होता है[7]। तिङ् प्रत्ययों में से केवल आत्मनेपद ही होते हैं, क्योंकि यङ्न्त धातु ङित् हैं और ङित् से आत्मनेपद होते हैं[8]।

लट्

पापठ्यते	पापठ्येते	पापठ्यन्ते
पापठ्यसे	पापठ्येथे	पापठ्यध्वे
पापठ्ये	पापठ्यावहे	पापठ्यामहे

लिट्

(१)[9] पापठाञ्चक्रे पापठाञ्चक्राते पापठाञ्चक्रिरे

(२) पापठाम्बभूव पापठाम्बभूवतुः पापठाम्बभूवुः

(३) पापठामास पापठामासतुः पापठामासुः

लुट्

पापठिता	पापठितारौ	पापठितारः
पापठितासे	पापठितासाथे	पापठिताध्वे
पापठिताहे	पापठितास्वहे	पापठितास्महे

लृट्

पापठिष्यते	पापठिष्येते	पापठिष्यन्ते
पापठिष्यसे	पापठिष्येथे	पापठिष्यध्वे
पापठिष्ये	पापठिष्यावहे	पापठिष्यामहे

लोट्

पापठ्यताम्	पापठ्येताम्	पापठ्यन्ताम्
पापठ्यस्व	पापठ्येथाम्	पापठ्यध्वम्
पापठ्यै	पापठ्यावहै	पापठ्यामहै

लङ्

अपापठ्यत	अपापठ्येताम्	अपापठ्यन्त
अपापठ्यथाः	अपापठ्येथाम्	अपापठ्यध्वम्
अपापठ्ये	अपापठ्यावहि	अपापठ्यामहि

---

१. सन्यङोः (अष्टा० ६.१.९) २. पूर्वोऽभ्यासः (अष्टा० ६.१.४)
३. हलादिः शेषः (अष्टा० ७.४.६०) ४. ह्रस्वः (अष्टा० ७.४.५९)
५. दीर्घोऽकितः (अष्टा० ७.४.८३) ६. गुणो यङ्लुकोः (अष्टा० ७.४.८२)
७. अ प्रत्ययात् (अष्टा० ३.३.१०२)
८. अनुदात्तङित आत्मनेपदम् (अष्टा० १.३.१२)
९. लिट्, लुट्, लृट् आदि लकारों में तथा अन्य आर्धधातुक प्रत्ययों में, हलन्त धातु से उत्पन्न यङ् के य् का 'यस्य हलः' (६.४.४९) से लोप हुआ।

वि० लिङ्		
पापठ्येत	पापठ्येयाताम्	पापठ्येरन्
पापठ्येथा:	पापठ्येयाथाम्	पापठ्येध्वम्
पापठ्येय	पापठ्येवहि	पापठ्येमहि

लुङ्		
अपापठिष्ट	अपापठिषाताम्	अपापठिषत
अपापठिष्ठा:	अपापठिषाथाम्	अपापठिढ्वम्
अपापठिषि	अपापठिष्वहि	अपापठिष्महि

लृङ्		
अपापठिष्यत	अपापठिष्येताम्	अपापठिष्यन्त
अपापठिष्यथा:	अपापठिष्येथाम्	अपापठिष्यध्वम्
अपापठिष्ये	अपापठिष्यावहि	अपापठिष्यामहि

तव्यत्—पापठितव्यम् । यत्—पापठ्यम् । अनीयर्—पापठनीयम् ।
क्त्वा—पापठित्वा । क्त—पापठित: । क्तवतु—पापठितवान् ।
णमुल्—पापठं पापठम् । तृच्—पापठिता । ण्वुल्—पापठक: ।
तुमुन्—पापठितुम् । अ—पापठा । शानच्—पापठ्यमान: ।

१. जो विद्यार्थी बहुत पढ़ते हैं उनका गुरु आदर करते हैं।
पापठ्यमानान् छात्रान् गुरव: सदा आद्रियन्ते ।

अथवा

ये छात्रा: पापठ्यन्ते तान् गुरव: सदा आद्रियन्ते ।

२. यह बार-बार पढ़ता है फिर भी अनुत्तीर्ण हो जाता है ।
पापठ्यमान: अपि अयम् अनुत्तीर्ण: एव भवति । अथवा
अयं पापठ्यते तथापि न उत्तरति परीक्षाम् ।

३. प्राचीन आश्रमों में ब्रह्मचारी खूब वेद पढ़ते थे ।
प्राचीनेषु आश्रमेषु ब्रह्मचारिभ्य: वेदान् पापठाञ्चक्रिरे ।

४. जैसे गुरुदत्तजी ने सत्यार्थप्रकाश बार-बार पढ़ा था वैसे तू भी उसे बार-बार पढ़ ।
यथा गुरुदत्तमहाभाग: सत्यार्थप्रकाशम् अपापठ्यत (अपापठिष्ट) तथैव त्वम् अपि तं ग्रन्थं पापठ्यस्व (पापठ्येथा:) ।

५. प्राचीन कानून को जानने के लिए यह वकील मनुस्मृति को बार-बार पढ़ेगा ।
प्राग्विधिज्ञानाय अयं प्राड्विवाक: मनुस्मृतिं पापठिष्यते (पापठिता) ।

६. यदि नागेश भट्ट महाभाष्य को बार-बार न पढ़ता तो उत्तम वैयाकरण न बनता—यदि नागेशभट्ट: महाभाष्यं न अपापठिष्यत तर्हि स: वैयाकरण-शिरोमणि: न अभविष्यत् ।

७. ऋग्वेदादिभाष्यभूमिका बार-बार पढ़ने योग्य है ।
ऋग्वेदादिभाष्यभूमिका पापठितव्या (पापठ्या, पापठनीया) अस्ति ।

८. प्रेमचन्द के उपन्यासों को लोगों ने बार-बार पढ़ा।

प्रेमचन्द्रस्य उपन्यासान् जनाः पापठितवन्तः। अथवा—

प्रेमचन्द्रस्य उपन्यासाः जनैः पापठिताः।

९. तू बार-बार पढ़के भी इस पत्र का अभिप्राय न जान सका।

त्वं पापठं पापठम् अपि अस्य पत्रस्य अभिप्राय ज्ञातुं न अशकः।

१०. ग्रन्थों को बार-बार पढ़ने वाला शास्त्रों का ज्ञाता हो जाता है।

ग्रन्थानां पापठिता (पापठकः) शास्त्रज्ञाता (शास्त्रज्ञः) जायते।

११. यह उसी ग्रन्थ को बार-बार पढ़ने के लिये पुस्तकालय जाता है।

अयं तम् एव ग्रन्थं पापठितुम् पुस्तकालयं गच्छति।

१२. तेरी इस धुआंधार पढ़ाई को देखकर कौन तेरे उत्तीर्ण होने में सन्देह करेगा?

तव एनां पापठां (पापठनम्) प्रेक्ष्य कः तव उत्तीर्णतां सन्धेक्ष्यति?

(२) गद व्यक्तायां वाचि (=बोलना), जागद्य (=गद्+यङ्)=बार-बार बोलना, अधिक बोलना

जागद्यते। जागदाञ्चक्रे। जागदिता। जागदिष्यते। जागद्यताम्। अजागद्यत।

जागद्येत। अजागदिष्ट। अजागदिष्यत।

जागदितव्यम्, जागद्यम्, जागदनीयम्। जागदित्वा। जागदितः। जागदितवान्।

जागदं जागदम्। जागदिता। जागदकः। जागदितुम्। जागदा। जागद्यमानः।

१. एक ही बात को बार-बार क्यों कहता है।=कथम् एकाम् एव वार्तां जागद्यसे।

२. अधिक बोलने वाले की बात का महत्त्व कम हो जाता है।

जागदितुः (जागदकस्य) वार्तायाः महत्त्वं हीयते।

३. तेरे निरन्तर बोलने से मेरा सिर भन्ना गया है।

तव जागदया (जागदनेन) शिरो मे भिन्नमिव।

(३) भण व्यक्तायां वाचि (=बोलना, पढ़ना), बम्भण्य[1]=बार-बार पढ़ना, अधिक पढ़ना

बम्भण्यते। बम्भणाञ्चक्रे। बम्भणिता। बम्भणिष्यते। बम्भण्यताम्। अबम्भण्यत।

बम्भण्येत। अबम्भणिष्ट। अबम्भणिष्यत।

बम्भणितव्यम्। बम्भण्यम्। बम्भणनीयम्। बम्भणित्वा। बम्भणं बम्भणम्।

बम्भणितः। बम्भणितवान्। बम्भणिता। बम्भणकः। बम्भणितुम्। बम्भणा।

बम्भण्यमानः।

---

१. यङ् परे रहने पर भण् के अभ्यास 'ब' को नुक् (न्) का आगम 'नुगतोऽनुनासिकान्तस्य (अष्टा० ७.४.८५) से हुआ। न् को अनुस्वार और अनुस्वार को परसवर्णादेश होने पर—बम्भण्य।

१. मुनि देवराज जी कांगड़ी गुरुकुल में बार-बार पढ़े।
मुनिः देवराजमहाभागः कांगड़ीस्थे गुरुकुले बम्भणाञ्चक्रे।

(४) हन् हिंसागत्योः (=मारना, जाना), जङ्घन्य[1]=बुरी तरह से जाना,[2] जेघ्नीय[3]=बार बार या अधिक मारना अथवा हिंसा करना

जङ्घन्यते=टेढ़ा मेढ़ा जाता है। जङ्घनाञ्चक्रे। जङ्घनिता। जङ्घनिष्यते। जङ्घन्यताम्। अजङ्घन्यत। जङ्घन्येत। अजङ्घनिष्ट। अजङ्घनिष्यत। जङ्घनितव्यम्। जङ्घनित्वा। जङ्घना। जङ्घन्यमानः।

जेघ्नीयते=बार-बार या अधिक मात्रा में हिंसा करता है। जेघ्नीयाञ्चक्रे। जेघ्नीयिता। जेघ्नीयिष्यते। जेघ्नीयताम्। अजेघ्नीयत। जेघ्नीयेत। अजेघ्नीयिष्ट। अजेघ्नीयिष्यत।

जेघ्नीयितव्यम्। जेघ्नीय्यम्। जेघ्नीयनीयम्। जेघ्नीयित्वा। जेघ्नीयितः। जेघ्नीयितवान्। जेघ्नीयं जेघ्नीयम्। जेघ्नीयिता। जेघ्नीयकः। जेघ्नीयितुम्। जेघ्नीया। जेघ्नीयमानः। इत्यादि।

१. राम के द्वारा अधिक और बार-बार मारे जाते हुए राक्षसों को देखकर रावण को बहुत दुःख हुआ।
रामेण जेघ्नीय्यमानान्[4] राक्षसान् दर्शं दर्शं रावणः दोदूयमानमनाः बभूव।
२. सांप सदा टेढ़ा चलता है=सर्पः सदा जङ्घन्यते।
३. जो अधिक हिंसा करते हैं, वे अधिक पाप के भागी होते हैं।
ये जेघ्नीयन्ते ते पापभागिनः बोभूयन्ते।
४. चाणक्य ने अपनी कुटिल चाल से खूब हिंसा करने वाले नन्दों का नाश किया।
चाणक्यः निज-जङ्घमया जेघ्नीयकान् (जेघ्नीयितॄन्) नन्दान् जघान।
५. पाकिस्तान की असीम हिंसा को देखकर भारत भी पुनः पुनः हिंसा करने में प्रवृत्त हो गया।
पाकिस्तानस्य जेघ्नीयां विलोक्य भारतम् अपि जेघ्नीयितुं प्रववृते (प्रावर्तत)।

---

१. पूर्ववत् अभ्यास को नुगागम।
२. 'नित्यं कौटिल्ये गतौ' (अष्टा० ३.१.२३) से गत्यर्थक धातु से कुटिलता अर्थ में ही यङ् होता है।
३. हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः [वा०] (अष्टा० ७.४.३०) से, हिंसा अर्थ में वर्त्तमान हन् से यदि यङ् होगा तो हन् के स्थान पर घ्नी भाव होगा।
४ 'जेघ्नीय' इस यङन्त धातु से कर्मवाच्य में शानच् है। मध्य में 'सार्वधातुके यक्' अष्टा ३.१.६७) से यक् (=य) विकरण हुआ। 'अतो लोपः ६.४.४८ से धातु के अन्त्य अकार का लोप—जेघ्नीय्यमानान्।

(५) अट गतौ (=घूमना, भ्रमण करना), अटाट्य (=टेढ़ा-मेढ़ा चलना या घूमना)

अटाट्यते । अटाटाञ्चक्रे । अटाटिता । अटाटिष्यते । अटाट्यताम् । आटाट्यत । अटाट्येत । आटाटिष्ट । आटाटिष्यत ।

अटाटितव्यम् । अटाट्यम् । अटाटनीयम् । अटाटित्वा । अटाटितः । अटाटितवान् । अटाटम् अटाटम् । अटाटिता । अटाटकः । अटाटितुम् । अटाटा । अटाट्यमानः ।

१. हम छात्रावस्था में मेवाड़ के जङ्गलों में खूब घूमे ।
   वयं छात्रावस्थायां मेदपाटविपिनेषु आटाट्यामहि (अटाटितवन्तः) ।
२. रात्रि में बहुत नहीं घूमना चाहिए = निशायां न अटाटितव्यम् (अटाटनीयम्)
३. ये घुमक्कड़ अपनी घुमक्कड़ी को नहीं त्याग सकते ।
   एते अटाटितारः (अटाटकाः) स्वीयाम् अटाटां न हातुम् अर्हन्ति ।

(६) घ्रा गन्धोपादाने (=सूंघना), जेघ्रीय[1] = बार बार या अधिक सूंघना

जेघ्रीयते । जेघ्रीयाञ्चक्रे । जेघ्रीयिता । जेघ्रीयिष्यते । जेघ्रीयताम् । अजेघ्रीयत । जेघ्रीयेत । अजेघ्रीयिष्ट । अजेघ्रीयिष्यत ॥

जेघ्रीयितव्यम् । जेघ्रीय्यम् । जेघ्रीयणीयम् । जेघ्रीयित्वा । जेघ्रीयितः । जेघ्रीयितवान् । जेघ्रीयं जेघ्रीयम् । जेघ्रीयिता । जेघ्रीयकः । जेघ्रीयितुम् । जेघ्रीया । जेघ्रीयमाणः ।

१. जो बहुत अधिक नसवार सूंघते हैं, उनको फफड़े का कैंसर हो जाता है ।
   नस्यं जेघ्रीयमाणाः पुरुषाः फुफ्फुसे घातकम् अर्बुदं लभन्ते ।
२. गाय आदि पशु, खाने से पहिले भक्ष्य पदार्थ को बार-बार सूंघते हैं ।
   गवादयः पशवः भक्षणात् पूर्वं भक्ष्यं वस्तु जेघ्रीयन्ते ।
३. कुत्ते बार-बार सूंघकर मार्ग को खोजते हैं ।
   सारमेयाः जेघ्रीयं जेघ्रीयं पन्थानं मार्गयन्ति ।
४. हम इसे बार बार सूंघते हुए भी तृप्त नहीं हुए ।
   वयम् इदं जेघ्रीयमाणाः अपि न अतृप्याम (अतृपाम) ।

(७) शीङ् स्वप्ने (=सोना, शाशय्य[2] = पुनः पुनः अथवा अधिक सोना

शाशय्यते । शाशयाञ्चक्रे । शाशयिता । शाशयिष्यते । शाशय्यताम् । अशाशय्यत । शाशय्येत । अशाशयिष्ट । अशाशयिष्यत ।

---

१. 'ई घ्राध्मोः' (अष्टा ७.४.३१) से घ्रा के आ को ईकारादेश हुआ ।
२. 'अयङ् यि क्ङिति' (अष्टा. ७.४.२२) से 'शी' के ई के स्थान पर अयङ् (=अय्) आदेश ।

शाशयितव्यम् । शाशय्यम् । शाशयनीयम् । शाशयित्वा । शाशयं शाशयम् । शाशयितः । शाशयितवान् । शाशयिता । शाशयकः । शाशयितुम् । शाशया । शाशय्यमानः ।

१. केशवदेव के द्वारा बार-बार जगाये जाते हुए भी ब्रह्मचारी बार बार सो जाते हैं।
केशवदेवेन पुनः पुनः बोध्यमानाः,[1] अपि ब्रह्मचारिणः शाशय्यन्ते ।

२. ये इतना अधिक सोने वाले व्यक्ति क्या विद्वान् बनेंगे ।
एते शाशयितारः (शाशयकाः) जनाः कथमिव विद्वांसः सम्पत्स्यन्ते ।

३. तुम यदि बार बार न सोते तो पाठ याद कर लेते ।
यूयं यदि न अशाशयिष्यध्वं तर्हि पाठम् अस्मरिष्यत ।

४. तुम्हारे बार बार सोने को देखकर वे भी अधिक सोने के लिए कमरे में घुस गये ।
युष्माकं शाशयां वीक्ष्य ते अपि शाशयितुं प्रकोष्ठं प्राविशन् (प्राविक्षन्) ।

(८) गै शब्दे (=गाना) जेगीय[2]=बार बार अथवा अधिक गाना

जेगीयते । जेगीयाञ्चक्रे । जेगीयिता । जेगीयिष्यते । जेगीयताम् । अजेगीयत । जेगीयेत । अजेगीयिष्ट । अजेगीयिष्यत ।।

जेगीयितव्यम् । जेगीय्यम् । जेगीयनीयम् । जेगीयित्वा । जेगीयं जेगीयम् । जेगीयितः । जेगीयितवान् । जेगीयिता । जेगीयकः । जेगीयितुम् । जेगीया । जेगीयमानः ।

१. देश के लिए प्राण देने वाले और जनहित करने वाले लोगों की कीर्ति सब जगह बार बार गायी जाती है ।
देशाय प्राणान् उपहरतां जनहितकर्तॄणां च कीर्तिः सर्वत्र जेगीयते ।

२. लव और कुश ने रामचरित का खूब गान किया ।
कुशलवौ रामचरितं जेगीयाञ्चक्राते ।

३. परमेश्वर की महिमा का खूब गान करो ।
परमेश्वरस्य महिमानं जेगीयध्वं (जेगीयेध्वम्) ।

४. ये बार बार गीत गाते हुए भी थके नहीं हैं ।
एते गीतानि जेगीयमानाः अपि न श्राम्यन्ति ।

(९) नृती गात्रविक्षेपे (=नाचना), नरीनृत्य[3]=बार बार अथवा खूब नाचना

नरीनृत्यते । नरीनृताञ्चक्रे । नरीनृतिता । नरीनृतिष्यते । नरीनृत्यताम् । अनरीनृत्यत । नरीनृत्येत । अनरीनृतिष्ट । अनरीनृतिष्यत ।।

---

१. बुध् के णिजन्त 'बोधि' से शानच् । णिजन्त धातु से यङ् नहीं होता क्योंकि वह अनेकाच् हो जाती है ।

२. 'घुमास्थागापाजहातिसां हलि' (अष्टा. ६.४.६६) से 'गा' (=गै) के आ के स्थान पर ईकारादेश ।

३. 'रीगृदुपधस्य च' (अष्टा. ७.४.९०) से नृत् (यङन्त) के अभ्यास 'न' को रीक् (=री) आगम हुआ । 'नरीनृत्य' में 'नृ' के न् को णत्व 'अट्कुप्वाङ्नुम्व्यवायेऽपि (अष्टा. ८.४.२) से प्राप्त था, उसका निषेध 'क्षुभ्नादिषु च' ८.४.३९ से हुआ ।

नरीनृतितव्यम् । नरीनृत्यम् । नरीनृतनीयम् । नरीनृतित्वा । नरीनृतं नरीनृतम् । नरीनृतितः । नरीनृतितवान् । नरीनृतिता । नरीनृतकः । नरीनृतितुम् । नरीनृता । नरीनृत्यमानः ।

१. आजकल सब मनुष्य रात दिन धन के लिए बार-बार नाचते हैं।

अद्यत्वे सर्वे मनुष्याः अहर्निशं धनाय नरीनृत्यन्ते ।

२. बार-बार नाचते हुए मोरों को देखकर किसका मन प्रसन्न नहीं होता।
नरीनृत्यमानान् मयूरान् निभाल्य कस्य चित्तं न प्रसीदति ?

३. यह नाचने वाली बार बार नाच करके भी इस स्त्रीसभा को सन्तुष्ट न कर सकी।

इयं नृत्याङ्गना नरीनृतं नरीनृतम् अपि इदं स्त्रीसभं[1] न तोषितुम् अशकत् ।

४. तेरे ये अनेक नाच मुझे प्रभावित नहीं करेंगे।
तव इयं नरीनृता मां न प्रभावयिष्यति ।

यङ्लुगन्त-प्रक्रिया

यङन्त और यङ्लुगन्त के अर्थों में कोई भेद नहीं, केवल रूपों में भिन्नता है। पूर्ववत् धातुओं से यङ् प्रत्यय होने पर उसका (=य का) लुक् हो जाता है।[2] प्रत्यय का लोप हो जाने पर भी 'प्रत्ययलोपे प्रत्ययलक्षणम्'[3] के अनुसार प्रत्यय की पूर्व उपस्थिति के प्रभाव से यङ्लुगन्त शब्द की धातु सञ्ज्ञा[4] और फिर लट् आदि प्रत्ययों की उत्पत्ति होती है। अदादिगणस्थ 'चर्करीतं च' इस धातु-सूत्र से यङ्-लुगन्त धातु को अदादिगण के अन्तर्गत गिना जाता है और वह परस्मैपदी ही होता है यह भी माना जाता है। अदादि के अन्तर्गत मानने से, यङ्लुगन्त धातु से (लट्-लोट्-लङ्-विधिलिङ्) में जो शप् होता है उसका लुक् हो जाता है। यङ्लुगन्त धातु से परे जो हलादि पित् सार्वधातुक प्रत्यय (=अर्थात् तिप्, सिप्, मिप्) आते हैं उनके आरम्भ में विकल्प से ईट् (=ई) आगम हो जाता है[5]; परिणामतः तिप्, सिप्, मिप् में दो दो रूप बनते हैं। भू धातु और पठ् धातु के यङ्लुगन्त के रूप सभी लकारों में दर्शाते हैं।

---

१. 'अशाला च' (अष्टा. २.४.२४) से नपुंसकलिङ्गता।
२. यङोऽचि च (अष्टा. २.४.७४) ३. (अष्टा १.१.६२)
४. सनाद्यन्ता धातवः (३.१.३२) ५. यङो वा (अष्टा० ७.३.९४) से।

(१) भू सत्तायाम् (=होना), बोभू=बार बार होना अथवा अधिक होना

लट्

(१) बोभवीति, बोभोति बोभूतः बोभुवति
बोभवीषि, बोभोषि बोभूथः बोभूथ
बोभवीमि, बोभोमि बोभूवः बोभूमः

लिट्

(१) बोभवाञ्चकार बोभवाञ्चक्रतुः बोभवाञ्चक्रुः
(२) बोभवाम्बभूव बोभवाम्बभूवतुः बोभवाम्बभूवुः
(३) बोभवामास बोभवामासतुः बोभवामासुः

लुट्

बोभविता बोभवितारौ बोभवितारः
बोभवितासि बोभवितास्थः बोभवितास्थ
बोभवितास्मि बोभवितास्वः बोभवितास्मः

लृट्

बोभविष्यति बोभविष्यतः बोभविष्यन्ति
बोभविष्यसि बोभविष्यथः बोभविष्यथ
बोभविष्यामि बोभविष्यावः बोभविष्यामः

लोट्

बोभवीतु, बोभूतु / बोभूतात् बोभूताम् बोभुवतु
बोभूहि / बोभूतात् बोभूतम् बोभूत
बोभवानि बोभवाव बोभवाम

लङ्

अबोभवीत् / अबोभोत् अबोभूताम् अबोभवुः[1]
अबोभवीः / अबोभोः अबोभूतम् अबोभूत
अबोभवम् अबोभूव अबोभूम

वि० लिङ्

बोभूयात् बोभूयाताम् बोभूयुः
बोभूयाः बोभूयातम् बोभूयात
बोभूयाम् बोभूयाव बोभूयाम

लुङ्

अबोभूवीत् / अबोभोत् अबोभूताम् अबोभूवन्[2]
अबोभूवीः / अबोभोः अबोभूतम् अबोभूत
अबोभूवम् अबोभूव अबोभूम

लृङ्

अबोभविष्यत् अबोभविष्यताम् अबोभविष्यन्
अबोभविष्यः अबोभविष्यतम् अबोभविष्यत
अबोभविष्यम् अबोभविष्याव अबोभविष्याम

कृत्प्रत्यय—बोभवितव्यम् । बोभव्यम् । बोभवनीयम् । बोभूतः । बोभूतवान् । बोभूत्वा । बोभावं बोभावम् । बोभविता । बोभावकः । बोभवितुम् । बोभुवत्[3] (शतृ) ।

अभ्यास

१. यह कार्य अत्यन्त सम्भव है—इदं कार्यं सम्बोभवीति (सम्बोभोति) ।

---

१. सिजभ्यस्तविदिभ्यश्च (अष्टा० ३.४.१०९) से झि के स्थान पर जुस् आदेश । 'जुसि च' (अष्टा० ७.३.८३) से जुस् परे रहते उ को गुण ।

२. भट्टोजिदीक्षित के मत में 'अबोभूवुः' होना चाहिये ।

३. यहाँ शतृ के उगित् हो जाने से जो 'उगिदचां सर्वनामस्थाने' (७.१.७०) से नुम् प्राप्त था उसका 'नाभ्यस्ताच्छतुः' (अष्टा० ७.१.७८) से निषेध हुआ ।

२. ईश्वर में मन लगा, अन्यथा दुःख बार बार होंगे।
ईश्वरे मनः निवेशय, नोचेत् दुःखानि बोभविष्यन्ति (बोभवितारः)।

३. मुझे जो सिरदर्द बार-बार हो जाता था उसकी निवृत्ति इस ओषधि से हुई।
मम या शिरोवेदना अबोभवीत् (अबोभोत्, अबोभूवीत्) तस्याः निवृत्तिः अनेन औषधेन अजायत।

४. यह बार-बार रोगी होता हुआ भी प्रथम श्रेणी में उत्तीर्ण हुआ।
अयं रुग्णः बोभुवत् अपि प्रथमविभागे समुत्तीर्णः अभवत्।

(२) पठ व्यक्तायां वाचि (=पढ़ना), पापठ्=बार-बार या अधिक पढ़ना

लट्

पापठीति / पापट्टि	पापट्टः	पापठति
पापठीषि / पापट्षि	पापट्ठः	पापट्ठ
पापठीमि / पापठ्मि	पापठ्वः	पापठ्मः

लिट्

(१) पापठाञ्चकार पापठाञ्चक्रतुः पापठाञ्चक्रुः

(२) पापठाम्बभूव पापठाम्बभूवतुः पापठाम्बभूवुः

(३) पापठामास पापठामासतुः पापठामासुः

लुट्

पापठिता	पापठितारौ	पापठितारः
पापठितासि	पापठितास्थः	पापठितास्थ
पापठितास्मि	पापठितास्वः	पापठितास्मः

लृट्

पापठिष्यति	पापठिष्यतः	पापठिष्यन्ति
पापठिष्यसि	पापठिष्यथः	पापठिष्यथ
पापठिष्यामि	पापठिष्यावः	पापठिष्यामः

लोट्

पापठीतु / पापट्टु / पापट्टात्	पापट्टाम्	पापठतु
पापड्ढि / पापट्टात्	पापट्टम्	पापट्ट
पापठानि	पापठाव	पापठाम

लङ्

अपापठीत् / अपापट्	अपापट्टाम्	अपापठुः
अपापठीः / अपापट्	अपापट्टम्	अपापट्ट
अपापठम्	अपापठ्व	अपापठ्म

वि० लिङ्

पापठ्यात्	पापठ्याताम्	पापठ्युः
पापठ्याः	पापठ्यातम्	पापठ्यात
पापठ्याम्	पापठ्याव	पापठ्याम

लुङ्

अपापाठीत् / अपापठीत्	अपापाठिष्टाम् / अपापठिष्टाम्	अपापाठिषुः / अपापठिषुः
अपापाठीः / अपापठीः	अपापाठिष्टम् / अपापठिष्टम्	अपापाठिष्ट / अपापठिष्ट
अपापाठिषम् / अपापठिषम्	अपापाठिष्व / अपापठिष्व	अपापाठिष्म / अपापठिष्म

लृङ्

अपापठिष्यत्	अपापठिष्यताम्	अपापठिष्यन्
अपापठिष्यः	अपापठिष्यतम्	अपापठिष्यत
अपापठिष्यम्	अपापठिष्याव	अपापठिष्याम

कृत्प्रत्यय—पापठितव्यम् । पापाठ्यम्[1] । पापठनीयम् । पापठित्वा । पापठं पापठम् । पापठितः । पापठितवान् । पापठिता । पापठकः ! पापठितुम् । पापठत् ।

१. तुम दोनों बार-बार पाठ पढ़ते हो फिर भी भूल जाते हो।
युवां पाठं पापठ्ठः तथापि विस्मरथः ।

२. तू इस पृष्ठ को बार-बार पढ़=त्वम् इदं पृष्ठं पापड्ढि (पापठ्याः)

३. ये खूब पढ़ते हुए छात्र दुर्बल हो गये।
इमे पापठतः छात्राः दुर्बलाः अजनिषत ।

४. ये आख्यान बार-बार पढ़ने योग्य हैं इन्हें हम बार बार पढ़ेंगे ।
इमानि आख्यानानि पापाठ्यानि सन्ति इमानि वयं पापठिष्यामः (पापठितास्म,:)

(३) मुद हर्षे (=प्रसन्न होना), मोमुद्=बार बार या खूब प्रसन्न होना

मोमोत्ति—मोमुदीति[2] । मोमोदाञ्चकार । मोमोदिता । मोमोदिष्यति । मोमोत्तु, मोमुदीतु । अमोमोत्-अमोमुदीत्[2] । मोमुद्यात् । अमोमोदीत् । अमोमोदिष्यत् । कृत्प्रत्यय—मोमोदितव्यम् । मोमोद्यम् । मोमोदनीयम् । मोमुदितः । मोमुदितवान् । मोमुदित्वा, मोमोदित्वा[3] । मोमोदं मोमोदम् । मोमोदितुम् । मोमुदत् । मोमोदिता । मोमोदकः ।।

१. आप जैसे मित्रों को देखकर यह मनुष्य बड़ा प्रसन्न होता है।
भवादृशान् सुहृदः अवलोक्य अयं मनुष्यः मोमोत्ति (मोमुदीति)

२. हे शिष्य ! विद्या में उन्नति करते हुए तुझे देख देखकर मैं बहुत खुश हुआ था।
भो वत्स ! विद्यायाम् उत्तिष्ठमानं त्वां दर्शं दर्शम् अमोमोदिषम् अहम् ।

३. सुख की प्राप्ति में बहुत खुश नहीं होना चाहिए।
सुखलाभे न मोमोदितव्यम् (मोमोद्यं, मोमोदनीयम्) (मा मोमोदीः)

४. माता को देखकर अति प्रसन्न होते हुए बालकों के मुखों को देख।
मातरं दृष्ट्वा मोमुदतां बालकानां मुखानि पश्य ।

(४) स्वप् (=ञिष्वप्) शये=सोना, सास्वप्=बार बार या अधिक सोना

सास्वपीति सास्वप्ति । सास्वपाञ्चकार । सास्वपिता । सास्वपिष्यति । सास्वपीतु-सास्वप्तु । असास्वपीत्-असास्वप् । सास्वप्यात् । असास्वापीत्-असास्वपीत् । असास्वपिष्यत् ।

---

१. यङ्लुगन्त 'पापठ्' के हलन्त होने से यहाँ 'ऋहलोर्ण्यत्' (अष्टा ३.१.१२७) से ण्यत् प्रत्यय हुआ। अतएव धातु की उपधा को वृद्धि हुई।

२. 'मोमुदीति' आदि में लघूपधगुण का निषेध 'नाभ्यस्तस्याचि पिति सार्वधातुके' (अष्टा. ७.३.८७) से हुआ।

३. 'रलो व्युपधाद्धलादेः संश्च' (अष्टा १.२.२६) से क्त्वा के कित्व का विकल्प।

सास्वपितव्यम् । सास्वप्यम्[1] । सास्वपनीयम् । सासुपितः । सासुपितवान् । सासुपित्वा । सास्वापं सास्वापम् । सास्वपितुम् । सास्वपत् । सास्वपिता । सास्वापकः ।

१. नशे में चूर मूर्ख लोग आवश्यक कार्य को भी छोड़कर दिन भर बहुत अधिक सोते हैं ।
   मदविह्वलाः मूर्खाः अनतिक्रमणीयं कार्यमपि अपहाय समस्तं दिनं यावत् सास्वपति ।
२. मेरे द्वारा बार बार जगाये जाने पर भी सुरेन्द्र बहुत सोया ।
   मया मुहुः मुहुः बोध्यमानः अपि सुरेन्द्रः असास्वापीत् (असास्वपीत्)
३. तेरी परीक्षा समाप्त हुई अब तो तू खूब सोयेगा ।
   अवसिता ते परीक्षा अधुना त्वं सास्वपिष्यसि (सास्वपितासि) ।
४. अरक्षित स्थान में बहुत नहीं सोना चाहिए ।
   अरक्षिते स्थले न सास्वप्यम् (सास्वपितव्यम्, सास्वपनीयम्) ।

(५) वृतु वर्तने (=होना), वरीवृत्-वरिवृत्-वर्वृत्=बार बार या अधिक होना

वरीवर्त्ति[2]-वरिवर्ति-वर्वर्त्ति-वरीवृतीति-वरिवृतीति-वर्वृतीति । वरीवर्ताञ्चकार-वरिवर्ताञ्चकार-वर्वर्ताञ्चकार । वरीवर्तिता-वरिवर्तिता-वर्वर्तिता । वरीवर्तिष्यति-वरिवर्तिष्यति-वर्वर्तिष्यति । वरीवर्त्तु-वरिवर्त्तु-वर्वर्त्तु-वरीवृतीतु-वरिवृतीतु-वर्वृतीतु । अवरीवर्त्-अवरिवर्त्-अवर्वर्त्-अवरीवृतीत्-अवरिवृतीत्-अवर्वृतीत् । वरीवृत्यात्-वरिवृत्यात्-वर्वृत्यात् । अवरीवर्तीत्-अवरिवर्तीत्-अवर्वर्तीत् । अवरीवर्तिष्यत्अवरिवर्तिष्यत्-अवर्वर्तिष्यत् ।

कृत्प्रत्यय→वरीवर्तितव्यम्-वरिवर्तितव्यम्-वर्वर्तितव्यम् । वरीवृत्यम्-वरिवृत्यम्-वर्वृत्यम्[3] । वरीवर्तनीयम्-वरिवर्तनीयम्-वर्वर्तनीयम् । वरीवृत्तः[4]-वरिवृत्तः-वर्वृत्तः । वरीवृत्तवान्[4]-वरिवृत्तवान्-वर्वृत्तवान् । वरीवर्तित्वा-वरिवर्तित्वा-वर्वर्तित्वा । वरीवृत्त्वा[5]-वरिवृत्त्वा-वर्वृत्त्वा । वरीवर्तं वरीवर्तम्-वरिवर्तं वरिवर्तम्-वर्वर्तं-वर्वर्तम् । वरीवर्तिता-वरिवर्तिता-वर्वर्तिता । वरीवर्तकः-वरिवर्तकः-वर्वर्तकः । वरीवृतत्-वरिवृतत्-वर्वृतत् (शतृ) । वरीवर्तितुम्-वरिवर्तितुम्-वर्वर्तितुम् ।

१. आज ठंड अधिक है=अद्य शैत्यं वरीवर्ति (वरिवर्ति, वर्वर्ति, वरीवृतीति…)

---

१. पोरदुपधात् (अष्टा. ३.१.९८) से यत् प्रत्यय हुआ ।
२. वृत् (यङ्लुगन्त) के अभ्यास को (रीगृदुपधस्य च; रुग्रिकौ च लुकि ७.४.९;९२) से रीक्, रिक् और रुक् आगम हुए । तीनों अवस्थाओं में पक्ष में ईट् हुआ ।
३. 'ऋदुपधाच्चाक्लृपिचृतेः (अष्टा. ३.१.११०) से क्यप् प्रत्यय हुआ ।
४. 'यस्य विभाषा' (अष्टा. ७.२.१५) से इट् का निषेध ।
५. 'उदितो वा' (अष्टा. ७.२.५६) से इट् का विकल्प ।

२. सायंकाल तू कहां था = सायंकाले त्वं क्व अवर्वाः (अवरिवाः, अवरीवाः, अवर्वर्त्-अवरिवर्त्-अवरीवर्त्; अवर्वृतीः, अवरिवृतीः, अवरीवृतीः)?

३. देश में बार बार होने वाले ये दुष्ट रोग कब खत्म होंगे।
देशे वरीवर्तितारः (वरिवर्तितारः, वर्वर्तितारः, वरीवर्तकाः, वरिवर्तकाः, वर्वर्तकाः) एते दुष्टरोगाः कदा नंक्ष्यन्ति (नशिष्यन्ति)?

(६) तॄ प्लवनसन्तरणयोः (= तैरना), तातॄ = बार बार अथवा अधिक तैरना

तार्तर्ति। तातराञ्चकार। तातरिता-तातरीता[1]। तातरिष्यति-तातरीष्यति[1]। तातर्तु। अतातः। तातीर्यात्। अतातारीत्। अतातरिष्यत्-अतातरीष्यत्[1]।

कृत्प्रत्यय—तातरितव्यम्-तातरीतव्यम्[1]। तातार्यम्[2]। तातरणीयम्। तातीर्णः[3] तातीर्णवान्[3]। तातीर्त्वा[3]। तातारं तातारम्। तातरितुम्-तातरीतुम्[1]। तातरिता-तातरीता[1]। तातारकः। तातिरत् (शतृ)।

१. पढ़ते हुए मैंने बहुत से कष्ट-सागरों को बार-बार पार किया।
अधीयानः अहं बहून् कष्ट-सागरान् अतातारिषम् (अतातरम्)।

२. मिहिरसेन ने खाड़ी को अनेक बार पार किया।
मिहिरसेनः उपसागरं तातराञ्चकार (अतातः, अतातारीत्, तातीर्णवान्)।

३. तालाब में बार बार तैरते हुए बालक जल को गन्दा कर रहे हैं।
तडागे तातिरतः बालकाः मलिनयन्ति सलिलम्।

४. देवदत्त परीक्षा में बार बार फेल हुआ।
देवदत्तः परीक्षाम् अनूदतातः [अनु + उत् + तॄ (यङ्लुक्) + लङ्. प्र. ए.]

(७) गृधु अभिकाङ्क्षायाम् (= लालच करना), जरीगृध्-जरिगृध्-जर्गृध् = बार बार अथवा अधिक लालच करना।

जरीगर्द्धि-जरिगर्द्धि-जर्गर्द्धि जरीगृधीति-जरिगृधीति-जर्गृधीति। जरीगर्धाञ्चकार-जरिगर्धाञ्चकार-जर्गर्धाञ्चकार। जरीगर्धिता-जरिगर्धिता-जर्गर्धिता। जरीगर्धिष्यति-जरिगर्धिष्यति-जर्गर्धिष्यति। जरीगर्द्धु-जरिगर्द्धु-जर्गर्द्धु-जरीगृधीतु-जरिगृधीतु-जर्गृधीतु। अजरीघर्त्-अजरिघर्त्-अजर्घर्त्-अजरीगृधीत्-अजरिगृधीत्-अजर्गृधीत्। जरीगृध्यात्-जरिगृध्यात्-जर्गृध्यात्। अजरीगर्धीत्-अजरिगर्धीत्। अजर्गर्धीत्। अजरीगर्धिष्यत्-अजरिगर्धिष्यत्-अजर्गर्धिष्यत्॥

---

१. वॄतो वा (अष्टा. ७.२.३८) से इट् को विकल्प से दीर्घत्व।
२. ऋहलोर्ण्यत् (अष्ट. ३.१.१२४) से ण्यत् प्रत्यय। णित्वात् ॠ को आर् वृद्धि।
३. श्र्युकः किति (अष्टा. ७.२.११) से इट् का निषेध।

कृत्प्रत्यय—जरीगर्धितव्यम्-जरिगर्धितव्यम्-जर्गर्धितव्यम् । जरीगृध्यम् (क्यप्)-जरिगृध्यम्-जर्गृध्यम् । जरीगर्धनीयम्-जरिगर्धनीयम्-जर्गर्धनीयम् । जरीगृद्धः-जरिगृद्धः-जर्गृद्धः । जरीगृद्धवान्-जरिगृद्धवान्-जर्गृद्धवान् । जरीगृध्वा-जरिगृध्वा-जर्गृध्वा-जरीगर्धित्वा-जरिगर्धित्वा-जर्गर्धित्वा । जरीगर्धं-जरीगर्धम्, जरिगर्धं-जरिगर्धम्, जर्गर्धं-जर्गर्धम् जरीगर्धिता-जरिगर्धिता-जर्गर्धिता । जरीगर्धकः-जरिगर्धकः-जर्गर्धकः । जरीगर्धितुम्-जरिगर्धितुम्-जर्गर्धितुम् । जरीगृधत्-जरिगृधत्-जर्गृधत् (शतृ) ।

१. श्वशुर के धन का अधिक लालच मत कर ।
   मा स्म श्वशुरस्वं जर्घाः (जरीघाः, जरिघाः, जर्घर्त्, जरिघर्त्, जरीघर्त्) मा श्वशुरस्वं जरीगर्धीः (जरिगर्धीः, जर्गर्धीः) ।
२. कन्जूस सदा धन का लालच बहुत करता है ।
   कृपणः सर्वदा धनं जरीगर्द्धि (जरिगर्द्धि, जर्गर्द्धि, जरीगृधीति···)
३. उस बुढ़िया ने अन्त समय तक अपनी रत्नों की पेटी का बार बार लालच किया ।
   सा वृद्धा अन्तकालं यावत् स्वरत्नमञ्जूषां अजरीधर्त् (अजरिघर्त्, अजर्घर्त्, अजरीगृधीत्···)
४. तुझे ब्लड प्रेशर हो गया पर तू धन का लालच करता ही रहा ।
   त्वं रक्तचापेन समाक्रान्तः अपि धनम् अजर्घाः (अजरिघाः, अजरीघाः, अजर्घर्त्, अजरिघर्त्, अजरीघर्त्) ।

मुर्छा मोहसमुच्छ्राययोः (मूर्छित होना), मोमूर्छ्=बार बार मूर्छित होना

मोमोर्ति-मोमूर्च्छीति । मोमूर्छाञ्चकार । मोमूर्छिता । मोमूर्छिष्यति । मोमोर्तु-मोमूर्च्छीतु । अमोमोः-अमोमूर्च्छीत् । मोमूर्च्छ्यात् । अमोमूर्छीत् । अमोमूर्छिष्यत् ॥

कृत्प्रत्यय—मोमूर्छितव्यम् । मोमूर्छ्यम् । मोमूर्छनीयम् । मोमूर्छितः । मोमूर्छितवान् । मोमूर्छित्वा । मोमूर्छं मोमूर्छम् । मोमूर्छिता । मोमूर्छकः । मोमूर्छितुम् । मोमूर्छत् (शतृ) ।

१. अपने सभी पुत्रों के विनाश का समाचार सुनकर धृतराष्ट्र बार बार मूर्छित हुआ ।
   अशेषाणां निजसुतानां निधनस्य वार्तां निशम्य धृतराष्ट्रः मोमूर्छाञ्चकार ।
२. गोदाम में लगी आग को देखकर दोनों व्यापारी बार-बार मूर्छित हुए ।
   वस्तुभण्डारे ज्वलन्तं वह्निं विलोक्य उभौ वणिजौ अमोमूर्ताम् (अमोमूर्छिष्टाम्, मोमूर्छितवन्तौ) ।
३. बारहठ उमरदान को पुत्रमरण का शोक तो हुआ पर वह बार बार मूर्छित नहीं हुआ ।
   बारहठ उमरदानमहाभागः पुत्रमरणेन अशोचत् परं न अमोमोः (अमोमूर्छीत्) ।
४. पुत्री को मरता देखकर बार-बार मूर्छित होते हुए माता-पिता विलाप कर रहे हैं
   सुताम् आसन्ननिधनां निभाल्य मोमूर्छन्तौ पितरौ विलपतः ।

कर्मकर्तृ-प्रक्रिया

इस प्रक्रिया में कर्म को कर्त्ता के समान मान लिया जाता है। क्रिया, कर्म को कर्ता मानकर उसी के अनुसार आती है। हिन्दी में भी ऐसे वाक्य होते हैं। जैसे—दाल पक रही है। रोटी बन रही है। चाकू बड़ा अच्छा काटता है। तलवार बहुत अच्छा काटती है। ढोल बड़ा अच्छा बजता है। साइकिल बड़ी अच्छी चलती है। मेरा यह पेन बड़ा अच्छा लिखता है। संस्कृत में भी यह व्यवहार है और इसे कर्मकर्तृवाच्य अथवा कर्मकर्तृप्रक्रिया कहते हैं।

१. चावल पक रहे हैं=ओदनाः पच्यन्ते।

२. लकड़ी फट रही है=काष्ठं भिद्यते।

३. लकड़ियाँ जल रही हैं=काष्ठानि दह्यन्ते।

४. साइकिल हल्की चलती है=द्विचक्रिका लघु चल्यते।

कहीं करण को भी कर्ता मान लिया जाता है—

१. तलवार अच्छा काटती है=साधु असिः छिनत्ति।

२. कलम अच्छा लिखती है=लेखनी सम्यक् लिखति।

कहीं अधिकरण को भी कर्ता माना जाता है—

१. हंडिया पका रही है=स्थाली पचति। स्थाली पच्यते।

द्विकर्मक वाक्य

१. आजकल दिन दहाड़े पुरुष लूटे जा रहे हैं।
अद्यत्वे विद्योतमाने दिवसे पुरुषाः द्रव्याणि मुष्यमाणाः सन्ति।

२. ब्राह्मणों को लड्डू खिलाये जा रहे हैं=ब्राह्मणाः मोदकान् भोज्यमानाः सन्ति।

३. सञ्जय गांधी के स्मारक के लिये लोगों से धन मांगा जा रहा है।
सञ्जयगांधीस्मारकभवनस्य कृते पुरुषाः धनं याच्यमानाः सन्ति।

४. वृक्षों से फल तोड़े जा रहे हैं=वृक्षाः फलानि अवचीयमानाः सन्ति।

५. व्यापारियों पर रोज जुर्माना किया जा रहा है, किन्तु वे अपना काला धन्धा नहीं छोड़ते।

६. प्रत्यहं दण्ड्यमानाः अपि वणिजः निजकूटव्यापारं न मुञ्चन्ति।

७. पुलिस द्वारा जेल को ले जाये जाते हुए बन्दी को छुड़ाने के लिये यत्न करते हुए लोगों से मैंने कहा—पापी को मत छुड़ाओ।

राजपुरुषैः कारां नीयमानं बन्दिनं मोचयितुं यतमानान् पुरुषान् अहम् अवादिषम् अरे! मा स्म पापिनं मोचयत (मा मूमुचत)।

८. सौ चोरों को जेल में बन्द किया जाता हुआ देखकर मैंने सोचा, ये चौर्यकर्म क्यों नहीं छोड़ते ?
शतं कर्णिसुतान् काराम् अवरुध्यमानां दृक्पथम् अवतार्य अहं व्यचिचिन्तं, कथम् एते चौर्यकर्म न परिहरन्ति ?

विविध-वाक्यप्रकार

अब हम अनुवाद के वाक्यों को भिन्न भिन्न प्रकार से बनाना सिखाते हैं—

१. मैं जब तक तुम्हें पढ़ा नहीं दूँगा तब तक मेरे दिल में चैन नहीं आयेगी।
(i) यावद् अहं युष्मान् न पाठयिष्यामि तावत् मम हृदये शान्तिः न भविष्यति।
(ii) कुतः शान्तिः हृदयस्य मे अपाठितेषु युष्मासु।

२. जब तक वह व्याख्यान नहीं दे लेता था तब तक उसे शान्ति नहीं होती थी।
(i) सः ऋते व्याख्यानात् तोष न प्राप्तवान्।
(ii) सः व्याख्याय एव अतुष्यत्।
(iii) न खलु अनुपदिष्टवते तस्मै भोजनम् अरुचत्[1] (अरोचिष्ट)।

३. बहुत से छात्र ऐसे मिट्टी के माधो होते हैं, कि उनको किसी तरह भी समझाया नहीं जा सकता।
(i) केचित् मृत्पिण्डबुद्धयः छात्राः यतमानेन अपि अध्यापकेन बोधयितुं न शक्यन्ते।
(ii) न खलु मृत्पिण्डबुद्धीनां किञ्चिदध्यापकोक्तं बुद्धिपथम् आरोहति।

४. मेरी लड़की के पास बुद्धि है, वह अपनी रक्षा अपने आप कर सकती है।
(i) मम सुतायाः समीपे मतिः अस्ति सा स्वयम् एव स्वरक्षां करिष्यति।
(ii) मतिमती मे बाला आत्मानं रक्षितुम् ईशा।

अब हम कुछ फुटकर वाक्यों को समझाते हैं—

१. एक दूसरे के बाल पकड़कर जब मनीषा और उमा युद्ध कर रहीं थीं तब सर्वमित्र के साथ ज्ञानचन्द्र आ गया, यह सब देखकर उनकी माता इन्दुबाला ने ज्ञानचन्द्र से कहा—ये दिनभर लड़ने और खेलने के अतिरिक्त कुछ नहीं करतीं, आप इन्हें अपने सामने दुकान पर बिठाकर पढ़ाइये।
केशाकेशि युध्यमानयोः उमामनीषयोः ज्ञानचन्द्रः सर्वमित्रेण सह सदनम् आयासीत्, ते युध्यमाने अवलोक्य तयोः माता इन्दुबाला ज्ञानचन्द्रम् अवादीत्— 'एते ऋते युद्धात् क्रीडनाद् वा नान्यत् किमपि कुरुतः, आपणम् आदाय समक्षम् उपवेश्य पाठ्येताम् भवता'।

२. जब दोनों तरफ से युद्ध के शङ्ख बज रहे थे, तब अर्जुन ने कृष्ण से कहा।
उभयतः ध्मायमानेषु युद्धशङ्खेषु अर्जुनः कृष्णं निजगाद।

---

१. 'द्युद्भ्यो लुङि' (अष्टा. १.३.९१) से विकल्प से परस्मैपद।

३. माली से सींचे जाते हुए और बढ़ाये जाते हुए वृक्षों को देखकर मैं बहुत प्रसन्न हुआ।
मालाकारेण सिच्यमानान् वर्ध्यमानान् च वृक्षान् वीक्ष्य नितराम् अमोदिषि अहम्।

४. चौधरी दीनदयालु ने राकेश और नरेश से कहा—तुम्हारा बड़ा भाई रमेश बड़ी मुश्किल से धन कमाता है, खेती को शास्त्रकारों ने भी क्लिष्टा विद्या कहा है, इसलिए तुम्हें इसके धन का नाश नहीं करना चाहिए और परिश्रम से पढ़ना चाहिये।
चौधरी दीनदयालु: राकेशनरेशौ अभ्यधात्, युवयोः ज्यायान् भ्राता रमेशः अतिकाठिन्येन वित्तम् उपार्जयति, शास्त्रकाराः अपि कृषिं क्लिष्टाम् आहुः, अतएव युवाभ्यां अनेन उपार्जितं वित्तं मुक्तहस्तं न व्ययितव्यम्, अपि तु पठने कृतश्रमाभ्यां भवितव्यम्।

५. जब मैं पहुंचा तब चोर पिट रहे थे=चौरेषु ताडयमानेषु अहम् अयासिषम्।

६. प्रतिदिन पिटते हुए लड़के को मैंने कहा-कम्बख्त क्यों पिटता है, याद कर लिया कर।
प्रतिदिनं ताड्यमानं बालकम् अहम् अवादिषम्-दुर्भग! कथं ताड्यसे, पाठः स्मर्यताम्।

७. ये धोबी के धोये हुए वस्त्र देखिये, मैल ही नहीं छूटा।
पश्य, रजकेन प्रक्षालितानि वस्त्राणि, मध्ये मध्ये मलिनानि सन्ति।

८. तुम्हारे वस्त्र धोये जा रहे हैं, तुम जाने के लिये तैयार हो जाओ।
यौष्माकीणाः पटाः प्रक्षाल्यमानाः सन्ति, गमनाय सज्जाः भवत।

९. अभी लड़के पढ़ाये जा रहे हैं=अधुना बालकाः पाठ्यमानाः सन्ति।

१०. आपके लिए भोजन बन रहा है, बिना खाये मत जाना।
भवतां कृते भोजनं पच्यमानम् अस्ति, अभुक्त्वा मा गमः।

११. दुनिया से ठुकराये जाते हुए मनुष्य प्रभु का आसरा लेते हैं।
लोकैः पादघातं हन्यमानाः पुरुषाः प्रभोः शरण्याः भवन्ति।

१२. आजकल बीज बोये जा रहे हैं=अद्यत्वे बीजानि उप्यमानानि सन्ति।

१३. जब मैं जाऊंगा शायद पत्र लिखे जा रहे हों।
मन्ये लेखिष्यमाणेषु पत्रेषु गच्छेयम्।

पर्यायवाचि-शब्द-प्रकरण

अब हम कुछ पर्याय-वाची शब्द समझा रहे हैं, जिससे सब बालकों के ज्ञान में वृद्धि होगी।

जल के लिए संस्कृत में लगभग १२५ नाम (=शब्द) हैं। उनमें से अधिक नाम ऐसे हैं, जो वेदसंहिताओं में प्रयुक्त हैं। लौकिक संस्कृत ग्रन्थों में अर्थात् महाकाव्य, नाटक आयुर्वेद आदि में जल के वाचक शब्द सीमित हैं। वैजयन्ती-कोष में जल के २९ पर्यायवाची लिखे हैं। अमर-कोष में जल के २७ नाम हैं। इनमें से अधिक प्रसिद्ध ये हैं—जलम्, वारि, तोयम्, पाथः, कमलम्, वनम्, जीवनम्, भुवनम्, कीलालम्, आपः, पानीयम्, पयः, उदकम्, अम्बु, अम्भः, नीरम्।

इन जलवाची शब्दों के साथ 'द' अथवा 'धर' लगा देने से इनका अर्थ बादल होगा तथा उनके रूप 'राम' शब्द के समान चलेंगे। इन्हीं शब्दों के साथ 'मुक्' (=मुच्) लगाने से भी इनका अर्थ बादल होगा तथा उनके रूप 'वाक्' (=वाच्) शब्द के समान चलेंगे, किन्तु वे पुंल्लिङ्ग माने जायेंगे।

पानी के पर्यायवाची	मेघ के पर्यायवाची		
जलम्	जलदः	जलधरः	जलमुक्
वारि	वारिदः	वारिधरः	वारिमुक्
तोयम्	तोयदः	तोयधरः	तोयमुक्
पाथः	पाथोदः	पाथोधरः	पाथोमुक्
कमलम्	कमलदः	कमलधरः	कमलमुक्
वनम्	वनदः	वनधरः	वनमुक्
जीवनम्	जीवनदः	जीवनधरः	जीवनमुक्
भुवनम्	भुवनदः	भुवनधरः	भुवनमुक्
कीलालम्	कीलालदः	कीलालधरः	कीलालमुक्
आपः	अब्दः	अब्धरः	अम्मुक्
पानीयम्	पानीयदः	पानीयधरः	पानीयमुक्
पयः	पयोदः	पयोधरः	पयोमुक्
उदकम्	उदकदः	उदकधरः	उदकमुक्
अम्बु	अम्बुदः	अम्बुधरः	अम्बुमुक्
अम्भः	अम्भोदः	अम्भोधरः	अम्भोमुक्
नीरम्	नीरदः	नीरधरः	नीरमुक्

'पयः' शब्द के दो अर्थ होते हैं—जल और दूध, अतः 'पयोधर' के भी दो अर्थ होते हैं—बादल और स्तन। आयुर्वेद में नुस्खों के प्रकरण में ये मेघवाची शब्द नागरमोथा के अर्थ में आते हैं। न केवल इनका, अपितु अन्य भी जो घन, बलाहक, तडित्वान् धूमयोनि, नदनु आदि मेघवाची शब्द हैं इनका प्रयोग आयुर्वेद में नुस्खों के प्रसङ्ग में 'नागरमोथा' के अर्थ में होता है।

जलवाची शब्दों के अन्त में 'धि' 'निधि, 'राशि' अथवा 'पति' लगा देने से, इनका अर्थ सागर हो जायेगा और पुंल्लिङ्ग 'हरि' शब्द के समान उनके रूप चलेंगे।

जलवाची शब्द	समुद्र के पर्यायवाची			
जलम्	जलधिः	जलनिधिः	जलराशिः	जलपतिः
वारि	वारिधिः	वारिनिधिः	वारिराशिः	वारिपतिः
तोयम्	तोयधिः	तोयनिधिः	तोयराशिः	तोयपतिः
पाथः	पाथोधिः	पाथोनिधिः	पाथोराशिः	पाथस्पतिः
कमलम्	कमलधिः	कमलनिधिः	कमलराशिः	कमलपतिः
वनम्	वनधिः	वननिधिः	वनराशिः	वनपतिः
जीवनम्	जीवनधिः	जीवननिधिः	जीवनराशिः	जीवनपतिः
भुवनम्	भुवनधिः	भुवननिधिः	भुवनराशिः	भुवनपतिः
कीलालम्	कीलालधिः	कीलालनिधिः	कीलालराशिः	कीलालपतिः
आपः	अब्धिः	अम्निधिः	अब्राशिः	अप्पतिः
पानीयम्	पानीयधिः	पानीयनिधिः	पानीयराशिः	पानीयपतिः
पयः	पयोधिः	पयोनिधिः	पयोराशिः	पयस्पतिः
उदकम्	उदकधिः	उदकनिधिः	उदकराशिः	उदकपतिः
अम्बु	अम्बुधिः	अम्बुनिधिः	अम्बुराशिः	अम्बुपतिः
अम्भः	अम्भोधिः	अम्भोनिधिः	अम्भोराशिः	अम्भस्पतिः
नीरम्	नीरधिः	नीरनिधिः	नीरराशिः	नीरपतिः

पृथ्वी-वाची और मनुष्य-वाची शब्दों के अन्त में ईश, ईश्वर, प, पति अथवा भृत् शब्द लगाने से इनका अर्थ 'राजा' हो जाता है। ईश, ईश्वर, और प शब्दान्त शब्दों के रूप 'राम' के समान, पति जिसके अन्त में हो उसके 'हरि' के समान और 'भृत्' जिसके अन्त में हो उसके 'भूभृत्' के समान रूप चलेंगे।

पृथ्वीवाची शब्द	राजा के वाचक शब्द				
पृथ्वी	पृथ्वीशः	पृथ्वीश्वरः	पृथ्वीपः	पृथ्वीपतिः	पृथ्वीभृत्
पृथिवी	पृथिवीशः	पृथिवीश्वरः	पृथिवीपः	पृथिवीपतिः	पृथिवीभृत्
मही	महीशः	महीश्वरः	महीपः	महीपतिः	महीभृत्
धरणी	धरणीशः	धरणीश्वरः	धरणीपः	धरणीपतिः	धरणीभृत्
मेदिनी	मेदिनीशः	मेदिनीश्वरः	मेदिनीपः	मेदिनीपतिः	मेदिनीभृत्
उर्वी	उर्वीशः	उर्वीश्वरः	उर्वीपः	उर्वीपतिः	उर्वीभृत्
क्षोणी(क्षोणिः)	क्षोणीशः	क्षोणीश्वरः	क्षोणीपः	क्षोणीपतिः	क्षोणीभृत्
क्षितिः	क्षितीशः	क्षितीश्वरः	क्षितिपः	क्षितिपतिः	क्षितिभृत्
भूमिः	भूमीशः	भूमीश्वरः	भूमिपः	भूमिपतिः	भूमिभृत्
अवनिः	अवनीशः	अवनीश्वरः	अवनिपः	अवनिपतिः	अवनिभृत्
भूः	भ्वीशः	भ्वीश्वरः	भूपः	भूपतिः	भूभृत्
धरा	धरेशः	धरेश्वरः	धरापः	धरापतिः	धराभृत्
इला	इलेशः	इलेश्वरः	इलापः	इलापतिः	इलाभृत्
क्ष्मा	क्ष्मेशः	क्ष्मेश्वरः	क्ष्मापः	क्ष्मापतिः	क्ष्माभृत्
वसुधा	वसुधेशः	वसुधेश्वरः	वसुधापः	वसुधापतिः	वसुधाभृत्
कुः	क्वीशः	क्वीश्वरः	कुपः	कुपतिः	कुभृत्

मनुष्यवाची शब्द	राजा के वाचक शब्द				
मनुष्य	मनुष्येशः	मनुष्येश्वरः	मनुष्यपः	मनुष्यपतिः	मनुष्यभृत्
ना(=नृ)	नृशः	नृश्वरः	नृपः	नृपतिः	नृभृत्
नरः	नरेशः	नरेश्वरः	नरपः	नरपतिः	नरभृत्
मनुज	मनुजेशः	मनुजेश्वरः	मनुजपः	मनुजपतिः	मनुजभृत्
मानव	मानवेशः	मानवेश्वरः	मानवपः	मानवपतिः	मानवभृत्
मर्त्य	मर्त्येशः	मर्त्येश्वरः	मर्त्यपः	मर्त्यपतिः	मर्त्यभृत्
मानुष	मानुषेशः	मानुषेश्वरः	मानुषपः	मानुषपतिः	मानुषभृत्

इसी प्रकार इन (पृथ्वी-वाची और मनुष्य-वाची) शब्दों के अन्त में इन्द्र, नाथ, पाल, अधिप ये शब्द लगाने से भी उनका 'राजा' अर्थ हो जाता है।

यथा—पृथ्वीन्द्रः, अवनीन्द्रः, पृथ्वीनाथः, भूपालः, वसुधाधिपः, नरेन्द्रः, नरनाथः, नृपालः, नराधिपः आदि। पृथ्वीवाची शब्दों के अन्त में 'जानि' लगाने से भी राजा अर्थ होता है। यथा—पृथ्वीजानिः, भूजानिः[1]। पृथ्वीवाची शब्दों के अन्त में 'धर' अथवा 'भृत्' लगा देने से इनका अर्थ पर्वत हो जाता है तथा 'रुह्', 'जन्मा' अथवा 'ज' लगा देने से इनका अर्थ वृक्ष हो जाता है—

पृथ्वीवाची	पर्वतवाची		वृक्षवाची		
पृथ्वी	पृथ्वीधरः	पृथ्वीभृत्	पृथ्वीरुहः	पृथ्वीजन्मा	पृथ्वीजः
पृथिवी	पृथिवीधरः	पृथिवीभृत्	पृथिवीरुहः	पृथिवीजन्मा	पृथिवीजः
मही	महीधरः	महीभृत्	महीरुहः	महीजन्मा	महीजः
धरणी	धरणीधरः	धरणीभृत्	धरणीरुहः	धरणीजन्मा	धरणीजः
मेदिनी	मेदिनीधरः	मेदिनीभृत्	मेदिनीरुहः	मेदिनीजन्मा	मेदिनीजः
उर्वी	उर्वीधरः	उर्वीभृत्	उर्वीरुहः	उर्वीजन्मा	उर्वीजः
क्षोणी(क्षोणिः)	क्षोणीधरः	क्षोणीभृत्	क्षोणीरुहः	क्षोणीजन्मा	क्षोणीजः
क्षितिः	क्षितिधरः	क्षितिभृत्	क्षितिरुहः	क्षितिजन्मा	क्षितिजः
भूमिः	भूमिधरः	भूमिभृत्	भूमिरुहः	भूमिजन्मा	भूमिजः
अवनिः	अवनिधरः	अवनिभृत्	अवनिरुहः	अवनिजन्मा	अवनिजः
भूः	भूधरः	भूभृत्	भूरुहः	भूजन्मा	भूजः
कुः	कुधरः	कुभृत्	कुरुहः	कुजन्मा	कुजः
धरा	धराधरः	धराभृत्	धरारुहः	धराजन्मा	धराजः
इला	इलाधरः	इलाभृत्	इलारुहः	इलाजन्मा	इलाजः
क्ष्मा	क्ष्माधरः	क्ष्माभृत्	क्ष्मारुहः	क्ष्माजन्मा	क्ष्माजः
वसुधा	वसुधाधरः	वसुधाभृत्	वसुधारुहः	वसुधाजन्मा	वसुधाजः

ऊपर दर्शायी गई तालिकाओं से ज्ञात होता है कि 'भृत्' शब्द जिसके अन्त में हो ऐसे पृथ्वीवाची शब्द राजा और पर्वत दोनों के वाचक होते हैं। जहां ऐसे शब्द आयें वहां प्रसङ्ग और पूर्वापर प्रकरण से सही अर्थ का ज्ञान कर लेना चाहिए।

---

१. भूः जाया यस्य सः भूजानिः 'जायाया निङ्' (अष्टा. ५.४.१३४) से समासान्त निङ्।

जलवाची शब्दों के साथ 'ज' लगाने से उनका अर्थ 'कमल' अथवा 'जल के जीव' हो जाता है —यथा—

जलजम्, वारिजम्, नीरजम्, अब्जम्, तोयजम्, अम्भोजम्, पयोजम्, अम्बुजम्, सलिलजम्, कजम् आदि।

रात्रिवाची शब्द

निशा, दोषा, क्षपा, क्षणदा, त्रियामा, तमिस्रा, रात्रिः, तमी, तमस्विनी, रजनी, यामिनी, शर्वरी, विभावरी आदि।

ये रात्रिवाची शब्द आयुर्वेद के नुस्खों के प्रकरण में हल्दी के वाचक होते हैं।

रात्रिवाची शब्दों के अन्त में 'ईश, नाथ, कर, पति अथवा जानि' शब्द लगा देने से इनका अर्थ चन्द्रमा हो जाता है—

रात्रिवाची शब्द	चन्द्रमावाची शब्द				
निशा	निशेशः	निशानाथः	निशाकरः	निशापतिः	निशाजानिः
दोषा	दोषेशः	दोषानाथः	दोषाकरः	दोषापतिः	दोषाजानिः
क्षपा	क्षपेशः	क्षपानाथः	क्षपाकरः	क्षपापतिः	क्षपाजानिः
क्षणदा	क्षणदेशः	क्षणदानाथः	क्षणदाकरः	क्षणदापतिः	क्षणदाजानिः
त्रियामा	त्रियामेशः	त्रियामानाथः	त्रियामाकरः	त्रियामापतिः	त्रियामाजानिः
तमिस्रा	तमिस्रेशः	तमिस्रानाथः	तमिस्राकरः	तमिस्रापतिः	तमिस्राजानिः
रात्रिः	रात्रीशः	रात्रिनाथः	रात्रिकरः	रात्रिपतिः	रात्रिजानिः
तमी	तमीशः	तमीनाथः	तमीकरः	तमीपतिः	तमीजानिः
तमस्विनी	तमस्विनीशः	तम…नाथः	तम—करः	तम…पतिः	तम—जानिः
रजनी	रजनीशः	रजनीनाथः	रजनीकरः	रजनीपतिः	रजनीजानिः
यामिनी	यामिनीशः	यामिनीनाथः	यामिनीकरः	यामिनीपतिः	यामिनीजानिः
शर्वरी	शर्वरीशः	शर्वरीनाथः	शर्वरीकरः	शर्वरीपतिः	शर्वरीजानिः
विभावरी	विभावरीशः	विभा…नाथः	विभा करः	विभा पतिः	विभा जानिः

ये तथा अन्य जो चन्द्रमावाची शब्द चन्द्रः, शशाङ्कः, उडुराजः, ओषधीशः, चन्द्रमाः, विधुः, इन्दुः, शीतांशुः, क्लेदुः, तुहिनदीधितिः, हिमद्युतिः, शशी (=शशिन्), ग्लौः आदि हैं उन सबका आयुर्वेद में (नुस्खा प्रकरण में) कपूर अर्थ होता है।

सूर्यवाची शब्द

अर्कः, सूर्यः, सूरः, मार्तण्डः, मार्ताण्डः, तपनः, प्रभाकरः, भास्करः, अहस्करः, दिनमणिः, दिनकरः, दिवाकरः, विभाकरः, खाध्वनीनः, खतिलकः, आदित्यः, मिहिरः, मित्रः दिनेशः, अर्यमा, द्वादशात्मा, पूषा, सविता, सप्तसप्तिः, तिग्मदीधितिः, रविः, अहर्पतिः, अनूरुसारथिः, रश्मिमाली, दिनप्रणीः, भानुः, भातुः, पद्मबन्धुः, तमोरिपुः, चण्डांशुः, सहस्रांशुः, अंशुमान् आदि शब्द सूर्यवाची हैं।

सूर्यवाचक समस्त शब्द, आयुर्वेद में (नुस्खों के प्रकरण में) आक (=अकौआ) अर्थ के वाचक होते हैं।

अग्निवाचक शब्द

ज्वलनः, दहनः, अनलः, पावकः, उषर्बुधः, आश्रयाशः, शुक्रः, हव्यवाहनः, वैश्वानरः, अग्निः, वह्निः, कृपीटयोनिः, आशुशुक्षणिः, शुचिः, कृशानुः, चित्रभानुः, विभावसुः, जातवेदाः, कृष्णवर्त्मा, हुतभुक् आदि शब्द अग्निवाची हैं।

अग्निवाची समस्त शब्द आयुर्वेद के नुस्खों के प्रकरण में 'चित्रक' बूटी के लिये प्रयुक्त होते हैं।

वायुवाचक शब्द

वातः, पवनः, पवमानः, प्रभञ्जनः, समीरः, समीरणः, श्वसनः, स्पर्शनः, गन्धवहः, गन्धवाहः, अनिलः, आशुगः, मारुतः, जगत्प्राणः, सदागतिः, नभस्वान्, मातरिश्वा, वायुः, मरुत् आदि शब्द वायुवाची हैं।

कुछ ज्ञातव्य बातें

[१] लट् लकार भी 'स्म' अव्यय साथ लगाने पर भूतकालिक अर्थ देता है[1] अर्थात् वर्तमान काल की क्रिया के अन्त में 'स्म' लगा देने से वह अनद्यतन भूतकाल की क्रिया बन जाती है। जैसे—पठति स्म=पढ़ता था। पिबति स्म=पीता था। गच्छति स्म=जाता था। खादति स्म=खाता था।

मैं ब्रह्मचारी ब्रह्मदत्त को गुरुकुल कुरुक्षेत्र में पढ़ाता था।
अहं ब्रह्मचारिणं ब्रह्मदत्तं गुरुकुल-कुरुक्षेत्रे पाठयामि स्म।
साथ ही पक्ष में अपाठयम् (लङ्), अपीपठम् (लुङ्) का भी प्रयोग होता है।

[२] अभिज्ञा अर्थात् भूली हुई बात को याद दिलाने के विषय में अनद्यतन भूतकाल के अर्थ में लृट् लकार का भी प्रयोग होता है[2]। जैसे कोई दो मित्र आपस में बात कर रहे हों, तब एक मित्र दूसरे मित्र को पुरानी बात का स्मरण कराता हुआ कहता है।—

यज्ञदत्त! क्या तुम्हें याद है अपन अम्बाला शहर की पाठशाला में पढ़ते थे।
अपि स्मरसि यज्ञदत्त! अम्बाला-नगरस्य पाठशाले (पाठशालायां) पठिष्यावः।

किन्तु इस प्रकार के वाक्यों में कहीं 'यत्' शब्द का प्रयोग हो जाय तो फिर लृट् लकार नहीं होगा[3]। यथा—अपि स्मरसि यज्ञदत्त! यत् अम्बालानगरस्य पाठशाले (पाठशालायां) अपठाव।

---

१. लट् स्मे (अष्टा० ३.२.११८); अपरोक्षे च (अष्टा. ३.२.११९)
२. अभिज्ञावचने लृट् (अष्टा० ३.२.११२) ३. न यदि (अष्टा० ३.२.११३)

[३] धातुमात्र से वर्तमान काल में उत्पन्न लट् के स्थान पर यथायोग्य शतृ और शानच् प्रत्यय होते हैं, किन्तु उनका प्रथमा विभक्ति के साथ समानाधिकरण न हो। ऐसा पाणिनि के सूत्र में कहा गया है।[१] तथापि साहित्य में ऐसे प्रयोग देखे जाते हैं जहां प्रथमा-समानाधिकरण में भी शतृ-शानच् का प्रयोग होता है। इसके लिये वैयाकरणों ने पाणिनि के शतृ-शानच्-विधायक सूत्र में से ही समाधान खोज निकाला है। पहिले के 'वर्त्तमाने लट्'[२] सूत्र में 'लट्' की अनुवृत्ति आ ही रही थी, तब फिर 'लटः शतृशानचा०' इस सूत्र में 'लट्' पद क्यों रक्खा? सो इस प्रकार 'लटः' पद का ग्रहण व्यर्थ होकर किसी अतिरिक्त (=अधिक) विषय की ओर सङ्केत कर रहा है और वह यह है कि कहीं कहीं प्रथमा-समानाधिकरण में भी लट् के स्थान पर शतृशानच् होते हैं।[३]

[४] 'वह खा रहा था। मैं खा रहा हूं। शायद वह खा रहा हो।' इत्यादि वाक्यों में शतृ-शानच्-प्रत्ययान्त शब्द के साथ 'भू' या 'अस्' धातु का प्रयोग किया जाता है।

१. वह जा रहा है=सः गच्छन् अस्ति
२. विमला जा रही है=
विमला गच्छन्ती अस्ति
३. जल बह रहा है=जलं वहद् अस्ति
४. मैं जा रहा हूं=अहं गच्छन् अस्मि
५. हम दो जा रहे हैं=
आवां गच्छन्तौ स्वः
६. हम सब जा रहे हैं=
वयं गच्छन्तः स्मः
७. तू जा रहा है=त्वं गच्छन् असि
८. तुम दो जा रहे हो=
युवां गच्छन्तौ स्थः
९. तुम सब जा रहे हो=
यूयं गच्छन्तः स्थः
१०. मैं जा रहा था=
अहं गच्छन् आसम् (अभूवम्)
११. हम दो जा रहे थे=
आवां गच्छन्तौ आस्व (अभूव)
१२. हम सब जा रहे थे=
वयं गच्छन्तः आस्म (अभूम)
१३. लड़कियां जा रहीं थीं=
बालिकाः गच्छन्त्यः आसन्
१४. दो फल गिर रहे थे=
फले पतन्ती आस्ताम्।
१५. शायद वे इस समय भोजन खा रहे हों=मन्ये इदानीं ते खादन्तः भवेयुः।

[५] 'जा चुका है', 'खा चुका था', 'जा चुका होगा' इस प्रकार के वाक्यों में 'क्तवतु' का प्रयोग करके 'अस्' या 'भू' धातु का प्रयोग करते हैं।

---

१. लटः शतृशानचावप्रथमासमानाधिकरणे (अष्टा० ३.२.१२४)
२. अष्टा० ३.२.१२३.
३. 'लडिति [अनु] वर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम् प्रथमासमानाधिकरणेऽपि भवति—सन् ब्राह्मणः।······विद्यमानो ब्राह्मणः' (काशिका ३. २. १२४)

यथा—१. मैं फल खा चुका हूं=अहं फलानि भुक्तवान् अस्मि ।

२. क्या तू फल खा चुका ?=किं त्वं फलानि खादितवान् असि ?

३. शायद ये फल तोतों ने गिराये हैं=मन्ये एतानि फलानि शुकाः पातितवन्तः स्युः

४. अथवा स्वयं गिरे हैं=स्वयमेव पतितानि (पतितवन्ति) वा भवेयुः ।

इस प्रकार के वाक्य कर्मवाच्य में 'क्त' से भी बन सकते हैं । यथा—'एतैः फलैः स्वयं पतितं भवेत्; एतानि फलानि शुकैः पातितानि भवेयुः' ।

५. वह गया होगा=सः गतवान् भविष्यति अथवा 'सः गतः भविष्यति ।'

६. लड़की गई होगी=बालिका गतवती भविष्यति ।

ये दोनों वाक्य इस प्रकार भी बन सकते हैं—

तेन गतं भविष्यति । बालिकया गतं भविष्यति ।

[६] 'मुझे जाना है', 'उनको जाना है', 'हमें जाना होगा, 'उन्हें जाना था' इस प्रकार के वाक्यों में कर्मवाच्य में तव्य, अनीयर्, यत् आदि के साथ अस् या 'भू' धातु का प्रयोग होता है । यथा—

१. मुझे घर जाना है=मया गृहं गन्तव्यम् (गम्यं, गमनीयम्) अस्ति ।

२. कुछ काम मुझे ही करने होंगे=कानिचित् कर्माणि मयैव कर्त्तव्यानि (कार्याणि, करणीयानि) भविष्यन्ति ।

३. ये कार्य मुझे ही करने पड़ेंगे=एतानि कर्माणि अनिच्छता अपि मयैव कर्तव्यानि (करणीयानि, कार्याणि) भविष्यन्ति ।

४. आपको घर जाना था=भवद्भिः गृहं गन्तव्यम् आसीत् ।

५. ये फल आपने ही खाने हैं=एतानि फलानि भवतैव खादितव्यानि सन्ति ।

६. शायद इन लड़कियों को ही ये कपड़े सिलने पड़ें ।
मन्ये आभिः बालिकाभिः एव एतानि वस्त्राणि सेवितव्यानि भवेयुः ।

७. वहां उन्हें ही जाना होगा=तत्र तैः एव गन्तव्यं भविष्यति ।

[७] "इसके बाल या आंखें सुन्दर हैं" इस प्रकार के वाक्यों में जो कर्त्ता सबसे अन्त में होगा उसके अनुसार क्रिया आयेगी । यथा—

१. अस्य केशाः वा नेत्रे वा सुभगे स्तः ।

२. बैल के सींग, पांव या पूंछ कांपती है=वृषभस्य शृङ्गे वा पादाः वा पुच्छं वा कम्पते ।

[८] जिन वाक्यों में अन्य कर्ताओं (अथवा कर्ता) के साथ सर्वनाम रूपी कर्त्ता भी प्रयुक्त हो वहां उस सर्वनाम के अनुसार क्रिया आती है[1]। यथा—

(i) तू और मोहन वहां जायेंगे = त्वं च मोहनः च तत्र गमिष्यथः।

(ii) तू, सुभाष और नरेन्द्र नहीं जायेंगे = त्वं च सुभाषः च नरेन्द्रः च न गमिष्यथ।

(iii) मैं और भृत्य खोदेंगे = अहं भृत्याः च खनिष्यामः।

[९] किन्तु जहां सब कर्त्ता सर्वनाम रूप में प्रयुक्त हों वहां सर्वनाम के त्यदादि गण में जो जो परे पढ़ा है उसके अनुसार क्रिया आयेगी[2]। वहां क्रम इस प्रकार है—'त्यत्, (तत्,) यद्, एतद्, (इदम्,) अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्'। इन में से वाक्य में जो जो प्रयुक्त होंगे, उन प्रयुक्तों में, इस उपर्युक्त क्रम में से जो परे होगा तदनुसार क्रिया होगी। यथा—

१. वह, यह और तू लड्डू खायेंगे = सः च अयं (एषः) च त्वं च मोदकान् खादिष्यथ।

२. तू और यह पढ़ोगे = त्वं च अयं च पठिष्यथः।

३. तू, वह और यह लेख लिखेंगे = त्वं च सः च एषः च लेखं लिखिष्यथ।

४. ये और हम तैरेंगे = एते च वयं च तरिष्यामः (तरीष्यामः)।

स्त्रीलिङ्ग में विकल्प से ङीप्[२] होगा—द्विपात् स्त्री, द्विपदी[३] स्त्री, चतुष्पात् वडवा, चतुष्पदी[३] वडवा आदि।
सुपात् [शोभनौ पादौ यस्य सः→सु पाद→सुपाद्→सुपात् पुरुषः=सुन्दर पांवों वाला पुरुष]। सुपात्, सुपदी[३] स्त्री।

(७) [i] बहुव्रीहि समास में यदि ककुद शब्द उत्तरपद हो तो उस 'ककुद' के अन्त्य अकार का लोप होता है आयु बताने के विषय में[४]। यथा—

असञ्जातककुत् [असञ्जातं ककुदं यस्य सः→असञ्जात ककुद→असञ्जात-ककुद्→असञ्जातककुत्=ऐसा बछड़ा जिसके अभी खुम्ब उभरा नहीं है= छोटा बछड़ा]।
पूर्णककुत् [पूर्णं ककुदं यस्य सः→पूर्णककुद→पूर्णककुद्→पूर्णककुत्=जवान बैल जिसका खुम्ब भर गया है]।
उन्नतककुत् [उन्नतं ककुदं यस्य सः→उन्नत ककुद→उन्नतककुद्→उन्नत-ककुत्=प्रौढ़ बैल जिसका खुम्ब खूब ऊँचा हो गया है]।
इसी प्रकार—स्थूलककुत्। क्षीणककुत् आदि।

[ii] बहुव्रीहि समास में त्रि पूर्वपद हो तो उत्तरपद के 'ककुद' के अन्त्य अ का लोप पर्वतविशेष के कथन में होता है[५]। यथा—

---

१. सङ्ख्यासुपूर्वस्य [अष्टा. ५.४ १४०]। २. पादोऽन्यतरस्याम् [अष्टा. ४.१.८]
३. पादः पत् [अष्टा. ६.४.१३०] से पाद् के स्थान पर पत् आदेश।
४. ककुदस्यावस्थायां लोपः [अष्टा. ५.४.१४६]।
५. त्रिककुत् पर्वते [अष्टा. ५.४.१४७]।

त्रिककुत् पर्वतः [त्रीणि ककुदानि (=ककुदाकाराणि शृङ्गाणि) यस्य सः→ त्रिककुद→त्रिककुद्→त्रिककुत् पर्वतः=तीन शिखरों वाला पर्वत]।

(८) [i] बहुव्रीहि समास में यदि उत् और वि उपसर्ग पूर्वपद हों और काकुद शब्द उत्तरपद हो तो 'काकुद' के अ का लोप होता है[1]। यथा—

उत्काकुत् [उद्गतं काकुदं यस्य सः→उत् काकुद→उत् काकुद्→उत्काकुत् =जिसका तालु उठा हुआ हो वह पुरुष]।

विकाकुत् [विकृतं काकुदं यस्य सः→विकाकुद्→विकाकुत्=बिगड़े हुए तालु वाला पुरुष]।

(ii) बहुव्रीहि समास में यदि पूर्वपद 'पूर्ण' शब्द हो और उत्तरपद काकुद शब्द हो तो उसके अ का लोप विकल्प से होता है।[2] यथा—

पूर्णकाकुत्, पूर्णकाकुदः (पूर्णं काकुदं यस्य सः→पूर्णं काकुद→पूर्णकाकुद्→ पूर्णकाकुत्, पूर्णकाकुदः=पूरे तालु वाला पुरुष)

अभ्यास

१. जिन्होंने हवन कर लिया है और भात खा लिया है उन अतिथियों को विदा करो।
हुतहोमान् भुक्तौदनांश्च प्राघुणिकान् विसर्जय साम्प्रतम्।

२. जिन्हें भिक्षा दी जा चुकी है ऐसे संन्यासियों के बाहर चले जाने पर, जिनके लिये पुए पकाए हैं, वे ऋत्विक् भोजनालय में प्रविष्ट हुए हैं।
दत्तभिक्षेषु यतिषु गृहाद् बहिर्गतवत्सु पक्वापूपा ऋत्विजो भोजनालयम्प्राविक्षन्।

३. यह नहर-निरीक्षक, जिस गाँव तक पानी पहुंचा है उस गांव का निरीक्षण करेगा।
अयङ् कुल्यानिरीक्षकः प्राप्तोदकं ग्रामन्निरीक्षिष्यते।

४. सभी मेहमानों के चले जाने पर, यह घर, उड़े हुए पक्षियों वाले पेड़ के समान शोभा से रहित प्रतीत हो रहा है।
गतवत्सु सर्वेष्वभ्यागतेषु गृहमेतदुड्डीनविहगवृक्षवद् अपगतश्रीकम्प्रतीयते।

५. चितकबरी गौओं वाले इस गोपाल का पीले कपड़े पहनने वाला पुत्र रात-दिन पढ़ता है।
चित्रगोरस्य गोपालस्य पीताम्बरः सूनू रात्रिन्दिवमधीते।

६. जहां कन्याएं शिक्षित हैं, ऐसे गाँव में अन्ध विश्वास क्यों पनपेंगे ?

---

१. उद्विभ्यां काकुदस्य (अष्टा. ५.४.१४८)।

२. पूर्णाद् विभाषा (अष्टा. ५.४.१४९)।

शिक्षितकन्ये ग्रामे कुतोऽन्धविश्वासा उदेष्यन्ति (उदयिष्यन्ते)।

७. सोने के गहने वाली स्त्री में विद्या का लेश भी न हो तो उसका जीवन व्यर्थ है।
सुवर्णालङ्कारायां ललनायां विद्यालेशोऽपि न स्यात्ततोऽपार्थकमेव तस्य जीवितम्।

८. इन झड़े हुए पत्तों वाले पेड़ों के झुंड में, उस जवान गंजे को कैसे ढूंढ़ोगे?
एषां प्रपर्णानां (प्रपतितपर्णानां) पादपानां समूहे कथमिव तं युवखलतिङ् गवेषयिष्यथ?

९. निपूतों की उत्तम गति नहीं होती, ऐसी प्रसिद्धि नैष्ठिक ब्रह्मचारियों में नहीं घटती।
अपुत्राणाम् (अविद्यमानपुत्राणां) सद्गतिर्न जायत इतीयं लोकोक्तिर्न सङ्गच्छते नैष्ठिकवर्णिषु।

१०. मैं जिसमें रोगी पड़ा हूं ऐसे इस घर में, तुम शोर क्यों मचा रहे हो?
अस्मिरुग्णेऽस्मिन्नोकसि कथङ् कोलाहलङ् कुरुथ?

११. अत्याचार होने पर भी नीचे मुख किये हुए ये विद्वान् क्या तिरस्कार के पात्र नहीं हैं?
अत्याचारे सत्यपि (अधोमुखाः) नीचैर्मुखा इमे विपश्चितो न (किमु) विडम्बनाभाजनानि सन्ति?

१२. देखो! जिसके सीने पर बाल हैं वह पहलवान दयालु और विश्वासपात्र है।
पश्यत! उरसिलोमा स मल्लो दयालुर्विश्रम्भभाजनञ्च वर्त्तते।

१३. तब हाथ में चक्र धारण किए हुए श्री कृष्ण, महाधनुर्धारी भीष्म की ओर दौड़े।
तदा चक्रपाणिर्मधुसूदनो दधाव महाधनुर्धरम्भीष्मं प्रति।

१४. ऊँट के से मुँह वाले बन्दर ने अनेक वृक्ष उजाड़ दिये हैं।
उष्ट्रमुखेनानेन शाखामृगेण नैकेऽनोकहा व्यनाश्यन्त।

१५. ब्रह्मदेव के बाड़े में दस के लगभग घोड़े, बीस के आस पास गायें, लगभग तीस बकरियां और पचास से अधिक भेड़े हैं।
ब्रह्मदेवस्य गोष्ठे उपदशास्तुरगा उपविंशा गाव आसन्नत्रिंशा अजा अधिकपञ्चाशा अवयश्च सन्ति।

१६. इस विद्वान् ने बारह महीनों में बीस ग्रन्थ लिखे हैं।
अयं विपश्चिद् द्वादशभिः मासैः द्विदशान् (=विंशतिं) ग्रन्थान् अलेखीत्।

१७. इन पांच छः लड्डुओं से इसका पेट भरेगा क्या?
एभिः पञ्चषैर्मोदकैः पूरयिष्यते किमस्योदरदरी?

१८. अजमेर नगर की उत्तर पश्चिम दिशा में एक बड़ी झील है।
अजमेरनगरस्योत्तरपश्चिमायामाशायाम्महती ह्येका सरसी विद्यते।

१९. वे शराबी एक दूसरे के केश पकड़कर लड़ते हुए चिल्लाने लगे और पहिले मुक्कों से और फिर लाठियों से लड़ने लगे।

मद्यपास्ते कचाकचि युध्यमानाः प्राक्रोशन्, तदनन्तरञ्च पूर्वं मुष्टीमुष्टि पश्चाच्च दण्डादण्डि योद्धुम्प्रावर्त्तन्त।

२०. राम और लक्ष्मण सीता के साथ नाव में बैठे।
ससीतौ (सहसीतौ) रामलक्ष्मणौ नावमध्यारुरुहतुः।

२१. जिनको पढ़ना प्यारा लगता है, वे ही छात्र मेरे पास पढ़ने आवें।
प्रियाध्ययनाः (अध्ययनप्रियाः) एव छात्रा मामध्येतुमुपेयुः।

२२. नियम के अनुसार जिन्होंने अग्नि का आधान किया है और जिनके पुत्र उत्पन्न हो गया है वे विद्वान् इस उत्सव में आयेंगे।
यथानियमम् आहिताग्नयः (अग्न्याहिताः) जातपुत्राः (पुत्रजाताः) च सुधियोऽस्मिन्नुत्सवे समेष्यन्ति।

२३. यह बड़ी-बड़ी आंखों वाला किसान, तीन अङ्गुलियों वाली जेई से पूले उठा उठा कर गाड़ी में डालेगा।
अयं विशालाक्षः कृषीवलस्त्र्यङ्गुलेन पूलानुत्थापमुत्थापं शकटे पातयिष्यति।

२४. आज एक गाय ने दो सिर वाला बछड़ा जना था।
अद्यैका गौर्द्विमूर्ध वत्समसोष्ट (अजीजनत्)।

२५. यह ऊंची नाक वाला वैयाकरण और सुन्दर नाक वाला मीमांसक, दोनों उत्तम बुद्धि वाले और श्रेष्ठ संतान वाले हैं।
एष उन्नसः पदज्ञः प्रणसो वाक्यज्ञश्चोभावपि सुमेधसौ सुप्रजसौ च स्तः।

२६. जिन्हें धर्म प्यारा है, वे निरन्तर प्राणियों पर दया करें।
प्रियधर्माणोऽनवरतम्प्राणिषु दयन्ताम्।

२७. यह गठे हुए सीने वाला युवक, जूते पहने हुए अपने छोटे भाई के साथ, दूसरे गाँव को जाएगा।
व्यूढोरस्कोऽयं युवा धृतोपानत्केन निजानुजेन समं ग्रामान्तरं व्रजिष्यति।

२८. बहुत ग्वालिनों वाले इस गांव में, सुशील बहुओं वाला यह घर सबसे अधिक सुखी है।

बहुगोपीकेऽस्मिन् ग्रामे सुशीलवधूकोऽयङ् कुटुम्बः सुखितमः खलु।

२९. इस दो दांत वाले शिशु को कड़वी दवाई मत दो।
अस्मै द्विदते शिशवे मा स्म ददाः (मा दाः) तिक्तमौषधम्।

३०. यह बालिका धुमैले (भूरे) दांतों वाली है, परन्तु इसकी बड़ी बहन तो सुन्दर दांतों वाली है।
बालेयं श्यावदती (श्यावदन्ती, श्यावदन्ता) वर्त्तते, परमस्या अग्रजा तु सुदती खलु।

३१. जिस देश में घड़े जैसे एन वाली गौएं हों, वहां दूध की बहुतायत क्यों न हो?
यस्मिन्देशे घटोध्न्यो गावःस्युः कथन्न भवेत्तत्र दुग्धस्य बहुलता (बहुलत्वं, बंहिमा)।

३२. इस श्रमसाध्य यात्रा में युवती पत्नियों वाले पुरुष ही जायेंगे, बूढ़ी पत्नियों वाले नहीं।
अस्यां श्रमसाध्यायां यात्रायां युवजानयो यात्रिण एव यास्यन्ति न पुनर्वृद्धजानयः।

३३. इस कम घी वाले शाक को कोई बीमार चाटे, मैं तो बढ़िया गन्ध वाला हलुआ खाऊंगा।
एतद् घृतगन्धि शाकमामयी कश्चिल्लेढु, सुगन्धि संयावमहन्तु समास्वदिष्ये।

३४. तीन चार दिनों में यह कार्य पूरा नहीं होगा, इसके लिए कम से कम आठ नौ दिन चाहिए।
त्रिचतुरेष्वह:सु नेदङ् कार्यं सेत्स्यति, न्यूनान्न्यूनान्यष्टनवानि दिनान्यपेक्ष्यन्ते ह्येतदर्थानि।

केवल समास

जो समास, अव्ययीभाव आदि चारों समासों की परिधि में नहीं आता वह केवल समास कहलाता है।

(१) सुबन्त शब्द का सुबन्त शब्द के साथ समास होता है[१]। यथा—
भूतपूर्वः (पूर्वं भूतः [=पूर्वकाले भूतः[पूर्व भूत→भूतपूर्वः[२]=पहिले हुआ हुआ)।

(२) कहीं कहीं वेद में सुबन्त (परि, अनु आदि) का तिङन्त के साथ भी समास होता है[१]। यथा—
पर्यभूषत् (परि अभूषत्→पर्यभूषत्=
अनुव्यचलत् (अनु वि अचलत्→अनुव्यचलत् =

---

१. सुपा (सह सुपा [अष्टा० २ १.४] के विभाग करने पर बना सूत्र) से समास हुआ।
२. भूतपूर्वे चरट् (अष्टा० ५.३.५३) सूत्र में पाणिनि के व्यवहाररूपी निर्देश से भूत शब्द पूर्वपद में आ गया।

(३) सुबन्त का इव अव्यय के साथ समास होता है किन्तु मध्यवर्ती विभक्ति का लोप नहीं होता और पूर्वपद का प्रकृतिस्वर ही सारे समस्त शब्द पर लागू होता है[1]। यथा—

वाससी इव (वाससी इव=कपड़ों के समान)।
वागर्थाविव (वागर्थौ इव→वागर्थाविव=शब्द और अर्थ के समान)।
जीमूतस्येव (जीमूतस्य इव→जीमूतस्येव=बादल के समान)।
उद्बाहुरिव (उद्बाहुः इव→उद्बाहुरिव=ऊपर भुजा उठाये हुए व्यक्ति के समान)।

× × ×

श्लोक-सङ्ग्रह

संस्कृत साहित्य उत्तमोत्तम श्लोकों से भरा पड़ा है। उन सबका रसास्वादन तो साहित्यसरोवर में प्रत्यक्ष स्नान करने से होता है। किन्तु कतिपय श्लोक हम नमूने के लिये यहां दे रहे हैं।

१. विद्याविलासमनसो धृतशीलशिक्षाः
सत्यव्रता रहितमानमलापहाराः।
संसारदुःखदलनेन सुभूषिता ये
धन्या नरा विहितकर्मपरोपकाराः।
[महर्षि दयानन्द; सत्यार्थप्रकाश, समु० ३]

२. यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः।

३. वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितः प्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः॥
[कालिदास, विक्रमोर्वशीयम्]

ऊर्णां नैव ददाति नैष विषयो वाहस्य दोहस्य वा
हा कष्टं कथमस्य पृष्ठशिखरे गोणी समारोप्यते?

---

१. इवेन सह समासो विभक्त्यलोपश्च पूर्वपदप्रकृतिप्रकृतिस्वरत्वञ्च [वा०] (अष्टा० २.२.१८)।

तृप्तिर्नास्य महोदरस्य बहुभिर्ग्रासैः पलालैरपि
को गृह्णाति कपर्दकैरलमिति ग्राम्यैर्गजो हस्यते ॥

५. अस्यां सखे ! बधिरलोकनिवासभूमौ
किं कूजितेन खलु कोमलकोकिलेन ।
एते हि दैवहतकास्तदभिन्नवर्णं
त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥

६. किं कोमलैः कलरवैः पिक ! तिष्ठ तूष्णीम्
एते हि पामरजनाः स्वरमाकलय्य ।
को वा रटत्ययमये निकटे कटूनि
रे ! वध्यतामिति वदन्ति गृहीतदण्डाः ॥

७. रे बालकोकिल ! करीरमरुस्थलेषु
किं दुर्विदग्धमधुरध्वनिमा तनोषि ।
अन्यः स कोऽपि सहकारतरुप्रदेशो
मूल्यन्तु यत्र तव विभ्रमभाषितानाम् ॥

८. विश्वाभिराम-गुण-गौरव-गुम्फितानां
कोपोऽपि निर्मलधियां रमणीय एव ।
लोकप्रियैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुताऽपि नितान्तरम्या ॥

९. यन्नादृतस्त्वमलिना मलिनाशयेन
किं तेन चम्पक ! विषादमुरी करोषि ।
विश्वाभिराम-नव-नीरद-नीलवेशाः
केशाः कुशेशयदृशां कुशलीभवन्तु ॥

१०. क्रुद्धोलूक-नख-प्रपात-विगलत्-पक्षा अपि स्वाश्रयं
ये नोज्झन्ति पुरीष-पुष्ट-वपुषस्ते केचिदन्ये द्विजाः ।
ये तु स्वर्ग-तरङ्गिणी-बिसलता-लेशेन संवर्द्धिता
गङ्गातीरमपि त्यजन्ति मलिनं ते राजहंसा वयम् ॥

[पण्डितराज जगन्नाथ,

११. यत्रापि कुत्रापि गता भवन्ति
हंसा महीमण्डल-मण्डनानि ।
हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः ॥

१२. किं तेन हेमगिरिणा रजताद्रिणा वा
यत्र स्थितास्तु तरवस्तरवस्त एव ।
मन्यामहे मलयमेव यदाश्रयेण
कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः ॥

१३. अयि दलदरविन्द ! स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥

१४. ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातकः
त्वां ध्यायन् घन ! वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत् कं प्रति ब्रूमहे ॥

१५. भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य
कृतेन केन भवितासि कृतोपकारः ॥

१६. आपेदिरे ह्यम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ते ।
सङ्कोचमञ्चति वद त्वयि दीननाथे
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥

१७. आपद्गतं हससि किं द्रविणान्धमूढ !
लक्ष्मीः स्थिरा न भवतीति विचित्रमेतत् ।

एतान् प्रपश्यसि घटान् जलयन्त्रचक्रे
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ।

१८. अस्तङ्गतो ऽयमरविन्दवनैकबन्धुर्
भास्वान्, न लङ्घयति कोऽपि विधिप्रणीतम् ।
हे चक्र ! धैर्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं न तु दीनचित्ताः ॥

१९. आश्वास्य पर्वतकुलं तपनोष्मतप्त—
मुद्दाम-दाव-विधुराणि च काननानि ।
नाना-नदी-नद-शतानि च पूरयित्वा
रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ॥

२०. अर्था न सन्ति न च मुञ्चति मां दुराशा
त्यागे रतिं वहति दुर्ललितं मनो मे ।
याच्ञा च लाघवकरी स्ववधे च पापं
प्राणाः ! स्वयं व्रजत किं परिदेवितेन ॥

२१. कस्त्वं भोः, कथयामि दैवहतकं शाखोटकं विद्धि मां,
वैराग्यादिव वक्षि, साधुविदितं, कस्मादिदं कथ्यते ?
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे ॥

२२. कस्त्वं भद्र, खलेश्वरोऽहमिह किं घोरेवने स्थीयते,
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया ।
कस्मात् कष्टमिदं त्वया व्यवसितं, मद्देहमांसाशिनः
प्रत्युत्पन्न-नृमांस-भक्षणधियस्ते घ्नन्तु सर्वान् नरान् ॥

२३. कः पद्मिनीनां वद तिग्मदीधिति—
र्धर्मः परः कः कविवाचि कः स्थितः ?
का कण्ठभूषा न यमाद् बिभेति कः ?
स्वामी दयानन्द-सरस्वती यतिः ॥

२४. अस्मानवेहि कलमानलमाहतानां
येषां प्रकाण्डमुसलैरवदाततैव ।
स्नेहं विमुच्य सहसा खलतां प्रयान्ति
ये स्वल्पमर्दनवशान्न वयं तिलास्ते ।।

२५. मम भवपथिकस्य कर्मभोग्यं
प्रलयनिशि त्वमवैक्षथाः शयालोः ।
त्वयि सकलमकिञ्चनो बुभूषुः
प्रहरिकवेतनमेतदर्पयामि ।।

वेद-मन्त्राः

ओ३म् अहं भूमिमददामार्यायाऽहं वृष्टिं दाशुषे मर्त्याय ।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन् ।।
[ऋग्वेद ४.२६.२]

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।
[ऋग्वेद १०.७१.२]

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ।।
[ऋग्वेद १०.११७.६]

उत्तिष्ठत सं नह्यध्वमुदाराः केतुभिः सह ।
सर्पा इतरजना रक्षांस्यमित्राननु धावत ।।
[अथर्ववेद ११.१०.१]

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः । अस्य लोकः सुतावतः ।
द्युभिरहोभिरक्तुभिर्व्यक्तंयमो ददात्ववसानमस्मै ।।
[यजुर्वेद ३५.१]

प्रशस्य-प्रशस्तिः

जगदेव जी सिद्धान्ती*

कश्चिच्चौधरी जगदेवाभिधो मैट्रिकपरीक्षामुत्तीर्य निजपितरमनुहरमाण इंग्लैण्डजर्मनदेशयोः प्रथमे विश्वयुद्धे आङ्ग्लपक्षं कक्ष्यीकृत्य सेनां प्रविश्य वेदाध्ययनाय स्पृहयन्नन्तरेण संस्कृताध्ययनं वेदज्ञानस्यासम्भवतामाकलय्याष्टाध्यायीमहाभाष्यादीनि पुस्तकानि क्रेतुमजमेरनगरं धनादेशं प्राहिणोत्। तदा पुस्तकान्युपलभ्यर्ते गुरोः पुस्तकाध्ययने काठिन्यमनुभूय प्रत्यहमुपचीयमानां पदोन्नतिं तृणाय मन्यमानस्तद्वृत्तिं परिहृत्य गृहस्थसुखमप्यनादृत्य मटिण्डूगुरुकुलमध्युष्य विशारदपरीक्षायामधीत इति मटिण्डूगुरुकुलान्तेवासी बलवीरसिंह आम्रेडं मामश्रुश्रवत्। तत्कीर्तिं कर्णपुटाभ्यां निपीय तेन महोदयेन सञ्जिगमिषा मम मनस्यजरीजृम्भ्यत। मम भाग्योदयाल्लवपुरमधिवसन्नहं तच्छ्रवणरमणीयानि वचांसि श्रावं श्रावं रसमयं समयमयीयपम्। तद्दिनात् प्रभृति सरलतमे साधावस्मिन् नितरां श्रद्दधानो निजाध्यनमविगणय्य तदधिष्ठितं किरठलमहाविद्यालयमयासिषम्। तत्राधिवसता मया शास्त्रेष्वधीतो गुरुशिष्यस्नेहः साक्षादन्वभावि। बहुधा विद्यालयं व्यवतिष्ठापयिषोस्तस्य साधोर्जाग्रत एव रजन्यक्षणोरेव प्रभातायितेत्यज्ञायि।

महता श्रमेणैष त्यागमूर्ती रघुवीरसिंहप्रमुखानि भारतरत्नान्यजीजनत्। अद्यापि निजपुत्रीकृताय निजशिष्यावतंसाय चन्द्रमोहनशास्त्रिणे सर्वस्वमहासीत्। चन्द्रमोहनमपि स्वपितृनिर्विशेषं निजगुरुं सेवमानमक्षिलक्ष्यीकृत्यानिशं भृशममोदिष्यहम्।

गुणगौरवगुम्फितस्यास्य साधोर्विषये कथयतो मे वाग्विभवोऽवसितिं याति। कथमेष त्यागावतारो लोकसभासदस्यः सन्नपि लघिष्ठं कुटीरमधिवसतीति दर्शं दर्शं विशाखदत्तकवेरयं श्लोकः पण्डापथमधिरुह्य जगदेवमेनत् चाणक्यकोटिकं मानयितुं हठयति स्म—

> उपलशकलमेतद् भेदकं गोमयानां
> वटुभिरुपहृतानां बर्हिषां स्तोम एषः।
> शरणमपि समिद्भिः शुष्यमाणाभिराभि-
> र्विनमित- पटलान्तं दृश्यते जीर्णकुड्यम्।

इत्याचार्यरामशास्त्रिणः
श्रीजगदेवमहाभागाय सिद्धान्तिपदोपबृंहिताय
श्रद्धाप्रसूनाञ्जल्युपहारः।

---

* इयं प्रशस्तिः 'सिद्धान्ति-अभिनन्दनग्रन्थ' इत्याख्यरचनायां प्रकाशनाय प्रेषितचराऽऽसीत्।

श्री राजवैद्य ओम्प्रकाशः

कथं स शय्याकृतिमाप विष्णोः
शेषो ह्यवागच्छमहं त्विदानीम् ।
ह्रीणोऽसमर्थो गुणकीर्त्तने ते
हरिं निजं प्रावरणं करोति ॥

निरवद्यविद्याविद्योतमानायाऽऽयुर्वेदविद्वज्जननिकर-
निकषायमाणायाऽनूचानाय राजवैद्याय
कविराजाय मम शिष्यवंशावतंसाय
श्रीमत ओम्प्रकाशाय
आचार्यरामशास्त्रिणः
प्रेमपुष्पोपहारः ।

आशीराश्यम्भसा परिपूरितेन हृद्घटेनानिशमहर्निशमभिषिञ्चामि मलयज-वृक्षकं भवन्तम् । यदाश्रयेण कङ्कोलनिम्बकुटजादयः कटुतमाः कुजन्मानश्चन्दनी-भवन्ति । परद्रव्यं लोष्ठवद् वीक्षमाणा भूयिष्ठा जागतिका दृक्पथमवतरन्ति । परन्तु निजद्रव्यं लोष्ठाय मन्यमानो भवानिव कश्चिद् वैद्यो न श्रुतिपथमधिरूढः का कथा प्रत्यक्षस्य ? वैद्यविषये तु 'कथं दद्याद् यो मर्तुकामादपि हर्तुकामः' इत्याभाणकं सहासं भणन्ति लोकाः । एतादृशीं प्रसरन्तीं वैद्यापकीर्तिं स्वदानशीतलेन सलिलेन सलीलं प्राचीक्षलद् भवान् । मानवगुणवर्णनाय कल्पमानोऽपि मन्मतिविभवोऽतिमानवगुण-वर्णनाय परिसमाप्नोति । इत्थं मानवगुणातिशायिभिर्गुणप्रसूनैर्गुम्फितगौरवस्रजं शिशुमहं कञ्चित् कालमध्यापिपम् इति विविच्य मोमुद्यमानमानसस्समपत्सीति—

आचार्य रामशास्त्री वैद्यः ।

परिशिष्ट (१)

संख्यावाची शब्द

सुबन्तप्रकरण के अन्त में (पृष्ठ २०६ तथा २०७ पर) मैंने सङ्ख्यावाची शब्दों के विषय में थोड़ा सा समझाया था। एक से लेकर नवदश (=१९) तक के लिङ्गों तथा वचनों का विषय तुम समझ ही चुके हो। अब आगे के सङ्ख्या शब्दों को समझ लो। विंशतिः से लेकर नवनवतिः तक के शब्द नियत स्त्री-लिङ्ग हैं।[1] एकोनविंशतिः भी स्त्रीलिङ्ग है। विंशतिः, षष्टिः, सप्ततिः, अशीतिः और नवतिः इन शब्दों के रूप तथा इनके पूर्व सङ्ख्यावाची शब्द लगाने पर जो एकविंशतिः, द्विषष्टिः, त्रिसप्ततिः, चतुरशीतिः, पञ्चनवतिः आदि जो शब्द बनते हैं उनके रूप 'रुचिः' शब्द के समान चलेंगे। त्रिंशत्, चत्वारिंशत् और पञ्चाशत् तथा एकोनत्रिंशत्, एकत्रिंशत् द्विचत्वारिंशत्, त्रिपञ्चाशत् आदि शब्दों के रूप 'सरित्' शब्द के समान बनेंगे।

इन विंशतिः आदि और त्रिंशत् आदि शब्दों का दो प्रकार से प्रयोग होता है। एक शुद्ध सङ्ख्या शब्दों के रूप में और दूसरा सङ्ख्येयसङ्ख्या के रूप में। सङ्ख्या के वाच्य पदार्थ को सङ्ख्येय कहते हैं। उस सङ्ख्येय का विशेषण जो सङ्ख्याशब्द होता है, वह सङ्ख्येय सङ्ख्या कहलाता है। जब विंशति, त्रिंशत् आदि शब्द सङ्ख्येय-सङ्ख्या के रूप में प्रयुक्त होंगे सदा इनका एकवचनान्त प्रयोग ही होगा[2] और सङ्ख्येय-पदार्थवाची शब्द चाहे किसी भी लिङ्ग का हो विंशति, त्रिंशत् आदि शब्द स्त्रीलिङ्ग के रूप में ही प्रयुक्त होंगे। यथा—मयङ्कः विंशतिं पुरुषान् पश्यति (=मयङ्क बीस पुरुषों को देखता है)। नवोदिता पञ्चषष्ठिं द्राक्षाफलानि भक्षयति (=नवोदिता पैंसठ किशमिश खाती है)। अद्य अष्टाशीतौ विद्यालयेषु अवकाशो वर्तते (=आज अठासी स्कूलों में छुट्टी है)। त्रिंशते छात्रेभ्यो रामशास्त्री पुस्तकानि वितरति (=रामशास्त्री तीस छात्रों को पुस्तक बांटते हैं)। इत्यादि। किन्तु जब विंशतिः, त्रिंशत् आदि शब्द शुद्ध सङ्ख्याशब्दों के रूप में प्रयुक्त होंगे तो इनके द्विवचन और बहुवचन में भी प्रयोग होंगे।[3] यथा आनन्द प्रकाशः आम्राणां द्वे विंशती क्रीणाति (=आनन्द प्रकाश आमों की दो बीसियां खरीदता है)। इत्यादि।

---

१. विंशत्यादिरानवतेः (लिङ्गानु० स्त्री० १३)।

२. विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः (अमरकोष २.९.८३)।

३. सङ्ख्यार्थे द्वित्वबहुत्वे स्तः (अमरकोषे २.९.८३)।

शतम् (=सौ), सहस्रम् (=हजार) और लक्षम् (=लाख) ये तीनों शब्द प्रायः नपुंसकलिङ्ग है।[1] यथा—सुरेन्द्रः शतेन रूप्यकैः कम्बलमक्रीणात् (=सुरेन्द्र ने सौ रुपये में कम्बल खरीदा हैं)। जनको याज्ञवल्क्याय सहस्रं गाः प्रादात् (=जनक ने याज्ञवल्क्य को एक हजार गायें दीं)। विक्रमदेवः लक्षस्य ग्रामाणामधिपतिर्बभूव (विक्रमदेव एक लाख गांवों का स्वामी था)। सेनापतिः सहस्राभ्यां सैनिकैः शत्रौ प्रत्याक्रमणमकरोत् (=सेनापति ने दो हजार सैनिकों के साथ शत्रु पर प्रत्याक्रमण कर दिया)। भारते लक्षे गावः बहुक्षीराः सन्ति (=भारत में दो लाख गायें खूब दूध देने वाली हैं)।

अयुत (=दस हजार) शब्द और प्रयुत (=दस लाख) शब्द नपुंसकलिङ्ग हैं, पर कहीं कहीं पुंल्लिङ्ग के रूप में भी प्रयुक्त होते हैं[2]। कोटि (=करोड़) शब्द स्त्रीलिङ्ग है[3]। अर्बुद (=दस करोड़) शब्द पुंल्लिङ्ग है[4]। अब्ज (=एक अरब) शब्द नपुंसकलिङ्ग है। अरब के लिये न्यर्बुद (पंल्लिङ्ग) शब्द का भी प्रयोग होता है। खर्वं (=दस अरब) नपुंसकलिङ्ग है। शङ्कु (=एक नील अर्थात् दस लाख करोड़) शब्द पुंल्लिङ्ग है[5]। रामदुर्गे अयुतं जनाः सन्ति (=रामगढ़ में दस हजार मनुष्य रहते हैं) जयपुरेऽधुना प्रयुतं जनान् द्रष्टुं शक्नुथ (=जयपुर में इस समय दस लाख लोगों को देख सकते हो)। हरयाणाप्रदेशस्य कोटये जनेभ्यः शिक्षाव्यवस्था साधीयसि नास्ति (=हरयाणा प्रान्त में एक करोड़ मनुष्यों के लिये शिक्षाव्यवस्था अच्छी नहीं है) अयं विशालबन्धः अब्जेन रूप्यकैः निर्मास्यते (=यह बड़ा बांध एक अरब रुपयों में बनेगा)। भारतराष्ट्रं विश्वाधिकोषात् खर्वं रूप्यकाणि पर्युदञ्चिष्यति (=भारत देश विश्वबैंक से दस अरब रुपये उधार लेगा)। कृषिविभागो निखर्वं रूप्यकाणि अपेक्षते (=कृषि विभाग एक खरब रुपये चाहता है) शङ्कुं शङ्कु रूप्यकाणि अण्वायुधनिर्माणे व्ययीक्रियन्ते अमरीकादिराष्ट्रैः (=अमरीका आदि देश सम्भवतः अणु-हथियारों के निर्माण में एक नील रुपया खर्च करते हैं)।

---

१. शतादिः सङ्ख्या (लिङ्गानु० नपु० २९)

२. शतायुतप्रयुताः पुंसिच (लिङ्गानु० नपुं० ३०)

३. लक्षाकोटी स्त्रियाम् (लिङ्गानु० नपुं० ३१)। इसके अनुसार लक्ष शब्द भी स्त्रीलिङ्ग है, किन्तु व्यवहार में लक्ष शब्द नपुंसकलिङ्ग ही प्रयुक्त होता है।

४. कासमर्दोऽर्बुदः कुन्दः (अमरकोष, ३.५.१९)

५. अब्ज आदि शब्दों के विषय में संस्कृत-शब्दार्थ-कौस्तुभ' कोष देखिये।

१ एकम्
२ द्वे
३ त्रीणि
४ चत्वारि
५ पञ्च
६ षट्
७ सप्त
८ { अष्टौ / अष्ट }
९ नव
१० दश
११ एकादश
१२ द्वादश
१३ त्रयोदश
१४ चतुर्दश
१५ पञ्चदश
१६ षोडश
१७ सप्तदश
१८ अष्टादश
१९ { नवदश / एकोनविंशतिः }

२० विंशतिः
२१ एकविंशतिः
२२ द्वाविंशतिः
२३ त्रयोविंशतिः
२४ चतुर्विंशतिः
२५ पञ्चविंशतिः
२६ षड्विंशतिः
२७ सप्तविंशतिः
२८ अष्टाविंशतिः
२९ { नवविंशतिः / एकोनत्रिंशत् }
३० त्रिंशत्
३१ एकत्रिंशत्
३२ द्वात्रिंशत्
३३ त्रयस्त्रिंशत्
३४ चतुस्त्रिंशत्
३५ पञ्चत्रिंशत्
३६ षट्त्रिंशत्
३७ सप्तत्रिंशत्
३८ अष्टत्रिंशत्

३९ { नवत्रिंशत् / एकोनचत्वारिंशत् }
४० चत्वारिंशत्
४१ एकचत्वारिंशत्
४२ { द्विचत्वारिंशत् / द्वाचत्वारिंशत् }
४३ { त्रिचत्वारिंशत् / त्रयश्चत्वारिंशत् }
४४ चतुश्चत्वारिंशत्
४५ पञ्चचत्वारिंशत्
४६ षट्चत्वारिंशत्
४७ सप्तचत्वारिंशत्
४८ { अष्टाचत्वारिंशत् / अष्टचत्वारिंशत् }
४९ { नवचत्वारिंशत् / एकोनपञ्चाशत् }
५० पञ्चाशत्
५१ एकपञ्चाशत्
५२ { द्विपञ्चाशत् / द्वापञ्चाशत् }
५३ { त्रिपञ्चाशत् / त्रयःपञ्चाशत् }

५४ चतुःपञ्चाशत्
५५ पञ्चपञ्चाशत्
५६ षट्पञ्चाशत्
५७ सप्तपञ्चाशत्
५८ { अष्टपञ्चाशत् / अष्टापञ्चाशत् }
५९ { नवपञ्चाशत् / एकोनषष्टिः }
६० षष्टिः
६१ एकषष्टिः
६२ { द्विषष्टिः / द्वाषष्टिः }
६३ { त्रिषष्टिः / त्रयःषष्टिः }
६४ चतुःषष्टिः
६५ पञ्चषष्टिः
६६ षट्षष्टिः
६७ सप्तषष्टिः
६८ { अष्टषष्टिः / अष्टाषष्टिः }
६९ { नवषष्टिः / एकोनसप्ततिः }

७० सप्ततिः
७१ एकसप्ततिः
७२ द्विसप्ततिः / द्वासप्ततिः
७३ त्रिसप्ततिः / त्रयःसप्ततिः
७४ चतुःसप्ततिः
७५ पञ्चसप्ततिः
७६ षट्सप्ततिः
७७ सप्तसप्ततिः
७८ अष्टसप्ततिः / अष्टासप्ततिः

७९ नवसप्ततिः / एकोनाशीतिः
८० अशीतिः
८१ एकाशीतिः
८२ द्व्यशीतिः
८३ त्र्यशीतिः
८४ चतुरशीतिः
८५ पञ्चाशीतिः
८६ षडशीतिः
८७ सप्ताशीतिः
८८ अष्टाशीतिः
८९ नवाशीतिः / एकोननवतिः

९० नवतिः
९१ एकनवतिः
९२ द्विनवतिः / द्वानवतिः
९३ त्रिनवतिः / त्रयोनवतिः
९४ चतुर्णवतिः
९५ पञ्चनवतिः
९६ षण्णवतिः
९७ सप्तनवतिः
९८ अष्टनवतिः / अष्टानवतिः

९९ नवनवतिः / एकोनशतम्
१०० शतम्
१००० सहस्रम्
अयुतम् (दस हजार)
लक्षम् (एक लाख)
प्रयुतम् (दस लाख)
कोटिः (एक करोड़)
अर्बुदः (दस करोड़)
अब्जम् (एक अरब)
खर्वम् (दस अरब)
निखर्वम् (एक खरब)
शङ्कुः (एक नील)

पूरणप्रत्ययान्त-सङ्ख्या-शब्द

सङ्ख्यावाची शब्दों से पूरा करने अर्थ में जो प्रत्यय होते हैं उन्हें पूरण-प्रत्यय कहते हैं। पूरण-प्रत्यय मुख्य रूप से दो ही हैं— डट् और तीय। तीय प्रत्यय केवल 'द्वि' और 'त्रि' इन दो शब्दों से ही होता है[1]। द्वितीयः (द्वयोः पूरणः) —द्वि+तीय=द्वितीयः=दूसरा। स्त्रीलिङ्ग में द्वितीया=दूसरी। नपुं० में द्वितीयम् =दूसरा। त्रयाणां पूरणः→त्रि+तीय→तृ+तीय=तृतीयः=तीसरा। तृतीया[2]= तीसरी। तृतीयम्=तीसरा। चतुर्थः, पञ्चमः आदि समस्त अन्य पूरण-प्रत्यान्त शब्द वस्तुतः डट् प्रत्यय वाले हैं। सङ्ख्यावाची सब शब्दों (द्वि और त्रि को छोड़कर) से पूरण अर्थ में डट् (=अ) प्रत्यय होता है[3]। डट् के ड् और ट् की इत्सञ्ज्ञा होने पर अ शेष रहता है।

१. द्वेस्तीयः, त्रेः सम्प्रसारणञ्च (अष्टा. ५·२·५४,५५)
२. अजाद्यतष्टाप् (अष्टा. ४·१·४) से टाप् (=आ)।
३. तस्य पूरणे डट् (अष्टा. ५·२·४८)

यथा—एकदशानां पूरणः→एकादशन्+डट्→एकादशन्+अ→एकादश्[1]+अ =एकादशः (=ग्यारहवां)। इसी प्रकार द्वादशानां पूरणः→द्वादशन्+डट्→द्वादशन्+अ=द्वादश्+अ=द्वादशः (=बारहवां)। त्रयोदशः=तेहरवां। इसी प्रकार चतुर्दशः से नवदशः तक बनेंगे। स्त्रीलिङ्ग में एकादशी,[2] द्वादशी[2] आदि तथा नपुं० में एकादशम् आदि बनेंगे। पञ्चन्, सप्तन्, अष्टन्, नवन् और दशन् से जब डट् (=अ) होगा तो बीच में मट् (=म्) आगम हो जाता है।[3] पञ्चानां पूरणः→पञ्चन्+डट्→पञ्चन्+अ→पञ्चन्+म् अ→पञ्चमः[4] (पांचवां)। पञ्चानां पूरणी पञ्चमी (=पांचवीं)। पञ्चानांपूरणम् पञ्चमम् (=पांचवां)। इसी प्रकार सप्तमः[4], अष्टमः, नवमः, दशमः, सप्तमी,[2] दशमी[2] आदि। षट् (=षष्) और चतुर शब्दों से जो डट् होगा वहाँ मध्य में थुक् (=थ्) आगम होगा[5]। षण्णां पूरणः→षट्+डट्→षष्+अ→षष्+थुक्+अ→षष् थ अ→षष्ठः (=छठा)। षष्ठी[2] (=छठी)। षष्ठम् (=छठा)। चतुर्णां पूरणः→चतुर्+डट्→चतुर+अ→चतुर थुक्+अ→चतुर थ् अ→चतुर्थः (=चौथा)। चतुर्थी[2] (चौथी)। चतुर्थम् (=चौथा)।

षष्टि, सप्तति, अशीति, नवति, शत, सहस्र और लक्ष इन सङ्ख्याशब्दों से तथा इनसे बड़ी संख्या के वाचक शब्दों से जब डट् प्रत्यय होगा तो वहाँ बीच में सदा तमट् (=तम्) आगम आ जाता है[6]। षष्टेः पूरणः→षष्टि+डट्→षष्टि+अ→षष्टितमी[2] (=साठवीं) षष्टितमम् (=साठवां)। सप्ततेः पूरणः→सप्ततितमः। स्त्रियाम्→सप्ततितमी। नपुं०—सप्ततितमम्। अशीतेः पूरणः अशीतितमः इत्यादि। शतस्य पूरणी→शततमी (=सौवीं)। शततमः (पुं०)=सौवां सहस्रस्य पूरणम्→सहस्रतमम् (न०)=हजारवां। सहस्रतमी (स्त्री०)। सहस्रतमः पु०। इत्यादि।

एकोनविंशति से लेकर एकोनषष्टि तक के शब्दों से तथा एकषष्टि से नवनवति तक (षष्टि, सप्तति, अशीति तथा नवति को छोड़कर) के शब्दों से जब डट् प्रत्यय होता है तो मध्य में विकल्प से तमट् (=तम्) आगम होता है। एकोनविंशतेः पूरणः→एकोनविंशतितमः (=उन्नीसवां)। पक्ष में जब तमट् नहीं होगा तो विंशति

---

१. टेः (अष्टा. ६. ४. १४३) से टिकालोप
२. टिड्ढाणञ्० (अष्टा. ४.१.१५) से ङीप्।
३. नान्तादसङ्ख्यादेर्मट् (अष्टा. ५.२.४६)
४. वेद में पञ्चथः (=पांचवां), सप्तथः (=सातवां) आदि प्रयोग भी होते हैं [थट् च च्छन्दसि (अष्टा. ५.२.५०)]
५. षट्कतिकतिपयचतुरां थुक्। (अष्टा. ५.२.५१)
६. षष्ट्यादेश्चासङ्ख्यादेः, नित्यं शतादिमासार्ध······(अष्टा. ५.२.५८,५७)

के ति का लोप हो जायेगा'। एकोनविंश: (=उन्नीसवां [एकोनविंशति+डट्→ एकोनविंशति+अ=एकोनविंश+अ→एकोनविंश्+अ→एकोनविंश:। इसी प्रकार विंशते: पूरण: विंशतितम:, विंश: (-बीसवां) स्त्रियाम्—विंशतितमी, विंशी। नपुं—विंशतितमम्, विंशम्। एकषष्टे: पूरण: एकषष्टितम:, एकषष्ट:। एकषष्टितमी, एकषष्टी। एकषष्टितमम्, एकषष्टम्। आदि।

अभ्यास

१. कक्षा के तीसरे पांचवें, दसवें अठारवें छात्र को बुलाओ।
कक्षाया: तृतीयं पञ्चमं दशमं अष्टादशं च छात्रम् आह्वय।

२. कमलानगर की बीसवीं, इकतीसवीं और साठवीं गली में प्रकाश नहीं है।
कमलानगरस्य विंश्याम् (विंशतितम्याम्) एकत्रिंशत्तम्यां (एकत्रिंश्यां), षष्टितम्यां च वीथ्यां प्रकाशो न विद्यते।

३. अपनी सम्पत्ति का पचासवां भाग स्कूल को और सौवां भाग अनाथों को दूंगा।
मम सम्पद: पञ्चाशं (पञ्चाशत्तमम्) अंशं विद्यालयाय शततमं चांशं अनाथेभ्य: प्रदास्यामि।

४. सातवीं कक्षा के चौथे छात्र ने चौदहवीं के पच्चीसवें छात्र को भाषण प्रतियोगिता में हरा दिया।
सप्तम्या: कक्षाया: चतुर्थ: छात्र: चतुर्दश्या: पञ्चविंशं (पञ्चविंशतितमं) छात्रं भाषणप्रतियोगितायां पराजेष्ट।

५. अणु बाल के अग्रभाग के हजारवें भाग से भी सूक्ष्म होता है।
अणु: बालाग्रभागस्य सहस्रतमादप्यंशात्सूक्ष्मतमो भवति।

६. अस्सी फल चालीसवीं लड़की को और सौ पूरियां साठवें भिक्षुक को दे दो।
अशीतिं फलानि चत्वारिंश्यै बालिकायै शतं शष्कुलीश्च षष्टितमाय भिक्षुकाय यच्छ।

अब सुविधा के लिये पूरणप्रत्ययान्त शब्दों को क्रमश: तालिकाबद्ध कर देते हैं। ये पुंल्लिङ्ग रूप हैं। स्त्री॰ तथा नपुं॰ में पूर्वानुसार बना लो।

प्रथमः
द्वितीयः
तृतीयः
चतुर्थः
पञ्चमः
षष्ठः
सप्तमः
अष्टमः
नवमः
दशमः
एकादशः
द्वादशः
त्रयोदशः
चतुर्दशः
पञ्चदशः
षोडशः
सप्तदशः
अष्टादशः
नवदशः
एकोनविंशतितमः
एकोनविंशः
विंशतितमः
विंशः
एकविंशतितमः
एकविंशः

↓

नवविंशतितमः
नवविंशः
एकोनत्रिंशत्तमः
एकोनत्रिंशः
त्रिंशत्तमः
त्रिंशः
एकत्रिंशत्तमः
एकत्रिंशः

↓

नवत्रिंशत्तमः
नवत्रिंशः
एकोनचत्वारिंशत्तमः
एकोनचत्वारिंशः
चत्वारिंशत्तमः
चत्वारिंशः
एकचत्वारिंशत्तमः
एकचत्वारिंशः

↓

नवचत्वारिंशत्तमः
नवचत्वारिंशः
एकोनपञ्चाशत्तमः
एकोनपञ्चाशः
पञ्चाशत्तमः
पञ्चाशः

एकपञ्चाशत्तमः
एकपञ्चाशः

↓

नवपञ्चाशत्तमः
नवपञ्चाशः
एकोनषष्टितमः
एकोनषष्टः
षष्टितमः
एकषष्टितमः
एकषष्टः

↓

नवषष्टितमः
नवषष्टः
एकोनसप्ततितमः
एकोनसप्ततः
सप्ततितमः
एकसप्ततितमः
एकसप्ततः

↓

नवसप्ततितमः
नवसप्ततः
एकोनाशीतितमः
एकोनाशीतः
अशीतितमः

एकाशीतितमः
एकाशीतः

↓

नवाशीतितमः
नवाशीतः
एकोननवतितमः
एकोननवतः
नवतितमः
एकनवतितमः
एकनवतः

↓

नवनवतितमः
नवनवतः
एकोनशततमः
शततमः
एकशततमः
द्विशततमः
सहस्रतमः
लक्षतमः
कोटितमः
अब्जतमः
अर्बुदतमः
खर्वतमः
निखर्वतमः
शङ्कुतमः

परिशिष्ट (२)

नामधातु-प्रकरण

नाम अर्थात् सुबन्त शब्दों से जो धातुयें बनती हैं उन्हें नामधातु कहते हैं। इन्हें नाम प्रत्यय धातु भी कहते हैं क्योंकि नाम (=सुबन्त) शब्दों से कुछ विशिष्ट प्रत्ययों के लगने के बाद ही उनकी धातु सञ्ज्ञा होती है[१]। ऐसे प्रत्यय सात हैं—क्यच्, क्यङ्, क्यष्, काम्यच्, णिङ्, णिच् और क्विप्। इनके लगने पर किस अवस्था में किस सुबन्त शब्द से कैसे धातु बनती है सो समझ लो।

(i) कर्मकारक सुबन्त शब्द मात्र से अपने की इच्छा करने अर्थ में विकल्प से क्यच् (=य) प्रत्यय होता है[१]। आत्मनः पुत्रम् इच्छति→पुत्रीयति। पुत्र+अम्+क्यच्→पुत्र अम्+य। इस अवस्था में क्यच्प्रत्ययान्त शब्द की धातु सञ्ज्ञा होगी[२]। धातुसञ्ज्ञा के कारण मध्यगत सुप् (=अम् आदि प्रत्यय) का लुक्[३]→पुत्र+य→पुत्रीय[४]। पुत्रीय+लट्→पुत्रीय+तिप्। पुत्रीय शप् तिप्→पुत्रीय अ ति→पुत्रीयति (=अपने पुत्र को चाहता है)। इसके रूप अन्य धातुओं के समान चलेंगे—पुत्रीयति पुत्रीयतः, पुत्रीयन्ति। पुत्रीयसि, पुत्रीयथः पुत्रीयथ। पुत्रीयामि पुत्रीयावः पुत्रीयामः। लिट्—पुत्रीयाञ्चकार—पुत्रीयामास—पुत्रीयाम्बभूव। लुट्—पुत्रीयिता। लृट्—पुत्रीयिष्यति। लोट्—पुत्रीयतु। लङ्—अपुत्रीयत्। वि० लिङ्—पुत्रीयेत्। लुङ्→अपुत्रीयीत्। लृङ्—अपुत्रीयिष्यत्। धातुमात्र से होने वाले क्त्वा आदि कृत्प्रत्यय भी नामधातुओं से होते हैं। क्त्वा—पुत्रीयित्वा। तुमुन्—पुत्रीयितुम्। क्तवतु—पुत्रीयितवान्। क्त—पुत्रीयितम्। तृच्—पुत्रीयिता। यत्—पुत्रीय्यः[५]। इत्यादि। इन पुत्रीय आदि सभी नाम धातुओं से यङ्, णिच्, (सन्) आदि प्रत्यय भी होते हैं। इसी प्रकार—आत्मनः भवनम् इच्छति—भवनीयति। आत्मनः छात्रम् इच्छति छात्रीयति। इत्यादि। समस्त सुबन्तों से इसी प्रकार धातुरूप बन सकते हैं।

(ii) इसी प्रकार, कर्मकारक सुबन्त शब्द से अपने की इच्छा करने के अर्थ

---

१. सुप आत्मनः क्यच् (अष्टा० ३.१.८)

२. सनाद्यन्ता धातवः (अष्टा० ३.१.३२)

३. सुपो धातुप्रातिपदिकयोः (अष्टा० २.४.७१)

४. क्यचि च (अष्टा० ७.४.३३) से अकार को ईकारादेश।

५. पुत्रीय धातु अजन्त है अतः 'अचो यत्' (अष्टा० ३.१.९७) से यत् प्रत्यय हुआ।

में विकल्प से काम्यच् प्रत्यय होता है[1]। आत्मनः पुत्रम् इच्छति→पुत्रकाम्यति। पुत्र+अम्+काम्यच् पुत्र+अम्+काम्य→पुत्रकाम्य। पुत्रकाम्य+लट्। पुत्रकाम्य+पुत्रकाम्य+शप्+तिप्→पुत्रकाम्यति (=अपने पुत्र को चाहता है)। पुत्रकाम्याञ्चकार। पुत्रकामिता[2]। पुत्रकामिष्यति[2]। पुत्रकाम्यतु। अपुत्रकाम्यत्। पुत्रकाम्येत्। अपुत्रकामीत्[2]। अपुत्रकामिष्यत्॥ पुत्रकामित्वा[2]। पुत्रकामितुम्[2] आदि।

(iii) उपमान रूपी कर्मकारक सुबन्त शब्द से आचरण करने के अर्थ में विकल्प से क्यच् (=य) प्रत्यय होता है[3]। पुत्रम् इव आचरति पुत्रीयति छात्रम् (=छात्र के साथ पुत्र के समान आचरण करता है)। छात्रमिवाचरति छात्रीयति पुत्रम् (=पुत्र के साथ छात्र के समान आचरण करता है)। इसी प्रकार—क्षीरीयति जलम्। (=जल को दूध के समान काम में लेता है)। इत्यादि।

(iv) उपमानरूपी अधिकरणकारक सुबन्त शब्द से भी आचरण अर्थ में क्यच् (=य) प्रत्यय होता है[4]। प्रासादे इवाचरति प्रासादीयति कुट्याम् (=कुटी में महल में रहने के समान रहता है)। नगरीयति ग्रामे। पर्यङ्कीयति खट्वायाम्। इत्यादि॥

(v) उपमानभूत कर्तृकारक सुबन्त शब्द से आचरण अर्थ में विकल्प से क्यङ् (=य) प्रत्यय होता है[5]। यदि किसी सकारान्त शब्द से क्यङ् होगा तो उस शब्द के अन्तिम सरकार का लोप भी हो जाता है[5]। पण्डितः इव आचरति पण्डितायते[6] (=पण्डित के समान आचरण करता है)। पण्डितायाञ्चक्रे। पण्डितायिता पण्डितायिष्यते। पण्डितायताम्। अपण्डितायत। पण्डितायेत। अपण्डितायिष्ट। अपण्डितायिष्यत॥ इत्यादि। श्येन इव आचरति श्येनायते। गृहस्थ इवाचरति गृहस्थायते अप्सराः इव आचरति अप्सरायते (अप्सरस्+सु+क्यङ्→अप्सरस्+य→अप्सर[5]+य→अप्सराय+लट्→अप्सरायते (=अप्सरा के समान आचरण करती है)।

(vi) उपमानरूपी कर्तृकारक सुबन्त मात्र से आचरण अर्थ में विकल्प से

---

१. काम्यच्च (अष्टा० ३.१.९)।

२. यस्य हलः (अष्टा० ६.४.४९) से यकार का लोप।

३. उपमानादाचारे (अष्टा० ३.१.१०)।

४. अधिकरणाच्चेति वक्तव्यम् [वा०] (अष्टा० ३.१.१०)

५. कर्त्तुः क्यङ् सलोपश्च (अष्टा० ३.१.११)

६. क्यङ् प्रत्यय के ङित् होने से तदन्त 'पण्डिताय' आदि धातुओं से (अनुदात्तङित० १.३.१२ आत्मनेपद होता है।

क्विप् प्रत्यय भी होता है[1] अश्व इवाचरति→अश्वति (=अश्व के समान आचरण करता है) [अश्व सु क्विप्→अश्व सुव्। अश्व सु। अश्व। अश्व लट्→अश्व शप् तिप्→अश्व अ ति। अश्वति[2]। अश्वाञ्चकार। अश्विता। अश्विष्यति। अश्वतु। आश्वत्। अश्वेत्। आश्वीत्। आश्विष्यत्। आदि। पक्ष में—क्यङ् प्रत्यय होने पर अश्वायते आदि। (पण्डित इवाचरति पण्डितति। कविरिवाचरति कवयति। गुरुरिवाचरति गुरवति। पितेवाचरति पितरति। शास्त्रीवाचरति शास्त्रिणति। गौरिवाचरति गवति। इत्यादि। इन्ही शब्दों से क्यङ् करने पर कवीयते। गुरूयते। पित्रीयते। शास्त्रिण्यते। गव्यते। आदि बनेंगे।

ये उपर्युक्त प्रत्यय इन उपर्युक्त अर्थों में प्रायः समस्त शब्दों से होते हैं। अब कुछ विशिष्ट शब्दों से होने वाले प्रत्यय और तदन्त धातुरूपों के विषय में समझाते हैं।

(vii) भृश आदि कुछ कर्तृकारक सुबन्त शब्दों से अभूततद्भाव अर्थ में (=जो जैसा नहीं है उसके वैसा होने के अर्थ में) क्यङ् प्रत्यय होता है, किन्तु भृश आदि शब्द च्विप्रत्ययान्त न हों[3]। इन भृश आदि शब्दों में से जो शश्वत्, उन्मनस् आदि हलन्त शब्द हैं उनके अन्तिम हल् का लोप भी हो जाता है[3]। अभृशो भृशो भवति भृशायते (=जो बहुत नहीं है वह बहुत होता है) अचपलश्चपलो भवति चपलायते। अशश्वत् शश्वद् भवति शश्वायते। अनुन्मना उन्मना भवति उन्मनायते। आदि।

(viii) लोहित आदि कुछ शब्दों से और डाच् प्रत्ययान्त शब्दों से अभूततद्भाव अर्थ में क्यष् (=य) प्रत्यय होता है[4]। अलोहितो लोहितो भवति लोहितायति, लोहितायते[5]। आदि।

(ix) कर्मकारक रोमन्थ शब्द से जुगाली करने के अर्थ में तथा कर्मकारक तपस् शब्द से [तपस्या] करने के अर्थ में क्यङ् प्रत्यय होता है[1]। रोमन्थं वर्त्तयति रोमन्थायते गौः (=गाय जुगाली करती है)। तपश्चरति तपस्यति[2] (=तपस्या करता है)।

(x) कर्मकारक सुबन्त बाष्प, उष्मन् और फेन इन शब्दों से उद्वमन

---

१. सर्वप्रातिपदिकेभ्य इत्येके [वा०] (अष्टा० ३.१.११)।

२. अतो गुणे (अष्टा० ६.१.) से पररूपैकादेश।

३. भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः (अष्टा० ३.१.१२)।

४. लोहितादिडाज्भ्यः क्यष् (अष्टा० ३.१.१३)

५. वा क्यषः (अष्टा० १.३.९०) से विकल्प से आत्मने पद।

(=उगलना) अर्थ में क्यङ् प्रत्यय होता है[३]। वाष्पम् उद्वमति→वाष्पायते (=भाप को उगलता है)। उष्माणम् उद्वमति उष्मायते। फेनम् उद्वमति→फेनायते।

(xi) कर्मकारक सुबन्त शब्द, वैर, कलह, अभ्र, कण्व, मेघ, सुदिन, दुर्दिन, नीहार, अटा, अट्टा, शीका, कोटा, पोटा, सोटा और कष्टा शब्दों से 'करण' अर्थ में (=करना, सम्पादन करना, निर्माण करना आदि अर्थों में) क्यङ् प्रत्यय होता है[४]। शब्दं करोति→शब्दायते। वैरं करोति→वैरायते। कलहायते। अभ्रायते। कण्वायते। (=पाप करता है) मेघायते।। सुदिनं करोति→सुदिनायते। दुर्दिनायते। निहारायते।। अटाम् (=भ्रमणम्) करोति अटायते। अट्टाम् (=अतिक्रमणम्) करोति अट्टायते। शीकायते। इत्यादि।

(xii) कर्मकारक सुबन्त सुख आदि कुछ शब्दों से कर्त्ता सम्बन्धी अनुभव अर्थ में क्यङ् होता है[५]। सुखं वेदयते→सुखायते (=सुख का अनुभव करता है)। दुःखायते। आदि।

(xiii) नमस् शब्द से पूजा करने के अर्थ में, वरिवस् शब्द से परिचर्या करने के अर्थ में और चित्रङ् (=चित्र) शब्द से आश्चर्य करने के अर्थ में क्यच् (=य) प्रत्यय होता है[६]। नमस् करोति→नमस्यति विदुषः। वरिवस्करोति→वरिवस्यति गुरून्। चित्रं करोति→चित्रीयते[७] (=आश्चर्य करता है)।

(xiii) कर्मकारक सुबन्त पुच्छ, शब्द से ऊपर उठाने के या चारों ओर घुमाने के अर्थ में, भाण्ड शब्द से इकट्ठा करने के अर्थ में और चीवर शब्द से धारण करने के अर्थ में णिङ् प्रत्यय होता है[८]। पुच्छम् उदस्यति→उत्पुच्छयते (उत्+पुच्छ+अम्+णिङ्→उत्+पुच्छ+इ→उत्पुच्छि→उत्पुच्छि+लट्→उत्पुच्छि+शप्+

---

१. कर्मणो रोमन्थतपोभ्या वर्त्तिचरोः (अष्टा० ३.१.१५)
२. तपसः परस्मैपद च [वा०] अष्टा० ३.१.१५) से परस्मैपद।
३. वाष्पोष्मभ्यामुद्वमने (अष्टा० ३.१.१६); फेनाच्चेति वक्तव्यम् [वा०]।
४. शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे (अष्टा० ३.१.१७); सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् [वा०], अटाट्टाशीकाकोटापोटासोटाकष्टाग्रहणं कर्त्तव्यम् [वा०]।
५. सुखादिभ्यः कर्त्तृवेदनायाम् (अष्टा० ३.१.१८)।
६. नमोवरिवश्चित्रङः क्यच् (अष्टा० ३.१.१९)।
७. चित्र के ङित् होने के कारण (अनुदत्ताङित० १.३.१२) आत्मनेपद।
८. पुच्छभाण्डचीवराण्णिङ् (३.१.२०); पुच्छादुदसने पर्यसने वा; भाण्डात् समाचयने; चीवरादर्जने परिधाने वा [वा.]

त→उत्पुच्छयते (=पूंछ को ऊपर उठाता है)। परिपुच्छयते। भाण्डान् समाचिनोति→सम्भाण्डयते (=बरतन इकट्ठे करता है) चीवरं परिधत्ते→सञ्चीवरयते।

(xiv) मुण्ड, मिश्र, श्लक्षण और लवण इन कर्मकारक सुबन्त शब्दों से सामान्य करण (=करना, बनाना) अर्थ में तथा व्रत, वस्त्र, हलि; कलि, कृत और तूस्त इन शब्दों से विशिष्ट करण अर्थों में (=भिन्न भिन्न अर्थों में) णिच् प्रत्यय होता है[1]।

मुण्डं करोति→मुण्डयति (=मुण्डित करता है)। मिश्रं करोति→मिश्रयति। श्लक्ष्णं करोति→श्लक्ष्णयति। लवणं करोति लवणयति। व्रतं करोति→व्रतयति पयः (=केवल दूध ही भोजन के रूप में लेता है)। व्रतं करोति→व्रतयति वृषलान्नम् (=गन्दे व्यक्ति का भोजन ग्रहण नहीं करता है)। वस्त्राणि समाच्छादयति→संवस्त्रयति। हलिं गृह्णाति हलयति→हलि→हल[3]+णिच्→हल+इ→हल्+इ→हलि→हलि+लट्→हलि+शप्+तिप्→हलि+अ+ति - हलयति। (=हल चलाता है)। कलिं गृह्णाति→कलयति (=बाण को ग्रहण करता है) कृतं गृह्णाति→कृतयति (=फल को ग्रहण करता है)। तूस्तानि विहन्ति→वितूस्तयति केशान्→(=केशों को सुलझाता है)।

(xv) सत्य, अर्थ; वेद, पाश रूप, वीणा, तूल, श्लोक, सेना, लोमन्, त्वच, वर्मन् वर्ण और चूर्ण इन सुबन्त शब्दों से विभिन्न अर्थों में णिच् प्रत्यय होता है[4]। सत्य, अर्थ और वेद इन प्रातिपदिकों को आपुक् (=आप्) आगम भी होता है[4]। विधानसामर्थ्य से टि भाग का लोप नहीं होता है।

सत्यम् आचष्टे→सत्यापयति (=सत्य बताता है)। अर्थम् आचष्टे→अर्थापयति (=अर्थ बताता है) वेदमाचष्टे→वेदापयति (वेद पढ़ाता है)। पाशाद् विमुञ्चति→विपाशयति (=बन्धन से मुक्त करता है)। रूपयति (=दिखाता है)। उपवीणयति (=वीणा के साथ गाता है)। अनुतूलयति (=रूई से कुरेदता है=

---

१. 'णाविष्ठवत्प्रातिपदिकस्य' [वा० अष्टा० ६-४.१५५] से णि परे रहने पर भी प्रातिपदिक को इष्ठपरवत् कार्य का विधान और 'टेः' (अष्टा० ६.४.१५५) से टिका लोप।

२. मुण्डमिश्रश्लक्षणलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् (अष्टा० ३.१.२१)

३. सूत्र में 'हल' अदन्त निपातन किया है जिससे लुङ् में 'अनग्लोपे' प्रतिषेध से सन्वद्भाव का अभाव रहता है और 'अजहलत्' आदि रूप बनते हैं।

४. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (अष्टा० ३.१.२५); अर्थवेदसत्यानामापुग्वक्तव्यः [वा०]

कान का मल निकालता है)। उपश्लोकयति (=श्लोकों से स्तुति करता है)। अभिषेणयति (=सेना के साथ चढ़ाई करता है) [अभि+सेना+टा+णिच्→ अभि+सेना+इ→अभि+सेन्+इ→अभिषेणि→अभिषेणि+लट्→ अभिषेणि+ शप्+तिप्→अभिषेणयति]। अनुलोमयति (=रोओं को साफ करता है) त्वच-यति[1] (=त्वचा अर्थात् छाल को पकड़ता है)। संवर्मयति (=कवच सहित तैयार होता है)। वर्णयति (=रंग पकड़ता है)। अवचूर्णयति ।। धूल फेंकता है।

(xvi) कर्मकारक सुबन्त से करता है इस अर्थ में तथा 'कहता है' इस अर्थ में णिच् (=इ) प्रत्यय होता है[2]। सूत्रं करोति सूत्रयति (=सूत्र बनाता है)। कटं करोति→कटयति (=चटाई बनाता है)। पुरुषमाचष्टे→पुरुषयति (=पुरुष का वर्णनकरता है)। पटुमाचष्टे→पटयति (=पटु [=चतुर] को कहता है) लघु-माचष्टे→लघयति।

(xvii) कृत्प्रत्ययान्त आख्यानवाची कर्मकारक सुबन्त से 'वर्णन करता है' इस अर्थ में णिच् (=इ) प्रत्यय होता है और तब कृत्प्रत्यय का लुक् हो जाता है, प्रकृति अपने मूल धातुरूप में आती है और कारक प्रकृतिवत् हो जाता है[3]। कंसवधम् आचष्टे→कंसं घातयति (कंसवध की घटना का वर्णन करता है='कंसवध' आख्यान को कहता है) [कंसवध+अम्+णिच्→कंसवध+इ→वध्+इ→हम्+इ→हत्+ इ→घात्+इ→घाति→घाति+लट्→घातयति]। बलिबन्धम् आचष्टे→बलिं बन्धयति (=बलि राजा को बांधने की घटना का वर्णन करता है)। इत्यादि।

अभ्यास

१. ये पति पत्नी अपने पुत्र को चाहते हैं।
   इमौ दम्पती पुत्रीयत (पुत्रकाम्यतः)।
२. अपने पुत्र की कामना करने वाला यह मनुष्य अब अपने मकान की कामना करता है।
   पुत्रीयिताऽयं जनोऽधुना भवनीयति (भवनकाम्यति)।
३. इस स्कूल के शिक्षक छात्रों से पुत्रों के समान व्यवहार करते हैं।
   अस्य विद्यालयस्य शिक्षकाः पुत्रीयन्ति छात्रान्।
४. पढ़े लिखे माता पिता पुत्रों के साथ छात्रों के समान आचरण करते हैं।
   शिक्षितौ पितरौ छात्रीयतः पुत्रान्।

---

१. सूत्र में 'त्वच' अदन्त निपातन करने से स्थानिवद्भाव के कारण टिलोप नहीं हुआ।
२. तत्करोति तदाचष्टे (धातुसूत्र, चुरादि०)
३. आख्यानात्कृतस्तदाचष्टे इति णिच् कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम् [वा०] अष्टा० ३.१.२६.

५. मारवाड़ में लोग जल को दूध के समान काम में लाते हैं।
मरुभूमौ क्षीरीयन्ति जलं जनाः।

६. महामति चाणक्य कुटिया में भी महल में रहने के समान आचरण करता था।
महामतिश्चाणक्यः कुट्यामप्यप्रासादयत् (=प्रासादयाञ्चकार)।

७. इस आर्यसमाज के सभी सदस्य पण्डितों सा आचरण करते हैं।
अस्य आर्य समाजस्य समेऽपि सभ्याः पण्डितायन्ते (पण्डितन्ति)।

८. रमेश गुरु के समान आचरण करता है और मनीषी कवि के समान आचरण करता है।
रमेशो गुरवति (गुरुयते) मनीषी च कवयति (कवीयते)।

९. जो पिता के समान आचरण करे उसे ही संरक्षक बनाओ।
यः पितरेत् (पित्रीयेत) तमेव संरक्षकं कुरुथ।

१०. ये हलवाहे भी शास्त्रियों का सा आचरण करते हैं।
एते हलिनोऽपि शास्त्रिणन्ति (शास्त्रिण्यन्ते)।

११. कभी कभी अस्थायी रीतियां भी सनातन बन जाती हैं।
कदाचिद् अस्थायिन्यो रीतयोऽपि शश्वायन्ते।

१२. रामशास्त्री जी की दवाई खाकर ये आलसी बच्चे भी चंचल बन जायेंगे।
रामशास्त्रिमहाभागस्य भेषजम्भुक्त्वाऽलसा अप्येते बालाश्चपलायिष्यन्ते।

१३. जुगाली करती हुई गौएँ देखने योग्य हैं।
रोमन्थायमाणा गावो दर्शनार्हाः खलु।

१४. तपस्या करते हुए मुनि को देखकर महिलाओं ने प्रणाम किया।
तपस्यन्तम्मुनिमवलोक्य प्रणेमुर्योषितस्तम्।

१५. उपनयन के दिन नापित ने उदयन को मुण्डित कर दिया।
उपनयनदिवसे दिवाकीर्त्तिरुदयनममुमुण्डत्।

१६. यह प्रवक्ता उसके लेख को सत्य बताता है।
अयम्प्रवक्ता तल्लेखं सत्यापयति।

१७. पाणिनि ने सूत्र बनाये और कात्यायन ने वार्त्तिक बनाये।
पाणिनिः असूत्रयत् (=असुसूत्रत्) कात्यायनश्चावार्त्तिकयत् (अववार्त्तिकत्)।

१८. शास्त्री जी पुत्र को पटु कहते हैं और सुमित्रा उसे लघु कहती है।
शास्त्रिमहोदयः पुत्रम्पटयति सुमित्रा च तं लघयति।

१९. आज सभागृह में पण्डित जी कंसवध का आख्यान सुनायेंगे।
अद्य सभागारे पण्डितवर्यः कंसं घातयिष्यति।

२०. श्रुतिधर ने पहिले दिन केवल दूध का व्रत किया।
श्रुतिधरः पूर्वदिवसे पयोऽव्रतयत् (अवव्रतत्)।

धातु-वर्णानुक्रमसूची

धातु	पृष्ठाङ्क	धातु	पृष्ठाङ्क	धातु	पृष्ठाङ्क	धातु	पृष्ठाङ्क
भिद्	१५१	यज्	७५	विज्	१४४	सेव्	६५
भी	१०६	यत्	५८	विद्	९०	स्खल्	५३
भुज्	१५६	याच्	८३	विश्	१४३	स्था	२९
भू	२२	युज्	१५४	वृत्	६०	स्ना	१००
भृ	११३	रक्ष्	५१	वृध्	६१	स्निह्	१२९
भ्रम्	४४	रच	१८९	शक्	१३६	स्पृश्	१४२
मन्	१३४	रम्	६८	शङ्क्	५९	स्पृह	१९१
मन्त्र्	१८२	रुच्	६३	शप्	७८	स्मृ	३८
मन्थ्	१६९	रुद्	९२	शम्	१३०	स्वद्	१८३
मस्ज्	१४०	रुध्	१५०	शास्	९७	स्वप्	९४
मा	९८	लभ्	७०	शीङ्	१०४	हन्	८८
मार्ग्	१८४	लिख्	१३९	शुच्	४९	हस्	५४
मिल	१४७	लष्	८५	श्रु	३९	हा	१११
मुच्	१४८	लू	१६६	श्लिष्	१२१	हृ	८२
मुद्	५७	वद्	३५	सिच्	१४९	हृष्	१३१
मुष्	१७१	वप्	७९	सिध्	१२३	ह्वेञ्	८६
मुह्	१२८	वस्	५१	सिव्	११७		
मृ	१४४	वह्	७६	सू	१०५		

शिक्षक निधि

"तू मुझे कुछ मत कहना"

यह वाक्य आप इतनी विधियों से बना सकते हैं ।

त्वम् माम् मा गादीः, मा गदीः, मा स्म गदः ।

वाच्यपरिवर्तन —त्वया अहम् मा गदिषि, मा स्म गद्ये ।

कहीं-कहीं मा के योग में लोट्, विधिलिङ् का प्रयोग होता है। उसका समाधान वैयाकरण इस प्रकार करते हैं। पाणिनि ने माङि लुङ् (अष्टा० ३.३.१७५) सूत्र लिखा है। इस प्रकार माङ् के योग में लुङ् होगा, और मा अव्यय के योग में लोट् विधिलिङ् भी आ जाता है। तब वाक्य इस प्रकार बनेगा ।

त्वम् माम् मा गद, मा गदेः ।

कर्मवाच्य— त्वया अहम् मा गद्यै, मा गद्येय ।

तव्य-अनीयर-यत् में —त्वया अहम् न गादितव्यः, न गदनीयः, न गद्यः ।

क्त्वा के साथ अलम् या खलु—जोड़ने से भी निषेध अर्थ होता है ।

अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा ।

(अष्टा० ३.४.१८)

तब वाक्य ऐसे बनेगा—

अलं गदित्वा माम् ।

खलु गदित्वा माम् ।।

ल्युट् के कर्ता कर्म में षष्ठी होती है। (ये पहले हम बता चुके हैं)।

अलं को तृतीया के साथ प्रयुक्त करने पर भी निषेधार्थ हो जाता है ।

यथा—अलं मम किञ्चित् गदनेन ।

कृतं (अव्यय) भी आ जाता है—

कृतं मम किञ्चित् गदनेन ।

संस्कृत और भारतीय संस्कृति पर प्रत्येक भारतीय को गर्व करना चाहिये, संस्कृत में भारत की आत्मा बसती है। संस्कृत शिक्षण सरणी से संस्कृत सीखने वालों को आसानी होगी, इस कार्य के लिये मैं आचार्य राम शास्त्री जी को बधाई देती हूँ।

इन्दिरा गांधी

21-1-1983